UNIVERSAL LIBRARY
OU_184233
UNIVERSAL LIBRARY

OUP—24—4-4-69—5,000

OSMANIA UNIVERSITY LIBRARY

ll No. S294·4 A51P Accession No. S1607

thor अमितगत्याचार्य

e पंचसंग्रह 1927.

This book should be returned on or before the date last marked below.

माणिकचन्द्र-दिगम्बर-जैन-ग्रन्थमालायाः

पञ्चविंशतितमो ग्रन्थः ।

श्रीमदमितगत्याचार्यप्रणीतः ।

पंचसंग्रहः ।

साहित्यरत्न-पण्डित-दरबारीलालन्यायतीर्थेण

संशोधितः ।

प्रकाशिका—

श्रीमाणिकचन्द्रदिगम्बरजैनग्रन्थमालासमितिः ।

आश्विन, वीरनिर्वाण सं० २४५२ ।

प्रथमावृत्तिः] *** [अक्टूम्बर १९२७

मूल्यं त्रयोदशाणकाः ।

प्रकाशक

नाथूराम प्रेमी,

मन्त्री,-श्रीमाणिकचन्द-दिगम्बर-

जैनग्रन्थमालासमिति ।

हीराबाग, पो० गिरगांव-बम्बई ।

मुद्रक

विनायक बाळकृष्ण परांजपे,

नेटिव ओपिनियन प्रेस,

आंग्रेवाडी, गिरगांव-बम्बई ।

विषयसूची ।

विषयाः ।	पृष्ठसंख्या ।
प्रथमः परिच्छेदः ।	
सामान्यजीवसंख्या	१
गुणस्थानानाम् स्वरूपम्	२
गुणस्थानेषु जीवसंख्या	८
जीवसमासप्ररूपणा	१३
प्राणप्ररूपणा	१९
पर्याप्तिप्ररूपणा	१९
मार्गणाप्ररूपणा	१९
गतिमार्गणा	२०
इन्द्रियमार्गणा	२१
कायमार्गणा	२१
योगमार्गणा	२३
वेदमार्गणा	२५
कषायमार्गणा	२६
ज्ञानमार्गणा	२७
संयममार्गणा	३०
दर्शनमार्गणा	३१
लेश्यामार्गणा	३२
भव्यमार्गणा	३६
सम्यक्त्वमार्गणा	३६
संज्ञामार्गणा	४४
आहारमार्गणा	४५
उपयोगप्ररूपणा	४५

विषयाः ।	पृष्ठसंख्या ।
द्वितीयः परिच्छेदः ।	
प्रकृतिस्तवः	४८
तृतीयः परिच्छेदः ।	
कर्मप्रकृतिबन्धस्तवः	५३
बन्धादिनिरूपणम्	५४
गुणस्थानेषूत्तरप्रकृतिबन्धः	५६
गुणस्थानेषूत्तरप्रकृत्युदयः	५९
गुणस्थानेषूत्तरप्रकृतिसत्वम्	६३
प्रश्नचूलिका	६७
चतुर्थः परिच्छेदः ।	
मार्गणासु जीवसमासाः	७३
मार्गणासु गुणस्थानानि	७५
मार्गणासूपयोगाः	७७
मार्गणासु योगाः	७९
जीवसमासेषूपयोगाः	८१
जीवस्थानेषु योगाः	८१
गुणस्थानेषूपयोगाः	८२
गुणस्थानेषु योगाः	८२
बन्धप्रत्ययाः	८३
मार्गणायाम् बन्धप्रत्ययाः	८६
गुणस्थानेषु बन्धप्रत्ययाः	८८
अष्टकर्मबन्धः	११२
बन्धोदयोदीरणाः	११३

विषयाः ।		पृष्टसंख्या ।
स्थानबन्धः (भुजाकारादयः)		११७
प्रकृतिबन्धः		१२८
स्थितिबन्धः		१३०
अनुभागबन्धः		१३९
प्रदेशबन्धः		१४६
पञ्चमः परिच्छेदः ।		
प्रकृतिस्थानानि		१४९
ज्ञानान्तराययोः बंधादित्रिभंगी		१५०
दर्शनावरणस्य	,,	१५१
गोत्रस्य	,,	१५२
वेद्यस्य	,,	१५३
आयुषः	,,	१५४
मोहनीयस्य	,,	१५५
नामकर्मणः	,,	१६१
जीवस्थानेषु	,,	१९०
गुणस्थानेषु	,,	१९६
ज्ञानावरणान्तराययोःस्थानभंगः		१९६
दर्शनावरणस्य	,,	१९६
वेदनीयस्य	,,	१९७
आयुषः	,,	१९८
गोत्रस्य	,,	२००
मोहनीयस्य	,,	२०१
(योगगुणिताः)		२०६
(उपयोगगुणिताः)		२०९
(लेश्यागुणिताः)		२१०
(वेदगुणिताः)		२११
नामकर्मणः स्थानभंगाः		२१५
मार्गणायाम् बंधादित्रिभंगी		२१८
ग्रन्थकर्तुः प्रशस्तिः		२३८

अमितगतिः ।

विद्वच्छिरोमणिरयम्महानुभावः परमारवंशावतंश–महाराजमुञ्जस्यराज्येऽभूदिति तत्प्रशस्त्या ज्ञायते । महाराजमुञ्जः षट्त्रिंशदधिकसहस्राब्दपूर्वाद्दृष्टसप्तत्यधिकसहस्राब्दपर्यन्तं राज्यञ्चकार तथाहि–

> त्रिक्रमाद्वासरादष्ट मुनिव्योमेन्दुसंमिते ।
> वर्षे मुञ्जपदे भोजभूपः पट्टे निवेशितः ॥

मुञ्जस्यराज्याभिषेकः कदा बभूवेति न ज्ञायते किन्तु तस्य षट्त्रिंशदधिक सहस्राब्दे लिखितमेकं दानपत्रं प्राप्तमस्ति तेन ज्ञायते यत्तत्पूर्वं तस्य राज्याभिषेको बभूव ।

महात्मनाऽमितगतिना पञ्चाशदधिकसहस्राब्दे (१०५०) सुभाषितरत्नसंदोहः रचितः । धर्मपरीक्षा च सप्तत्यधिकसहस्राब्दे (१०७०), पश्चाच्चायम्पञ्चसंग्रहः त्रिसप्तत्याधिकसहस्राब्दे (१०७३) निर्मितः । तथाहि पञ्चसंग्रहप्रशस्तौ–

> त्रिसप्तत्याधिकेब्दानां सहस्रे शकविद्विषः । (विक्रमस्य)
> मसूतिकापुरे जातमिदं शास्त्रम्मनोहरम् ॥

ग्रन्थरचना समयैरनुमीयते यत्कवेर्जन्म विक्रमस्यैकादश शताब्द्याः प्रथमपादान्तेऽभूत् (१०२५) परन्त्विदं वक्तुं नशक्नोमि यत्कविः कदा स्वर्जगाम ।

ग्रन्थकारेण स्वप्रशस्तौ गुरुपरम्परादेरपिनिर्देशः कृतस्तेन ज्ञायते यदयम्महानुभावः माथुरसंघमलञ्चकार ।

दिगम्बरजैनसमाजेऽर्हद्वलिकृताः सिंहसंदिसेनदेवाख्याः चत्वारः संघाः आसन् । अमी चत्वारोऽपि मूलसंघस्यशाखास्वरूपाः बभूवुः । ज्ञायतेऽनेन यन्माथुरसंघोनास्ति मूलसंघशाखास्वरूपः, अतः जैनाभासेष्वन्वेषे । नीतिसारे गोपुच्छिकादयः (काष्ठासंघादयः) पञ्चजैनाभासाः उक्ताः । तथाहि–

गोपुच्छिकः श्वेतवासा द्राविडो यापनीयकः ।
निःपिच्छश्चेति पञ्चैते जैनाभासाः प्रकीर्तिताः ॥ १० ॥

तत्र च काष्ठासंघापरनामधेये गोपुच्छके माथुरगच्छ आसीदिति सुरेन्द्रकीर्त्याचार्यनिर्मितपट्टावल्या ज्ञायते । तथाहि—

काष्ठासंघो भुवि ख्यातो जानन्ति नृसुरासुराः ।
तत्र गच्छाश्च चत्वारो राजन्ते विश्रुताः क्षितौ ॥ १ ॥
श्रीनन्दितटसंज्ञश्च माथुरो बागडाभिधः ।
लाडवागड इत्येते विख्याताः क्षितिमण्डले ॥

श्रीमदमितगतिः काष्ठासंघीय आसीदिति श्रीभूषणसूरिकृतप्रबोधचिन्तामणिग्रन्थेनापि ज्ञायते । तथाहि—

भानुभूवलये कम्रो काष्ठसंघाम्बरे रविः ।
अमितादिगतिः शुद्धः शब्दव्याकरणार्णवः ॥

न केवलमनेन काष्ठासंघीयत्वं ज्ञायते किन्तु महात्मनो वैयाकरणत्वमपिसूच्यते । अतोऽनुमीयते यद्व्याकरणविषयेऽपि तत्ख्यातिर्दिगन्तव्यापिनी बभूव ।

यद्यपि माथुरसंघः काष्ठासंघस्य गच्छ एव तथापि तस्मिन् किञ्चिद्विशेषत्वमप्यस्ति । अतएवानुमीयते यन्माथुरगच्छस्यनाम माथुरसंघ इत्यभूत । दर्शनसारे माथुरसंघोत्पत्तिविषये गाथेयम्प्राप्यते ।

तत्तो दुसएतीदे महुराएमाहुराण गुरुणाहो ।
णामेण रामसेणो णिप्पिच्छियं वण्णियं तेण ॥ ४१ ॥

अनया माथुरसंघस्य काष्ठासंघात्स्वतन्त्रता निःपिच्छिकता च ज्ञायते । यद्यपि श्रीमदमितगतेः संघः जैनाभासेषु परिगणितस्तथापि नानेनाचार्यस्य महत्त्वहानिः । पुरा कैश्चिन्नाममात्रमतभेदेनाचारभेदेन वा सिद्धान्ताभेदे सत्यपि जैनाभासतोद्घोषिताऽऽसीत् परन्तु शनैः शनैः सा प्रच्छन्नत्वमगात् । अत इदमुचितमेवोक्तम् ।

---

१ ततो द्विशतेऽतीते मथुरायाम्माथुराणां गुरुनाथः ।
नाम्ना रामसेनो निःपिच्छिकं वर्णितं तेन ॥

ताकज्जे लहु लग्गहु अप्पा झाएहु जो णिरालम्बो ।
अह कट्ठो अह मूलो संकप्पवियप्पयं मुयहं ॥
संघो कोवि ण तारइ कट्ठो मूलो तहेव णिप्पिच्छो ।
अप्पा तारइ अप्पा तम्हा अप्पावि झाएहि ॥
पिच्छे णहु सम्मत्तं करगहिए चमरमोरडंबरए ।
समभावे जिणदिट्ठं रायाईदोसचत्तेणं ॥

अमितगत्याचार्यनिर्मिताः निम्नलिखितनामानो ग्रन्था: सन्ति ।

१ धर्मपरीक्षा
२ सुभाषितरत्नसंदोहः
३ भावनाद्वात्रिंशतिः
४ श्रावकाचारः
५ जम्बूद्वीपप्रज्ञप्तिः
६ चन्द्रप्रज्ञप्तिः
७ सार्द्धद्वयद्वीपप्रज्ञप्तिः
८ व्याख्याप्रज्ञप्तिः
९ योगसारप्राभृतं
१० पञ्चसंग्रहः
११ सामायिकपाठः

तत्र धर्मपरीक्षा सुभाषितरत्नसंदोहभावनाद्वात्रिंशतियोगसारप्राभृत श्रावकाचारसामायिकपाठ ग्रन्था: मुद्रिताः सन्ति । पञ्चसंग्रहस्तु हस्तस्थ-एव । शेषाः प्रज्ञप्तिग्रन्थाः नोपलभ्यन्ते । अयं रचनासंदोहः कवेः सर्वमुखीनपाण्डित्यं व्यनक्ति ।

---

१ ततः कार्ये लघु लगतु आत्मानं ध्यायतु यःनिरालम्बः ।
अथ काष्ठः अथ मूलः संकल्पविकल्पकं त्यजत ॥
संघः कोपि न तारयति काष्ठो मूलः तथैव निःपिच्छः ।
आत्मा तारयति आत्मानं तस्मात् आत्मानं अपि ध्यायत ॥
पिच्छे न हि सम्यक्त्वं करगृहीते चमरमयूरडंबरे ।
समभावे जिनेन दृष्टं रागादिदोषत्यक्तेन ॥

२ "सामायिक पाठः" इति नाम्ना भावनाद्वात्रिंशतिः पृथक् मुद्रिताऽस्ति अयम् सामायिकपाठस्त्वन्यएव माणिकचन्द्रग्रन्थमालायाः सिद्धान्तसारादिसंग्रहे संग्रहीतः । अस्यैकविंशत्यधिकशत (१२१) श्लोकाः सन्ति ।

अमितगत्याचार्यस्य रचनाः सरलाः सुखसाध्याः सत्योऽपि गम्भीराः मधुराश्च सन्ति । अयं ग्रन्थस्तु करणानुयोगस्यात्युत्तम ग्रन्थोस्ति । रचनाशैली त्वस्य गोम्मटसाराद्विलक्षणा सरला चास्ति । अनेकस्थलेषु विषय विशेषताप्युलभ्यते । गोम्मटसारकर्मकाण्डाध्ययनन्तु टीकामंकसंदृष्टिम्विना न शक्यम् किन्तु पञ्चसंग्रहे, आवश्यकाङ्कसंदृष्टिः ग्रन्थकारेण तत्रैव प्रदर्शिता, टीकायाः अप्यावश्यकता मूलरचनयैव दूरीकृता । अतएवायम् छात्राणामप्युपयोग्यस्ति । इत्यलमतिविस्तरेण ।

ॐ

श्रीअमितगतिसूरिविरचितः

पंचसंग्रहः ।

सर्वसंग्रहनिषेधकोऽपि यः पंचसंग्रहविधानदर्शकः ।
तत्त्वमार्गविनिवेदिनीं[1] जिनः शेमुषीं मम तनोतु संस्थितिम् ॥१॥
[2]बंधकं [3]बंध्यमानं यो [4]बंधेशं [5]बंधकारणम् ।
भाषते बंधभेदं[6] च तं स्तुवे भावसंग्रहम् ॥ २ ॥
ये षट् द्रव्याणि बुध्यंते द्रव्यक्षेत्रादिभेदतः ।
जिनेशास्तांस्त्रिधानत्वा करिष्ये जीवरूपणम् ॥ ३ ॥
अनंतानंतसंख्याना जंतवो द्रव्यतोऽखिलाः ।
अनंतलोकसंख्यानाः संक्षेपात्क्षेत्रतो मताः ॥ ४ ॥
अतीतकालतोऽनंतगुणिताः कालतः स्मृताः ।
भावतः केवलानंतभागमाना जिनेश्वरैः ॥ ५ ॥
परीतानंतयुक्तानंतानंतानंतमेकशस्त्रयाणां जघन्योत्कृष्टाजघन्यो-त्कृष्टभेदेन त्रैविध्यादनंतस्य नवधात्वमुन्नेयम् ॥ ६ ॥
नवधात्वेऽप्यनंतस्य प्रमाणस्य विचक्षणैः ।
अजघन्योत्कृष्टमत्रेदमनंतानंतमीर्यते[7] ॥ ७ ॥

---

१ विचारिणीं । २ जीवं । ३ कर्मप्रकृतिं । ४ गुणस्थानादिषु क्व क्व कियंत्यः प्रकृतयो बंधं यांति । ५ मिथ्यात्वादिप्रत्ययाः । ६ प्रकृति-स्थित्यनुभागप्रदेशभेदेन चतुर्द्धा । ७ न जघन्यः न उत्कृष्टः अजघन्योत्कृष्टः किन्तु मध्यमः ।

जीवभंगो जिनैरुक्तः पुद्गलाद्धाविहायसाम् ।
अनंतगुणितं पूर्वं परतः परतः परम् ॥ ८ ॥
गदितौ द्रव्यतोऽसंख्यौ धर्माधर्मौ प्रदेशतः ।
क्षेत्रतो लोकमानौ तौ लोकं व्याप्य यतः स्थितौ ॥ ९ ॥
अतीतानेहसोऽनन्तभागौ तौ कालतः स्मृतौ ।
*भावतः केवलानन्तभागौ केवललोचनैः ॥ १० ॥
विज्ञातव्या गुणाजीवाः प्राणपर्याप्तिमार्गणाः ।
उपयोगा बुधैः संज्ञा विंशतिर्जीवरूपणाः ॥ ११ ॥
जीवा यैरवबुध्यन्ते भावैरौदयिकादिभिः ।
गुणागुणस्वरूपज्ञैरत्र ते गदिता गुणाः ॥ १२ ॥
जन्तोरौदयिकोऽवाचि क्षायिकः शामिको जिनैः ।
क्षायोपशमिको भावः स्वतत्त्वं पारिणामिकः ॥ १३ ॥

---

१ अग्रेऽग्रे परस्परगुणितमनंतगुणम् । २ १४–१४–१०–६–१४ व्यक्ति (४–५–६–१५–३–१६–८–७–४–६–२–६–२–२) १२–४ ।
* अस्माद्ग्रे संदृष्टिरियम् ।

द्रव्यतो जीवा अ ≡ क्षेत्रतो ≡ अ.लो.	पुद्गला अ अ ≡ अ अ	कालः अ अ अ ≡ अ अ अ	आकाशं अ अ अ अ	अ अ अ अ	धर्म अ. प्र. ≡ लोक	अधर्म अ प्र ≡ लोक
कालतोऽतीत कालात् अ १	अ अ १ १	अ अ अ १ १ १	अ अ अ अ १ १ १ १		अतीतः १ भा अ	अतीत १ ≡ भा अ
भावतः केवलस्य १ भा. अ.	१ १ अ अ	१ १ १ अ अ अ	१ १ १ १ अ अ अ अ		१ भा अ	१ ≡ भा अ

बन्धमौदयिको मोक्षं क्षायिकाः शामिकाश्च ते ।
उभयं कुर्वते मिश्रा नोभयं पारिणामिकाः ॥ १४ ॥
मिथ्यादृष्टिर्जिनैराद्यो द्वितीयः श्रस्तदर्शनः[1] ।
तृतीयोऽकथि मिश्रोऽन्यः सम्यग्दृष्टिरसंयतः ॥ १५ ॥
संयतासंयतस्तस्मात्पंचमः शुद्धदृष्टिकः ।
प्रमत्तसंयतः षष्ठः सप्तमोऽतोऽप्रमत्तकः ॥ १६ ॥
अपूर्वकरणो द्वेधाऽनिवृत्तिकरणो द्विधा ।
द्वेधा सूक्ष्मकषायोऽतः शमकक्षपकत्वतः ॥ १७ ॥
शान्तक्षीणकषायौ स्तो योग्ययोगौ ततो जिनौ ।
चतुर्दशगुणातीता जीवाः सिद्धास्ततः परे ॥ १८ ॥
तत्त्वानि जिनदृष्टानि यस्तथ्यानि न रोचते ।
मिथ्यात्वस्योदये जीवो मिथ्यादृष्टिरसौ मतः ॥ १९ ॥
संयोजनोदये[2] भ्रष्टो जीवः प्रथमदृष्टितः[3] ।
अन्तराऽनात्तमिथ्यात्वो[4] वर्ण्यते श्रस्तदर्शनः ॥ २० ॥
जघन्यः समयः कालः प्रकृष्टोऽस्य[5] षडावलिः ।
कथ्यतेऽन्तर्मुहूर्तस्य शेषभूतो मनीषिभिः ॥ २१ ॥
सम्यग्मिथ्यारुचिर्मिश्रः सम्यग्मिथ्यात्वपाकतः ।
सुदुष्करः पृथग्भावो दधिमिश्रगुडोपमः ॥ २२ ॥
पाकाच्चारित्रमोहस्य व्यस्तप्राण्यक्षसंयमः[6] ।
त्रिष्वेकतमसम्यक्त्वः सम्यग्दृष्टिरसंयतः ॥ २३ ॥
यस्त्राता त्रसकायानां हिंसिता स्थावराङ्गिनां ।
अपकाष्टकषायोऽसौ संयतासंयतो मतः ॥ २४ ॥

---

१ सासादनः । २ अनन्तानुबन्धिचतुष्कोदये । ३ उपशमसम्यक्त्वात् । ४ अन्तरालवर्ती । ५ उपशमसम्यक्त्वकालस्य । ६ प्राणीन्द्रियसंयमरहितः ।

सम्यग्दृष्टिर्व्रतीज्ञेयः सामायिकविधायकः ।
प्रोषधी प्रासुकाहारी निरस्तदिनमैथुनः ॥ २५ ॥
ब्रह्मचारी निरारंभः परिग्रहपराङ्मुखः ।
निरस्तानुमतिस्त्रेधा विमुक्तोद्देशिकाशनः ॥ २६ ॥
इत्थमेकादश प्रोक्ता भेदास्तस्य मुनीश्वरैः ।
त्रायते यदि यत्नेन त्रसानां [1]दशकं सदा ॥ २७ ॥
न यस्य प्रतिपद्यन्ते कषाया द्वादशोदयं ।
व्यक्ताव्यक्तप्रमादोऽसौ प्रमत्तः संयतः स्मृतः ॥ २८ ॥
संज्वलनोकषायाणामुदये सत्यनुद्यमः ।
धर्मेशुद्ध्यष्टके वृत्ते प्रमादो गदितो यतेः ॥ २९ ॥
क्षान्तिः शौचंसंयमोऽकिंचनत्वं सत्यं त्यागो ब्रह्मचर्यंतपश्च ।
कार्यो भव्यैरार्जवं मार्दवं च प्राज्ञैर्धर्मो [2]द्व्यष्टधेतिप्रणीतः ॥ ३० ॥
मनोवाक्कायभैक्षेर्याशय्योत्सर्गाविनीतिषु ।
कुर्वतः सर्वदा शुद्धिं शुद्ध्यष्टकमुदीरितं ॥ ३१ ॥
पंचपंचत्रिसंख्यानाः समितिव्रतगुप्तयः ।
वृत्तं निवेद्यते साधोस्त्रयोदशविकल्पकम् ॥ ३२ ॥
कषायप्रणयस्वापविकथाक्षाणि योगिनः ।
प्रमादाश्चतुरेकैकचतुः पंच यथाक्रमम् ॥ ३३ ॥
शमक्षयपराचीनः कर्मणामुद्यसंयमः ।
निष्प्रमादोऽप्रमत्तोऽस्ति धर्म्यं ध्यानमधिष्ठितः ॥ ३४ ॥
अपूर्वः करणो येषां भिन्नं क्षणमुपेयुषां ।
अभिन्नं सदृशोऽन्योवा तेऽपूर्वकरणाः स्मृताः ॥ ३५ ॥

---

१ पर्याप्तापर्याप्तभेदयुक्तद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिसंज्ञिपंचेन्द्रिय-भेदरूपम् । २ द्वौ+अष्ट=द्श ।

न पूर्वे करणाः प्राप्ता ये ते भिन्नक्षणस्थितैः ।
गुणस्थानमिदं यातैरपूर्वकरणास्ततः ॥ ३६ ॥
क्षपयन्ति न ते कर्म शमयन्ति न किंचन ।
केवलं मोहनीयस्य शमनक्षपणोद्यताः ॥ ३७ ॥
ये संस्थानादिना भिन्नाः समानाः परिणामतः ।
समानसमयावस्थास्ते भवत्यनिवृत्तयः ॥ ३८ ॥
येनानिवृत्तयस्तुल्या भावास्तुल्यक्षणश्रिताम् ।
तेनानिवृत्तयो वाच्या वाच्यवाचकवेदिभिः ॥ ३९ ॥
क्षपयन्ति महामोहविद्विषं शमयन्ति ते ।
विनिर्मलतरैर्भावैः स्थूलकोपादिवृत्तयः ॥ ४० ॥
पूर्वापूर्वाणि विद्यन्ते स्पर्धकानि[1] विशेषतः ।
संज्वालस्यानुभागस्य यानि तेभ्यो व्यपेत्य यः ॥ ४१ ॥
अनन्तगुणहीनानुभागो लोभे व्यवस्थितः ।
अणीयसि यथार्थाख्यः सूक्ष्मलोभः स संमतः ॥ ४२ ॥
लोभसंज्वलनः सूक्ष्मः शमं यत्र प्रपद्यते ।
क्षयं वा संयतः सूक्ष्मः संपरायः स कथ्यते ॥ ४३ ॥
कोसुंभोऽन्तर्गतो रागो यथावस्त्रेऽवतिष्ठते ।
सूक्ष्मलोभगुणे लोभः शोध्यमानस्तथा तनुः ॥ ४४ ॥

---

१ स्पर्धकानां संदृष्टिरियं—

क



(शेषमग्रे पृष्ठे.)

वर्गः शक्तिसमूहोऽणोरणूनां वर्गणोदिता ।
वर्गणानां समूहस्तु स्पर्धकं स्पर्धकापहैः ॥ ४५ ॥
वर्धमानं मतं पूर्वं हीयमानमपूर्वकं ।
स्पर्धकं द्विविधं ज्ञेयं स्पर्धकक्रमकोविदैः ॥ ४६ ॥
अधोमले यथा नीते कतकेनाम्भोऽस्ति निर्मलं ।
उपरिष्टात्[1] तथा शान्तमोहो ध्यानेन मोहने[2] ॥ ४७ ॥
तदेवाम्भो यथाऽन्यत्र पात्रे न्यस्तं मलं विना ।
प्रसन्नं मोहने क्षीणे क्षीणमोहस्तथा यतिः ॥ ४८ ॥

ख



ग



१ उपशमात् । २ मोहकर्मणि ।

घातिकर्मक्षये लब्धा नवकेवललब्धयः ।
येनासौ विश्वतत्त्वज्ञः सयोगः केवली विभुः ॥ ४९ ॥
प्रदह्याऽघातिकर्माणि शुद्धध्यानकृशानुना ।
अयोगो याति शीलेशो मोक्षलक्ष्मीं निराश्रवः ॥ ५० ॥
संप्राप्ताष्टगुणा नित्याः कर्माष्टक निराशिनः ।
लोकाग्रवासिनः सिद्धा भवन्ति निहितापदः ॥ ५१ ॥
मोह[१]द्वितयमाश्रित्य त्रयो ज्ञेया गुणा नवे[२] ।
चारित्रमोहमन्ये द्वौ योगं गुणिभिरन्तिमौ ॥ ५२ ॥
मिथ्यादृष्टौ मतो मिश्रेभाव औदयिको जिनैः ।
संयोजनोदयोत्थाने सासने पारिणामिकः ॥ ५३ ॥
क्षायिकः शामिको भावः क्षायोपशामिकोऽथवा ।
वृत्तमोहोदयापेक्षे सम्यग्दृष्टावसंयते ॥ ५४ ॥
क्षायोशामिको भावो गुणानां त्रितये[३] परे ।
क्षायिकः शामिकोऽन्यत्र[४] शामिकः शान्तमोहने ॥ ५५ ॥
क्षायिकः क्षीणमोहेऽस्ति सयोगायोगयोरपि ।
आनुपूर्वीरितैतेषा[५]मुत्तरोत्तरशुद्धितः ॥ ५६ ॥
मूर्च्छारंभपरित्यक्तमुपयोगगुणार्चितं ।
ते लिंगमपरापेक्षं संयता बिभ्रते सर्वे[६] ॥ ५७ ॥
रूपतः सदृशाः सर्वे त्यक्तबाह्यपरिग्रहाः ।
असदृक्षाः परीणामैरुपर्युपरिशुद्धयः ॥ ५८ ॥

१ दर्शनचारित्रमोहं । २ अविरतादिक्षीणकषायान्ताः । ३ पंचमषष्ठसप्तमगुणस्थानेषु । ४ अपूर्वकरणादित्रयं । ५ भावानाम् । ६ प्रमत्ताद्ययोगकेवलिपर्यन्ताः ।

अनन्तानन्तसंख्याना जीवामिथ्यात्ववर्तिनः ।
पल्यासंख्यातभागास्तु परे गुणचतुष्टये ॥ ५९ ॥
शब्दसाम्येऽपि धीमद्भिः संख्याभेदः परस्परं ।
गुणस्थानचतुष्केऽत्र विबोद्धव्योयथागमं ॥ ६० ॥

मि. अ. अ. । सा. प. अ. । मि. प. अ. । अ. प. अ. । दे. प. अ. । तदाह—षट्त्रिंशपंचशतपंचषष्टिसहस्रप्रमाणं (६५५३६) पल्योपमं परिकल्प्यं । द्वात्रिंशता ३२, षोडशभिः १६, (भागे) चतुर्भिः ४, अष्टाविंशतिशतेन १२८ आवल्यसंख्यभागेन परिकल्पतेन भागे हृते क्रमेण सासादनाः अष्टाचत्वारिंशद्द्विसहस्रप्रमाः २०४८ । मिश्राः षण्णवत्यधिकचतुःसहस्रप्रमाः ४०९६ । असंयताः चतुरशीत्यधिकशतत्रयषोडशसहस्रप्रमाः १६३८४ । देशसंयताः द्वादशोत्तरपंचशतप्रमाः ५१२ ।

मनुष्यापेक्षया पुनराह—

द्विपंचाशत्तनूभाजो सासने मिश्रके मताः ।
द्विगुणाः सप्त सद्दृष्टौ देशे कोटयस्त्रयोदश ॥ ६१ ॥

सा. ५२०००००० । मि. १०४०००००० ।
असं. ७००००००००० । दे. १३०००००० ।

प्रमत्ताः कोटयः पंचलक्षास्त्रिनवतिप्रमाः ।
सहस्राष्टानवत्यामा षड्रुत्तरशतद्वयं ॥ ६२ ॥

५९३९८२०६

अप्रमत्ता भवन्त्येते द्वाभ्यां भागे हृते सति ।
शमकक्षपकार्हद्भिर्युक्तास्ते सन्ति संयताः ॥ ६३ ॥

द्वाभ्यां भागे हृते प्रमत्ता अप्रमत्ता भवन्ति। २९६९९१-०३ । ते प्रमत्ताप्रमत्तसंयताः शमकक्षपकार्हद्भिर्युक्ताः सर्वसंयताः भवन्ति । ८९९९९९७ ।

संयताः पान्तु मां सर्वे त्रिहीना नवकोटयः ।
सर्वशीलगुणाधारा गुणानां नवके स्थिताः ॥ ६४ ॥
शमकाः षोडशापूर्वे विंशतिश्चतुरुत्तरा ।
त्रिंशत्षट्त्रिंशदेतेऽतो द्वाचत्वारिंशदीरिताः ॥ ६५ ॥
चत्वारिंशत्सहाष्टाभिः पंचाशद्द्विचतुर्युताः ।
अष्टासु समयेष्वेते प्रविशन्ति क्षणे क्षणे ॥ ६६ ॥
अपूर्वकरणे सर्वे त्रिशती चतुरुत्तरा ।
शमकाः मिलिताः सन्ति क्षपकाः द्विगुणस्ततः ॥ ६७ ॥
अपूर्वे शमकाः ३०४ क्षपकाः ६०८ ।
सर्वोत्कृष्टप्रमाश्लिष्टा लल्यन्ते न यतः क्षणाः ।
आचार्यैरपरैरुक्ताः पंचभी रहितास्ततः ॥ ६८ ॥
शमका मिलितास्तस्मादेकोनत्रिशतप्रमाः ।
द्यूनषट्शतसंख्याना अपूर्वे क्षपकाःस्मृताः ॥ ६९ ॥

---

१ अस्मादग्रेतनो मूल पाठः ।

० ५४
० ५४
० ४८
० ४२
० ३६
० ३०
० २४
० १६

शमकाः २९९ क्षपकाः ५९८ ।

तेषां चतुर्भिरभ्यासे शमकानां समुच्चयः ।
पंचभिः क्षपकानां तु कथ्यते क्षीणकल्मषैः ॥ ७० ॥

गुणचतुष्के शमकाः ११९६ । गुणपंचके क्षपकाः २९९० ।

क्षणाष्टकाधिके वर्षपृथक्त्वे समयाष्टकं ।
जायते शमकश्रेणिप्रवेशार्हं तपस्विनां ॥ ७१ ॥
एकादिषोडशाद्यन्ता प्रविशन्ति क्षणे क्षणे ।
साधवः शमकश्रेणौ मोहनीयशमोद्यताः ॥ ७२ ॥
उपर्युपरि निक्षिप्य षोडशादीन् क्षिपेत्सुधीः ।
एकैकाष्टकमादाय चतुर्विंशादितोऽग्रतः ॥ ७३ ॥
एकद्वित्रिचतुःपंचषट्कानि त्रिंशदादितः ।
गृहीत्वा क्रमतो विद्वानग्रेतेभ्यो विनिक्षिपेत् ॥ ७४ ॥
कृत्वा चतुर्दशैकत्र द्वौ द्वावष्टावतो बुधः ।
गृहीत्वा स्थापयेत्तस्मिन्नेकैकं यत्र षोडश ॥ ७५ ॥
सर्वेषामग्रिमे शेषं निदध्यात्षट्कमग्रतः ।
लब्ध्वा क्षणाष्टके वृद्धिः षड्भिः सप्तदशादितः ॥ ७६ ॥

---

१ अस्मादग्रेतनो मूलपाठोऽयं ।

० १७ ६ ६ ६ ६ ६ ६ ६ । आदिः १७ । वृद्धिः ६ । पदं ८ ।
० १७ ६ ६ ६ ६ ६ ६ ।
० १७ ६ ६ ६ ६ ६ ।
० १७ ६ ६ ६ ६ ।
० १७ ६ ६ ६ ।
० १७ ६ ६ ।
० १७ ६ ।
० १७ ।

एकहीनं पदं वृद्ध्या ताडितं द्विभिर्भाजितं ।
आदियुक्तं पराभ्यस्तमीप्सितं गणितं मतं ॥ ७७ ॥

३०४ पदं । ८ वृद्धिः । १२ आदि ३४ आगतं त्रैराशिकेन ६०८ क्षपकाः ।

लभ्यते क्षपकश्रेणौ क्षपकानां प्रवेशने ।
अष्टक्षणाधिके योग्यं मासषट्के क्षणाष्टकं ॥ ७८ ॥
द्वात्रिंशत्समयेऽष्टाग्रा चत्वारिंशत्ततस्ततः ।
षष्टिर्द्वासप्ततिस्तस्मादशीतिश्चतुरुत्तरा ॥ ७९ ॥
ततः षण्णवतिर्द्वेधा शतमष्टोत्तरं ततः ।
विशन्ति क्षपकश्रेणिं मोहक्षपणकांक्षिणः ॥ ८० ॥
संस्थाप्य क्रमतः सर्वानुपर्युपरि पूर्ववत् ।
करोति पूर्वसूत्रेण क्षपकानयनं कृती ॥ ८१ ॥
द्वितीयादिक्षणस्थेभ्यः क्रमेणक्रमकोविदः ।
आदायनिक्षिपेत्तेभ्यः पुरः षोडशषोडश ॥ ८२ ॥
[2]तृतीयादिक्षणस्थेभ्यो द्वादशद्वादशाग्रतः ।
एकद्वित्रिचतुः पंचवारानादाय निक्षिपेत् ॥ ८३ ॥

---

१ ० १०८
० १०८ — २ क पुस्तके नास्त्ययम् श्लोकः
० ९६
० ८४
० ७२
० ६०
० ४८
० ३२

चतुरश्चतुरो लात्वा षोडशभ्यः क्षिपेत्ततः ।
द्वितयं द्वितयं तत्र द्वात्रिंशद्यत्र दृश्यते ॥ ८४ ॥
सर्वेषामग्रिमे शेषान्निक्षिपेद्द्वादशाग्रतः ।
लब्ध्वा द्वादशभि र्द्वैद्विस्त्रिंशतश्चतुरग्रतः ॥ ८५ ॥
सक्षणाष्टकषण्मास्यामेकत्राष्टक्षणा यदि ।
इयतीनां तदा तासां सद्वियोग्याः कतिक्षणाः ॥ ८६ ॥
चत्वारिंशत्सहस्राणि षण्मास्योऽष्टक्षणाधिकाः ।
भवन्त्यष्टशतान्येकचत्वारिंशानि सिद्ध्यताम् ॥ ८७ ॥
४०८४१
आद्यन्तयोः प्रमाणेच्छे विधायान्तस्तयोः फलं ।
अन्तेन गुणितं कृत्वा भजनीयं तदादिना ॥ ८८ ॥
इति त्रैराशिकेन लब्धाः समयाः—
समयानां त्रयोलक्षाः षड्विंशतिसहस्रकाः ।
अष्टाविंशं विबोद्धव्यमपरे शतसप्तकं ॥ ८९ ॥
३२६७२८
क्षणेष्वष्टसु मोक्षार्हाः सन्ति द्वाविंशतिर्यदि ।
इयत्सु कति लभ्यन्ते तदानीं मोक्षभागिनः ॥ ९० ॥

---

१ अस्मादग्रेतनो मूलपाठोऽयम्—

० ३४ १२ १२ १२ १२ १२ १२ १२
० ३४ १२ १२ १२ १२ १२ १२
० ३४ १२ १२ १२ १२ १२
० ३४ १२ १२ १२ १२
० ३४ १२ १२ १२
० ३४ १२ १२
० ३४ १२
० ३४

२ अस्मादग्रेतनो मूलपाठोऽयम्

० २
० २
० ३
० ३
० ३
० ३
० ३
० ३

एते मिलिताः द्वाविंशतिः २२ त्रैराशिकेन लब्धा योगिजिनाः ॥[१]
अष्टलक्षाणि लभ्यन्ते जिनानां जितजन्मनाम् ।
सहस्राष्टानवत्यामा ह्युत्तरं शतपंचकं ॥ ९१ ॥
चत्वारः श्वाभ्रदेवेषु पंच तिर्यक्षु भाषिताः ।
नृषु सर्वे गुणा जैनैरेकमेकेन्द्रियादिषु ॥ ९२ ॥
अनेकेऽनेकधा जीवा यैर्ज्ञायन्ते स्वजातिजाः ।
ज्ञेया जीवसमासास्ते समासेन चतुर्दश ॥ ९३ ॥
एकाक्षा बादराः सूक्ष्मा द्व्यक्षाद्या विकलास्त्रयः ।
पंचाक्षाः संज्ञ्यसंज्ञाख्याः सर्वे पर्याप्तकेतरे ॥ ९४ ॥
एकेन्द्रियेषु चत्वारः समासा विकलेषु षट् ।
पंचेन्द्रियेषु चत्वारो भवन्त्येते चतुर्दश ॥ ९५ ॥
चतुर्दशसु पंचाक्षः पर्याप्तस्तत्र वर्तते ।
एतच्छास्त्रमतेनाद्ये गुणस्थानद्वयेऽपरे ॥ ९६ ॥
पूर्णः पंचेन्द्रियः संज्ञी चतुर्दशसु वर्तते ।
सिद्धान्तमततो मिथ्यादृष्टौ सर्वे गुणे परे ॥ ९७ ॥
चतुर्दशाङ्गिनां भेदा एकविंशतिरीरिताः ।
त्रिंशत्सद्विषडष्टाग्रा चत्वारिंशद्युताष्टभिः ॥ ९८ ॥
चतुः पंचाशदर्थज्ञैः सप्तपंचाशदप्यतः ।
विज्ञाय संयतै रक्ष्या विशेषेणेति सर्वदा ॥ ९९ ॥

१ अस्मादग्रेतनो मूलपाठः ।



अपर्याप्ता मता ये ये चतुर्दशसु देहिनः ।
ते ते निर्वृत्यपर्याप्तलब्ध्यपर्याप्तयो द्विधा ॥ १०० ॥
चतुर्दशापि तैर्युक्तास्ते भवन्त्येकविंशतिः[1] ।
इदानीं त्रिंशदुच्यन्ते निगद्येत्येकविंशतिः ॥ १०१ ॥
पंच स्थावरकाया ये ते प्रत्येकं चतुर्विधाः ।
दशत्रसयुता जीवसमासास्त्रिंशदीरिताः[2] ॥ १०२ ॥
द्विधा साधारणो ज्ञेयः प्रत्येकाङ्गो वनस्पतिः ।
साधारणश्चतुर्धात्र प्रत्येकांगः पुनर्द्विधा ॥ १०३ ॥
पूर्णाऽपूर्णतया तत्र प्रत्येकाङ्गः स्मृतो द्विधा ।
वनस्पतिर्यतः षोढा द्वात्रिंशत्त्रिंशदस्त्यतः[3] ॥ १०४ ॥
एकमेकस्य यस्याङ्गं प्रत्येकाङ्गः स कथ्यते ।
साधारणः स यस्याङ्गमपरैर्बहुभिः समम् ॥ १०५ ॥
गूढसन्धिशिरापर्व समभंगमहीरुहं ।
साधारणं वपुश्छिन्नरोहि प्रत्येकमन्यथा ॥ १०६ ॥
एकत्र म्रियमाणे ये म्रियन्ते देहिनोऽखिलाः ।
जायन्ते जायमाने ते लक्ष्याः साधारणाः बुधैः ॥ १०७ ॥

---

१ अस्माद्ग्रेतनोमूलपाठोऽयम् । २ ३

(१)
० ० १ १ ० ० (२१)
१ ० ०
१ ० ०
१ ० ०
० ० १ १ ० ०

(२)
० १ १ ० (३०)
१ ०
१ ०
१ ०
० १ १ ०
० १ १ ०
० १ १ ०
० १ १ ०
० १ १ ०

(३)
० १ १ ० सा. प्र.
१ ० १० स. प्र.
१ ० ३२ अ. प्र.
१ ०
० १ १ ०
० १ १ ०
० १ १ ०
० १ १ ०
० १ १ ०

नित्येतरनिगोतत्वभेदास्साधारणा द्विधा ।
प्रत्येकं ते चतुर्भेदाःस्थूलसूक्ष्मादिभेदतः ॥ १०८ ॥
अष्टभेदा यतो जाताः साधारणशरीरिणः ।
द्वात्रिंशदुच्यते पूर्वा षट्त्रिंशत्साधुभिस्ततः ॥ १०९ ॥
त्रसत्वं ये प्रपद्यन्ते कालानां त्रितयेऽपि नो ।
ज्ञेया नित्यनिगोतास्ते भूरिपापवशीकृताः ॥ ११० ॥
कालत्रयेऽपि यैर्जीवैस्त्रसता प्रतिपद्यते ।
सन्त्यनित्यनिगोतास्ते चतुर्गतिविहारिणः ॥ १११ ॥
प्रत्येका देहिनो द्वेधा प्रतिष्ठिताप्रतिष्ठिताः ।
प्रत्येकं तेऽपि जायन्ते पूर्णापूर्णतया द्विधा ॥ ११२ ॥
प्रत्येकाङ्गाश्चतुर्भेदा यतः सन्ति शरीरिणः ।
अष्टत्रिंशत्ततः पूर्वा षट्त्रिंशद्गदिता बुधैः ॥ ११३ ॥
पृथिव्यां ये प्ररोहन्ति ते भण्यन्ते प्रतिष्ठिताः ।
उपरिष्टाद्ये जलादीनां ते भवन्त्यप्रतिष्ठिताः ॥ ११४ ॥
सन्ति निर्वृत्त्यपर्याप्तलब्ध्यपर्याप्तभेदतः ।
अपर्याप्ता यतो द्वेधा द्वात्रिंशति शरीरिणः ॥ ११५ ॥

१



२



चत्वारिंशत्ततोऽष्टाग्रा सा द्वात्रिंशाभिवेदिताः[1] ।
चतुः[2]पंचाशदादिष्टा तथा षट्त्रिंशदुत्तमैः ॥ ११६ ॥
अष्टात्रिंशत्पुरः प्रोक्ता सप्तपंचाशदुच्यते[3] ।
लब्ध्यनिर्वृत्त्यपर्याप्तभेदतोऽपूर्णदेहिनाम् ॥ ११७ ॥
अथवा जीव सामान्य स्थावरत्रसपूर्वकैः ।
जीवभेदा विबोद्धव्या भेदैर्भेदविशारदैः ॥ ११८ ॥

१ { सा / १ }

२ { स्था. त्र. / १ १ }

३ { ए. वि. स. / १ १ १ }

४ { ए. वि. अ. सं. / १ १ १ १ }

५ { ए. द्वी. त्री. च. प. / १ १ १ १ १ }

६ { पृ. अ. ते. वा. व. त्र. / १ १ १ १ १ १ }

७ { पृ. अ. ते. वा. व. वि. स. / १ १ १ १ १ १ १ }



८

पृ.	अ.	ते.	वा.	व.	वि.	अ.	सं.
१	१	१	१	१	१	१	१

९

पृ.	अ.	ते.	वा.	व.	द्वी.	त्री.	च.	पं.
१	१	१	१	१	१	१	१	१

१०

पृ.	अ.	ते.	वा.	व.	द्वी.	त्री.	च.	अ.	सं.
१	१	१	१	१	१	१	१	१	१

धरादयो द्विधा ज्ञेया बादरेतरभेदतः ।
जीवभेदाववबोधाय पटीयोभिर्यथाक्रमम् ॥ ११९ ॥

११

पृ.	अ.	ते.	वा.	व.	त्र.
२	२	२	२	२	१

१२

पृ.	अ.	ते.	वा.	व.	त्र.
२	२	२	२	२	२

१३

पृ.	अ.	ते.	वा.	व.	वि.	अ.	सं.
२	२	२	२	२	१	१	१

१४

पृ.	अ.	ते.	वा.	व.	द्वी.	त्री.	च.	पं.
२	२	२	२	२	१	१	१	१

१५

पृ.	अ.	ते.	वा.	व.	द्वी.	त्री.	च.	अ.	सं.
२	२	२	२	२	१	१	१	१	१

१६

पृ.	अ.	ते.	वा.	नि.	च.	प्र.	वि.	अ.	सं.
२	२	२	२	२	२	१	१	१	१

१७

पृ.	अ.	ते.	वा.	नि.	च.	प्र.	अ.	वि.	अ.	सं.
२	२	२	२	२	२	१	१	१	१	१

१८

पृ.	अ.	ते.	वा.	नि.	च.	प्र.	द्वी.	त्री.	च.	अ.	सं.
२	२	२	२	२	२	१	१	१	१	१	१

१९

पृ.	अ.	ते.	वा.	नि.	च.	प्र.	अ.	द्वी.	त्री.	च.	अ.	सं.
२	२	२	२	२	२	१	१	१	१	१	१	१

एकाद्यः समासा ये यावदेकोनविंशतिः ।
ते पर्याप्तेतराभ्यस्ताःकार्या भेदावबुद्धये ॥ १२० ॥

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६. १७. १८. १९.

ते पर्याप्तेतराभ्यस्ताः—

२. ४. ६. ८. १०. १२. १४. १६. १८. २०. २२. २४. २६. २८. ३०. ३२. ३४. ३६. ३८.

पर्याप्तलब्ध्यपर्याप्तनिर्वृत्यपर्याप्तकैस्त्रिभिः ।
एकादीनां विधे ज्ञेया जीवभंगप्रकृष्टताः ॥ १२१ ॥

३. ६. ९. १२. १५. १८. २१. २४. २७. ३०. ३३. ३६. ३९. ४२. ४५. ४८. ५१. ५४. ५७.

सप्तपंचाशतं ज्ञात्वा भेदान् ये पान्ति जन्मिनः ।
ते संसारपयोराशेः संयतास्तारयन्तु माम् ॥ १२२ ॥

प्राणन्ति यैः सदा जीवाः प्राणैर्बाह्यैरिवांतरैः ।
प्राणाः प्रवर्तमानास्ते प्राणिनां जीविताववधि ॥ १२३ ॥
हृषीकपंचकं स्वान्तवचःकायबलत्रयम् ।
आयुरुच्छ्वासनिःश्वासौ दशप्राणा भवन्त्यमी ॥ १२४ ॥
सर्वेष्वङ्गेन्द्रियायूंषि पूर्णेष्वानः शरीरिषु ।
वाग्द्वित्र्यादिहृषीकेषु मनः पूर्णेषु संज्ञिषु ॥ १२५ ॥
ते संज्ञिनि दशैकैको हीनोऽन्येष्वन्त्ययोर्द्वयं ।
अपर्याप्तेषु सप्ताद्योरेकैकोऽन्येषु हीयते ॥ १२६ ॥
४–४–६–७–८–९–१० । ७–७–६–५–४–३–३
पूर्णापूर्णा यथा सन्ति पदार्थो भवनादयः ।
पूर्णापूर्णास्तथा जीवा विज्ञातव्या मनीषिभिः ॥ १२७ ॥

आहाराङ्गहृषीकानभाषामानसलक्षणाः ।
पर्याप्तयः षडङ्गादिशक्तिनिष्पत्तिहेतवः ॥ १२८ ॥
अन्तर्मुहूर्त्तवर्तिन्यश्चतस्रः पंचषण्मताः ।
ता यथाक्रममेकाक्षविकलेन्द्रियसंज्ञिनाम् ॥ १२९ ॥
आयुःपर्याप्तिनिष्पन्नाः सर्वकालोपलब्धितः ।
प्राणिनां शक्तयः प्राणाः शस्वज्जीवनहेतवः ॥ १३० ॥

यकाभिर्यासु वा जीवा मार्ग्यन्तेऽनेकधास्थिताः ।
मार्गणा मार्गणादक्षैस्ताश्चतुर्दशभाषिताः ॥ १३१ ॥
गतयः करणं कायो योगो वेदः क्रुदा (धा) दयः ।
वेदनं संयमो दृष्टिर्लेश्या भव्यः सुदर्शनम् ॥ १३२ ॥

---

१ एकेन्द्रिय बादरसूक्ष्मयोः । २ श्वासोच्छ्वासः । ३ ज्ञानं । ४ दर्शनं ।
५ सम्यक्त्वं ।

संज्ञी चाहारकः प्रोक्तास्ताश्चतुर्दश मार्गणाः ।
मिथ्यादृशादयो जीवा मार्ग्या यासु सदादिभिः ॥ १३३ ॥
४–५–६–१५–३–४–८–७-४–६–२–६–२–२ ।
नरो गत्यामपर्याप्तः संयमे सूक्ष्मसंयमः ।
साहारकद्वयो योगे मिश्रवैक्रियिकः परः ॥ १३४ ॥
सम्यक्त्वे शामिको मिश्रः सम्यग्दर्शनाविच्युतः[१] ।
सान्तरा[२] मार्गणाश्चाष्टौ पराः सन्ति निरन्तराः ॥ १३५ ॥
गतौ १ । संयमे १ । योगे ३ । सम्यक्त्वे ३ । मिलिताः ८ ।
यया गच्छन्ति संसारं या कृतागतिकर्मणा ।
श्वभ्रगत्यादिभेदेन गतिः सास्ति चतुर्विधा ॥ १३६ ॥
न रमन्ते महादुःखा ये द्रव्यादिचतुष्टये ।
ये परस्परतो दीना नारकास्ते निरूपिताः ॥ १३७ ॥
कुटिला ये तिरोऽञ्चन्ति विवेकविकलाशयाः ।
मायाकर्मबलोत्पन्नास्ते तिर्यंचः प्रकीर्तिताः ॥ १३८ ॥
हेयादेयानि मन्यन्ते ये मनोज्ञानलोचनाः ।
द्विधा म्लेच्छार्यभेदेन मानवास्ते निवेदिताः ॥ १३९ ॥
दिव्यन्ति सर्वदाष्टाभिर्ये गुणैरणिमादिभिः ।
दिव्यदेहा मता देवाश्चतुर्धा ते विभास्वराः ॥ १४० ॥
जन्ममृत्युजराराग संयोगाविगमादयः ।
न यस्यां जातु जायन्ते सा सैद्धा गदिता गतिः ॥ १४१ ॥

---

१ सासादनः । २ अपर्याप्तमनुष्यस्य पल्योपमासंख्याततमभागः शून्यकालः । आहारकद्वितयस्य सप्ताष्टौ वर्षाणि । वैक्रियिकमिश्रे द्वादशमुहूर्ताः । सूक्ष्मसंयमे षण्मासाः । सासादनमिश्रयोः पल्योपमासंख्याततमभागः । *सप्त दिनानि औपशमिके ।

अहमिन्द्रा इवैकैकमीशन्ते यानि सर्वदा ।
तानीन्द्रियाण्यहंयूनि विज्ञेयानि विचक्षणैः ॥ १४२ ॥
यवनालमसूरातिमुक्तकेन्द्वर्धसान्निभाः ।
श्रोत्राक्षिघ्राणजिह्वाःस्युः स्पर्शनेऽनेकधाकृतिः ॥ १४३ ॥
एकाक्षे स्पर्शनं जन्तावेकैकं वर्धते ततः ।
अन्येषु रसनं घ्राणं चक्षुः श्रोत्रं यथाक्रमम् ॥ १४४ ॥
अस्पृष्टं दृश्यते रूपं स्पृष्टः शब्दो निशम्यते ।
सदा गन्धो रसः स्पर्शो बद्धः स्पृष्टोऽवबुद्ध्यते ॥ १४५ ॥
वेदनं दर्शनं भोगं स्वामित्वं कुरुते यतः ।
एकेन स्पर्शनेनोक्त एकाक्षः पंचधा ततः ॥ १४६ ॥
जलूकाशुक्तिशम्बूकगण्डूपदकपर्दिकाः ।
जठरकृमिशंखाद्या द्वीन्द्रियादेहिनो मताः ॥ १४७ ॥
कुन्थुः पिपीलिका गुंभी यूका मत्कुणवृश्चिकाः ।
मर्कोटकेन्द्रगोपाद्यास्त्रीन्द्रियाः सन्ति देहिनः ॥ १४८ ॥
पतङ्गा मशका दंशा मक्षिकाः कीटगर्मुतः ।
पुत्तिका चंचरीकाद्याश्चतुरक्षाः शरीरिणः ॥ १४९ ॥
नारका मानवा देवा तिर्यंचश्च चतुर्विधाः ।
सामान्येन विशेषेण पंचाक्षा बहुधास्थिताः ॥ १५० ॥
इन्द्रियार्थसुखातीता लोकालोकविलोकिनः ।
क्षायिकातीन्द्रियज्ञाना जीवाः सन्ति निरिन्द्रियाः ॥ १५१ ॥

कर्मभारं वहत्यङ्गी कायमादाय सर्वदा ।
सुदुर्वहं महाभारं कावटीमिव कर्मठः ॥ १५२ ॥

---

१ प्रभवन्ति । २ अहङ्कारयुक्तानि । ३ स्पृष्टः । ४ पृथिव्यादिभेदेन । ५ मंकोडा । ६ मधुमक्षिका: । ७ नीलमक्षिकाः ।

पिण्डः पौद्गलिकः कायो जीवव्यापारसंचितः ।
भेदाः षडस्य भूम्यम्भोवन्हिवायुतरुत्रसाः ॥ १५३ ॥
समानास्ते मसूराम्भोविन्दुशूचीव्रजध्वजैः ।
धराम्भोऽग्निमरुत्कायाः क्रमाच्चित्रास्तरुत्रसाः ॥ १५४ ॥
शर्करा सिकता पृथ्वी रत्नोपलशिलादयः ।
षट्त्रिंशद्धरणीभेदा दर्शिता जिनपुंगवैः ॥ १५५ ॥
करका महिकाविन्दुहिमावश्यायसीकराः ।
शुद्धं घनोदकं तोयं तोयकायास्तनूभृतः ॥ १५६ ॥
अंगारो मुर्मुरो ज्वालाः स्फुलिंगशुद्धपावकाः ।
अर्चिरग्न्यादयो ज्ञेया बहुधावन्हिकायिकाः ॥ १५७ ॥
घनो महांस्तनुर्वात्या गुंजा[1] मण्डालिरुत्कलिः ।
प्रभंजनादयः प्रोक्ता विचित्रा वातकायिकाः ॥ १५८ ॥
मूलाग्रविष्टपस्कन्धग्रान्थिबीजादिरोहिणः ।
सम्मूर्च्छिनो मताश्चित्रा वनस्पतिशरीरिणः ॥ १५९ ॥
त्रसा द्वित्रिचतुःपंचहृषीका भवभागिनः ।
विकलासंज्ञिसंज्ञ्याख्यास्त्रसप्रकृतियंत्रिताः ॥ १६० ॥
त्रसनाड्याबहिः सन्ति नाङ्गिनस्त्रसकायिकाः ।
उपपादं गतांस्त्यक्त्वा देहिनो मारणान्तिकान्[2] ॥ १६१ ॥
प्रत्येककायिका देवाः श्वाभ्राः केवलिनोर्द्वयम् ।
आहारकधरातोयपावकानिलकायिकाः ॥ १६२ ॥
निगोतैर्बादरैः सूक्ष्मैरेते सन्त्यप्रतिष्ठिताः ।
पंचाक्षा विकला वृक्षा जीवाःशेषाःप्रतिष्ठिताः ॥ १६३ ॥ युग्मम्

---

१ घटादिमध्ये शब्दविशेषो गुंजा । २ केवलिसमुद्घातगतांश्च ।

ध्यानेन नाशितो येषां कायबन्धः कृशानुना ।
हेमाश्मनामिवाशेषो मलस्ते सन्त्यकायिकाः ।। १६४ ।।

आत्मनो वीर्यविघ्नस्य क्षयोपशमने सति ।
यः प्रदेशपरिस्पंदः स योगो गदितस्त्रिधा ।। १६५ ।।
प्रत्येकं वाङ्मनोयोगौ सत्यासत्यद्वयाद्वयैः ।
चतुर्धा कथितः प्राज्ञैः काययोगस्तु सप्तधा ।। १६६ ।।
सत्यं मनो यथावस्तु प्रवृत्तं परथा मृषा ।
द्वये सत्यमृषा ज्ञेयमस्त्यसत्यमृषाऽद्वये ।। १६७ ।।
यथेति मनसो योगश्चतुर्धा प्रतिपादितः ।
वाचिकोऽपि तथा ज्ञेयो योगनिग्रहणोद्यतैः ।। १६८ ।।
जनान्त सम्मति न्यास नाम रूप प्रतीतिषु ।
सत्यं संभावने भाव्ये (वे) व्यवहारोपमानयोः ।। १६९ ।।
इत्थं सत्यवचो योगो दशधातोऽन्यथा मृषा ।
द्वाभ्यां सत्यमृषा ताभ्यां युक्तोऽसत्यमृषान्यथा ।। १७० ।।
वागसत्यमृषा ज्ञेया विकलाक्षशरीरिणाम् ।
योगिनां संज्ञिनां चैषा याचनामंत्रणादिका ।। १७१ ।।

१ भत्तं देवी चंदप्पहपडिमा तहय होदि जिणदत्तो ।
सेदो दिग्घो रज्झदि कूरोत्तिय जं हवेवयणं ।। गो.सा.२२३ ।।
सक्को जम्बूदीवं पल्लट्टदि पापवज्जवयणं च ।
पल्लोवमं च कमसो जणपदसच्चादि दिट्ठंता ।। २२४ ।।

२ आमंतणि आणवणी याचणिया पुच्छणी य पण्णवणी ।
पच्चक्खाणी संसयवयणी इच्छाणुलोमा य ।। २२५ ।।
णवमी अणक्खरगदा असच्चमोसा हवंतिभासाओ ।
सोदारणं जम्हावत्तावत्तंस संजणया ।। २२६ ।।

उदरे यो भवः स्थूले यस्योदारं प्रयोजनं ।
औदारिकोऽस्त्यसौ कायो मिश्रोऽपर्याप्त इष्यते ॥ १७२ ॥
विक्रियायां भवः कायो विक्रिया वा प्रयोजनं ।
यस्य वैक्रियिको ज्ञेयो मिश्रोऽपूर्णः स कथ्यते ॥ १७३ ॥
एकानेकलघुस्थूलशरीरविविधक्रिया ।
विक्रिया कथिता प्राज्ञैः सुरश्वाभ्रादिगोचरा ॥ १७४ ॥
अर्थानाहरते सूक्ष्मान् गत्वा केवलिनोऽन्तिकम् ।
संशये सति लब्धर्द्धेरसंयमजिहासया ॥ १७५ ॥
यः प्रमत्तस्य मूर्धोत्थो धवलो धातुवर्जितः ।
अन्तर्मुहूर्तस्थितिकः सर्वव्याघातविच्युतः ॥ १७६ ॥
पवित्रोत्तमसंस्थानो हस्तमात्रोऽनघद्युतिः ।
आहारकः स बोद्धव्यो मिश्रोऽपर्याप्त उच्यते ॥ १७७ ॥
कर्मैव कार्मणः कायः कर्मणां वा कदम्बकं ।
एकद्वित्रिक्षणानेष विग्रहर्तौ[1] प्रवर्तते ॥ १७८ ॥
तैजसेन शरीरेण बध्यते न न जीर्यते ।
न चोपभुज्यते किंचिद्यतो योगोऽस्य नास्त्यतः ॥ १७९ ॥
अकायाः सन्ति निर्मुक्ताः शुभाशुभप्रवर्तिनः ।
सप्तधा काययोगेन भवातीता निरास्रवाः ॥ १८० ॥
स्थूला विकुर्वते पूर्णास्तेजःपवनकायिकाः ।
पंचाक्षाश्वतनूभाजां परेषां नास्ति विक्रिया ॥ १८१ ॥
विग्रहर्तौ समस्तानां कायौ तैजसकार्मणौ ।
युक्तौ वैक्रियिकेनेमौ स्वर्गश्वभ्रनिवासिषु ॥ १८२ ॥

---

१ ऋतुशब्दः गतौ प्रवर्तते ।

औदारिकेन[1] तिर्यक्षु नृणामाहारकेन[2] च ।
सहाहारकयोगेन जातु वैक्रियिकोऽस्ति नो ॥ १८३ ॥
वक्रतौ[3] सकला[4] अङ्गा देवश्वाभ्रास्त्रिविग्रहाः[5] ।
त्रिकाया मर्त्यतिर्यंचश्चतुःकाया च केचन[6] ॥ १८४ ॥
द्वयोस्त्रयोदशैकत्र दशान्यत्र त्रयोदश ।
नवैकादश ते षट्सु नवातः सप्त योगिनि ॥ १८५ ॥
१३।१३।१०।१३।९।११।९।९।९।९।९।९।७।०।

नोकषायविशेषाणामुदये त्रिविधोऽङ्गिनाम् ।
स्त्रीपुंनपुंसकाभिख्यो वेदो मूढत्वकारकः ॥ १८६ ॥
वेदोदीरणया जीवः सुषुप्तमनुजोपमः ।
कृत्याकृत्यविचाराणां जायते करणाक्षमः ॥ १८७ ॥
वेदकर्मोदयोत्पन्नो भाववेदस्त्रिधास्मृतः ।
नामकर्मोदयोत्पन्नो द्रव्यवेदोऽपि च त्रिधा ॥ १८८ ॥
जीवस्वभावसंमोहो भाववेदोऽभिधीयते ।
योनिलिंगादिको दक्षैर्द्रव्यवेदः शरीरिणाम् ॥ १८९ ॥
योऽभिलाषः स्त्रियाः पुंसि पुरुषस्य च यः स्त्रियाम् ।
स्त्रीपुंसयोश्च संढस्य भाववेदोऽस्ति स त्रिधा ॥ १९० ॥
नान्तर्मौहूर्तिका वेदास्ततः सन्ति कषायवत् ।
आजन्ममृत्युतस्तेषामुदयो दृश्यते यतः ॥ १९१ ॥
स्त्रीपुंनपुंसका जीवाः सदृशा द्रव्यभावतः ।
जायन्ते विसदृक्षाश्च कर्मपाकनियन्त्रिताः ॥ १९२ ॥

१–२ युक्तौ इमौ तैजसकार्मणौ स्त इति सम्बन्धः । ३ विग्रहगतौ ।
४ विग्रहगतौ सर्वेजीवास्तैजसकार्मणकायाः । ५ त्रिशरीराः । ६ मनुष्याः ।

या स्त्री द्रव्येण, भावेन साऽस्ति स्त्री ना नपुंसकः ।
पुमान् द्रव्येण, भावेन पुमान्नारी नपुंसकः ॥ १९३ ॥
संढो द्रव्येण, भावेन संढो नारी नरो मतः ।
इत्येवं नवधा वेदो द्रव्यभावविभेदतः ॥ १९४ ॥
स्तनयोनिमती नारी पुमान् सश्मश्रुमेहनः ।
न स्त्री न पुरुषः पापो द्वयरूपो नपुंसकः ॥ १९५ ॥
श्रोणिमार्दवस्त्रस्तत्वं मुग्धत्वक्लीबतास्तनाः ।
पुंस्कामेन समं सप्त लिंगानि स्त्रैणसूचने ॥ १९६ ॥
खरत्वमेहनस्ताब्ध्य सौंडीर्यस्मश्रुधृष्टताः ।
स्त्रीकामेन समं सप्त लिंगानि पौंस्त्ववेदने ॥ १९७ ॥
यानि स्त्रीपुंसलिंगानि पूर्वाणीति चतुर्दश ।
शक्तानि तानि मिश्राणि षंढभावनिवेदने[१] ॥ १९८ ॥
गर्भः स्त्यायति यस्यां या दोषैश्छादयति स्वयं ।
नराभिलाषिणी नित्यं या सेह स्त्री निरुच्यते ॥ १९९ ॥
कुरुते पुरुकर्माणि गर्भं रोपयते स्त्रियां ।
यतो भजति राभस्यं ज्ञेयः सद्भिस्ततः पुमान् ॥ २०० ॥
सुष्ठु क्लिष्टमनोवृत्तिद्वयाकांक्षी नपुंसकः ।
नरप्रजावतीरूपो दुःसहाधिकवेदनः ॥ २०१ ॥
करीषजेन तार्णेन पावकेनेष्टकेन च ।
समतो वेदतोऽपेताः सन्त्यवेदा गतव्यथाः ॥ २०२ ॥

ये चारित्रपरीणामं कषन्ति शिवकारणं ।
क्रुन्मानवंचनालोभास्ते कषायाश्चतुर्विधाः ॥ २०३ ॥

---

१ क पुस्तकेनास्त्यम् श्लोकः ।

सन्त्यनन्तानुबन्ध्याख्याः अप्रत्याख्याननामकाः ।
ते प्रत्याख्यानसंज्ञाकाः क्रमात्संज्वलनाभिधाः ॥ २०४ ॥
तैराद्यैर्दृष्टिचारित्रे द्वितीयैर्देशसंयमः ।
तृतीयैः संयमस्तुर्यैर्यथाख्यातश्च हन्यते ॥ २०५ ॥
कोपतः समतो ग्रावाभूरेणूदकराजिभिः ।
गतिं चतुर्विधां यान्ति श्वभ्रतिर्यग्नृनाकिनाम् ॥ २०६ ॥
अश्मस्तंभास्थिदार्वार्द्रवल्लरीसमतो गतिं ।
मानतो गच्छति श्वभ्रतिर्यङ्मर्त्यदिवौकसाम् ॥ २०७ ॥
तुल्यया वंशमूलाविशृङ्गगोमूत्रचामरैः ।
मायया नारकस्तिर्यङ् जायते मानवोऽमरः ॥ २०८ ॥
कृमिनीलीहरिद्राङ्गमलरागसमानतः ।
लोभतो जायते श्वभ्रस्तैरश्चो मानुषः सुरः ॥ २०९ ॥
क्रुद्धः श्वभ्रेषु तिर्यक्षु मायायाः प्रथमोदयः ।
जातस्य नृषु मानस्य लोभस्य स्वर्गवासिषु ॥ २१० ॥
आचार्या निगदन्त्यन्ये कोपादिप्रथमोदये ।
भ्रमतां भवकान्तारे नियमो नास्ति जन्मिनाम् ॥ २११ ॥
स्वान्यपीडाकरा निन्द्या बन्धासंयमहेतवः ।
कषायाः सन्ति नो येषां तेऽकषाया जिनोत्तमाः ॥ २१२ ॥

गुणपर्ययवद्द्रव्यं ध्रौव्योत्पादव्ययात्मकं ।
तत्वतो ज्ञायते येन तज्ज्ञानं कथ्यते जिनैः ॥ २१३ ॥
इन्द्रियानिन्द्रियैरर्थग्रहणं मननं मतिः ।
विकल्पा विविधास्तस्याः क्षयोपशमसंभवाः ॥ २१४ ॥
क्षिपेद्धृत्वेन्द्रियैः षड्भिश्चतुरोऽवग्रहादिकान् ।
व्यञ्जनावग्रहं तत्र मूलभंगं चतुर्विधं ॥ २१५ ॥

२४–२८–३२ ।

त्रयोऽपि राशयस्तावद्बह्वादिभिरसेतरैः ।
तैः सेतरैः पुनस्ताड्या मतिभेदावबुद्धये ॥ २१६ ॥

१४४।१६८।१९२।

ते त्रयो राशयः सेतरैर्बह्वादिभिर्द्वादशभिर्गुणिताः—
२८८।३३६–३८४ ।

मतिपूर्वं श्रुतं प्रोक्तं अनेकद्वादशात्मकम् ।
शब्दाद् घटादि विज्ञानं वह्निज्ञानं च धूमतः ॥ २१७ ॥
मतिपूर्वं श्रुतं दक्षैरुपचारान्मतिर्मता ।
मतिपूर्वं ततः सर्वं श्रुतं ज्ञेयं विचक्षणैः ॥ २१८ ॥

घट इत्युक्ते घकाराकारटकाराकारविसर्जनीयविषयं मतिज्ञानं ततः पृथुबुध्नोदराद्याकारविषयं श्रुतज्ञानं ततो जलधारणादिविषयं श्रुतज्ञानम् । तथा धूमदर्शनं मतिज्ञानं ततोऽग्निविषयं विज्ञानं श्रुतज्ञानं ततोऽपि दाहपाकादिविषयं विज्ञानं श्रुतज्ञानमिति श्रुतात् श्रुतोत्पत्तेर्मतिपूर्वं श्रुतमेतल्लक्षणमव्यापीति चेत्, नैष दोषो मतेर्यच्छ्रुतज्ञानं तदपि मतिज्ञानमेव कार्यकारणोपचारात् अन्नं वै प्राणाः, आयुर्वैघृतमित्यादिवत् । ततो व्याप्त्येव लक्षणं ।

अवाच्यानामनन्तांशो वाच्या भावा मता जिनैः ।
तद्वत्तेषामनन्तांशो वाच्यानामागमे पुनः ॥ २१९ ॥
मूर्त्ताशेषपदार्थानां वेदको गद्यतेऽवधिः ।
स भवप्रत्ययः प्रोक्तो नारकेष्वमरेषु चं ॥ २२० ॥

---

१ च शब्दात्तीर्थकराणाञ्च ।

क्षयोपशमजः षोढा शेषाणां जन्मभागिनाम् ।
अधोगतबहुद्रव्यबोधनादवधिर्मतः ॥ २२१ ॥
अनुगो[1]ऽननुगः शश्वदवस्थोऽनवस्थितः ।
मुनिभिर्वर्द्धमानोऽसौ हीयमानश्च कथ्यते ॥ २२२ ॥
सर्वाङ्गोत्थोऽवधिस्तीर्थकर्तृनारकनाकिनाम् ।
परेषां शंखराजीवस्वस्तिकाद्यङ्गचिन्हजः ॥ २२३ ॥
नन्द्यावर्तो ध्वजः पद्मः श्रीवत्सः कलशो हलम् ।
पावनं नरतिर्यक्षु नाभेरुपरि लक्षणं ॥ २२४ ॥
सरटो मर्कटो गोधा कंकः काको वकः खरः ।
अधस्ताल्लक्षणं नाभेर्विभंगस्य तु निन्दितम् ॥ २२५ ॥
क्षयोपशमयोगस्य तारतम्यव्यवस्थितेः ।
उत्पत्तिक्षेत्रमासाद्य जायते तारतम्यता ॥ २२६ ॥
योऽन्यदीयमनो[2]र्जातरूपिद्रव्यावबोधकः ।
स मनःपर्ययो द्वेधा विपुलर्जुमती मतः ॥ २२७ ॥
लब्ध्वान्यतमलब्धीनां संयतानां प्रजायते ।
मर्त्यक्षेत्रस्थितद्रव्यप्रकाशी स प्रकर्षतः ॥ २२८ ॥
साक्षात्कृताखिलद्रव्यपर्यायमविपर्ययम् ।
अनन्तं केवलज्ञानं कल्मषक्षयसंभवम् ॥ २२९ ॥
मतिश्रुतावधिज्ञानं मिथ्यात्वसमवायतः ।
विपरीतं त्रिधाज्ञेयं विपरीतार्थदर्शकम् ॥ २३० ॥
रूपादौ यद्विपर्यस्तं मत्यज्ञानं तदक्षजम् ।
धर्मरिक्तं श्रुताज्ञानं विज्ञेयं शब्दकारणम् ॥ २३१ ॥

---

१ ख पुस्तके "नानुगः" इति पाठः । २ क पुस्तके मनोयात इति पाठः ।

पर्याप्तस्यावधिज्ञानं मिथ्यात्वविषदूषितम् ।
विभंगं भण्यते सद्भिः क्षयोपशमसंभवम् ॥ २३२ ॥
उदये यद्विपर्यस्तं ज्ञानावरणकर्मणः ।
तदस्थास्नुतया नोक्तं मिथ्याज्ञानं सुदृष्टिषु ॥ २३३ ॥

कषायाः षोडश प्रोक्ता नोकषाया यतो नव ।
ईषद्भेदो न भेदोऽतः कषायाः पंचविंशतिः ॥ २३४ ॥
शामिकं शमतस्तेषां क्षायिकं क्षयतो मतम् ।
क्षयोपशमतो वृत्तं क्षायोपशमिकं पुनः ॥ २३५ ॥
द्वादशाद्यकषायाणामुदयस्य क्षये सति ।
यत्सत्त्वोपशमे तेषां चारित्रोदयघातिनाम् ॥ २३६ ॥
त्रयोदशकषायाणां परेषामुदये सति ।
चारित्रं जायते तत्स्यात् क्षायोपशमिकं यतेः ॥ २३७ ॥ युग्मम् ॥
व्रतदण्डकषायाक्षसमितीनां यथाक्रमम् ।
संयमो धारणं त्यागो निग्रहो विजयोऽवनम्[1] ॥ २३८ ॥
क्रियते यदभेदेन व्रतानामधिरोपणम् ।
कषायस्थूलतालीढः स सामायिकसंयमः ॥ २३९ ॥
व्रतानां भेदनं कृत्वा यदात्मन्यधिरोपणम् ।
शोधनं वा विलोपेनच्छेदोपस्थापनं मतं ॥ २४० ॥
सावद्यपरिहारेण प्राप्यते यः समाहितैः ।
व्रतगुप्तिसमित्याढ्यैः सः परीहारसंयमः ॥ २४१ ॥
वर्तते सूक्ष्मलोभे यः शमके क्षपके गुणे ।
स सूक्ष्मसांपरायाख्यः संयमः सूक्ष्मलोभतः ॥ २४२ ॥

---

१ रक्षणम् ।

चारित्रमोहनीयस्य प्रशमे प्रक्षयेऽपि वा ।
संयमोऽस्ति यथाख्यातो जन्मारण्यदवानलः ॥ २४३ ॥
चतुर्णां संयमावाद्यौ तृतीयोऽवादि पूर्वयोः ।
सूक्ष्मस्य सूक्ष्मलोभाद्धश्चतुर्णां पंचमस्ततः ॥ २४४ ॥
प्रथमाष्टकषायाणामुदयप्रलये सति ।
यः सत्त्वोपशमे[1] तेषामन्येषामुदये सति ॥ २४५ ॥
चतुः[2]स्थावरविध्वंसी दशधा[3] त्रसरक्षकः ।
सम्पद्यते परीणामः संयमासंयमोऽस्ति सः ॥२४६॥ युग्मम् ॥
अष्टौ स्पर्शा रसा पंच द्वौ गन्धौ वर्णपंचकं ।
षड्[4]जादयः स्वराः सप्त दुर्मनोऽक्षेष्वसंयमाः ॥ २४७ ॥
इत्यष्टाविंशतिः सन्ति चतुर्दशशरीरिषु ।
तेषामरक्षका जीवा ज्ञेया दक्षैरसंयताः ॥ २४८ ॥

इन्द्रियेष्वसंयमाः २८—जीवेषु १४ ।

रूपादीनां पदार्थानां सामान्यस्यावलोकनम् ।
चतुर्द्धा दर्शनं ज्ञेयं जीवसामान्यलक्षणम् ॥ २४९ ॥
प्रकाशश्चक्षुषोऽर्थानां चक्षुर्दर्शनमिष्यते ।
शेषाणां पुनरक्षाणामचक्षुर्दर्शनं जिनैः ॥ २५० ॥
साक्षाद्रूपिपदार्थानां सोऽवाद्यवधिदर्शनम् ।
मूर्त्तामूर्त्तपदार्थानामसौ केवलदर्शनम् ॥ २५१ ॥

---

१ ख पुस्तके " सत्तोपशमे " इतिपाठः । २ स्थावराणां चत्वारो जीवसमासाः, सूक्ष्मबादरपर्याप्तापर्याप्तभेदेन । ३ अवशिष्टदशजीवसमासाः । ४ षड्जं मयूरो वदति, ऋषभं चातको वदेत् । अजा वदति गांधारं, क्रुंचो वदति मध्यमं ॥ १ ॥ पुष्पसाधारणाकाले पंचमं कोकिलो वदेत् । दर्दुरं धुवकं चैव निषादं वदते गजः ॥ २ ॥

मनः पर्ययविज्ञानं विशेषविषयं यतः ।
मतिपूर्वं श्रुतज्ञानं दर्शनं न ततस्तयोः ॥ २५२ ॥

प्रवृत्तिर्यौगिकी लेश्या कषायोदयरंजिता ।
भावतो द्रव्यतो देहच्छविः षोढोभयी मता ॥ २५३ ॥
कृष्णा नीला च कापोती पीता पद्मा सिता स्मृता ।
लेश्या षड्भिः सदा ताभिर्गृह्यते कर्म जन्मिभिः ॥ २५४ ॥
पृथ्वीकायेषु सा[1] षोढा शुक्ला तोयशरीरिषु ।
पीता पावककायेषु कापोती पवनांगिषु ॥ २५५ ॥
षोढा पादपकायेषु बादरेषु निवेदिताः ।
कापोती सूक्ष्मकायेषु सर्वापर्याप्तकेषु च ॥ २५६ ॥
सर्वेषां जन्मिनां शुक्ला लेश्या वक्रगतौ[2] स्मृता ।
शरीरं कार्मणं शुक्लं पीतं भवति तैजसम् ॥ २५७ ॥
औदारिकं नृतिर्यक्षु सषट्लेश्यं कलेवरम् ।
पीता वैक्रियिके पद्मा शुक्ला लेश्या सुधाशिनाम् ॥ २५८ ॥
[3]मूलनिर्वर्त्तने पीता देवीनां तु कलेवरे ।
श्वाभ्राणां कथिता कृष्णा सा षोढोत्तरकालिकी ॥ २५९ ॥
षट्लेश्यांगा मतेऽन्येषां भौमज्योतिष्कभावनाः ।
गोमूत्रमुद्गकापोतवर्णाङ्गाः पवनांगिनः ॥ २६० ॥

इत्युक्ता द्रव्यलेश्या ।

भावलेश्योच्यते,——

---

१ द्रव्यलेश्या । २ विग्रहगतौ । ३ शरीरे देवीनां पीतलेश्या भवति विकुर्वणाकाले बहुविधा द्रव्यतः । नारकिनां विकुर्वणाकाले सा कृष्णलेश्या षड्विधा जायते परं स्वभावेन कृष्णालेश्या द्रव्यतो न तु भावतो भवति ॥

योगाविरतिमिथ्यात्वकषायजनिताङ्गिनाम् ।
संस्कारो भावलेश्यास्ति कल्मषास्रवकारणम् ॥ २६१ ॥
कापोती कथिता तीव्रो नीला तीव्रतरो जिनैः ।
कृष्णा तीव्रतमो लेश्यापरिणामः शरीरिणाम् ॥ २६२ ॥
पीता निवेदिता मंदः पद्मा मंदतरो बुधैः ।
शुक्ला मंदतमस्तासां वृद्धिः षट्स्थानयायिनी ॥ २६३ ॥
निर्मूलस्कंधयोश्छेदे भावा शाखोपशाखयोः ।
उच्चये पतितादाने भावलेश्या फलार्थिनाम् ॥ २६४ ॥
[1]षट् षट् चतुर्षु विज्ञेयास्तिस्रस्तिस्रः शुभास्त्रिषु ।
शुक्ला गुणेषु षट्स्वेका लेश्या निर्लेश्यमन्तिमम् ॥ २६५ ॥

इति मिथ्यादृष्ट्यादिषु लेश्याः ।

[2]कर्मभूमिष्वपूर्णानामाद्यास्तिस्रो विचक्षणैः ।
जघन्यावादि कापोती लेश्या क्षायिकदृष्टिषु ॥ २६६ ॥
षट् नृतिर्यक्षु तिस्रोऽन्त्याः संत्यसंख्येयजीविषु ।
एकाक्षविकलासंज्ञिष्वाद्यास्तिस्रो भवन्ति ताः ॥ २६७ ॥
[3]द्विः कापोताथ कापोतानीले नीला च मध्यमा ।
नीलाकृष्णे च कृष्णातिकृष्णा रत्नप्रभादिषु ॥ २६८ ॥

---

१ लेश्यावर्णनार्थं संदृष्टिः ६।६।६।६।३।३।३।१।१।१।१।१।१।०।

२ कर्मभूमिषु अपर्याप्तेषु क्षायिकसम्यग्दृष्टिषु जघन्यकापोतलेश्या भवति ।

३ अस्य संदृष्टिरित्थं-

०	०	०	०	०	०	०
३	३	३	२	२	१	१
उ	म	२	म	१	म	ज
		उ		उ		
		ज		ज		

नरकस्य शून्यसंज्ञा, प्रथमनरके उत्कृष्टा कापोता द्वितीये मध्यमा ।

रत्नप्रभायां जघन्या कापोता, शर्करायां मध्यमा कापोता, वालुकायामुत्कृष्टा कापोता नीला जघन्येत्येवं त्रिकं योज्यम् ।

अपूर्णेष्वादिमास्तिस्रो जघन्या भावनादिषु ।
त्रिषु पूर्णेषु पीतैका लेश्याऽवाचि सुधाशिषु ॥ २६९ ॥
सौधर्मैशानयोः पीता पीतापद्मे द्वयोस्ततः ।
कल्पेषु षट्स्वतः पद्मा पद्माशुक्ले द्वयोस्ततः ॥ २७० ॥
आनतादिषु शुक्लाऽतस्त्रयोदशसु मध्यमा ।
चतुर्दशसु सोत्कृष्टा विज्ञेयाऽनुदिशादिषु ॥ २७१ ॥

आद्ये निकायत्रये देवानामपर्याप्तानामाद्यास्तिस्रः पर्याप्तानामेका जघन्या पीतेति चतस्रो लेश्याः सौधर्मैशानयोर्मध्यमा पीता, ततो द्वयोरुत्कृष्टा पीता, जघन्या पद्मेत्येवं त्रिकं त्रिकं योज्यमिति भावः ।

लेश्याः समाप्ताः ।

अथ लेश्याकर्मोच्यते,—

रागद्वेषमदाविष्टो दुर्ग्रहो दुष्टमानसः ।
क्रोधमानादिभिस्तीव्रैर्ग्रस्तोऽनंतानुबंधिभिः ॥ २७२ ॥

१—भवनत्रिषु—संदृष्टिरित्थम्-



भवनवासिव्यन्तरज्योतिष्केषु चतुर्थी पीतलेश्या जघन्या भवति ।

निर्दयो निर[1]नुक्रोशो मद्यमांसादिलंपटः ।
सर्वदा [2]कंदनासक्तः कृष्णलेश्यो मतो जनः ॥ २७३ ॥
कोपी मानी मायी लोभी रागी द्वेषी मोही शोकी ।
हिंस्रः क्रूरश्चंडश्चौरो मूर्खः स्तब्धः स्पर्द्धाकारी ॥ २७४ ॥
निद्रालुः कामुको मंदः[3] कृत्याकृत्यविचारकः ।
महामूर्च्छो महारंभो नीललेश्यो निगद्यते ॥ २७५ ॥
शोक[4]भीमत्सरा[5]सूयापरनिन्दापरायणः ।
प्रशंसति सदात्मानं स्तूयमानः प्रहृष्यति ॥ २७६ ॥
वृद्धिहानी न जानाति न मूढः स्वपरान्तरम् ।
अहंकारग्रहग्रस्तः समस्तां कुरुते क्रियाम् ॥ २७७ ॥
श्लाघितो नितरां दत्ते रणे मर्तुमपीहते ।
परकीययशोध्वंसी युक्तः कापोतलेश्यया ॥ २७८ ॥
सम्यग्दृष्टिरविद्विष्टो हिताहितविवेचकः ।
[6]वदान्यः सदयो दक्षस्तेजोलेश्यो महामना[7]ः ॥ २७९ ॥
शुचिर्दानरतो भद्रो विनीतात्मा प्रियंवदः ।
साधुपूजोद्यतः शान्तः पद्मलेश्योऽनघक्रियः ॥ २८० ॥
निर्निदानोऽनहंकारः पक्षपातोज्झितोऽशठः ।
रागद्वेषपराचीनः शुक्ललेश्यः स्थिराशयः ॥ २८१ ॥
निरस्तोभयलेश्याका नित्यसौख्यपरंपराः ।
संसारप्रक्रमातीताः सिद्धाः संति निरापदः ॥ २८२ ॥

---

१ पश्चात्तापरहितः । २ कुत्सितान्नमशनं तस्मिन्नासक्तः । ३ मूढः बुद्धिहीनो वा । ४ भयं । ५ ईर्षाकरणं । ६ अतिशयेन दानं ददातीति वदान्यः । ७ क ख पुस्तकयोः " महात्मनः " इतिपाठः ।

ते भव्या भणिता जीवाः सिद्धियोग्या भवन्ति ये ।
विशुद्धेर्नियमस्तेषु[1] सुवर्णाश्मस्विवास्ति नो[2] ॥ २८३ ॥
संख्यातकमसंख्यातं कालं भ्रान्त्वाप्यनंतकम् ।
भव्याः सेत्स्यंति नाभव्याः कदाचन शरीरिणः ॥ २८४ ॥
भव्याभव्यत्वनिर्मुक्ताः सर्वद्वन्द्वबहिर्भवाः ।
पवित्राष्टगुणैश्वर्याः सिद्धाः संति निरामयाः ॥ २८५ ॥
पूर्णपंचेन्द्रियः संज्ञी लब्धकालादिलब्धिकः ।
सम्यक्त्वग्रहणे योग्यो भव्यो भवति शुद्धधीः ॥ २८६ ॥

भव्यः कर्माविष्टोऽर्द्धपुद्गलपरिवर्त्तपरिमाणकालेऽवशिष्टे प्रथमसम्यक्त्वयोग्यो भवतीति काललब्धिः । आदिशब्देन वेदनाभिभवजातिस्मरणजिनेन्द्रार्चादयो गृह्यन्ते ।

क्षायोपशमिकीं लब्धिं शौद्धीं देशनिकीं भवी[3] ।
प्रायोगिकीं समासाद्य कुरुते करणत्रयम् ॥ २८७ ॥

प्रागुपात्तकर्मपटलानुभागस्पर्द्धकानां शुद्धियोगेन प्रतिसमयानंतगुणहीनानामुदीरणा क्षायोपशमिकी लब्धिः ।

क्षयोपशमविशिष्टोदीर्णानुभागस्पर्द्धकप्रभवः परिणामः सातादिकर्मबन्धनिमित्तः सावद्यकर्मबन्धविरुद्धः शौद्धी लब्धिः ।

यथार्थतत्वोपदेशतदुपदेशकाचार्याद्युपलब्धिरुपदिष्टार्थग्रहणधारणाविचारणाशक्तिर्वा देशनिकी लब्धिः ।

---

१ भव्येषु । २ यथा धातुपाषाणेषु स्वर्णत्वं व्यक्तं भवति, क्वापि न भवत्यपि, परं तेषु स्वर्णत्वमस्ति यदि साधनिका मिलति तदा व्यक्तं भवति नो चेन्न, तथा भव्येष्वपि विशुद्धेर्नियमो नास्ति । ३ जीवः । ४ उदयस्पर्द्धकानां ।

अन्तः कोटीकोटीसागरोपमस्थितिकेषु कर्मसु बंधमापद्य-मानेषु विशुद्धिपरिणामयोगेनसत्कर्मसु संख्येयसागरोपमसहस्रोनायामन्तःकोटीकोटीसागरोपमस्थितौ स्थापितेषु आद्य-सम्यक्त्वयोग्यता भवतीति प्रायोगिकी लब्धिः ।

अथाप्रवृत्तकापूर्वानिवृत्तिकरणत्रयम् ।
विधाय क्रमतो भव्यः सम्यक्त्वं प्रतिपद्यते ॥ २८८ ॥

भव्योऽनादिमिथ्यादृष्टिः षड्विंशतिमोहप्रकृतिसत्कर्मकः[1][2] सादिमिथ्यादृष्टिर्वा[3] षड्विंशतिमोहप्रकृतिसत्कर्मकः सप्तविंशति मोहप्रकृतिसत्कर्मको वा अष्टाविंशतिमोहप्रकृतिसत्कर्मको वा प्रथमसम्यक्त्वमादातुकामः शुभपरिणामाभिमुखो[4]ऽन्तर्मुहूर्त्तमनंतगुणवृद्ध्या वर्द्धमानविशुद्धिश्चतुर्षु मनोयोगेष्वन्यतमेन मनोयोगेन चतुर्षु वाग्योगेष्वन्यतमेन वाग्योगेनौदारिकवैक्रियिककाययोगयोरन्यतरेण काययोगेन त्रिषु वेदेष्वन्यतमेन वेदेनालीढो निरस्तसंक्लेशो हीयमानान्यतमकषायः[5] साकारोपयोगो[6] वर्द्धमानशुभपरिणामयोगेन सर्वप्रकृतीनां स्थितिं ह्रासयन्नशुभप्रकृतीनामनुभागबंधमपसारयन्[7] शुभप्रकृतीनां रसं संवर्द्धयन् त्रीणि करणानि प्रत्येकमंतर्मुहूर्त्तकालानि कर्तुमुपक्रमते । तत्रान्तःकोटीकोटीस्थितिकानि कर्माणि कृत्वा अथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं[8] च क्रमेण प्रविशति

---

१ सम्यङ्मिथ्यात्वसम्यक्प्रकृतिमिथ्यात्वं विना २ सत्ताकर्माणि यस्य ३ यदा चतुर्थात्प्रथमे आगच्छति तदा । सम्यक्त्वमोहनीयं मिथ्यात्वमोहनीयं च मिथ्यात्व एवान्तर्गर्भिते स्तः मिथ्यात्वत्रयं गोलकरूपं वर्त्तते ४ शुभपरिणामेन सन्मुखः ५ हीयमाना अन्यतमा अनंतानुबंधिनः कषाया यस्य ६ ज्ञानोपयोगः ७ भिन्नं कुर्वन् ८ करणे अन्तर्मुहूर्त्तकाले वा ।

तत्र सर्वकरणानां प्रथमसमये स्वल्पा शुद्धिः । [1]ततः [2]प्रति-
समयमन्तर्मुहूर्त्तसमाप्तेरनंतगुणा द्रष्टव्या । सर्वाणि करणान्य-
न्वर्थानि, —— अथ प्रागप्रवृत्ताः कदाचिदीदृशाः करणाः
परिणामा यत्र तदथाप्रवृत्तकरणं । [3]अधःस्थैरुपरिस्थाः
समानाः प्रवृत्ताः करणाः यत्र तदधःप्रवृत्तकरणमिति वान्व-
र्थसंज्ञा । अपूर्वाः समये समये अन्ये शुद्धतराः करणाः यत्र
तदपूर्वकरणं । एकसमयस्थानामनिवृत्तयोऽभिन्नाः[4] करणा यत्र
तदनिवृत्तिकरणं । सर्वेषु करणेषु नानाजीवानामसंख्येयलोक-
प्रमाणाः परिणामा द्रष्टव्याः । तत्राथाप्रवृत्तकरणे स्थिति-
खंडनानुभागखंडनगुणश्रेणिसंक्रमा न संति परमनंतगुणवृद्ध्या
विशुद्ध्या अशुभप्रकृतीरनंतगुणानुभागहीना बध्नाति शुभ-
प्रकृतीरनंतगुणरसवृद्धाः, स्थितिमपि पल्योपमासंख्येयभाग-
हीनां करोति । अपूर्वकरणानिवृत्तिकरणयोः स्थितिखंडनादयः
संति । क्रमेणाशुभप्रकृतीनामनुभागबंधोऽनंतगुणहान्या शुभ-
प्रकृतीनां चानंतगुणवृद्ध्या वर्त्तते । तत्रानिवृत्तिकरणस्या-
संख्येयेषु भागेषु गतेष्वान्तरकरणमारभते, येन दर्शनमोहनीयं
निहत्य चरमसमये त्रिधा करोति शुद्धाशुद्धमिश्रभेदेन,
सम्यक्त्वं, मिथ्यात्वं, सम्यङ्मिथ्यात्वं चेति ।

प्रशमय्य ततो भव्यः सहानंतानुबंधिभिः ।
ताः मोहप्रकृतीस्तिस्रो याति सम्यक्त्वमादिमम् ॥ २८९ ॥

---

१ प्रथमसमयात् । २ अन्तर्मुहूर्त्तकालसमाप्तेर्यावत् समयं समयं प्रति अनंतगुणा ज्ञातव्या । ३ यत्र स्थाने उपरिस्था अनादिकालस्य रागद्वेषादिपरिणामा अधःस्थैरात्मानुयायिभिर्भव्यपरिणामैः सह समाना भवंति तदधःप्रवृत्तिकरणं । ४ भेदरहिताः किन्त्वेकरूपाः समानाः ।

संवेगप्रशमास्तिक्य[१]दयादिव्यक्तलक्षणम् ।
तत्सर्वदुःखविध्वंसि त्यक्तशंकादिदूषणम् ॥ २८९ ॥
निसर्गाधिगमाभ्यां यच्छ्रद्धानं तत्वगोचरम् ।
अज्ञानच्छेदकं त्रेधा सम्यक्त्वमिदमुच्यते ॥ २९० ॥
शमे सम्यक्त्वमिथ्यात्वमिश्रानंतानुबंधिनाम् ।
प्रादुर्भवति सम्यक्त्वं शमिकं क्षायिकं क्षये ॥ २९१ ॥
[२]क्षीणोदयेषु मिथ्यात्वमिश्रानंतानुबन्धिषु ।
लब्धोदये च सम्यक्त्वे क्षायोपशमिकं भवेत् ॥ २९२ ॥
रूपैर्भयंकरैर्वाक्यैर्हेतुदृष्टान्तदर्शिभिः ।
जातु क्षायिकसम्यक्त्वो न क्षुभ्यति विनिश्चलः ॥ २९३ ॥
नृगतौ दृष्टिमोहस्य मर्त्यः प्रारभते क्षयम् ।
निर्वर्त्तते [३]समस्तासु कर्मभूमिभवः स्फुटम् ॥ २९४ ॥
क्षयस्यारंभको यत्र[४] परं तस्मा[५]द्भवत्रयम् ।
[६]अनातिक्रम्य निर्वाति क्षीणदर्शनमोहतः ॥ २९५ ॥
शमको दृष्टिमोहस्य ज्ञेयो गतिचतुष्टये ।
संज्ञी पंचेन्द्रियः पूर्णः सान्तरः शुद्धमानसः ॥ २९६ ॥
निकायत्रितये पूर्वे श्वभ्रभूमिषु षट्स्वधः ।
वनितासु समस्तासु सम्यग्दृष्टिर्न जायते ॥ २९७ ॥
[७]चतुर्ष्वसंयताद्येषु सम्यक्त्वत्रयमिष्यते ।
वेदकेन विनान्येषु क्षायिकं त्रितये परे ॥ २९८ ॥

---

१ जीवादिपदार्था यथा जिनैरुक्तास्तथैव संतीत्यास्तिक्यं २ उदयरहितेषु, उपशमं गतेषु, परं पुनरुदयं नागमिष्यंति इति क्षयरूपेषु च । ३ चतुर्गतिषु ४ भवे ५ भवात् ६ अनुल्लंघ्य ७ अमुमेवार्थं संदृष्टिद्वारेण सूचयति—०।०।०।३।३।३।३।२।२।२।२।१।१।१।

नृभोगभूमितिर्यक्षु सौधर्मादिषु नाकिषु ।
आद्यायां श्वभ्रभूमौ च सम्यक्त्वत्रयमिष्यते ॥ २९९ ॥
[1]शेषत्रिदशतिर्यक्षु षट्स्वधः श्वभ्रभूमिषु ।
पर्याप्तेषु द्वयं ज्ञेयं क्षायिकेन बिनांगिषु ॥ ३०० ॥
आयुश्चतुष्कबंधेऽपि दृष्टिलाभोऽस्ति निश्चितम् ।
देवायुष्ये च बद्धेऽङ्गी स्वीकरोति व्रतद्वयम् ॥ ३०१ ॥
आद्यसम्यक्त्वतो भ्रष्टः पाकेऽनंतानुबंधिनाम् ।
मिथ्यादर्शनमप्राप्तः सासनः कथ्यतेतराम् ॥ ३०२ ॥
सम्यङ्मिथ्यात्वपाकेन परिणामो विमिश्रितः ।
विषमिश्रामृतास्वादः सम्यङ्मिथ्यात्वमुच्यते ॥ ३०३ ॥
मिथ्यात्वोदयतस्त्रेधा मिथ्यात्वं जायतेऽङ्गिनाम् ।
तच्च सांशयिकं ज्ञेयं गृहीतमगृहीतकम् ॥ ३०४ ॥
मिथ्यात्वभूषितस्तत्त्वं नादिष्टं[2] रोचते कुधीः ।
सदादिष्टमनादिष्टमतत्त्वं रोचते पुनः ॥ ३०५ ॥
जिनेन्द्रभाषितं तत्त्वं किमु सत्यमुतान्यथा ।
इति द्वयाश्रया दृष्टिः प्रोक्ता सांशयिकी जिनैः ॥ ३०६ ॥
परोपदेशतो जातं तत्त्वार्थानामरोचनम् ।
गृहीतमुच्यते सद्भिर्मिथ्यादर्शनमङ्गिनाम् ॥ ३०७ ॥
भेदाः क्रियाऽक्रियावादिविनयाज्ञानवादिनाम् ।
गृहीतासत्यदृष्टीनां त्रिषष्टित्रिशतप्रमाः ॥ ३०८ ॥
अङ्कतो ३६३
तत्राशीतिशतं ज्ञेयमशीतिश्चतुरुत्तरा ।
द्वात्रिंशत्सप्तषष्टिश्च तेषां भेदाः यथाक्रमम् ॥ ३०९ ॥

---

१ भवनवासिनो व्यंतरा ज्योतिष्काश्च । २ आदिष्टं कथितम् ।

तत्र क्रियावादिनामास्तिकानां कोक्कुलकंठेविद्धिकौशिक-हरिश्मश्रुमांथविकरोमशहारितमुंडाश्वलयनादयो अशीति-शतप्रमाणभेदाः । तेषामानयनमुच्यते स्वभावनियतिकाले-श्वरात्मकर्तृत्वानां पंचानामधो जीवादिपदार्थानां नवानामधः स्वतः परतो नित्यत्वानित्यत्वानि च चत्वारि संस्थाप्य, अस्ति स्वतो जीवः स्वभावतः १ अस्ति परतो जीवः स्वभा-वतः २ अस्ति नित्यो जीवः स्वभावतः ३ अस्त्यनित्यो जीवः स्वभावतः ४ इत्याद्युच्चारणया राशित्रयस्य परस्पर-वधेन भेदा लभ्यन्ते १८० तेषामित्थं संदृष्टिः—

स्व.	नियति		काल		ईश्वर		आत्म	
जी.	अ.	आ.	बं.	सं.	नि.	मो.	पु.	प.
स्व.		प.		नित्य		अनित्य		

स्वभावादीनाह,—

कः स्वभावमपहाय वक्रतां कंटकेषु विहगेषु चित्रताम् ।
मत्स्यकेषु कुरुते पयोगतिं पंकजेषु खरदंडतां परः ॥ ३१० ॥

यदा यथा यत्र यतोऽस्ति येन यत्,
तदा तथा तत्र ततोऽस्ति तेन तत् ।
स्फुटं नियत्येह नियंत्र्यमाणं,
परो न शक्तः किमपीह कर्तुम् ॥ ३११ ॥

सुप्तेषु जागर्त्ति सदैव कालः,
कालः प्रजाः संहरते समस्ताः ।
भूतानि कालः पचतीति मूढाः
कालस्य कर्तृत्वमुदाहरन्ति ॥ ३१२ ॥

अज्ञः शरीरी नरकेऽथ नाके,
प्रपेर्यमाणो व्रजतीश्वरेण ।
स्वस्याक्षमो दुःखसुखे विधातु-
मिदं वदन्तीश्वरवादिनोऽन्ये ॥ ३१३ ॥
एको देवः सर्वभूतेषु लीनो,
नित्यो व्यापी सर्वकार्याणि कर्त्ता ।
आत्मा मूर्त्तः सर्वभूतस्वरूपं,
साक्षाज्ज्ञाता निर्गुणः शुद्धरूपः ॥ ३१४ ॥

अक्रियावादिनां नास्तिकानां मरीचिकुमारोलूककपिल-गार्ग्यव्याघ्रभूतिवाग्वलिमाठरमौङ्गिल्यादयश्चतुरशीतिप्रमा भेदास्तेषामानयनमाह,——स्वभावादीनां पंचानामधः पुण्यपापानिष्टेः सप्तानां जीवादीनामधः स्वपरद्वयं निक्षिप्य नास्ति स्वतो जीवः स्वभावतः १ नास्ति परतो जीवः स्वभावतः २ इत्याद्युच्चारणे परस्पराभ्यस्ते वा लब्धा भेदाः सप्ततिः ७० । तेषां संदृष्टिरित्थम्

स्व.		नियति.	काल.		ईश्व.	आत्म.
जी.	अ.	आ.	बंध	सं.	नि.	मो.
स्वतः			परतः			

नियतिकालयोरधो जीवादिसप्तकं विन्यस्य नास्ति जीवो नियतितः नास्त्यजीवो नियतितः इत्याद्युच्चारणेन लब्धाः १४ चतुर्दश ।

तेषां संदृष्टिरित्थम्——

नि.	का.					
जीव	अजीव	आ.	बं.	सं.	नि.	मो.

पूर्वैः सहैते मिलिताः सन्तश्चतुरशीति ८४ भेदाः भवन्तीति ।

विनयवादिनां वशिष्ठपराशरजतुकर्णवाल्मीकिरोमहर्षणशक्तिदत्तव्यासैलापुत्रोपमन्यवैंद्रदत्तायस्थूणादयो द्वात्रिंशद्भेदाः । तेषामानयनमाह,——देवनृपतियतिज्ञातिवृद्धबालजननीजनकानामधो वाक्कायदानमनश्चतुष्टयं निक्षिप्य विनयो मनसा देवेषु कार्यः १ विनयो वाचा देवेषु कार्यः २ विनयः कायेन देवेषु कार्यः ३ विनयो दानेन देवेषु कार्यः ४ इत्याद्युच्चारणेन लब्धा भेदाः ३२ ।

तेषां संदृष्टिरित्थं ज्ञेया,——

देव.	नृप.	पति	ज्ञाति	वृद्ध	बाल	जननी	जनक
वचन		काय		दान		मन	

अज्ञानवादिनां साकल्यवाकलकुथुमिचारायणकमठमाध्यन्दिनमौदपिप्पलादवादरायणैतिकायनवसुजैमिनिप्रभृतयः सप्तषष्टिसंख्याभेदाः । तेषामानयनमाह,——जीवादीनां नवानामधः सत्, असत्, सदसत्, अवाच्यं, सदवाच्यं, असदवाच्यं, सदसदवाच्यमिति सप्त निक्षिप्य सज्जीवभावं को वेत्ति, असज्जीवभावं को वेत्ति, इत्याद्युच्चारणेन लब्धा भेदाः ६३ । तेषां संदृष्टिरित्थम्,——

सत्.	असत्.	सदसत्	अवाच्य	सदवाच्य	असदवाच्य	सदसदवाच्य
जीव	अजीव	आश्रव	बंध	संवर	निर्जरा	मोक्ष

पुनर्भावोत्पत्तिमाश्रित्य सद्भावासद्भावसदसद्भावावाच्यानां चतुष्टयं प्रस्तार्य " सद्भावोत्पत्तिं को वेत्ति, असद्भावोत्पत्तिं

को वेत्ति, सदसद्भावोत्पत्तिं को वेत्ति, अवाच्यभावोत्पत्तिं को वेत्ति" इत्युच्चारणया (तत्संदृष्टिः ० ० ० ०) लब्धैश्चतुर्भिरेतैः सह पूर्वभेदाः ६३ मिलित्वा ६७ सप्तषष्टिसंख्याका भवन्ति ।

सर्वसमासे ३६३ भेदाः भवन्ति ।

एकेन्द्रियादि जीवानां घोराज्ञानविवर्त्तिनाम् ।
तीव्रसन्तमसाकारं मिथ्यात्वमगृहीतकम् ॥ ३१५ ॥
एकैकं न त्रयो द्वे द्वे रोचंते न परे त्रयः ।
एकस्त्रीणीति जायंते सप्ताप्येते कुदर्शनाः ॥ ३१६ ॥
सकलोपशमे प्राप्तिः सम्यक्त्वस्यादिमेष्यते ।
निश्चयेनापरा[1] सर्वदेशोपशमने पुनः ॥ ३१७ ॥
मिथ्यात्वं पृष्ठतो लाभे सम्यक्त्वस्यादिमे भवेत् ।
मिथ्यात्वं मिश्रकं वास्य लाभेऽन्यत्रा[2]स्ति पृष्ठतः ॥३१८॥

शिक्षालापोपदेशानां ग्राहको यः समानसः ।
सः संज्ञी कथितोऽसंज्ञी हेयादेयाविवेचकः ॥ ३१९ ॥
गृण्हाति शिक्षते कृत्यमकृत्यं सकलं तदा ।
नाम्नाहूतः समभ्येति समनस्कोऽन्यथेतरः ॥ ३२० ॥
क्षयोपशमतः संज्ञी स्वान्तावरणकर्मणः ।
भवत्युदयतोऽसंज्ञी विचेती भूतचेतनः ॥ ३२१ ॥

---

१ सम्यक्त्वस्य द्वितीया क्षयोपशमसम्यक्त्वरूपाप्राप्तिः षट् प्रकृतीनाम् उपशमे एकसम्यक्त्वप्रकृतिमिथ्यात्वस्योदये सति । २ अन्यत्र द्वितीय वेलायां अस्य सम्यक्त्वस्य लाभे सति पृष्ठतः मिथ्यात्वं भवति अथवा तृतीयगुणस्थानं भवति ।

अन्नादिसंज्ञया सर्वां प्रवृत्तिं कुरुते यतः ।
ततो न मानसाभावे प्रवृत्तिस्तस्य वाध्यते ॥ ३२२ ॥

शरीरत्रयपर्याप्तिषट्कयोर्योग्यपुद्गलाः ।
गृह्यंते येन स ज्ञेयो दक्षैराहारको भवी ॥ ३२३ ॥
समुद्घातं गतो योगी मिथ्यादृक्सासनायताः ।
विग्रहर्त्ताविनाहाराः सिद्धायोगाश्च भाषिताः ॥ ३२४ ॥
भवेदौदारिको दंडे मिश्रो दंडकपाटयोः ।
कार्मणो योगिनो योगः प्रतरे लोकपूरणे ॥ ३२५ ॥
सदंडारर[1]मंथानपूरणानि यथाक्रमम् ।
चतुर्भिः समयैः कृत्वा तावद्भिर्विनिवर्त्तते ॥ ३२६ ॥
षण्मासायुषि शेषे स्यादुत्पन्नं यस्य केवलम् ।
समुद्घातमसौ याति केवली नापरः पुनः ॥ ३२७ ॥

उपयोगो मतो द्वेधा बाह्याभ्यंतरभेदतः ।
स सामान्यविशेषाणां द्रव्याणां दर्शने क्षमः ॥ ३२८ ॥
बाह्योऽत्राष्टविधं ज्ञानं विशेषाकारदर्शकम् ।
सामान्यदृक् चतुर्द्धास्ति दर्शनं ज्ञेयमान्तरम् ॥ ३२९ ॥
घातिकर्मक्षये वृत्तिस्तस्य [2]केवलिनोः समम् ।
तत्क्षयोपशमेऽन्यत्र[3] क्रमतो वृत्तिरीरिता ॥ ३३० ॥
छद्मस्थेषूपयोगोऽस्ति द्वेधाप्यन्तर्मुहूर्त्तगः ।
साद्यपर्य्यवसानोऽसौ जायते जिनयोः समम् ॥ ३३१ ॥

---

१ अररम्=कपाटम् । २ सयोग्ययोगिनोः । ३ अन्यास्मिन् काले तस्योपयोगस्य वृत्तिरनुक्रमतः कथिता न तु युगपत् ।

आत्मयोग्यतया जातो यो भावो वस्तुदर्शकः ।
उपयोगो द्विधा सोऽस्ति साकारेतरभेदतः ॥ ३३२ ॥
विशेषार्थप्रकाशो यो मनोऽवधिमतिश्रुतैः ।
उपयोगः स साकारो जायतेऽन्तर्मुहूर्त्तगः ॥ ३३३ ॥
सामान्यार्थावभासो यो हृषीकावधिमानसैः ।
उपयोगो निराकारः स ज्ञेयोऽन्तर्मुहूर्त्तगः ॥ ३३४ ॥
द्विविधोऽप्युपयोगोऽसौ युगपज्जिनयोर्भवेत् ।
प्रत्यक्षीकृतनिःशेषतत्त्वः सादिरनंतकः ॥ ३३५ ॥
द्वित्रिसप्तद्विषु ज्ञेया गुणेषु क्रमतो बुधैः ।
[1]पंच षट् सप्त संति द्वावुपयोगा यथाक्रमम् ॥ ३३६ ॥
तेषां संदृष्टिरित्थम्,—

५, ५, ६, ६, ६, ७, ७, ७, ७, ७, ७, ७, २, २,

सयोगविक्रियातेजः कषायवेदनासु वै ।
आहारे मरणे सप्त समुद्धाता निवेदिताः ॥ ३३७ ॥
वहिरात्मप्रदेशानां ते[2] समूहेन निर्गमाः ।
[3]एकदिकौ स्मृतावंत्यौ सर्वदिक्काः परे पुनः ॥ ३३८ ॥
[4]चतुर्थे वासराः सप्त पंचमे ते चतुर्दश ।
आद्यसम्यक्त्वविच्छेदो गुणे पंचदश द्वयोः ॥ ३३९ ॥

---

१ ज्ञानत्रयं दर्शनद्वयमेवं पंच, ज्ञानत्रयं दर्शनत्रयमेवं षट्, ज्ञानचतुष्टयं दर्शनत्रयमेवं सप्त, ज्ञानमेकं दर्शनमेकमिति द्वयम् । २ समुद्धाताः । ३ अंत्यौ आहारमरणयोर्द्वौ समुद्धातावेकस्यामेव दिशि गच्छतः पुनरन्ये पंच सर्वत्र गच्छंति । ४ चतुर्थगुणे यदि उपशमसम्यक्त्वस्यांतरो भवति तदा दिनसप्तकं, पंचमे १४, षष्ठसप्तयोः पंचदश ।

तृतीयः संयमस्तुर्यं ज्ञानं सम्यक्त्वमादिमम् ।
आहारकद्वयं ज्ञेयं यत्रैकं तत्र नापरम् ॥ ३४० ॥
उत्तीर्योपशमश्रेणेः स मनःपर्यये गते ।
प्रमत्तं साद्यसम्यक्त्वं तुर्यं ज्ञानं विभाव्यते ॥ ३४१ ॥
न पश्चात्कृतमिथ्यात्वे प्राप्तशामिकदर्शने ।
संभवाभावतस्तत्र प्रमत्ते तुर्यबोधनम् ॥ ३४२ ॥
आहारर्द्धिः परीहारस्तीर्थकृत्तुर्यवेदनम् ।
नोदये तानि जायंते स्त्रीनपुंसकवेदयोः ॥ ३४३ ॥
इहामुत्र परं दुःखं यकाभिरुपयांति ताः ।
संज्ञाश्चतस्र आहारभीमैथुनपरिग्रहाः ॥ ३४४ ॥
पूर्णाः पूर्णेषु ताः सर्वाः प्रमत्तांतेषु देहिषु ।
आहारसंज्ञया हीनास्तिस्रस्ता गुणयोर्द्वयोः ॥ ३४५ ॥
पंचस्वाद्येऽनिवृत्त्यंशे द्वे मैथुनपरिग्रहे ।
सूक्ष्मलोभं ततो यावत्संज्ञा ज्ञेया परिग्रहे ॥ ३४६ ॥
असद्वेद्योदयाभावादप्रमत्तेऽन्नसंज्ञया ।
विना संज्ञाः परास्तिस्रः संभवंति यथागमम् ॥ ३४७ ॥
असातोदयतो रिक्तीभूतकोष्ठतयाङ्गिनः ।
अन्नोपयोगदृष्टिभ्यामन्नसंज्ञा प्रवर्तते ॥ ३४८ ॥
भयोपयोगतो भीमदृष्टितः सत्वहानितः ।
भयकर्मोदयाज्जीवे भयसंज्ञोपजायते ॥ ३ ९ ॥
स्ववेदोदीरणात्पुंसि वृष्यभोजनतः स्त्रियाः ।
संगोपयोगतः संज्ञा पुंसो मैथुनिकी स्त्रियाम् ॥ ३५० ॥

---

१ मणपज्जय परिहारो पढमुवसम्मत्त दोण्णिआहारो ।
एदेसु एक्कपगदे णत्थित्ति असेसयं जाणे ॥ गो० ७३० ॥
२ द्वितीयोपशमेन सह मनःपर्ययोभवितुमर्हति, न प्रथमोपशमेन ।

षण्ढकर्मोदयात्तीव्रा वह्निज्वालेव तापिका ।
द्वयोर्योगोपयोगाभ्यां संज्ञा षण्ढस्य मैथुने ॥ ३५१ ॥
लोभकर्मोदयाज्जंतोरीक्षणादुपयोगिनः ।
मूर्च्छोपयोगतः संज्ञा प्रादुरस्ति परिग्रहे ॥ ३५२ ॥

यः प्रमाणनयमार्गकोविदो
जीवमार्गणगुणावलोकनम् ।
आदरेण विदधाति शुद्धधीः
सोऽश्नुतेऽमितगतिः शिवास्पदम् ॥ ३५३ ॥

इत्यमितगत्याचार्यप्रणीते पंचसंग्रहनामकग्रन्थे जीवसमासाख्यः प्रथमः परिच्छेदः ।

अथ प्रकृतिस्तवः ।

यो ज्ञात्वा प्रकृतीर्देवो दग्धवान् ध्यानवन्हिना ।
तं प्रणम्य महावीरं क्रियते प्रकृतिस्तवः ॥ १ ॥
ज्ञानदृष्ट्यावृती वेद्यं मोहनीयायुषी मताः ।
नामगोत्रान्तरायाश्च मूलप्रकृतयोऽष्टधा ॥ २ ॥
एताः पंच नव द्वे स्युरष्टाविंशतिरुत्तराः ।
चतस्रो नवतिस्त्र्यग्रा द्वे पंच च यथाक्रमम् ॥ ३ ॥
गृहीतः पुद्गलस्कंधो मिथ्यात्वासंयमादिभिः ।
प्रयाति कर्मरूपेण परिणाममनेकधा ॥ ४ ॥
ज्ञानस्योदयमापन्नाः शरीरिणि पिधायिकाः[1] ।
भुवनोद्योतिनो व्योम्नि सूर्यस्येवाम्बुदावलीः ॥ ५ ॥
मतिश्रुतावधिज्ञानं मनःपर्ययकेवले ।
पंचानामावृतेस्तेषां[2] पंचज्ञानावृतीः विदुः ॥ ६ ॥

---

१ आच्छादिकाः । २ आवरणात् ।

आर्यावृत्तम् ।

निद्रानिद्रा प्रचलाप्रचला स्त्यानादिगृद्धयो निद्रा ।
प्रचला चक्षुरचक्षुरवधिकेवलदर्शनावृतयः[1] ॥ ७ ॥

अनुष्टुप् वृत्तम् ।

वारिका दर्शनस्यैताः प्रतिहार्य इवात्मनः ।
दर्शनावरणस्योक्ता नव प्रकृतयो जिनैः ॥ ८ ॥
[2]मध्वक्तसायकस्येव सुखदुःखविधायिनः ।
द्वे सद्वेद्यमसद्वेद्यं वेद्यस्य प्रकृती मते ॥ ९ ॥
नीयते येन मूढत्वं मद्येनेव शरीरवान् ।
मोहनं तत् द्विधा प्रोक्तं दृष्टिचारित्रमोहतः ॥ १० ॥
एकधा बंधतस्तत्र सत्वतो दृष्टिमोहनम् ।
त्रेधा सम्यक्त्वमिथ्यात्वसम्यङ्मिथ्यात्वभेदतः ॥ ११ ॥
कषाया नोकषायाश्च द्वेधा चारित्रमोहनम् ।
षोडश प्रथमास्तत्र द्वितीया नव भाषिताः ॥ १२ ॥
क्रोधो मानो जिनैर्माया लोभः प्रत्येकमीरिताः[3] ।
तत्रानंतानुबंध्यादि विकल्पेन चतुर्विधाः ॥ १३ ॥
ते च यथार्थनामानः सत्रा[4]नंतानुबंधिभिः ।
[5]अप्रत्याख्यानावृत्प्रत्याख्यानावृत्संज्वलनाः स्मृताः ॥ १४ ॥
हास्यं रत्यरती शोको भयं साकं जुगुप्सया ।
स्त्रीपुंनपुंसका वेदा नोकषाया नवेरिताः ॥ १५ ॥

---

१ आवरण्यः । २ मधुलिप्तखड्गस्येव । ३ कथिताः । ४ सह । ५ अप्रत्याख्यानावरण, प्रत्याख्यानावरणं, संज्वलनं ।

विद्युन्मालाछन्दः ।

आयुः श्वाभ्रं तैर्यग्योनं मार्त्यं दैवं तज्ज्ञातव्यम् ।
कारागारेणेवोद्बद्धो येनाङ्ग्यास्ते स्थास्नुर्भूयः ॥ १६ ॥

अनुष्टुप् ।

गतिजातिशरीराद्याः क्रियंते येन भूरिशः ।
कुलालेनेव कुंभाद्या नामकर्म तदुच्यते ॥ १७ ॥
पिंडापिंडाभिधास्तस्य द्वेधा प्रकृतयो मताः ।
पिंडाश्चतुर्दश प्राज्ञैस्तत्राष्टाविंशतिः पराः ॥ १८ ॥
पिंडाः १४ । अपिंडाः २८ । मिलिताः ४२ । भेदतः ९३ ।
गतिर्जातिः शरीरांगोपांगौ संघातसंहती ।
वर्णगन्धरसस्पर्शबंधानुपूर्व्यः संस्थितिः ॥ १९ ॥
निर्माणागुरुलघ्वाह्वे परघातोपघातने ।
उच्छ्वास आतपोद्योतौ तीर्थकृत्त्वनभोगती ॥ २० ॥
त्रसबादरपर्याप्तप्रत्येकानि स्थिरं शुभम् ।
सुभगं सुस्वरादेये यशःकीर्तिश्च सेतराः ॥ २१ ॥
नारकी येन तैरश्ची मानुषी त्रैदशी गतिः ।
विधीयते तदादिष्टं गतिनाम चतुर्विधम् ॥ २२ ॥
एकद्वित्रिचतुः पंच हृषीका येन देहिनः ।
क्रियंते पंचधा तत्स्याज्जातिनामेह पंचधा ॥ २३ ॥

आर्यावृत्तम् ।

औदारिकवैक्रियिकावाहारकतैजसौ परः कर्म ।
इति पंचकायजनकं शरीरनामास्ति पंचविधम् ॥ २४ ॥

अनुष्टुप् ।

अंगोपांगं त्रिकायानामंगोपांगकरं त्रिधा ।
संघातः पंचधांगानां संघातजनकक्षमः ॥ २५ ॥

वज्रर्षभादिनाराचमाद्यं संहननं परम् ।
वज्रनाराचनाराचे अर्द्धनाराचकीलके ॥ २६ ॥
अन्ये संहननं षष्ठमसंप्राप्तास्रपाटिकम् ।
अस्थिबंधकरं नाम षोढा संहननं विदुः ॥ २७ ॥
जनकं शुक्लादिवर्णानां वर्णनामास्ति पंचधा ।
गंधनाम द्विधा शस्ताशस्तगंधकरं स्मृतम् ॥ २८ ॥
मधुरोऽम्लः कटुस्तिक्तः कषायः पंच ये रसाः ।
तेषां विधायकं कर्म रसनामास्ति पंचधा ॥ २९ ॥
कर्कशः शीतलः स्निग्धो गुरुः स्पर्शोऽस्ति सेतरः ।
अष्टानां कारणं तेषामष्टधा स्पर्शनामकम् ॥ ३० ॥
पंचांगबंधनं ज्ञेयं पंचधा नाम बंधनम् ।
चतुर्विधानुपूर्व्यस्ति चतुरीतिप्रवेशिका ॥ ३१ ॥

आर्यावृत्तम् ।

ज्ञेयं समचतुरस्रं न्यग्रोधं सातिकुब्जके भविनः ।
हुंडं वामनकाख्यं संस्थानं जायते षोढा ॥ ३२ ॥

अनुष्टुप् छन्दः ।

नभोरीतिर्द्धिधा ज्ञेया शस्ताशस्तगतिप्रदा ।
चतुर्दशेति निर्णीताः पिंडप्रकृतयो जिनैः ॥ ३३ ॥
क्रियते येन नीचोच्चैः स्थाने चित्रकृतो यथा ।
प्रकृती तस्य नीचोच्चे द्वे प्रोक्ते गोत्रकर्मणः ॥ ३४ ॥
यो दानलाभभोगानां विघ्नं वीर्योपभोगयोः ।
भांडागारिकवद्धत्ते सोऽन्तरायोऽस्ति पंचधा ॥ ३५ ॥
नाम्नः षड्विंशतिं त्यक्त्वा मोहप्रकृतिद्वयम् ।
सर्वेषां कर्मणां शेषा बंधप्रकृतयः स्मृताः ॥ ३६ ॥

१२० बन्धप्रकृतयः ।

अबंधा मिश्रसम्यक्त्वे बंधसंघातयोर्दश ।
स्पर्शे सप्त भवन्त्येका गंधेऽष्टौ रसवर्णयोः ॥ ३७ ॥

२ । ५ । ५ । ७ । १ । ८ मिलिताः २८ ।

सम्यङ्मिथ्यात्वसम्यक्त्वप्रकृतिद्वितयोज्झिताः ।
एताः प्रकृतयो यांति कदाचिदपि नोयदम् ॥ ३८ ॥

२६ । १२२ उदय प्रकृतयः ।

मतेनापरसूरीणां सर्वाः प्रकृतयोऽगिनाम् ।
बंधोदयौ प्रपद्यन्ते स्वहेतुं प्राप्य सर्वदा ॥ ३९ ॥

सर्वाः १४८ ।

आर्यावृत्तम् ।

वैक्रियिकाहारकनृश्वाभ्रत्रिदशद्वयानि सम्यक्त्वम् ।
सम्यङ्मिथ्यात्वोच्चे त्रयोदशोद्वेल्लना ज्ञेयाः ॥ ४० ॥

त्रयोदश १३ उद्वेलनप्रकृतयः ।

या विनश्यन्त्यनासाद्य स्वमुखेनोदयं बुधैः ।
उद्वेल्लनाभिधाः प्रोक्ताः कर्मप्रकृतयोऽत्र ताः ॥ ४१ ॥

आर्यावृत्तम् ।

दशविघ्नज्ञानावृतयो दृष्ट्यावृतयो नवोपघाताख्यम् ।
तैजसकार्मणनिर्मितवर्णचतुष्टयभयजुगुप्साः ॥ ४२ ॥

मिथ्यात्वागुरुलघुनी कषायषोडशकमीरिताः सद्भिः ।
सप्तयुता चत्वारिंशद्ध्रुवसंज्ञाः प्रकृतयस्ताः ॥ ४३ ॥

परघातोद्योतातपतीर्थकृदाहारकद्वयानि चोच्छ्वासः ।[1]
आयुश्चतुष्कमेता एकादश सन्ति शेषाख्याः[2] ॥ ४४ ॥
द्वे वेद्ये गतयो हास्यचतुष्कं द्वे नभोगती ।
षट्के संस्थानसंहत्योर्गोत्रे वैक्रियिकद्वयम् ॥ ४५ ॥
चतुष्कमानपूर्वीणां दशयुग्मानि जातयः ।
औदारिकद्वयं वेदा एताः सपरिवृत्तयः[3] ॥ ४६ ॥
संख्या ६२ ।
एताः प्रकृतयः साष्टाचत्वारिंशच्छतप्रमाः ।
सत्युत्तरोत्तरा ज्ञेयाः संख्यातीता विचक्षणैः ॥ ४७ ॥

आगममार्गप्रकटितसारं
यो हृदि धत्ते प्रकृतिविचारम् ।
याति स भव्योऽमितगतिदृष्टं
नाकिनिषेव्यः पदमनदृष्टम् ॥ ४८ ॥

इति श्रीमदमितगत्याचार्यवर्यप्रणीते पंचसंग्रहनामकग्रंथे
प्रकृतिस्तवाख्यो द्वितीयः परिच्छेदः ॥

अथ कर्मप्रकृतिबंधस्तवः ।

प्रणम्य भक्तितः सर्वान् सर्वज्ञान् सर्वदर्शिनः ।
बन्धोदयसदुच्छेदवर्णना क्रियते मया ॥ १ ॥

---

१ क-ख पुस्तकयोः "परघातोपघातातप" इत्यादि पाठः किन्त्वनेन मात्राधिक्यं । तथाच गोम्मटसार कर्मकाण्डेऽपि "सेसे तित्थाहारं परघाद चउक्क सव्व आऊणि" इति पाठः परघातचतुष्के परघातोच्छ्वासोद्योतातप प्रकृतयः सन्ति । २ अध्रुवसंज्ञाः । ३ कदाचित्कस्याः कदाचित्कस्या उदयः, एतासां नियतोदयो नास्ति । ४ सत्ता ।

बंधोऽभिधीयतेऽन्योऽन्यं संपर्को जीवकर्मणोः ।
द्रव्यादेः फलदातृत्वं कर्मणामुदयो जिनैः ॥ २ ॥
संमुदीर्यानुदीर्णानां स्वल्पीकृत्य स्थितिं बलात् ।
कर्मणामुदयावल्यां प्रक्षेपणमुदीरणा ॥ ३ ॥
कर्मणां फलदातृत्वं द्रव्यक्षेत्रादियोगतः ।
उदयः पाकजं ज्ञेयमुदीरणमपाकजम् ॥ ४ ॥
कर्मणां विद्यमानत्वं यत्सत्त्वं तन्निगद्यते ।
तानि चत्वारि जायंते प्रथमोत्तरकर्मणाम् ॥ ५ ॥
तदुक्तम् ,—
परस्परं प्रदेशानां प्रवेशो जीवकर्मणोः ।
एकत्वकारको बंधो रुक्मकांचनयोरिव ॥ ६ ॥
ग्रहणं कर्मयोग्यानां पुद्गलानां प्रतिक्षणम् ।
सकषायस्य जीवस्य बंधोऽनेकविधः स्थितः ॥ ७ ॥
कर्मणां संगृहीतानां सत्तोक्ता विद्यमानता ।
उदयो भुक्तिकालस्तु धान्यानामिव कोविदैः ॥ ८ ॥
कृष्ट्वा कृष्ट्वोपरिस्थानां प्रक्षेपणमुदीरणा ।
असंख्यकर्मभागानां स्थिराणामुदयावली ॥ ९ ॥
जीवकर्मप्रदेशानां विश्लेषो यः परस्परम् ।
अपुनर्भाविकोऽवाचि स क्षयः क्षीणकल्मषैः ॥ १० ॥
प्रवध्नंत्यप्रमत्तान्ताः सप्ताष्टौ मिश्रवर्जिताः ।
वर्जितान्यायुषा सप्त मिश्रापूर्वानिवृत्तयः ॥ ११ ॥
विनायुर्मोहनीयाभ्यां षट्कं सूक्ष्मकषायकाः ।
एकमेव त्रयो वेद्यं निर्बन्धो योगवर्जितः ॥ १२ ॥

---

१ उदयमानीय बलात्, न उदयागतानां कर्मणाम् ।

तत्संदृष्टिरित्थम् ,—

७	७	७	७	७	७	७	७	७	६	१	१	१	०
८	८	०	८	८	८	८	०	०					

अष्टौ कर्माणि सूक्ष्मान्ताः भुंजते मोहनं विना ।
शान्तक्षीणकषायाख्यावन्तिमौ घातिभिर्विना ॥ १३ ॥

८।८।८।८।८।८।८।८।८।८।७।७।४।४।

स्वस्थावस्थायामिति

उदीरयंति घातीनि[1] तत्स्था[2] मोहं समोहनाः[3] ।
वेद्यायुषी प्रमत्तान्ता योग्यंता गोत्रनामनी ॥ १४ ॥

अतोऽत्रायुषो मरणावल्यामुदीरणा नास्ति[4] ।

ततः——

सप्तैव मरणावल्यां प्रमत्तान्ता अमिश्रकाः[5] ।
अष्टौ च सर्वदाऽमिश्रस्तस्य[6] तस्यामभावतः[7] ॥ १५ ॥
पंच[8] मोहं विना सूक्ष्मः क्षीणो[9] द्वे गोत्रनामनी ।
कर्मणी स्फुटमावल्यामुदीरयति निश्चितम् ॥ १६ ॥

८	८	७	८	८	८	६	६	६	६	५	५	२	०
७	७	०	७	७	७				५		२		

सत्ता कथ्यते,——

शांतान्तेषु समस्तानि सप्त मोहमृते परे ।
जिनयोः संत्यघातीनि घातिकर्मविमुक्तयोः ॥ १७ ॥

---

१ ज्ञानदर्शनान्तरायत्रयं । २ मोहस्थाः । ३ सूक्ष्मान्ता मोहमुदीरयंति । ४ मरणावस्थायामन्तर्मुहूर्त्तायुषि उदीरणा नास्ति । ५ मिश्रगुणस्थानवर्जिताः । ६ मिश्रस्य । ७ मरणावल्याम् । ८ सूक्ष्मसांपरायान्ते मोहंविनापंचकर्मणामुदीरणा शेषकालेषण्णाम् । ९ क्षीणश्च पंच ।

तत्संदृष्टिर्यथा——

८।८।८।८।८।८।८।८।८।८।८।७।४।४।

बंधहेतुः कथ्यते,——

सम्यक्त्वं तीर्थकर्तृत्वे वृत्तमाहारकद्वये।

बंधस्य हेतुरन्येषु मिथ्यात्वसंयमादयः ॥ १८ ॥

बंधविच्छेदो भण्यते,——

एताः षोडश दुर्दृष्टौ सासने पंचविंशतिः।

दशाविरमणे देशे चतस्रः षट् प्रमादिनि ॥ १९ ॥

एकातो द्वे ततस्त्रिंशच्चतस्रः पंचपंचसु।

सूक्ष्मे षोडश विच्छिन्ना वेद्यं योगिनि बंधतः ॥ २० ॥

बंधे सर्वाः प्रकृतयः १२०।

एतास्तीर्थकराहारकद्वयहीना मिथ्यादृष्टौ सासने, सुरनरायुर्भ्यां विना मिश्रे, तीर्थकरनरसुरायुर्भिः सहासंयते देशे प्रमत्ते, आहारकद्वयेन सहाप्रमत्ते अपूर्वे, सप्तसु भागेषु बंधविच्छेदः, अनिवृत्तौ पंचसु भागेषु, सूक्ष्मादिषु।

मिथ्यादृष्टिगुणे संदृष्टिरित्थम् बं. व्यु. १६, बंध ११७, अबंध ३, अ ३१।

सासने	मिश्रे	असंयते	देशे	प्रमत्ते	अप्रमत्ते
२५	०	१०	४	६	१
१०१	७४	७७	६७	६३	५९
१९	४६	४३	५३	५७	६१
४७	७४	७१	८१	८५	८९

१ सम्मेव तित्थबंधो आहारदुगं पमादरहिदम्मि। गो. क.। २ कर्मणाम् १४८ प्रकृत्यपेक्षया।

अपूर्वे सप्तसु भागेषु

२	०	०	०	०	३०	४
५८	५६	५६	५६	५६	५६	२६
६२	६४	६४	६४	६४	६४	१४
१०	१२	१२	१२	१२	१२	१२२

अनिवृत्तौ पंचसु भागेषु

१	१	१	१	१
२२	२१	२०	१९	१८
९८	९९	१००	१०१	१०२
१२६	१२७	१२८	१२९	१३०

सूक्ष्मादिषु पंचसु

सू०	उ०	क्षी०	स०	अ०
१६	०	०	१	०
१७	१	१	१	०
१०३	११९	११९	११९	१२०
१३५	१४७	१४७	१४७	१४८

मिथ्यात्वादिषु व्यच्छुन्नप्रकृतयः ।

आर्याच्छन्दः ।

मिथ्यात्वं षंढवेदः श्वभ्रायुः श्वभ्रयुग्महुंडानि ।
आद्यं जातिचतुष्कं स्थावरसाधारणातपापूर्णाः ॥ २१ ॥
सूक्ष्मं संहतिरंत्या बंधान्मिथ्यात्वलब्धजन्मानः ।
षोडश विच्छिद्यन्ते मिथ्यादृष्टौ गुणस्थाने ॥ २२ ॥ युग्मम् ॥
आद्यकषायचतुष्कं तिर्यग्द्वयातिर्यगायुरुद्योताः ।
दुर्भगदुःस्वरमध्यमसंहतिसंस्थितिचतुष्कानि ॥ २३ ॥
सत्रानादेयेन स्त्री नीचं स्त्यानगृद्धयस्तिस्रः ।
अशुभविहायोरीतिर्विच्छिद्यन्ते द्वितीयगुणे ॥ २४ ॥ युग्मम् ॥

प्रथमकषायोदयजा एता बंधादभावतस्तेषां ।
रभसेन पंचविंशतिरुपरिष्टात्प्रकृतयस्तस्मात् ॥ २५ ॥
द्वितीयानां कषायाणां चतुष्कमादिसंहतिः ।
नृद्वयौदारिकद्वन्द्वे मनुष्यायुर्देशाव्रते ॥ २६ ॥
द्वितीयकषायोत्थाना एताः प्रकृतयः स्फुटम् ।
प्रपद्यन्ते व्यवच्छेदे परं तेषामभावतः ॥ २७ ॥
तृतीयानां कषायाणां चतुष्कं याति विच्छिदम् ।
देशव्रते तदुत्थानामभावात्परतस्ततः ॥ २८ ॥
अरत्ययशसी शोकाऽस्थिरासाताशुभानि षट् ।
प्रमत्ते यांति विच्छेदं सुरायुश्चाप्रमत्तके ॥ २९ ॥
अपूर्वे प्रथमे भागे द्वे निद्राप्रचले ततः ।
षष्ठे प्रकृतयस्त्रिंशच्चतस्रः सप्तमे ततः ॥ ३० ॥
तैजसं कार्मणं पंचहृषीकममरद्वयम् ।[1]
स्थिरं प्रथमसंस्थानं शुभंवैक्रियिकद्वयम् ॥ ३१ ॥
त्रसौघ[2]गुरुलघ्वा[3]दिवर्णादीनां चतुष्टयम् ।
सुभगं सुस्वरादेये निर्माणं सद्गभोगतिः ॥ ३२ ॥
आहारकद्वयं तीर्थकृत्त्वं त्रिंशदिमास्ततः ।
हास्यं रतिर्जुगुप्सा भीश्चतस्रः सप्तमे ततः ॥ ३३ ॥
पुंवेदोन्त्यकषायाणां चतुष्कं पंचपंचसु ।
भागेषु याति विच्छेदमनिवृत्तेः क्रमादिमाः ॥ ३४ ॥
पंच ज्ञानावृतेरुच्चं चतस्रो दर्शनावृतेः ।
यशः पंचान्तरायस्य छिन्नाः सूक्ष्मे च षोडश ॥ ३५ ॥

---

१ पंचहृषीकं=पंचेन्द्रियं । २ त्रसबादरपर्याप्तप्रत्येकानि । ३ अगुरुलघूपघातपरघातोच्छ्वासानि ।

शांतक्षीणावपाकृत्य सातं योगिनि केवलम् ।
बंधः सान्तोऽप्यनंतोऽयमोघरूपेण जायते ॥ ३६ ॥

उदयः कथ्यते—

मिश्रकमुदेति मिश्रे सम्यक्त्वं गुणचतुष्टये तस्मात् ।
आहारकं प्रमत्ते तीर्थकरत्वं सयोगजिने ॥ ३७ ॥
यस्मान्न याति नरकं न ततः सासादने तदनुपूर्वी ।
मिश्रेऽखिलानुपूर्व्यो न संति येनैष न म्रियते ॥ ३८ ॥

उदयविच्छेदः कथ्यते—

पंच नवैका सप्तदशाष्टौ पंचादितश्चतस्रश्च ।
षट् षट् गच्छंत्युदयादेका द्वे षोडश त्रिंशत् ॥ ३९ ॥
द्वादश निर्योगान्ते गुणे प्रकृतयः क्रमादुदयविच्छेदम् ।
द्वाविंशशताः सम्यक् प्रत्येतव्या बुधैः सर्वाः ॥ ४० ॥

एताः सम्यक्त्वसम्यग्मिथ्यात्वाहारकद्वयतीर्थकरहीना मिथ्यादृष्टौ, नरकानुपूर्व्या विना सासने, तिर्यङ्नरसुरानुपूर्वीभिर्विना सम्यग्मिथ्यात्वेन च सह मिश्रे, चतसृभिरानुपूर्वीभिः सम्यक्त्वेन च सहासंयते, देशे, आहारकद्वयेन सह प्रमत्ते, अप्रमत्ते, अपूर्वे, अनिवृत्तौ, सूक्ष्मादिषु, क्षीणे द्विचरमसमये क्षीणचरमसमये, तीर्थकरेण सह सयोगे, अयोगे, उदयविच्छेदप्रकारो निम्नलिखितरीत्या ज्ञेयः ।

मिथ्यात्वे	सासने	मिश्रे	असंयते	देशे	प्रमत्ते
५	९	१	१७	८	५
११७	१११	१००	१०४	८७	८१
५	११	२२	१८	३५	४१
३१	३७	४८	४४	६१	६७

अप्रमत्ते	अपूर्वे	अनिवृत्तौ	सूक्ष्मे	उपशांते
४	६	६	१	२
७६	७२	६६	६०	५९
४६	५०	५६	६२	६३
७२	७६	८२	८८	८९

क्षीणे प्रथमसमये	द्वितीयसमये	सयोगे	अयोगे	सर्वाः
२	१४	३०	१२	०
५७	५५	४२	१२	०
६५	६७	८०	११०	१२२
९१	९३	१०६	१३६	१४८

उदयविच्छेदमुक्त्वा प्रकृतयः कथ्यन्ते—

पंचापर्याप्तिमिथ्यात्वसूक्ष्मासाधारणातपाः ।
मिथ्यादृष्टिगुणस्थाने प्रभ्रश्यंत्युदयादिमाः ॥ ४१ ॥
चतस्रो जातयः पूर्वाः कोपाद्याद्यचतुष्टयम् ।
स्थावरं चोदयादेता नव भ्रश्यंति सासने ॥ ४२ ॥
सम्यग्मिथ्यात्वमेवकं मिश्रे यात्युदयक्षयं ।
श्वभ्रदेवायुषी देवद्वयं वैक्रियकद्वयम् ॥ ४३ ॥
नृतिर्यगानुपूर्व्यौ (द्वे) दुर्भगं नारकद्वयम् ।
द्वितीयानां कषायाणां चतुष्कमयशोयुतम् ॥ ४४ ॥
अनादेयमिमाः सप्तदश प्रकृतयः स्फुटम् ।
असंयतगुणस्थाने स्वीकुर्वन्त्युदयक्षयम् ॥ ४५ ॥ विशेषकम् ॥
नीचोद्योतौ तृतीयानां कषायाणां चतुष्टयम् ।
तिर्यग्गत्यायुषी अष्टौ देशे यांत्युदयक्षयम् ॥ ४६ ॥
आहारकद्वयं स्त्यानगृद्धित्रयमिमा गुणे ।
प्रमत्तसंयते पंच श्रयन्त्युदयतश्च्युतिम् ॥ ४७ ॥

अंत्याः संहतयस्तिस्त्रः सम्यक्त्वं चाप्रमत्तके ।
अपूर्वे नोकषायाणां षट्कं यात्युदयच्युतिम् ॥ ४८ ॥
संज्वालं त्रितयं वेदत्रयं षडनिवृत्तिके ।
क्षणेंते लोभसंज्वालः सूक्ष्मे यात्युदयक्षयम् ॥ ४९ ॥
वज्रनाराचनाराचे शान्ते द्वे उदयक्षयम् ।
द्वे निद्राप्रचले यातः क्षीणस्योपांतिके क्षणे ॥ ५० ॥
दश ज्ञानान्तरायस्थाश्चतस्रो दर्शनस्थिताः ।
चतुर्दशोदयाद्यान्ति क्षीणस्यांते क्षणे क्षयम् ॥ ५१ ॥
वेद्यमेकतरं वर्णं चतुष्कौदारिकद्वये ।
आद्यसंहननं षट्कं संस्थानानां स्थिरद्वयम् ॥ ५२ ॥
शुभसुस्वरयोर्युग्मे निर्मित्तेजोनभोगती ।
चतस्रोऽगुरुलघ्वाद्याः प्रत्येककार्मणे इमाः ॥ ५३ ॥
भ्रश्यंत्युदयतस्त्रिंशत् सयोगस्यान्तिमे क्षणे ।
वेदनीयं द्वयोरेकं मर्त्यगत्यायुषी त्रसम् ॥ ५४ ॥
पंचाक्षं सुभगं स्थूलं पर्याप्तं तीर्थकर्तृता ।
आदेयं यश उच्चं च निर्योगे द्वादश च्युताः ॥ ५५ ॥

प्रयांत्युदीरणाच्छेदं पंच प्रकृतयो नव ।
एका सप्तदशाष्टाष्टौ चतस्रः षट् षडादितः ॥ ५६ ॥
एका द्वे षोडशैकोनचत्वारिंशत्क्रमादिमाः ।
एकोप्युदीर्यते जातु नायोगे प्रकृतिर्जिने ॥ ५७ ॥
उदीरणायां सर्वाः प्रकृतयः १२२ ।

एताः सम्यक्त्वसम्यङ्मिथ्यात्वाहारकद्वयतीर्थकरहीना मिथ्यादृष्टौ, नरकानुपूर्वीं विना सासादने, तिर्यङ्नरसुरानुपूर्वी

विना सम्यङ्मिथ्यात्वेन सह मिश्रे, चतसृभिरानुपूर्वीभिः सम्यक्त्वेन च सहासंयते, देशे, आहारकद्वयेन सह प्रमत्ते, अप्रमत्तादिकेषु षट्सु, तीर्थंकरेण सह सयोगे,

तद्दर्शनप्रकारः——

मिथ्यात्वे	सासने	मिश्रे	असंयते	देशे
५	९	१	१७	८
११७	१११	१००	१०४	८७
५	११	२२	१८	३५
३१	३७	४८	४४	६१

प्रमत्ते	अप्रमत्ते	अपूर्वे	अनिवृत्तौ	सूक्ष्मे
८	४	६	६	१
८१	७३	६९	६३	५७
४१	४९	५३	५९	६५
६७	७५	७९	८५	९१

उपशान्ते	द्विचरमे	क्षीणे चरमे	सयोगिनि	अयोगे
२	२	१४	३९	०
५६	५४	५२	३९	०
६६	६८	७०	८३	१२१
९२	९४	९६	१०९	१४८

सातासातमनुष्यायुः संयुक्ताः संत्युदीरणे ।
अष्टप्रकृतयः पंच प्रमत्तस्योदयस्थिताः ॥ ५८ ॥

सातासातनरायुर्भिर्नियोगोदयजाः विना ।
संति योगेन एकोनचत्वारिंशदुदीरणे ॥ ५९ ॥

उदयोदीरणे तुल्ये भवतोऽन्येषु सर्वथा ।
त्रीन्हित्वा गुणानेतान् प्रमत्तायोगयोगिनः ॥ ६० ॥

न सत्याहारकद्वन्द्वे न तीर्थकृति सासनः ।
नैति तिर्यक्त्वमिश्रत्वे सत्त्वे तीर्थकृतो भवी ॥ ६१ ॥

सत्ताक्षयः कथ्यते,——

चतुर्षु निर्व्रताद्येषु काप्यनंतानुबंधिना ।
मिथ्यात्वं मिश्रसम्यक्त्वे सप्त यांति क्षयं समम् ॥ ६२ ॥
षोडशाष्टकमेकैका षडेकैका चतुर्ष्वतः ।
क्षयं प्रकृतयो यांति नवांशेष्वनिवृत्तिके ॥ ६३ ॥
एका याति क्षयं सूक्ष्मे क्षीणे गच्छान्ति षोडश ।
समये गतयोगस्य द्वासप्ततिरुपान्तिमे ॥ ६४ ॥
त्रयोदशांतिमे तत्र निहत्य प्रकृतीर्जिनम् ।
मुक्तिं प्राप्तं नमाम्यष्टचत्वारिंशच्छतप्रमाः ॥ ६५ ॥

सर्वाः प्रकृतयः १४८ ।

एताः श्वभ्रतिर्यक्सुरायुर्हीनाश्चतुर्षु अपूर्वे अनिवृत्तौ नवांशेषु सूक्ष्मादिषु—

सद्दर्शन[1]प्रकारः—

मि०	सा०	मि०	असं.	देश.	प्र०	अप्रमत्ते	अपूर्वे
०	०	०	७	७	७	७	०
१४८	१४५	१४७	१४५	१४५	१४५	१४५	१३८

---

१ अत्र अपेक्षाभेदेन कथनम् गोम्मटसार कर्मकाण्डे तु ईदृशी सत्त्वरचना।

गुण	सत्त्व	असत्त्व	सत्त्व व्यु.
मिथ्यात्व	१४८	×	×
सासादन	१४५	३	×
मिश्र	१३७	१	×

(शेषमग्रे पृष्ठे)

अनिवृत्तौ नवांशेस्वित्थम्—

१६	८	१	१	६	१	१	१	१
१३८	१२२	११४	११३	१०७	१०६	१०५	१०४	१०३

	अक्षायिकसम्यक्त्वे		
अविरत—	१४८	×	१
देशविरत	१४७	१	१
प्रमत्त वि.	१४६	२	×
अप्रमत्त	१४६	२	×
अपूर्वकरण उ.	१४६	२	×
अनिवृत्तिकरण उ.	१४६	२	×
सूक्ष्मसांपराय	१४६	२	×
उपशान्त	१४६	२	×
	क्षायिकसम्यक्त्वे		
अविरत	१४१	७	२
देशविरत	१३९	९	×
प्रमत्त	१३९	९	×
अप्रमत्त	१३९	९	×
अपूर्व उ.	१३९	९	×
अनि. उ.	१३९	९	×
सूक्ष्म. उ.	१३९	९	×
उपशान्त	१३९	९	×
अपूर्व क्षप.	१३८	१०	×
अनिवृत्ति. क्षपक.	१३८-१२२-११४ ११३-११२-१०६ १०५-१०४-१०३ १०२	१०-२६-३४-३५ ३६-४२-४३-४४ ४५-४६	१६-८ १-१-६- १-१-१-१
सूक्ष्म	१०२-	४६	१
क्षीण	१०१	४७	१६
सयोगकेवली	८५	६३	×
अयोगकेवली द्वि.	८५	६३	७२
,, च.	१३	१३५	१३

सूक्ष्मसांपराये—१ । १०२ ।

उपशांते	द्वि. क्षी.	क्षी.च.	स.	अयोग प्रथमसमये	अयोग द्वितीयसमये
०	२	१४	०	७२	१३
०	१०१	९९	८५	८५	१३
१४२					

अथवा द्वितीयो विकल्पः——

श्वभ्रतिर्यक्सुरायुर्हीना मिथ्यादृष्टौ ०, १४५, ३ ।

"न सत्याहारकद्वन्द्वे न तीर्थकृति सासन" इति वचनादाहारकतीर्थकरहीनाः सासने ०, १४२, ६ ।

"नैति तिर्यक्त्वमिश्रत्वे सत्त्वे तीर्थकृतो भवी" ति वचनादाहारकद्वयेन सह तीर्थकरेण विना मिश्रे ०, १४४, ४ ।

[1]तीर्थकरेण सहासंयते ७, १४५, ३ । देशे ७, १४५, ३ । प्रमत्ते ७, १४५, ३ । अप्रमत्ते ७, १४५, ३ । अपूर्वे ०, १३८, १० ।

अनिवृत्तौ नवांशेषु इत्थम्—

१६	८	१	१	६	१	१	१	१
१३८	१२२	११४	११३	११२	१०६	१०५	१०४	१०३
१०	२६	३४	३५	३६	४२	४३	४४	४५

सूक्ष्मे	उपशान्ते	क्षीणे १	क्षीणे २	सयोगे	अयोगे १	अयोगे २
१	०	२	१४	०	७२	१३
१०२	१३८	१०१	९९	८५	८५	१३
४६	१०	४७	४९	६३	६३	१३५

१ अनिबद्धायुषः प्रांत्यदेहिनो लघुकर्मणः । असंयतगुणस्थाने नरकायुः क्षयं व्रजेत् ॥ तिर्यगायुः क्षयं याति गुणस्थाने तु पंचमे । सप्तमे त्रिदशायुश्च दृङ्मोहस्यापि सप्तकम् ॥ दशैताः प्रकृतीः साधुः क्षयं नीत्वा विशुद्धधीः । धर्मध्याने कृताभ्यासः प्राप्नोति स्थानमष्टमम् ।

प्रभ्रश्योपशमश्रेणेर्यो मिथ्यात्वं विगाहते ।
तस्य प्रकृतयः साष्टाश्चत्वारिंशच्छतप्रमाः ॥ ६६ ॥
त्रयेऽन्यजन्मनि क्षीणे श्वभ्रातिर्यक्सुरायुषाम् ।
सत्क्षयो नृभवे प्राप्ते गुणस्थानेषु कथ्यते ॥ ६७ ॥
स्त्यानगृद्धित्रयं तिर्यग्द्वितयं नारकद्वयम् ।
सूक्ष्मं साधारणोद्योतावाद्यजातिचतुष्टयम् ॥ ६८ ॥
आतपः स्थावरा ज्ञेया षोडश प्रथमे क्षणे ।
अनिवृत्तेर्द्वितीयेंशेऽष्टकषाया मध्यमास्ततः ॥ ६९ ॥
षंढवेदो वधूवेदो हास्यषट्कं क्रमात्ततः ।
पुंवेदोऽतस्ततः क्रोधो मानोऽतो वंचना ततः ॥ ७० ॥
अनिवृत्तौ १६।८।१।१।६।१।१।१।१।
सूक्ष्मे लोभसंज्वालो द्वे निद्राप्रचले क्षणे ।
आद्ये क्षीणान्तिमे ज्ञानदृग्विघ्नस्थाश्चतुर्दश ॥ ७१ ॥
१ । २ । १४ ।
अयोगस्य शरीराणि पंच बंधनपंचकम् ।
संघातपंचकं षट्कं संस्थानानां सुरद्वयम् ॥ ७२ ॥
त्रीण्यंगोपांगकान्यष्टौ स्पर्शाः संहननानि षट् ।
अपर्याप्तं रसाः पंच द्वौ गंधौ वर्णपंचकम् ॥ ७३ ॥
अयशोगुरुलघ्वादिचतुष्कं द्वे नभोगती ।
स्थिरद्वन्द्वं शुभद्वन्द्वं प्रत्येकं सुस्वरद्वयम् ॥ ७४ ॥
वेद्यमेकमनादेयं नीचदुर्भगानिर्मितः ।
उपान्त्यसमये क्षीणाः द्वासप्ततिरिमाः समम् ॥ ७५ ॥
७२ प्रकृतयः ।

अंत्ये वेद्यं द्वयोरेकं नरायुर्नृद्वयं त्रसम् ।
सुभगादेयपर्याप्तपंचाक्षं तीर्थकर्त्तृता ॥ ७६ ॥
वादरोच्चयशांसीति त्रयोदश क्षणे क्षयम् ।
यस्य प्रकृतयो यांति तमयोगं स्तुवे त्रिधा ॥ ७७ ॥
१३ प्रकृतयः ।

किं प्राक् विच्छिद्यते बंधः किं पाकः किमुभौ समम् ।
किं स्वपाकेन बंधोऽन्यपाकेनोभयथापि किम् ॥ ७८ ॥
सान्तरोऽनंतरः किं किं बंधो द्वेधा प्रवर्त्तते ।
इत्येवं नवधा प्रश्नक्रमेणास्त्येतदुत्तरम् ॥ ७९ ॥
देवायुर्वैक्रियद्वन्द्वं देवाहारद्वयेऽयशः ।
इत्यष्टानां पुरा पाकः[1] पश्चाद्बंधो विनश्यति ॥ ८० ॥

अत्रप्रथमतः बंधोच्छेदगुणस्थानांकसंख्या, पश्चात्तूदयविच्छेदगुणस्थानांकसंख्या द्रष्टव्या—

देवायुषः—बंध, गु. ७, गु. ४, उदय । वैक्रियिकद्वयस्य—८, ४ । देवद्वयस्य—८, ४ । आहारकद्वयस्य—८, ६ । अयशःकीर्त्तेः—६, ४ ।

हास्यरतिजुगुप्साभीमिथ्यापुंस्थावरातपाः ।
साधारणमपर्याप्तं सूक्ष्मं जातिचतुष्टयम् ॥ ८१ ॥
कोपादयोऽविसंज्वाललोभामर्त्यानुपूर्विका ।
इत्येकत्रिंशतो बंधपाकच्छेदौ समं मतौ ॥ ८२ ॥

एकस्मिन् गुणस्थाने बंधपाकद्वयोर्दर्शनाद्बंधपाकौ समं द्रष्टव्यौ । हास्यस्य ८, ८ । अरतेः ८, ८ । जुगुप्सायाः ८,

---

१ प्रथमत उदयविच्छेदः पश्चाद्बंधविच्छेदो भवति ।

८ । भयस्य ८, ८ । मिथ्यात्वस्य १, १ । पुंवेदस्य ९, ९ । स्थावरस्य १, १ । आतपस्य १, १ । साधारणस्य १, १ । अपर्याप्तस्य १, १ । सूक्ष्मस्य १, १ । जातिचतुष्टयस्य १, १ । यद्यपि सासने जातिचतुष्टयस्योदयस्तथापि न दोषस्तस्य मिथ्यादृष्टिसदृशत्वात् । नरानुपूर्व्याः ४, ४ । अनंतानुबंधिचतुष्टयस्य २, २ । अप्रत्याख्यानचतुष्टयस्य ४, ४ । प्रत्याख्यानचतुष्कस्य ५, ५ । क्रोध[1]संज्वलनस्य ९, ९ ।

प्रकृतीनां तु शेषाणामेकाशीतेः शरीरिणः ।
पूर्वं विच्छिद्यते बंधः पश्चात्पाकस्य विच्छिदा ॥ ८३ ॥
वेद्यांतरायदृक्ज्ञानरोधगोत्रभवायशः ।
शोकारत्यंतलोभा[2] स्त्रीषंडतीर्थविधायिताः ॥ ८४ ॥
श्वभ्रतिर्यङ्नरायूंषि श्वभ्रतिर्यङ्नृरीतयः ।
तिर्यक्श्वभ्रानुपूर्व्यौ द्वे पंचाक्षौदारिकद्वये ॥ ८५ ॥
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ।
षट् संस्थानसंहत्योरुद्योतो द्वे नभोगती ॥ ८६ ॥
स्थिरादिपंचयुग्मानि निर्मित्तैजसकार्मणे ।
एकाशीतेः पुरा बंधः पश्चात्पाको विनश्यति ॥ ८७ ॥

अत्रप्रथमतः पाकोच्छेदगणनांकसंख्या, पश्चात्तु बंधच्छेदगुणस्थानांकसंख्या द्रष्टव्या—

पंचानां ज्ञानावरणानां, चतुर्णां दर्शनावरणानां, पंचानामन्तरायाणां—पाकच्छेदः १२, बंधच्छेदः १० । यशःकीर्त्युच्चगोत्रयोः १४, १० । स्त्यानगृद्धित्रयस्य ६, २ । निद्राप्रच-

---

१ मान माया संज्वलनस्यापि ९, ९ । २ संचलनलोभः ।

लयोः १२, ८ । सद्वेद्यस्य १४, १३ । असद्वेद्यस्य १४, ६ । संज्वलनलोभस्य १०, ९ । स्त्रीवेदस्य ९, २ । नपुंसकवेदस्य ९, १ । अरतिशोकयोः ८, ६ । नरकायुषः ४, १ । तिर्यगायुषः ५, २ । मनुष्यायुषः १४, ४ । नरकगतेः ४, १ । तिर्यग्गतेः ५, २ । मनुष्यगतेः १४, ४ । पंचेन्द्रियजातेः १४, ८ । औदारिकशरीरस्य १३, ४ । तैजसस्य १३, ८ । कार्मणस्य १३, ८ । समचतुरस्रसंस्थानस्य १३, ८ । मध्यमसंस्थानचतुष्टयस्य १३, २ । हुंडस्य १३, १ । औदारिकशरीराङ्गोपांगस्य १३, ४ । वज्रर्षभनाराचसंहननस्य १३, ४ । वज्रनाराचनाराचयोः ११, २ । अर्द्धनाराचकीलकसंहननयोः ७, २ । असंप्राप्तासृपाटिकासंहननस्य ७, १ । वर्णादिचतुष्टयस्य १३, ८ । नरकगत्यानुपूर्व्याः ४, १ । तिर्यग्गत्यानुपूर्व्याः ४, २ । अगुरुलघ्वादिचतुष्टयस्य १३, ८ । उद्योतस्य ५, २ । प्रशस्तविहायोगतेः १३, ८ । अप्रशस्तविहायोगतेः १३, २ । त्रसबादरपर्याप्तानां १४, ८ । प्रत्येकशरीरस्य १३, ८ । स्थिरस्य १३, ८ । अस्थिरस्य १३, ६ । शुभस्य १३, ८ । अशुभस्य १३, ६ । सुभगस्य १४, ८ । दुर्भगस्य ४, २ । सुस्वरस्य १३, ८ । दुःस्वरस्य १३, २ । आदेयस्य १३, ८ । अनादेयस्य ४, २ । निर्माणस्य १३, ८ । तीर्थविधायितायाः १४, ८ । नीचस्य ५, २ ।

इति तत्प्रकारः ।

विक्रियाषट्कमाहारद्वयं श्वभ्रामरायुषी ।
तीर्थकृच्चेति बध्यंते एकादशपरोदयात् ॥ ८८ ॥

नरकगतिनरकगत्यानुपूर्वी देवगतिदेवगत्यानुपूर्वी वैक्रियिकशरीरवैक्रियिकशरीरांगोपांगानां षण्णां बंधयोग्येषु गुणेषु परोदयेन बंधः, स्वोदयेन बंधस्य विरोधादाहारकद्वयमपि परोदयेन बध्यते। आहारकद्वयोदयरहितयोरप्रमत्तापूर्वयोर्बंधोपलंभात्। नारकामरायुषोरपि परोदयेन बंधस्तद्बंधोदययोः [1]समानकाले वृत्तिविरोधात्। तीर्थकरनाम्नोऽपि परोदयेन बंधः तीर्थकरकर्मोदयसंभविगुणस्थानयोः सयोगायोगयोस्तद्बंधानुपलंभात्।

ज्ञानावृत्यंतरायस्था दश तैजसकार्मणे।
शुभस्थिरद्वये वर्णचतुष्कं दृक्चतुष्टयम् ॥ ८९ ॥
निर्माणागुरुलघ्वाह्व मिथ्यात्वं सप्तविंशतिः।
बध्यन्ते स्वोदयाच्छेषा द्व्यशीतिः स्वपरोदयात् ॥ ९० ॥

ज्ञानावरणान्तरायस्था दश प्रकृतयो, दर्शनावरणस्य चतस्रो, बंधयोग्येषु गुणस्थानेषु स्वोदयेन बध्यन्ते। मिथ्यादृष्ट्यादिक्षीणकषायान्तेष्वेतासां निरन्तरोदयोपलंभात्। तैजसकार्मणवर्णगंधरसस्पर्शनिर्माणागुरुलघुस्थिरास्थिरशुभाशुभानि स्वोदयेनैव बध्यन्ते, ध्रुवोदयत्वात्। मिथ्यात्वस्यापि स्वोदयेनैव बंधो, मिथ्यात्वकारणषोडशप्रकृतिषु पाठात्, बंधोदययोः समानकाले वृत्तिविरोधाभावाद्वा। दर्शनावरणपंचकवेद्यद्वयकषायषोडशकनोकषायतिर्यगायुर्मनुष्यायुस्तिर्यग्गतिमनुष्यगत्येकद्वित्रिचतुःपंचेन्द्रियजात्यौदारिकौदारिकांगोपांगसंस्थान-

---

१ यतः कारणात् तयोरुदयकाले बंधो न भवति बंधकाले उदयो न भवति इत्यन्योन्यं विरोधो ज्ञेयः।

षट्कसंहननषट्कतिर्यग्गतिमनुष्यगतिप्रायोग्यानुपूर्व्युपघातपरघातो च्छ्वासातपोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तप्रत्येकसाधारणसुभगदुर्भगसुस्वरादेयानादेययशः कीर्त्ययशःकीर्तिनीचोच्चगोत्रनामिकानां द्व्यशीतिप्रकृतीनां स्वपरोदयाद्बंधो द्रष्टव्यः, स्वोदयेनेव परोदयेनापि बंधाविरोधात् ।

कषायाः सकलाः सर्वाः ज्ञानदृष्ट्यंतरायगाः ।
उपघातजुगुप्से भीर्मिथ्यातैजसकार्मणे ॥ ९१ ॥
निर्माणागुरुलघ्वाख्ये वर्णादीनां चतुष्टयम् ।
ध्रुवबंधा मताः सप्तचत्वारिंशदिमाः जिनैः ॥ ९२ ॥

ध्रुवबंधत्वमेतासां बंधयोग्यगुणस्थाने नित्यं बंधोपलंभात् ।

आयुश्चतुष्टयाहारद्वयतीर्थकरैर्युताः ।
चतुः पंचाशदेताश्च बंधं यांति निरन्तरम् ॥ ९३ ॥

ध्रुवबंधस्य निरन्तरबंधस्य च को विशेषः? महान् विशेषो यतः——

बंधयोग्यगुणस्थाने याः स्वकारणसन्निधौ ।
सर्वकालं प्रबध्यन्ते ध्रुवबंधा भवन्ति ताः ॥ ९४ ॥
बन्धकालो जघन्योऽपि यासामन्तर्मुहूर्त्तकः ।
बन्धसमाप्तितस्तत्र ता निरन्तरबंधनाः ॥ ९५ ॥
अन्त्ये संहतिसंस्थानपंचके स्थावरातपौ ।
षंढवेदो वधूवेद आद्यं जातिचतुष्टयम् ॥ ९६ ॥
शोकारत्यशुभोद्योतसूक्ष्मसाधारणायशः ।
अस्थिरासन्नभोरीतिदुर्भगापूर्णदुःस्वराः ॥ ९७ ॥

श्वभ्रद्वयमनादेयासाते त्रिंशच्चतुर्युता[1]: ।
बध्यन्ते सांतरा बंधेऽन्याः सान्तरनिरन्तराः ॥ ९८ ॥
बंधो भूत्वा क्षणं यासामसमाप्तो निवर्त्तते ।
बंधापूर्तैः क्षणेनैताः सांतरा विनिवेदिताः ॥ ९९ ॥
अन्तर्मुहूर्त्तमात्रत्वाज्जघन्यस्यापि कर्मणाम् ।
सर्वेषां बंधकालस्य बंधः सामयिको[2]ऽस्ति नो ॥ १०० ॥
तिर्यग्द्वयं नरद्वन्द्वं पुंवेदौदारिकद्वये ।
गोत्रे सातं सुरद्वन्द्वं पंचाक्षं वैक्रियद्वयम् ॥ १०१ ॥
परघातं रतिर्हास्यमाद्ये संस्थानसंहती ।
दश त्रसादियुग्मानामाद्यान्युच्छ्वाससद्गती ॥ १०२ ॥
द्वात्रिंशदिति जायंते ताः सांतरनिरन्तराः ।
यस्मादुभयथा[3] बंधः सर्वदाप्युपलभ्यते ॥ १०३ ॥
उच्चनृत्वे न बध्नंति तेजःपवनकायिकाः ।
स्त्रीषंढकोदये साधुर्नाहारार्द्धिं कदाचन ॥ १०४ ॥
मिथ्यात्वभावतो जातु मिथ्यात्वबलभाविषु ।
सासनो जायते नैव श्वाभ्रतेजोनिलांगिषु ॥ १०५ ॥

बंधोदयोदीरणसत्क्षयाणां,
विचारणां यो विदधाति नित्यम् ।
विविक्तमात्मानमपास्तकर्मा,
ज्ञानात्मकं सोऽमितगत्युपैति ॥ १०६ ॥

इति श्रीमदमितगत्याचार्यप्रणीते पंचसंग्रहग्रन्थे
कर्मबंधस्तवाख्यस्तृतीयः
परिच्छेदः ।

---

१ द्वात्रिंशत् । २ एकसमयवर्ती । ३ सांतरोऽपि निरंतरोऽपि बंधः ५४, निरंतरबंधः ३४, सांतरबंध ३२, एवं १२० ।

अथ चतुर्थः परिच्छेदः ।

जयताज्जनितानंदं जिनेन्द्रवचनामृतम् ।
जन्ममृत्युजरातृष्णाश्रमतापापनोदनम् ॥ १ ॥
दृष्टिवादादपोद्धृत्य वक्ष्यन्ते सारयोगिनः ।
श्लोकाः जीवगुणस्थानगोचराः कतिचिन्मया ॥ २ ॥

ये सन्ति यस्मिन्नुपयोगयोगाः,
सप्रत्ययास्तान्निगदामि तत्र ।
जीवे गुणे वा परिणामतोऽह-
मेकत्र बंधादिविधिं च किंचित् ॥ ३ ॥

संत्येकाक्षेषु चत्वारि जीवानां विकलेषु षट् ।
पंचेन्द्रियेषु चत्वारि स्थानानीति चतुर्दश ॥ ४ ॥
तिर्यग्गतावशेषाणि द्वे संज्ञिस्थे गतित्रये ।
जीवस्थानानि नेयानि संत्येवं मार्गणास्वपि ॥ ५ ॥

न.	ति.	म.	दे.	ए.	द्वी.	त्री.
२	१४	२	२	४	२	२
च.	पं.	पृ.	अ.	ते.	वायु.	व.
२	४	४	४	४	४	४
त्रस	स. म.	अस. म.	उ. म.	अनु. म.	स. व.	अस. व.
१०	१	१	१	१	१	१
उ. व.	अनु. व.	औ.	औ. मि.	वै.	वै. मि.	आ.
१	५	७	८	१	१	१
आ. मि.	का	स्त्री	पुं	न	क्रो	मा
१	८	४	४	१४	१४	१४
माया	लोभ	कुम	कुश्रु	विभंग	म	श्रु
१४	१४	१४	१४	१	२	२

अ	मनः	के	सामा.	छेदो	परि.	सूक्ष्म	
२	१	१	१	१	१	१	
यथा.	संय.	असं.	च	विग्रह च.	अचक्षु	अव.	
१	१	१४	३	६	१४	२	
के	कृष्णा	नील	कापोत	तेजो.	पद्म	शु.	
१	१४	१४	१४	२	२	२	
भ	अ	औप. द्.	औ. विग्रह	वेदक	क्षा.	सासन	
१४	१४	१	२	२	२	२	
सा वि.	मिश्र	मिथ्या	संज्ञी	असं	अ. वि.	आहा	अनाहा
८	१	१४	२	२	१२	१४	८

तत्प्रकारः सूच्यते——

श्वभ्रमानवदेवेषु द्वौ द्वौ संज्ञिपर्याप्तापर्याप्तौ, तिर्यक्षु चतुर्दशापि जीवसमासाः, एकाक्षे बादरसूक्ष्मपूर्णापूर्णाश्चत्वारः, द्वित्रिचतुरक्षेषु निजौ पर्याप्तापर्याप्तौ द्वौ, पंचाक्षे संज्ञ्यसंज्ञिपर्याप्तापर्याप्ताश्चत्वारः, पंचस्थावरकायेषु प्रत्येकं प्रथमाश्चत्वारः, त्रसकायेषु द्व्यक्षाद्या दश, आद्येषु सप्तसु योगेषु एकः संज्ञी पूर्णः, अष्टमे तु पंच द्व्यक्षाद्याः पर्याप्ताः, औदारिके सप्त पर्याप्ताः, मिश्रे सप्तापर्याप्ताः [1]संज्ञिपर्याप्तोऽष्टमः, वैक्रियिकाहारकाहारकमिश्रेष्वेकः संज्ञी पर्याप्तः, वैक्रियिकमिश्रे संज्ञ्यपर्याप्तः, कार्मणे सप्तापर्याप्ताः संज्ञिपर्याप्तोऽष्टमः, स्त्रीपुंवेदयोः संज्ञ्यसंज्ञिपूर्णापूर्णाश्चत्वारः, षंढवेदे सर्वे, कषायचतुष्के समस्ताः, मतिश्रुताज्ञानयोर्निःशेषाः, विभंगे संज्ञ्येकः पूर्णः, मतिश्रुतावधिषु संज्ञिपूर्णापूर्णौ, मनःपर्ययकेवलयोः संज्ञ्येकः पूर्णः, संयमपंचकदेशसंयमयोरेकः संज्ञीपूर्णः, असंयमे सकलाः,

---

१ सयोगकेवलिनि । २, ३ सयोगकेवलिनि ।

चक्षुर्दर्शने चतुरक्षाद्याः पर्याप्तास्त्रयः, विग्रहगत्यपेक्षया षट्ते पर्याप्तापर्याप्ताः, अचक्षुर्दर्शने सर्वे, अवधिदर्शने संज्ञिपर्याप्तापर्याप्तौ द्वौ, केवलदर्शने पूर्णः संज्ञ्येकः, कृष्णनीलकापोतासु सर्वे, पीतपद्मशुक्ललेश्यासु संज्ञिपूर्णापूर्णौ द्वौ, भव्याभव्ययोः प्रत्येकमशेषाः, औपशमिकदर्शने संज्ञ्येकः, विग्रहगत्यपेक्षया पूर्णापूर्णौ द्वौ संज्ञिनौ, वेदकक्षायिकसासनेषु संज्ञिपूर्णापूर्णौ, सासने तु विग्रहगत्यपेक्षया सप्तापर्याप्ताः[१] संज्ञीपूर्णोऽष्टमः, मिश्रे संज्ञ्येकः पूर्णः, मिथ्यादृष्टौ सर्वे, संज्ञिनि द्वौ संज्ञिपूर्णापूर्णौ, असंज्ञिनि द्वावसंज्ञिनी पूर्णापूर्णौ, विग्रहगत्यपेक्षया द्वादश संज्ञिपूर्णापूर्णवर्जिताः, आहारके समस्ताः, अनाहारके सप्तापर्याप्ताः संज्ञिपर्याप्तोऽष्टमः । एवं मार्गणासु जीवसमासाः योजिताः ।

मार्गणायां गुणस्थानानि ।

सर्वाणि नृगतौ पंच तिर्यक्षु श्वाभ्रदेवयोः ।
गुणस्थानानि चत्वारि मार्गणास्वपरास्विति ॥ ६ ॥

नरक ४	ति ५	मनु. १४	देव ४	एके २	द्वी २	त्रीन्द्रि. २
चतु २	पंचे १४	पृथि. २	अपकाय २	तेजः १	वायु. १	वन. २
त्रस १४	स. म. १३	अ. म. १२	उभय म. १२	अनु. म. १३	स. व. १३	अ. व. १२
उ. व. १२	अ. व १३	औ १३	औ. मि. ४	वै. ४	वै. मि. ३	आ. १

---

१ " नहिंसासणो अपुण्णो साहारण सहुमगेयतेउदुगे " इति गोम्मटसारवचनात् सूक्ष्मापर्याप्तकभेदो नास्ति इत्यत्र चिन्तनीयम् ।

आ मि. १	का. ४	स्त्री ९	पुं ९	नपुंस ९	क्रो. ९	मान ९
माया ९	लो. १०	कुम २	कुश्रु. २	वि. २	म. ९	श्रु. ९
अ. ९	मनः ७	के. २	सामा ४	छेदो. ४	पारि. २	सूक्ष्म १
यथा ४	सं. ९	असं. ४	च. १२	अ. १२	अव ९	के २

कृष्ण ४	नील. ४	कापो. ४	तेजो. ७	पद्म ७	शु १३	भ. १२	अभ. १	औ. ८
वेदक ४	क्षा. ११	सा. १	मिश्र. १	मि. १	सं १२	अ. २	आ. १३	अ. ५

तत्प्रकारः सूच्यते——

नारकसुधाशिकयोश्चत्वार्याद्यानि गुणस्थानानि, तिर्यक्षु पंच, मनुष्येषु सर्वाणि, एकद्वित्रिचतुरक्षेषु द्वे प्रथमे, पंचाक्षेषु समस्तानि, धरावारिवनस्पतिकायेषु द्वे प्रथमे, तेजोवातकाययोरेकमाद्यं, त्रसेषु चतुर्दश, मनोवचनयोगयोराद्ययोरन्त्ययोरौदारिककाययोगे च त्रयोदश सयोग्यंतानि, मध्यमयोः क्षीणान्तानि द्वादश, कार्मणौदारिकमिश्रयोः प्रथमद्वितीयचतुर्थसयोग्याख्यानि चत्वारि, वैक्रियिके प्रथमानि चत्वारि, तन्मिश्रे मिश्रं विना त्रीणि, आहारकाहारकमिश्रयोरेकं प्रमत्ताख्यं, वेदत्रिके प्रत्येकं नवाद्यानि, आद्यकषायत्रिके नवाद्यानि, लोभे दश, अज्ञानत्रये द्वे मिथ्यादृष्टिसासने, प्रथमे ज्ञानत्रये प्रत्येकं नवासंयतादीनि, मनःपर्यये प्रमत्तादिक्षीणकषायान्तानि सप्त, केवले द्वे अंत्ये, सामायिकछेदोपस्थापनयोश्चत्वारि प्रमत्तादीनि, परिहारे द्वे प्रमत्ताप्रमत्ते, एकं सूक्ष्मे

सूक्ष्मकषायाख्यं, यथाख्याते चत्वार्युपशांतादीनि, एकं संयमासंयमे पंचमं, असंयमे चत्वार्याद्यानि, चक्षुर्दर्शनाचक्षुर्दर्शनयोर्द्वादशाद्यानि, अवधिदर्शने नवासंयतादीनि, केवलदर्शने द्वे अंत्ये, आद्ये लेश्यात्रये चत्वार्याद्यानि, तेजःपद्मयोराद्यानि सप्त, शुक्लायां त्रयोदश सयोग्यंतानि, द्वादशाद्यानि भव्ये, एकमभव्ये प्रथमं, औपशमिकेऽष्टासंयतादीनि, वेदके चत्वार्यसंयतादीनि, क्षायिके चतुर्थादीन्येकादश, सासनमिश्रमिथ्यादृष्टिषु प्रत्येकमेकं स्वकीयं, संज्ञिनि द्वादश क्षीणान्तानि, असंज्ञिनि द्वे प्रथमे, आहारके त्रयोदशाद्यानि मिथ्यादृष्टिसासनाविरतयोग्ययोग्याख्यानि पंचानाहारके । एवं मार्गणासु गुणस्थानानि योजितानि ।

संति मर्त्यगतौ सर्वे नवान्यासु विना त्रिभिः ।
नेतव्या मार्गणास्वेवमुपयोगा यथाक्रमम् ॥ ७ ॥

नरक ९	ति. ९	मनु. १२	देव. ९	ए. ३	द्वी. ३	त्री. ३
चतु ४	पं. १२	पृ ३	अप् ३	तेजो ३	वायु ३	व ३
त्रस १२	स. म. १२	अस. म १०	उ. म. १०	अनु. म १२	स. व. १२	अ. व. १०
उ. व. १०	अ. व. १२	औ १२	मिश्र ९	वै ९	मिश्र ७	आ. ६
मिश्र ६	का. ९	स्त्री ९	पुं. १०	नपुं. ९	क्रो. १०	मा. १०
माया १०	लोभ १०	कुम ५	कुश्रु ५	विभं. ५	म. ७	श्रु ७
अ. ७	मनः ७	के. २	सामा. ७	छेदो. ७	पारि. ६	सू ७

यथा	संय.	असं	च.	अ.	अव.	केव.
९	६	९	१०	१०	७	२

कृ.	नी.	का.	तेजो.	प.	शु.	भ.	अ.	औ.
९	९	९	१०	१०	१२	१०	५	६
वेद्.	**क्षा.**	**सा.**	**मिश्र.**	**मि.**	**सं.**	**अ.**	**आ.**	**अ.**
७	९	५	६	५	१०	४	१२	९

तत्प्रकारः सूच्यते——

केवलद्वयमनःपर्ययवर्जिता नवोपयोगाः श्वभ्रतिर्यग्देवेषु, मनुष्येषु सर्वे, मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनान्येकद्वित्र्यक्षेषूपयोगास्त्रयः, चतुरक्षेषु चक्षुर्दर्शनाधिकास्ते चत्वारः, पंचाक्षेषु द्वादश, पृथिव्यप्तेजोवायुवनस्पतिष्वेकाक्षोक्तास्त्रयः, त्रसेषु सर्वे, मनोवचोयोगयोराद्ययोरन्त्ययोश्च द्वादश, मध्यमेषु केवलद्वयहीना दश, औदारिके निखिलाः, तन्मिश्रकार्मणयोर्मनःपर्ययविभंगचक्षुर्दर्शनहीना नव, वैक्रियिके मनःपर्ययकेवलद्वयहीना नव, तन्मिश्रे मनःपर्ययकेवलद्वयविभंगचक्षुर्दर्शनहीनाः सप्त, आहारकद्वये प्रथमज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि षट्, स्त्रीषंढवेदयोस्तुर्यज्ञानकेवलद्वयवर्जिता नव, पुंवेदे विकेवलद्वया दश, चतुर्षु कषायेषु पुंवेदोक्ता दश, त्रिष्वज्ञानेष्वज्ञानत्रिकचक्षुरचक्षुर्दर्शनानि पंच, प्रथमज्ञानचतुष्के केवलद्वयाज्ञानत्रिकहीना सप्त, केवले केवलद्वयं, सामायिकछेदोपस्थापनसूक्ष्मसाम्परायेष्वज्ञानत्रिककेवलद्वयहीनाः सप्त, परि-

१ आहारकयोगिनोमुनेः मनःपर्ययाभावात् तदुक्तंगोम्मटसारजीवकांडे "मणपज्जवपरिहारो पढमुवसम्मत्तदोण्णिआहारा । एदेसु एक्कपगदेणत्थित्तिअसेसयं जाणे" ॥ २ मनःपर्ययज्ञानिनो मुनेः स्त्रीनपुंसकवेदोदयाभावात् तदुक्तं गो० कर्मकाण्डे मणपज्जवपरिहारेणवरिणसंढित्थिहारदुगं ।

हारदेशसंयमयोराद्यज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि षट्, यथाख्याते पंचज्ञानचतुर्दर्शनानि नव, असंयमे तुर्यबोध-केवलद्वयहीना नव, चक्षुरचक्षुर्दर्शनयोर्द्विके केवलद्वयहीना दश, अवधिदर्शने केवलयुग्माज्ञानत्रिकहीनाः सप्त, केवले केवलद्वयं, आद्यलेश्यात्रये केवलद्वयतुर्यबोधहीना नव, तेजः पद्मलेश्ययोः केवलद्वयविवर्जिता दश, शुक्लायां सर्वे, भव्ये केवलद्वयोना दश, अभव्ये चक्षुरचक्षुरज्ञानत्रिकाणि पंच, औपशमिकसम्यक्त्वे प्रथमज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि षट्, वेदके केवलयुगाज्ञानत्रिकहीनाः सप्त, अज्ञानत्रयहीनाः क्षायिके नव, सासनमिथ्यादृशोश्चक्षुरचक्षुर्दर्शनाज्ञानत्रिकाणि पंच, मिश्रे प्रथमज्ञानत्रिकचक्षुरचक्षुरवधिदर्शनानि मिश्राणि षट्, संज्ञिनि केवलद्वयहीना दश, मतिश्रुताज्ञानचक्षुरचक्षुर्दर्शनानि चत्वारोऽसंज्ञिनि, आहारे सर्वे, अनाहारके विभंगमनःपर्यय-चक्षुर्दर्शनहीना नव । मार्गणासु एवमुपयोगा निरूपिताः ।

अथ योगा निरूप्यन्ते——

त्रयोदश मनुष्यत्तावेकादश गतित्रये ।
योगा योज्याः परेष्वेवमिन्द्रियादिषु कोविदैः ॥ ८ ॥

स्पष्टं सूच्यते——

नरक	ति.	मनु.	दे.	ए.	द्वी.	त्री.
११	११	१३	११	३	४	४
च.	पं.	पृ.	अ.	तेज.	वायु	वन.
४	१५	३	३	३	३	३
त्रस	स. म.	अ. म.	उ. म.	अ.	स. व.	अ. व.
१५	१	१	१	१	१	१

उ. व.	अ. व.	औदा.	औ. मिश्र	वै	वै. मिश्र.	आहा.	
१	१	१	१	१	१	१	
आ. मिश्र	का.	स्त्री.	पुं.	नपुं.	क्रो.	मा.	
१	१	१३	१५	१३	१५	१५	
माया	लोभ	कुमति	कुश्रुत	विभं.	मति.	श्रु.	अव.
१५	१५	१३	१३	१०	१५	१५	१५
मनः	केवल.	सामा.	छेदो.	परि.	सू.	यथा.	संयमासं
९	७	११	११	९	९	११	९
असंय.	चक्षु. द.	अच. द.	अव. द.	के. द.	कृ.	नील.	का.
१३	१२	१५	१५	७	१३	१३	१३
तेजो.	पद्म.	शु.	भव्य.	अभ.	औप.	वेदक	क्षायिक
१५	१५	१५	१५	१३	१३	१५	१५
सास.	मिश्र	मि.	सं.	अ.	आ.	अ.	
१३	१०	१३	१५	४	१४	१	

तत्प्रकारः सूच्यते——

गताव[१]नाहारकद्वयाः श्वभ्रदेवयोरेकादश योगाः, निराहार-युगवैक्रियिकयुगाः तिर्यक्ष्वेकादश, वैक्रियिकद्वयहीना मनुष्येषु त्रयोदश, एकाक्षे कार्मणौदारिकौदारिकमिश्राभिधास्त्रयः, विकलेष्वसत्यमृषावचोयोगसहितास्ते चत्वारः, पंचाक्षे सकलाः, पंचसु स्थावरेष्वेकाक्षोक्तास्त्रयः, त्रसेषु सर्वे, योगेष्वेको निजोनिजः, स्त्रीनपुंसकयोर्निराहारकद्वयास्त्रयोदश, पुंसि पंचदश, कषायचतुष्के सर्वे, मत्यज्ञानश्रुताज्ञानयोर्निराहारकास्त्रयोदश, विभंगे मिश्रत्रिकाहारककार्मणहीना दश, मतिश्रुतावधिषु सर्वे, तुर्यबोधे मनोवचश्चतुष्कौदारिकयोगा नव, आद्यंतमनोवचोयोगौदारिकद्वयकार्मणाः सप्त केवले, आद्यसंयमयो-

---

१ आहारकद्वयौदारिकद्वयहीनाः ।

वैक्रियिकमिश्रत्रिकोनाः, यथाख्याते वैक्रियिकद्वयाहारकद्वयोनाः, परिहारसूक्ष्मसांपरायदेशसंयमेषु मनोवचनौदारिकयोगा नव, त्रयोदशासंयमे निराहारकद्वयाः, चक्षुर्दर्शने मिश्रत्रिकहीना द्वादश, अचक्षुरवधिदर्शनयोः सर्वे, केवलदर्शने केवलज्ञानोक्ताः, कृष्णनीलकापोतासु निराहारकद्वयास्त्रयोदश, तेजःपद्मशुक्लासु सर्वे, भव्ये सर्वे, अभव्ये निराहारकद्वयास्त्रयोदश, औपशमिकसम्यक्त्वसासनमिथ्यादृष्टिषु आहारकद्वयहीनास्त्रयोदश, वेदकक्षायिकयोः सर्वे, मिश्रे मिश्रत्रिकाहारककार्मणहीना दश, संज्ञिनि सर्वे, असंज्ञिनि कार्मणौदारिकद्वयांत्यवचोयोगाश्चत्वारः, आहारके निःकार्मणाश्चतुर्दश, एकः कार्मणोऽनाहारके। एवं मार्गणासु योगाः योजिताः।

जीवसमासेषूपयोगा उच्यन्ते——

जीवस्थानेषु चत्वार उपयोगाः द्वयोर्बुधैः।
त्रय एकादशस्विष्टा एकत्र द्वादशस्फुटम् ॥ ९ ॥

तदित्थम्——११, ३। २, ४। १, १२।

तत्प्रकारः सूच्यते——

तत्र मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनान्येकादशसु त्रयः, मत्यज्ञानश्रुताज्ञानाचक्षुर्दर्शनचक्षुर्दर्शनानि चतुरिन्द्रियासंज्ञिनोः पूर्णयोर्द्वयोश्चत्वारः, संज्ञिनि पूर्णे द्वादशोपयोगाः।

जीवस्थानेषु योगा उच्यन्ते——

---

१ संज्ञिपंचेन्द्रियापर्याप्तस्य एकजीवापेक्षया जघन्येन त्रय उपयोगाः सम्भवन्ति नानाजीवापेक्षया तु सप्त। इति विचारणीयं।

द्वौ चतुर्षु नवस्वेकः समस्ताः संति संज्ञिनि ।
जीवस्थानेषु विज्ञेया योगा योगविशारदैः ॥ १० ॥

तदित्थम्——९, १ । ४, २ । १, १५ ।

तत्प्रकारः सूच्यते——

द्वयोरेकेन्द्रिययोः पर्याप्तयोरौदारिक एकः, सप्तस्वपर्याप्तेष्वौदारिकमिश्र एकः इति । समुदायेन नवस्वेको योगो द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिषु पर्याप्तेषु चतुर्षु द्वौ कायवाग्योगौ, संज्ञिनि पर्याप्ते पंचदश योगाः ।

पंच षट् सप्त ज्ञेया द्वौ द्वित्रिसप्तद्विषु क्रमात् ।
गुणस्थानेषु विद्वद्भिरुपयोगा भवंत्यमी ॥ ११ ॥

त इत्थम्—५।५।६।६।६।७।७।७।७।७।७।७।२।२।

तत्राज्ञानत्रयचक्षुरचक्षुर्दर्शनानि मिथ्यादृष्टिसासनयोर्द्वयोः प्रत्येकं पंच, ज्ञानत्रयचक्षुरचक्षुरवधिदर्शनानि मिश्रासंयतदेशसंयतेषु त्रिषु षडेकशः, परं मिश्रे ज्ञानान्यज्ञानमिश्राणि, चत्वारि ज्ञानानि त्रीणि दर्शनानि सप्तसु यतिषु सप्तैकशः, केवलज्ञानकेवलदर्शने द्वयोः केवलिनोः प्रत्येकं द्वावुपयोगौ ।
[1]३, २ । ३, २ । ३, ३ । ३, ३ । ३, ३ । ४, ३ । ४, ३ । ४, ३ । ४, ३ । ४, ३ । ४, ३ । ४, ३ ।
सयोगायोगयोः १, १ । १, १ ।

आद्ययोरव्रते योगा विज्ञातव्यास्त्रयोदश ।
दश मिश्रे प्रमत्ताख्य एकादश विचक्षणैः ॥ १२ ॥

---

१ अत्र प्रथमतः ज्ञानोपयोगसंख्यांका पश्चाद्दर्शनोपयोगसंख्यांकाः । एवं सयोगायोगयोरपि ।

गुणानां सप्तके योगा नव सप्त मताः जिनैः ।
सयोगे योगनिर्मुक्ते न योगा योगिपूजिते ॥ १३ ॥
१३।१३।१०।१३।९।११।९।९।९।९।९।९।७।०।

मिथ्यादृक्सासनाव्रतेषु त्रिष्वाहारकद्वयहीनाः त्रयोदश, मिश्रे मिश्रद्वयाहारकद्वयकार्मणहीना दश, प्रमत्ते वैक्रियिकद्वयौदारिकमिश्रकार्मणहीना एकादश, देशसंयताप्रमत्तादिषु सप्तसु वैक्रियिकद्वयाहारकद्वयौदारिकमिश्रकार्मणहीना नव, आद्यंतमानसद्वयाद्यंतवचनद्वयौदारिकद्वयकार्मणलक्षणा योगिनि सप्त योगाः ।

योगिन्यौदारिको दंडे मिश्रो योगः कपाटके ।
कार्मणो जायते तत्र, प्रतरे लोकपूरणे ॥ १४ ॥

मिथ्यात्वाविरती योगः कषायः कथितो जिनैः ।
चत्वारः प्रत्ययाः मूले कर्मबन्धविधायिनः ॥ १५ ॥
उत्तराः प्रत्ययाः पंच द्वादश प्रत्ययातिगैः ।
जिनैः पंचदश प्रोक्ताः क्रमतः पंचविंशतिः ॥ १६ ॥
सामान्येन विशेषेण मौलिकाः प्रत्ययाः बुधैः ।
गुणस्थानेषु सर्वेषु योजनीया यथागमम् ॥ १७ ॥
मिथ्यात्वयुजि चत्वारो निर्मिथ्यात्वा गुणत्रये ।
विरत्यविरतिर्मिश्रा देशे द्वौ गुणपंचके ॥ १८ ॥
गुणानां त्रितये योगः केवलः प्रत्ययः स्मृतः ।
अन्तिमः प्रत्ययातीतः कर्मकक्षनिकर्त्तनः ॥ १९ ॥
दशत्रसविरत्याढ्या स्थावराविरतिर्मता ।
सार्द्धं योगकषायाभ्यां संयतासंयते त्रयः ॥ २० ॥

नानैकसमयेप्येते नानैकप्राणभागिनाम् ।
गुणस्थानेषु सर्वेषु प्रथमाः प्रत्यया मताः ॥ २१ ॥
तदित्थम्—४।३।३।३।३।२।२।२।२।२।१।१।१।० ।
उत्तरप्रत्ययानाह—
आद्यं सांशयिकं ज्ञेयं प्रतीपाज्ञानिके परे ।
विनयैकान्तिके चान्ये मिथ्यात्वं पंचधा मतम् ॥ २२ ॥
सर्वज्ञेन विरागेण जीवाजीवादि भाषितम् ।
सत्यं न वेति संदेहस्तत्र सांशयिकं स्मृतम् ॥ २३ ॥
केवली कवलाहारः सग्रन्थो मोक्षसाधकः ।
जीवविध्वंसनं धर्मो विपरीतमिदं विदुः ॥ २४ ॥
हिताहितापरीक्षायामाज्ञानिकमुदाहृतम् ।
सर्वेषु देवधर्मेषु साम्यं वैनयिकं मतम् ॥ २५ ॥
इदमेवेत्थमेवेति सर्वथा धर्मधर्मिणोः ।
ग्राहिका शेमुषी प्राज्ञैरेकान्तिकमुदाहृतम् ॥ २६ ॥
जीवानां हिंसने षण्णामिन्द्रियाणामयंत्रणे ।
द्वादशाविरतिर्भेदा गदिता गतकल्मषैः ॥ २७ ॥
चत्वारो मनसा योगाश्चत्वारो वाचिका मताः ।
कोविदैः कायिकाः सप्त योगाः पंचदशेत्यतः ॥ २८ ॥
तैजसेन यतः कर्म बध्यते न न जीर्यते ।
तैजसो न ततो योगो गीयते योगवेदिभिः ॥ २९ ॥
सदा निरुपभोगस्य क्षण एको जघन्यतः ।
उक्ता प्रकर्षतस्तस्य षट्षष्टिः सागरा स्थितिः ॥ ३० ॥
कषायाः षोडश प्राज्ञैर्नोकषाया नवेरिताः ।
ईषद्भेदो न भेदोऽस्ति कषायाः पंचविंशतिः ॥ ३१ ॥

समुदिताः ५७ ।

गुणेष्वेतानाह—

प्रथमे पंचपंचाशत् पंचाशत्प्रत्ययाः परे ।
त्रिचत्वारिंशदन्यत्र षट्चत्वारिंशदन्यतः ॥ ३२ ॥
सप्तत्रिंशच्चतुर्द्विद्वियुक्ता विंशतयस्त्रिषु ।
षोडशैकैकनिर्मुक्ता यावत्ते नवमे दश ॥ ३३ ॥
दश सूक्ष्मे नव प्रोक्ताः प्रशान्तक्षीणयोर्द्वयोः ।
सयोगे सप्त निर्योगः प्रतीतः प्रत्ययोज्झितः ॥ ३४ ॥
इति नानाक्षणेष्वेते [1]नानाजीवेषु कोविदैः ।
उत्तराः प्रत्यया नेया गुणस्थानेषु यत्नतः ॥ ३५ ॥

तदेवम्—

अष्टसु गुणस्थानेषु ५५।५०।४३।४६।३७।२४।२२।२२।
[2]अनिवृत्तौ १६।१५।१४।१३।१२।११।१० ।
सूक्ष्मादिषु पंचसु १०।९।९।७।० ।

तत्प्रकारः सूच्यते—

आहारकद्वयोना मिथ्यादृष्टौ, ते मिथ्यात्वपंचकहीनाः सासने, प्रथमकषायचतुष्कवैक्रियिकौदारिकमिश्रकार्मणहीना मिश्रे, वैक्रियिकौदारिकमिश्रकार्मणयुक्ताश्चतुर्थे, वैक्रियिकद्वयौदारिकमिश्रकार्मणद्वितीयकषायचतुष्कत्रसाविरतिहीनाः पंचमे, तृतीयकषायचतुष्कैकादशाविरतिहीना आहारकद्वययुक्ताः षष्टे, आहारकद्वयहीनाः सप्तमाष्टमयोः, हास्यादिषट्केन षंढवेदेन

१ एकजीवस्य सर्वे प्रत्ययाः एकदैव न सम्भवन्ति । बहुषुजीवेष्वेकक्षणे, एकजीवस्य च अनेकक्षणेषु सम्भवितुमर्हन्ति । २ अनिवृत्तिकरणभागेषु ।

स्त्रीवेदेन पुंवेदेन क्रोधेन मानेन मायया हीनाः क्रमेण सप्त-स्वनिवृत्तिक्षणेषु, सूक्ष्मे त एव दश, लोभहीनाः शांतक्षीण-योर्नव, आद्यंतमनोवचनौदारिकद्वयकार्मणाभिधाः सप्त प्रत्ययाः सयोगे ।

मार्गणायां प्रत्ययाः दीयन्ते—

पंचाशद्द्वित्रिकैकाग्रा स्वस्तिर्यक्श्वाभ्ररीतिषु ।
नृगतौ पंचपंचाशन्मार्गणास्वपरास्वपि ॥ ३६ ॥

नरक	तिर्य.	मनुष्य	देव.	एकें.	द्वीन्द्रि.	त्रीन्द्रि.		
५१	५३	५५	५२	३८	४०	४१		
चतु.	पं.	पृ.	अप्	तेजो	वायु	व.		
४२	५७	३८	३८	३८	३८	३८		
त्रस	स. म.	अस. म.	उ. म.	अनु. म.	स. व.	अ. व.		
५७	४३	४३	४३	४३	४३	४३		
उ. व.	अ. व.	औ. का.	औ.मि.का.	वै. का.	वै. मि.का.	आ.का.		
४३	४३	४३	४३	४३	४३	१२		
आ.मि.का.	का. का.	स्त्री.	पुं.	नपुं.	क्रो.	मा.		
१२	४३	५३	५७	५५	४५	४५		
माया	लोभ	कुमति	कुश्रुत	विभं.	मति.	श्रु.		
४५	४५	५५	५५	५२	४८	४८		
अव.	मनः	केवल.	सामा.	छेदो.	पार.	सू.		
४८	२०	७	२४	२४	२२	१०		
यथा.	संयमा.	असंय.	चक्षु. द.	अचक्षु.	अव.	के. द.	कृ.	
११	३७	५५	५७	५७	४६	७	५५	
नील.	का.	तेजो.	पद्म.	शु.	भव्य.	अभ.	औप.	
५५	५५	५७	५७	५७	५७	५५	४६	
वेदक	क्षायिक	सासा.	मिश्र	मि.	सं.	अ.	आ.	अना
४८	४८	५०	४३	५५	५७	४५	५६	४३

तत्प्रकारः सूच्यते——

स्त्रीपुंवेदौदारिकद्वयाहारकद्वयोना नरकगत्यां ५१, वैक्रियिकद्वयाहारकद्वयोनास्तिर्यग्गत्यां ५३, वैक्रियिकद्वयोनाः नृगत्यां ५५, नपुंसकवेदौदारिकद्वयाहारकद्वयोना देवगत्यां ५२, रसनघ्राणचक्षुःश्रोत्रमनः स्त्रीपुंवेदसर्वमनोवचोयोगवैक्रियिकाहारकद्वयोना एकाक्षेषु ३८, त एवांत्य[1]भाषारसनाभ्यां सह द्व्यक्षे ४०, घ्राणेन सह त्र्यक्षे ४१, चक्षुषा सह चतुरक्षे ४२, त्रसपंचाक्षयोः सर्वे ५७, एकाक्षोक्ताः स्थावरेषु ३८, विमुच्याहारकद्वयं शेषेषु[2] निजं निजं हित्वा शेषहीनाः ४३, संज्वालस्त्रीनपुंसकद्वयहीननोकषायनिजयोगा आहारकद्वये [3]१२, स्त्रीषंढवेदयोराहारकद्वयहीनाः [4]५५, पुंवेदे सर्वे [5]५७, निजहीनान्यकषायद्वादशकोना क्रोधादिषु ४५, मत्यज्ञानश्रुताज्ञानयोराहारकद्वयहीनाः ५५, वैक्रियिक[6]कौदारिकमिश्रकार्मणाहारकद्वयोना विभंगे ५२, ज्ञानत्रये मिथ्यात्वपंचकानंतानुबंधिहीनाः ४८, नवाद्ययोगसंज्वालस्त्रीषंढहीननोकषाया मनःपर्यये २०, आद्यंतमनोवचनौदारिकद्वयकार्मणाः केवलज्ञाने ७, संज्वालनोकषायवैक्रियिकद्वयौदारिकमिश्रकार्मणहीनैकादश योगाः सामायिकछेदोपस्थापनयोः २४, आहारक-

---

१ अनुभयवचनयोगः । २ योगेषु । ३ आहारकयोगिनाम् न स्त्रीनपुंसकवेदोदयः तदुक्तं छट्ठगुणं वा हारे ण थीणातियसंढथीवेदं ॥३१६॥ गो.क. । ४–५ स्त्रीवेदादिमार्गणासु स्वान्यवेदद्वयोदयाभावात् ५५ स्थाने ५३, ५७ स्थाने च ५५ भवितव्यम् अथवा द्रव्यवेदापेक्षया ज्ञातव्येयम् रचना किन्तु न वेदमार्गणायाम् द्रव्यवेदस्यापेक्षाऽस्माभिः कुत्रचिद्दृष्टेतिसर्वैर्विचारणीयम् । ६ वैक्रियकमिश्र ।

द्वयहीनास्ते परीहारे २२, नवाद्ययोगान्त्यलोभाः सूक्ष्मे १०, अंत्यलोभोनौदारिकमिश्रकार्मणयुक्ता यथाख्याते ११, नवनोकषायनवाद्ययोगाष्टांत्यकषायत्रसासंयमोनाखिलासंयमाः संयमासंयमे ३७, असंयमे आहारकद्वयहीनाः सर्वे ५५, चक्षुर्दर्शनाचक्षुर्दर्शनयोः सर्वे ५७, ज्ञानत्रयभाविनोऽवधिदर्शने ४८, केवलज्ञानभाविनः केवलदर्शने ७, आद्यलेश्यात्रये आहारकद्वयहीनाः ५५, अंत्यलेश्यात्रये सर्वे ५७, भव्ये सर्वे ५७, अभव्ये आहारकद्वयहीनाः ५५, मिथ्यात्वपंचकानंतानुबंधिचतुष्टयाहारकद्वयहीना औपशमिके ४६, आहारकद्वयाधिका वेदकक्षायिकयोः ४८, मिथ्यात्वपंचकाहारकद्वयहीनाः सासने ५०, मिथ्यात्वपंचकाहारकद्वयानंतानुबंधिवैक्रियिकौदारिकमिश्रकार्मणहीनाः मिश्रे ४३, आहारकद्वयहीनाः मिथ्यात्वे ५५, संज्ञिनि सर्वे ५७, असंज्ञिनि[1] औदारिकद्वयासत्यमृषाभाषेतरयोगहीनाः ४५, आहारके कार्मणहीनाः ५६, अनाहारके कार्मणहीनसकलयोगहीनाः ४३ ।

उत्तराः प्रत्ययाः प्रोक्ताः मार्गणास्वखिलास्विति ।
इदानीमिति कथ्यन्ते ते गुणेषूत्तरोत्तराः ॥ ३७ ॥
जघन्याः प्रत्ययाः प्रोक्ता द्वयोर्दर्शनवद्द्वयोः ।
एकत्राष्ट त्रये पंच द्वये द्वावेककस्त्रये ॥ ३८ ॥
अष्टादशादितः सप्तदशषोडशकं द्वयोः ।
चतुर्दश त्रये सप्त त्रिद्वयेकैकैककाः क्रमात् ॥ ३९ ॥

---

१ असंज्ञिनः स्त्रीपुंवेदोदयाभावात् कार्माणयोगस्यसद्भावाच्च ४४ प्रत्यय सद्भावो ज्ञायते इति विचारणीयं ।

उत्कृष्टाः प्रत्यया जीवमेकं प्रत्युत्तरोत्तराः ।
गुणस्थानेषु विज्ञेयाः नानैकसमयं प्रति ॥ ४० ॥
तदित्थम्——

ज. १०	१०	९	९	८	५	५	५	२	२	१	१	१	०
उ. १८	१७	१६	१६	१४	७	७	७	३	२	१	१	१	०

कालमावलिकामात्रं पाकोऽनंतानुबंधिनाम् ।
जंतोरस्ति न सम्यक्त्वं हित्वा मिथ्यात्वयायिनः[१] ॥ ४१ ॥
सम्यक्त्वतो न मिथ्यात्वं प्रयातोऽन्तर्मुहूर्त्तकम् ।
मिथ्यात्वतो न सम्यक्त्वं शरीरी याति पंचताम्[२] ॥ ४२ ॥

जघन्याः प्रत्ययाः ज्ञेयाः गुणस्थानेषु कोविदैः ।
प्रकृष्टमध्यमैः सार्द्धं क्रमेणेति यथागमम् ॥ ४३ ॥
एकद्वित्रिचतुःपंच षट् संयोगेन कायिकाः ।
गुणकारा भवेयुर्ये ते षट्पंचदशादयः ॥ ४४ ॥
अनुलोमविलोमाभ्यामेकैकोत्तरवृद्धितः[३] ।
एकद्वित्र्यादिसंयोगे विनिक्षिप्य पटीयसा ॥ ४५ ॥
पूर्वकेन परं राशिं गुणयित्वा विलोमतः ।
क्रमादेकादिकैरंकैर्भाजिते लभ्यते फलम्[४] ॥ ४६ ॥

तदित्थं[५]——

	६	५	४	३	२	१
	१	२	३	४	५	६

लब्धाः[६] गुणकाराः——६ । १५ । २० । १५ । ६ । १ ।

---

१ मिथ्यात्वे गमनशीलस्य । २ मृत्युम् । ३ सन्मुखपराङ्मुखाभ्यां । ४ द्विकलं । ५ उपरिस्थांकेषु विलोमाः, अधःस्थांकेष्वनुलोमाः । ६ यत्र षट्कं भवति राशौ तत्रैककं गृह्यते, यत्र पंचदशकाक्षरं तत्र द्विकं गृह्यते, यत्र विंशतिर्भवति तत्र राशौ त्रिकं भवति, यत्र पंचदशकं तत्र चतुष्कं, पत्र

(शेषमग्रे पृष्ठे

एकत्रिपंचषट्षट्षट्चतुस्त्र्येकांकभूषितैः ।
आनेया नवभिः कूटैर्भंगा मिथ्यादृशो बुधैः ॥

कू १ । कू ३ । कूट ५ । कूट ६ । कूट ६ । कूट ६ ।
कूट ४ । कूट ३ । कूट १ ।

काय १, अनंतानुबंधि ०, भय ०, योग १० ।
एते दश जघन्यप्रत्ययाः ।

मिथ्यात्वमिन्द्रियं कायः कषायैकतमत्रयम् ।
एको वेदो द्वियुग्मैकं दश योगैककः परः ॥ ४७ ॥

१ । १ । १ । ३ । १ । २ । ० । १ । पिंडिताः १० ।

अत्र पंचानां मिथ्यात्वानामेकतमस्योदयेऽस्तीत्येको मिथ्यात्वप्रत्ययः, षण्णामिन्द्रियाणामेकतमेन षण्णां कायानामेकतमस्य विराधने द्वावसंयमप्रत्ययौ, प्रथमचतुष्कहीनानां चतुर्णां कषायाणामेकतमत्रिकोदये त्रयः कषायप्रत्ययाः, त्रयाणां वेदानामेकतमोदये एको वेदप्रत्ययः, हास्यरतियुग्मारतिशोकयुग्मयोरेकतरोदये द्वौ युग्मप्रत्ययौ, आहारकद्वयमिश्रत्रयहीनानां दशानां योगानामेकतमोदये एको योगप्रत्ययः । एवमेते मिथ्यादृष्टेरेकत्र समये जघन्यप्रत्ययाः दश । १० ।

सत्रयोदशयोगस्य सम्यग्दर्शनधारिणः ।
मिथ्यात्वमुपयातस्य शान्तानंतानुबंधिनः ॥ ४८ ॥

षट्कं तत्र पंचकं, यत्रैककं तत्र षट्कं गृह्यते । तद्यथा ६÷१=६ । ६×५=३०, १×२=२, ३०÷२=१५ । ६×५×४=१२०, १×२×३=६, १२०÷६=२० । ६×५×४×३=३६०, १×२×३×४=२४, ३६०÷२४=१५ । ६×५×४×३×२=७२०, १×२×३×४×५=१२०, ७२०÷१२०=६ । ६×५×४×३×२×१=७२०, १×२×३×४×५×६=७२०, ७२०÷७२०=१ ।

पाकोनावलिकां यस्मादस्त्यनंतानुबंधिनाम् ।
ततोऽनंतानुबंध्यूनकषायप्रत्ययत्रयम् ॥ ४९ ॥
असौ न म्रियते यस्मात्कालमंतर्मुहूर्त्तकम् ।
मिश्रत्रयं विना तस्माद्यौगिकाः प्रत्ययाः दश ॥ ५० ॥

मिथ्यात्वपंचकेंद्रियषट्ककायषट्ककषायचतुष्कवेदत्रययुग्मद्वययोगदशकैकतमभंगाः ५×६×६×४×३×२×०×१०=४३२०० परस्पराभ्यस्ताः ।

सामान्यस्य विशेषस्य संख्यायाः कूटमुच्यते ।
चतुर्थे गुणकारस्य भंगराशेश्च पंचमम् ॥ ५१ ॥
गुणस्थानेषु सर्वेषु कूटस्थानेषु पंचसु ।
आनेयाः सकलाः भंगाः विज्ञाय प्रत्ययस्थिताः ॥ ५२ ॥

गुणकारकूटं सामान्यकूटाकारेण विरचितं विशेषकूटं संख्यागुणकारकूटं भंगराशिकूटम् । ४३२०० ।

सामान्यकूटम्	विशेषकूटमिदं	गुणकारकूटं	संख्याकूटं	
१५	१०	१०	१	यो.
२	०	०	०	भ.
२-२	२-२	२	२	हा.
१-१-१	१ १ १	३	१	वे.
४-४-४-४	३-३-३-३	४	३	क्रो.
१-१-१-१-१-१	१ १ १ १ १ १	६	१	का.
१-१-१-१-१-१	१ १ १ १ १ १	६	१	इं.
१-१-१-१-१	१ १ १ १ १	५	१	मि.

दशभिः प्रत्ययैर्मिथ्यादृष्टिर्बध्नाति षोडश ।
अर्पिताः प्रकृतीरेतैर्जघन्येनेति दर्शितम् ॥ ५३ ॥

इत्थमेकादशादीनां विधातव्या प्ररूपणा ।
प्रत्ययानां पटीयोभिरवबुध्य यथागमम् ॥ ९४ ॥

एकादशः—का	अन.	भ.	यो.
२	०	०	१०
१	१	०	१३
१	०	.१	१०

	सं.	गु	सं.	गु	सं.	गु.
यो.	१	१०	१	१३	१	१०
		भ.०		भ.	१	२
हा.	२	२	२	२	२	२
वे.	१	३	१	३	१	३
क.	३	४	४	४	३	४
इं	१	६	१	६	१	६
मि.	१	५	१	५	१	५
काय	२	१५	१	६	१	६

१०८००० [1]
५६१६०
८६४००
सर्वे मिलिताः
२५०५६०

११

द्वादशः

का.	अन.	भ.	यो.
३	०	०	१०
२	१	०	१३
२	०	१	१०
१	१	१	१३
१	०	२	१०

इयं चूलिका

संख्या

यो १	यो १	यो १	यो १	यो १
भ ०	भ ०	भ १	भ १	भ २
हा २	हा २	हा २	हा २	हा २
वे १	वेद् १	वे १	वे १	वे १
क्रो ३	क्रो ४	क्रो ३	क्रो ४	क्रो ३
इं १	इं १	इं १	इं १	इं १
मि १	मि १	मि १	मि १	मि १
का ३	का २	का २	का १	का १

---

(१) १०×२×३×४×६×५×१५=१०८००० एवमन्यत्रापि ।

सर्वे मिलिताः
१४४०००
१४०४००
२१६०००
११२३२०
४३२००
६५५९२०

|१२|

गुणाकारः

१०	१३	१०	१३	१०
भ०	भ०	ए२	ए२	×
२	२	२	२	२
३	३	३	३	३
४	४	४	४	४
६	६	६	६	६
५	५	५	५	५
२०	१५	१५	६	६

त्रयोदशः ।

का.	अन.	भ.	यो.		
४	०	०	१०		
३	१	०	१३		
३	०	१	१०		
२	१	१	१३		
२	०	२	१०		
१	१	२	१३		
यो १	यो १	यो १	यो १	१	१
भ ०	भ ०	भ १	भ १	२	२
हा २	हा २	हा २	हा २	२	२
वे १	वे १	वे १	वे १	१	१
क्रो ३	क्रो ४	क्रो ३	क्रो ४	३	४
इं १	इं १	इं १	इं १	१	१
मि. १	मि १	मि १	मि १	१	१
का ४	का ३	का ३	का २	२	१

१०	१३	१०	१३	१०	१३
भ०	भ०	ए२	ए२	द्वो×	द्वो×
२	२	२	२	२	२
३	३	३	३	३	३
४	४	४	४	४	४
६	६	६	६	६	६
५	५	५	५	५	५
१५	२०	२०	१५	१५	६

सर्वे मिलिताः
१०८०००
१८७२००
२८८०००
२८०८००
१०८०००
५६१६०
१०२८१६०

|१३|

चतुर्दशः ।

का	अ	भ	यो	यो १	यो १	यो. १	यो. १	यो १	यो १
५	०	०	१०	भ ०	भ ०	भ. १	भ. १	भ २	भ २
४	१	०	१३	हा २	हा २	हा. २	हा. २	हा २	हा २
४	०	१	१०	वे १	वे १	वे. १	वे. १	वे १	वे १
३	१	१	१३	क्रो ३	क्रो ४	क्रो. ३	क्रो. ४	क्रो ३	क्रो ४
३	०	२	१०	इं १	इं १	इं. १	इं. १	इं १	इं १
२	१	२	१३	मि १	मि १	मि. १	मि. १	मि १	मि १
				का ५	का ४	का. ४	का. ३	का ३	का २

१०	१३	१०	१३	१०	१३
भ०	भ०	ए २	ए २	दो×	दो×
२	२	२	२	२	२
३	३	३	३	३	३
४	४	४	४	४	४
६	६	६	६	६	६
५	५	५	५	५	५
६	१५	१५	२०	२०	१५

सर्वे मिलिताः—

४३२००
१४०४००
२१६०००
३७४४००
१४४०००
१४०४००
१०५८४००

१४

पञ्चदशः ।

का.	अन	भ.	यो.
६	०	०	१०
५	१	०	१३
५	०	१	१०
४	१	१	१३
४	०	२	१०
३	१	२	१३

१०	१३	१०	१३	१०	१३
भ.	भ.	ए २	ए २	दो×	दो×
२	२	२	२	२	२
३	३	३	३	३	३
४	४	४	४	४	४
६	६	६	६	६	६
५	५	५	५	५	५
१	६	६	१५	१५	२०

७२००
५६१६०
८६४००
२८०८००
१०८०००
१८७२००
सर्वे मिलिताः
७२५७६०

१५

षोडशः ।

का.	अन.	भ.	यो.
६	०	१	१०
५	१	१	१३
५	०	२	१०
४	१	२	१३

१०	१३	१०	१३
ए २	ए २	दो×	दो×
२	२	२	२
३	३	३	३
४	४	४	४
६	६	६	६
५	५	५	५
१	६	६	१५

सर्वे मिलिताः—

१४४००
११२३२०
४३२००
१४०४००
३१०३२०

|१६|

सप्तदशः ।

का	अ	भ	यो
६	१	१	१३
६	०	२	१०
५	१	२	१३

१३	१०	१३
ए २	दो×	दो×
२	२	२
३	३	३
४	४	४
६	६	६
५	५	५
१	१	६

सर्वे मिलिताः—

१८७२०
७२००
५६१६०
८२०८०

|१७|

का ६ । अ १ । भ २ । यो १३ ।

मिथ्यात्वमिन्द्रियं कायाः षट् कषायचतुष्टयम् ।
वेदो द्वियुगलैकं भीयुग्मं योगो दशाष्ट च ॥

१।१।६।४।१।२।२।१। मिलिताः १८ ।

पंचानां मिथ्यात्वानामेकतमः, षण्णामिन्द्रियाणामेकतमेन षट्कायविराधने सप्तासंयमप्रत्ययाः, चतुर्णां कषायाणामेकतमचतुष्कोदये चत्वारः, एकतरो वेदः, एकतरयुगलं, भयजुगुप्साद्वयं, आहारकद्वयं विना त्रयोदशानां योगानामेकतमः । एवमेतेऽष्टादशोत्कृष्टप्रत्ययाः १८ ।

मिथ्यात्वपंचकेन्द्रियषट्कैककायकषायचतुष्कवेदत्रयहास्यादियुग्मद्वयभयजुगुप्सैकत्रयोदशयोगा भंगाः। ५। ६। १। ४। ३। २। १। १३। परस्पराभ्यस्ताः ९३६०। मिथ्यादृष्टेः सर्वे भंगा मिलिताः ४१६३७६०।

सासादनो यतो जातु श्वभ्रभूमिं न गच्छति।
मिश्रे वैक्रियिके योगे स्त्रीपुंवेदद्वयं ततः॥
योगैर्द्वादशभिस्तस्मान्मिश्रवैक्रियिकेण च।
त्रिभिर्द्वाभ्यां च वेदाभ्यां तस्य भंगप्रकल्पना।
संस्थाप्य सासनं द्वेधा योगवेदैर्यथोदितैः।
गुणयित्वाऽखिलाः भंगास्तस्यानेयाः यथागमम्॥

का. १। अन. १। भ. ०। यो १२। (१)। ०। १। १। ४। १। २। ०। १। मिलिताः १०। एतेषामेते। ०। ६। ६। ४। २। ०। १२। अन्योन्यगुणा भंगाः १०३६८। मिश्रवैक्रियिकयोगे यतः सासनो नरकं न गच्छति ततो देवेषु स्त्रीपुंवेदयोरेते। ०। ६। ६। ४। २। २। ०। १। अन्योन्यगुणाः ५७६। एते १०३६८ एते च ५७६ मिलिताः जघन्याः १०९४४।

एकादशः।

का.	अन.	भ.	यो	
२	१	०	१२	१
१	१	१	१२	१

	वै. मि.		वै. मि.
१२	१	१२	१
भ ०	भ०	ए २	ए २
२	२	२	२
३	२	३	२
४	४	४	४
६	६	६	६
२५९२०	१४४०	२०७३६	११५२

सर्वे मिलिताः—

२७३६०ए
२१८८८ए
४९२४८

|११|

द्वादशः ।

का.	अन.	भ.	यो.	
३	१	०	१२	१
२	१	१	१२	१
१	१	२	१२	१

	वै. मि.		वै. मि.		वै. मि.
१२	१	१२	१	१२	१
भ०	भ०	ए२	ए २	दो×	दो×
२	२	२	२	२	२
३	२	३	२	३	२
४	४	४	४	४	४
६	६	६	६	६	६
२०	२०	१५	१५	६	६
३४५६०		५१८४०		१०३६८	
१९२०		२८८०		५७६	

मिलिताः—

३६४८०
५४७२०
१०९४४
१०२१४४

|१२|

त्रयोदशः ।

का.	अन.	भ.	यो	
४	१	०	१२	१
३	१	१	१२	१
२	१	२	१२	१

	वै. मि.		वै मि.		वै. मि.
१२	१	१२	१	१२	१
भ०	भ०	ए२	ए २	दो×	दो×
२	२	२	२	२	२
३	२	३	२	३	२
४	४	४	४	४	४
६	६	६	६	६	६
१५	१५	२०	२०	१५	१५
२५९२०		६९१२०		२५९२०	
१४४०		३८४०		१४४०	

सर्वे मिलिताः—

ए. २७३६०
ए. ७२९६०
ए. २७३६०
१२७६८०

|१३|

चतुर्दशः ।

का.	अन	भ.	यो.	
५	१	०	१२	१
४	१	१	१२	१
३	१	२	१२	१

	वै.मि.		वै.मि.		वै.मि.
१२	१	१२	१	१२	१
भ०	भ०	ए२	ए२	द्वो×	द्वो×
२	२	२	२	२	२
३	२	३	२	३	२
४	४	४	४	४	४
६	६	६	६	६	६
६	६	१५	१५	२०	२०
१०३६८		५१८४०		२५९२०	
	५७६		२८८०		१९२०

मिलिताः—

१०९४४
५४७२०
३६४८०
१०२१४४
१४

पञ्चदशः ।

का.	अन.	भ.	यो	
६	१	०	१२	१
५	१	१	१२	१
४	१	२	१२	१

	वै.मि.		वै.मि.		वै.मि.
१२	१	१२	१	१२	१
भ०	भ०	ए२	ए२	द्वो×	द्वो×
२	२	२	२	२	२
३	२	३	२	३	२
४	४	४	४	४	४
६	६	६	६	६	६
१	१	६	६	१५	१५
१७२८		२०७३६		२५९२०	
	९६		११५२		१४४०

मिलिताः—

१८२४
२१८८८
२७३६०
५१०७२
१५

षोडशः ।

का.	अन.	भ.	यो.	
६	१	१	१२	१
५	१	२	१२	१

	वै.मि.		वै.मि.
१२	१	१२	१
ए२	ए२	दो×	दो×
२	२	२	२
३	२	३	२
४	४	४	४
६	६	६	६
१	१	६	६
३४५६		१०३६८	
१९२		५७६	

मिलिताः—

३६४८
१०९४४
१४५९२

सप्तदशः ।

का.	अन.	भ.	यो.	
६	१	२	१२	१

	वै.मि.
१२	१
दो×	दो×
२	२
३	२
४	४
६	६
१	१

तयोः

१७२८
९६

मिलिताः

१८२४
१७

अमी सर्वे—४५९६४८ भंगाः ।

इति सासादनभंगाः ।

सम्यङ्मिथ्यादृष्टेः प्रत्ययभंगाः निरूप्यन्ते—

नवमः ।

का.	भ.	यो.
१	०	१०

१०
०
२
३
४
६
६

मिलिताः—

८६४०
९

दशमः ।

का.	भ.	यो.
२	०	१०
१	१	१०

१०	१०
भ. ०	ए. २
२	२
३	३
४	४
६	६
१५	६

मिलिताः—

२१६००
१७२८०
३८८८०
१०

एकादशः ।

का.	भ.	यो.
३	०	१०
२	१	१०
१	२	१०

१०	१०	१०
भ०	ए २	द्वा×
२	२	२
३	३	३
४	४	४
६	६	६
२०	१५	६

मिलिताः—

२८८००
४३२००
८६४०
८०६४०
११

द्वादशः ।

का.	भ.	यो.
४	०	१०
३	१	१०
२	२	१०

१०	१०	१०
भ०	ए २	द्वा×
२	२	२
३	३	३
४	४	४
६	६	६
१५	२०	१५

मिलिताः—

२१६००
५७६००
२१६००
१००८००
१२

त्रयोदशः ।

का.	भ.	यो.
५	०	१०
४	१	१०
३	२	१०

१०	१०	१०
भ०	ए२	दोX
२	२	२
३	३	३
४	४	४
६	६	६
६	१५	२०

मिलिताः—

८६४०
४३२००
२८८००
८०६४०

१३

चतुर्दशः ।

का	भ	यो
६	०	१०
५	१	१०
४	२	१०

१०	१०	१०
भ०	ए२	दोX
२	२	२
३	३	३
४	४	४
६	६	६
६	६	६
१	६	१५

मिलिताः-

१४४०
१७२८०
२१६००
४०३२०

१४

पंचदशः ।

का.	भ.	यो.
६	१	१०
५	२	१३

१०	१०
ए२	दोX
२	२
३	३
४	४
६	६
१	६

मिलिताः-

२८८०
८६४०
११५२०

१५

षोडशः ।

का.	भ.	यो.
६	२	१०

१०
द्वो×
२
३
४
६
१

सर्वे मिलिताः—

१४४०
१६

सर्वे मिलिताः=

३६३८८०

इति सम्यङ्मिथ्यादृष्टेर्भंगाः प्ररूपिताः ।

अथ असंयतस्य भंगाः निरूप्यंते—

योगे वैक्रियिके मिश्रे कार्मणे च सुधाशिषु ।
पुंवेदः षण्ढवेदश्च श्वभ्रे बद्धायुषः पुनः ॥ ५९ ॥
तिर्यक्ष्वौदारिके मिश्रे पूर्वबद्धायुषो मतः ।
मनुष्येषु च पुंवेदः सम्यक्त्वालंकृतात्मनः ॥ ६० ॥
त्रिभिर्द्वाभ्यां तथैकेन वेदेनास्य प्रताडना ।
भंगानां दशभिर्योगैर्द्वाभ्यामेकेन[1] च क्रमात् ॥ ६१ ॥

अस्यार्थः—चिरंतनचतुश्चत्वारिंशच्छतादिलक्षणं राशिं त्रिधा व्यवस्थाप्यैकंस्त्रिभिर्वेदैः, अन्यं द्वाभ्यां पुंनपुंसकवेदाभ्यां, परमेकेन नपुंसकवेदेन गुणितं, युगलेन[2] गुणयित्वा, योगैरेकं दशभिः, अन्यं द्वाभ्यां वैक्रियिकमिश्रकार्मणाभ्यां, परमेकेनौदारिकमिश्रेण गुणयेत् । तत एकीकरणे फलं भवति ।

१ क ख पुस्तकयोः "द्वाभ्यां योगेनैकेन च क्रमात्" इतिपाठः किन्त्वनेन छन्दोभङ्गः नार्थविशेषश्च । २ हास्यादियुगलेन ।

नवमः ।

का.	भ.	यो	यो.	यो.
१	०	१०	२	१

१०	२	१
म०	म०	म०
२	२	२
३	२	१
४	४	४
६	६	६
६	६	६

मिलिताः—

८६४०
११५२
२८८
१००८०
९

दशमः ।

का	भ.	यो.		
२	०	१०	२	१
१	१	१०	२	१

१०	२	१	१०	२	१
म०	म०	म०	ए२	ए२	ए२
२	२	२	२	२	२
३	२	१	३	२	१
४	४	४	४	४	४
६	६	६	६	६	६
१५	१५	१५	६	६	६

मिलिताः—

२५२००
२०१६०
४५३६०

एकादशः ।

का.	भ.	यो.	यो.	यो.
३	०	१०	२	१
२	१	१०	२	१
१	२	१०	२	१

१०	२	१	१०	२	१	१०	२	१
म ०	म०	म०	ए २	ए २	ए २	दोX	दोX	दोX
२	२	२	२	२	२	२	२	२
३	२	१	३	२	१	३	२	१
४	४	४	४	४	४	४	४	४
६	६	६	६	६	६	६	६	६
२०	२०	२०	१५	१५	१५	६	६	६
२८८००	३८४०	९६०	४३२००	५७६०	१४४०	८६४०	११५२	२८८

	ए. ३३६००
	ए. ५०४००
मिलिताः—	ए. १००८०
	९४०५०
	११

द्वादशः ।

का.	भ.	यो.	यो.	यो
४	०	१०	२	१
३	१	१०	२	१
२	२	१०	२	१

१०	२	१	१०	२	१	१०	२	१
भ ०	भ०	भ०	ए २	ए २	ए २	दो ×	दो २	दो×
२	२	२	२	२	२	२	२	२
३	२	१	३	२	१	३	२	१
४	४	४	४	४	४	४	४	४
६	६	६	६	६	६	६	६	६
१५	१५	१५	२०	२०	२०	१५	१५	१५
२१६००	२८८०	७२०	५७६०	७६८०	१९२०	२१६००	२८८०	७२०

	ए. २५२००
	ए. ६७२००
मिलिताः—	ए. २५२००
	११७६००
	१२

त्रयोदशः ।

का.	भ.	यो	यो.	यो.
५	०	१०	२	१
४	१	१०	२	१
३	२	१०	२	१

१०	२	१	१०	२	१	१०	२	१
भ०	भ०	भ०	ए२	ए२	ए२	दो×	दो×	दो×
२	२	२	२	२	२	२	२	२
३	२	१	३	२	१	३	२	१
४	४	४	४	४	४	४	४	४
६	६	६	६	६	६	६	६	६
६	६	६	१५	१५	१५	२०	२०	२०
८६४०	११५२	२८८	४३२००	५७६०	१४४०	२८८००	३८४०	९६०

मिलिताः—

१००८०
५०४००
३३६००
९४०८०
१३

चतुर्दशः ।

का.	भ.	यो.	यो.	यो.
६	०	१०	२	१
५	१	१०	२	१
४	२	१०	२	१

१०	२	१	१०	२	१	१०	२	१
भ०	भ०	भ०	ए२	ए२	ए२	दो×	दो×	दो×
२	२	२	२	२	२	२	२	२
३	२	१	३	२	१	३	२	१
४	४	४	४	४	४	४	४	४
६	६	६	६	६	६	६	६	६
१	१	१	६	६	६	१५	१५	१५
१४४०	१९२	४८	१७२८०	२३०४	५७६	२१६००	२८८०	७२०

मिलिताः—

१६८०
२०१६०
२५२००
४७०४०
१४

पंचदशः ।

का.	म.	यो.	यो.	यो.
६	१	१०	२	१
५	२	१०	२	१

१०	२	१	१०	२	१
ए २	ए २	ए २	दो ×	दो ×	दो ×
२	२	२	२	२	२
३	२	१	३	२	१
४	४	४	४	४	४
६	६	६	६	६	६
१	१	१	६	६	६
२८८०	३८४	१६	८६४०	११५२	२८८

मिलिताः—

३३६०
१००८०
१३४४०
१५

षोडशः ।

का.	म.	यो	यो.	यो.
६	२	१०	२	१

१०	२	१
दो ×	दो ×	दो ×
२	२	२
३	२	१
४	४	४
६	६	६
१	१	१
१४४०	१९२	४८

मिलिताः—

१६८०
१६

एवं सर्वे मिलिताः ४२३३६० भंगाः भवन्ति ।

असंयतस्य भंगाः समाप्ताः ।

देशसंयतस्याभिधीयन्ते—

ज्ञेयाः पंच[1] दश प्राज्ञैः दश पंचैककः क्रमात् ।
गुणकारविधानेन संयतासंयतस्थिते: ॥ ६२ ॥

५।१०।१०।५।१।

अष्टमः ।

का.	भ.	यो.
१	०	९

तस्य

६४८०
९

नवमः ।

का.	भ.	यो.
२	०	९
१	१	९

१	यो.
२	हा.
१	वे.
२	क.
१	इं.
२	का.

९	९
भ०	ए २
२	२
३	३
४	४
६	६
१०	५

मिलिताः—

१२९६०
१२९६०
२५९२०
९

दशमः ।

का.	भ.	यो.
३	०	९
२	१	९
१	२	९

९	९	९
भ.	ए २	द्वो×
२	२	२
३	३	३
४	४	४
६	६	६
१०	१०	५

मिलिताः—

१२९६०
२५९२०
६४८०
४५३६०
१०

---

१ त्रसबधाभावात् प्राणिबधस्यासंयुक्तभंगाः ५, द्विसंयोगिभंगाः १०, त्रिसंयोगिभंगाः १०, चतुःसंयोगिभंगाः ५, पंचसंयोगिभंगा १ ।

एकादशः ।

का.	भ.	यो.
४	०	१
३	१	१
२	२	१

१	१	१
म०	ए२	दो×
२	२	२
३	३	३
४	४	४
६	६	६
५	१०	१०

मिलिताः—

६४८०
२५९२०
१२९६०
४५३६०

|११|

द्वादशः ।

का.	भ.	यो.
५	०	१
४	१	१
३	२	१

१	१	१
म०	ए२	दो×
२	२	२
३	३	३
४	४	४
६	६	६
१	५	१०

मिलिता—

१२९६
१२९६०
१२९६०
२७२१६

|१२|

त्रयोदशः ।

का.	भ.	यो.
५	१	१
४	२	१

१	१
ए२	दो×
२	२
३	३
४	४
६	६
१	५

मिलिताः—

२५९२
६४८०
९०७२

|१३|

चतुर्दशः ।

का.	भ.	यो
५	२	९

९
दो×
२
३
४
६
१

तस्य

१२९६
१४

सर्वे देशसंयतस्य भंगाः १६०७०४ ।

प्रमत्तभङ्गानाह———

आहारकद्वयं ज्ञेयं पुंवेदस्योदये ततः ।
प्रमत्तस्य यतो नेदं निंद्यवेदोदये सति ॥ ६३ ॥
कर्त्तव्या नवभिर्द्वाभ्यां योगाभ्यां भंगकल्पना ।
त्रिभिरेकेन वेदेन द्वेधा संस्थाप्य स क्रमात् ॥ ६४ ॥

प्रमत्तस्य सर्वे भंगा ९२८ । तदित्थम्—

यो.	१	९	२
		भ०	०
हा.	२	२	२
वे.	१	३	१
क.	१	४	४
	५	२१६+१६	
		२३२	

यो.	१	९	२
भ.	१	२	२
हा.	२	२	२
वे.	१	३	१
क.	१	४	४
	६	४३२+३२	
		४६४	

यो.	१	९	२
भ.	२	×	×
हा.	२	२	२
वे.	१	३	१
क.	१	४	४
	७	२१६+१६	
		२३२	

२३२+४६४+२३२=९२८

अप्रमत्तापूर्वगुणद्वयभंगानाह—

पुंवेदाहारकद्वन्द्वविहीनः प्रक्रमः परः ।
प्रमत्तावस्थितः कृत्यो[1] गुणस्थानद्वये[2] परे ॥ ६५ ॥

तत्राप्रमत्तस्य तावत्सर्वे भंगाः अपूर्वस्य च,—

१	९	१	९	१	९	२१६
	भ०	१	२	२	द्वो×	ज. ५
२	२	२	२	२	२	४३२
१	३	१	३	१	३	म. ६
१	४	१	४	१	४	२१६
५	०	६	०	७	०	उ. ७
	०		०		०	
	०		०		०	
						अप्रमत्तस्य ८६४

१	९	१	९	१	९	२१६ ज. प्र.
२	भ०	१	ए२	२	द्वो×	४३२ म. ६ प्र.
१	२	२	२	२	२	२१६ उ. ७ प्र.
१	३	१	३	१	३	अपूर्वस्य ८६४
५	४	१	४	१	४	
	०	६	०	७	०	
	०		०		०	
	०		०		०	

अनिवृत्तिगुणस्याह—

जघन्यौ प्रत्ययौ ज्ञेयौ द्वाववेदानिवृत्तिके ।
संज्वालेषु चतुर्ष्वेको योगानां नवके परः ॥ ६६ ॥

१ । १ । भंगाः[3] । ४ । ९ अन्योन्याभ्यस्तौ ।

कषायवेदयोगानामेकैकग्रहणे सति ।
अनिवृत्तेः सवेदस्य प्रकृष्टाः प्रत्ययास्त्रयः ॥ ६७ ॥

भंगाः ४ । ३ । ९ अन्योन्याभ्यस्ताः[4] १०८ ।

सूक्ष्मसांपरायस्य भंगानाह—

एकः संज्वलनो लोभो योगानां नवके परम् ।
द्वावेव प्रत्ययौ ज्ञेयौ सूक्ष्मलोभे मनीषिभिः ॥ ६८ ॥

---

१ कार्यः । २ अप्रमत्ते अपूर्वकरणे च । ३ संज्वलनकषायमध्ये एकः । नवयोगानां मध्य एकः । एवं द्वौ जघन्यप्रत्ययौ अनिवृत्तेः । ४ जघन्यप्रत्ययोर्भंगाः ३६, उत्कृष्टत्रयाणां १०८ सर्वे मिलिताः १४४ अनिवृत्तस्य ।

१ । १ । ९ ।

शांतक्षीणकषाययोः प्रत्ययानाह—

योगेष्वस्ति नवस्वेकः शान्तक्षीणकषाययोः[1] ।

१ । ९ ।

अन्तिमद्वय आह,—

सप्तस्वेकः सयोगेऽसौ, १।७

नियोगः प्रत्ययातिगः ० ॥ ६९ ॥

प्रदोषविघ्नमात्सर्यनिह्नवा[2]सादनादयः ।

बंधस्य हेतवो ज्ञेयाः ज्ञानदर्शनरोधयोः ॥ ७० ॥

तितिक्षा व्रतिनां दानं भूतानामनुकम्पनम् ।

सरागसंयमः शौचसंयमासंयमः परः ॥ ७१ ॥

वात्सल्यं मृदुवादित्वं पापकर्मस्वनादरः ।

पुष्कलं कारणैरेतैः सद्वेद्यं कर्म बध्यते ॥ ७२ ॥

शोकस्तपो बधो दुःखमाक्रन्दः परिदेवनम् ।

स्वान्योभयस्थितैरेतैरसातं कर्म गृह्यते ॥ ७३ ॥

तपोधर्मागमस्वार्गसंघकेवलचक्षुषाम् ।

वभ्रात्यवर्णवादेन प्राणी दर्शनमोहनम् ॥ ७४ ॥

कषायोदयतस्तीव्रः परिणामो विनिन्दितः ।

द्वेधा चारित्रमोहस्य कर्मणो बंधकारणम् ॥ ७५ ॥

मिथ्यादृष्टिर्व्रतापेतो बह्वारंभपरिग्रहः ।

आयुर्बध्नाति निःशीलो नारकं दुष्टमानसः ॥ ७६ ॥

---

१ नवयोगानां मध्य एको योगः, एकः संज्वलनलोभ एवं द्वौ प्रत्ययौ, राशौ नव प्रत्ययाः । २ निह्नवं ज्ञानलोपनम्, आसादनं पीड़ाकरणम् ।

उन्मार्गदेशको मायी सशल्यो मार्गदूषकः ।
आयुरर्जति तैरश्चं शठो मूढो दुराशयः ॥ ७७ ॥
निःशीलो निर्व्रतो भद्रः प्रकृत्याल्पकषायकः ।
आयुर्बध्नाति मर्त्यानामल्पारंभपरिग्रहः ॥ ७८ ॥
अकामनिर्जरावालतपः शीलमहाव्रती ।
सम्यक्त्वभूषितो दैवमायुरर्जति शांतधीः ॥ ७९ ॥
वक्रस्वान्तवचस्कायो गौरवी[1] वंचनापरः ।
अशस्तं नाम बध्नाति प्रशस्तमपरस्ततः ॥ ८० ॥
स्वप्रशंसी परद्वेषी जिनशासननिन्दकः ।
नीचैर्गोत्रं प्रबध्नाति विपरीतं ततः परः ॥ ८१ ॥
दानलाभोपभोगादिप्रत्यूहकरणं मतम् ।
निमित्तमन्तरायस्य पंचभेदस्य देहिनः ॥ ८२ ॥
बंधस्य हेतवो येऽमी आस्रवस्यापि ते मताः ।
बंधो हि कर्मणां जंतोरास्रवे सति जायते ॥ ८३ ॥
इति बंधास्रवविशेषप्रत्यया उक्ताः ।

अष्टकर्मबन्धः कथ्यते,—

अष्टायुषा विना सप्त षडाद्याः[2] मिश्रकं विना ।
सप्त कर्माणि बध्नंति मिथ्यापूर्वानिवृत्तयः ॥ ८४ ॥
मोहायुर्भ्यां विना षट्कं सूक्ष्मो बध्नात्यतस्त्रयः ।
बध्नंति वेद्यमेवैकमयोगो बंधवर्जितः ॥ ८५ ॥

७	७	७	७	७	७	७	७	७	६	१	१	१	०
८	८	०	८	८	८	८							

---

१ सवर्गः । २ मिश्रंबिनाऽन्यषड्गुणस्थानवर्तिनोजीवाः ।

भुंजतेऽष्टापि कर्माणि गुणेषु दशसु स्थिताः ।
शान्तक्षीणौ विना मोहमपरौ घातिभिर्विना ॥ ८६ ॥

८।८।८।८।८।८।८।८।८।८।७।७।४।४।

अष्टावुदीरयन्ते, षट् प्रमत्तांतगुणस्थिताः[1] ।
उदीरयंति चत्वारः षट्कं वेद्यायुषी विना ॥ ८७ ॥
शांतक्षीणाभिधौ, पंच वेद्यायुर्मोहनैर्विना ।
सयोगो नामगोत्रे द्वे अयोगो निरुदीरणः ॥ ८८ ॥
सप्तैवोवालिकाशेषे[2] पंचाद्या मिश्रकं विना ।
वेद्यायुर्मोहहीनानि पंच[3] सूक्ष्मकषायकः ॥ ८९ ॥
नामगोत्रद्वयं क्षीणस्तत्रोदीरयते यतिः ।
एकत्रेति त्रयं ज्ञेयं बंधादीनां मनीषिभिः ॥ ९० ॥

८	८	८	८	८	८	६	६	६	६	५	५	२	०
७	७	०	७	७	७				५		२		

अत्रापक्वपाचनमुदीरणेतिवचनादुदयावलिकायां प्रविष्टायाः कर्मस्थितेर्नोदीरणेति । मरणावलिकायामायुषः, सूक्ष्मे मोहस्य, क्षीणे घातित्रयस्योदीरणा नास्ति, मरणावलिकाशेषे चायुषि मिश्रं न संभवति ।

बंधोदयोदीरणाः कथ्यन्ते,——
घातिकल्मषविध्वंसी भुंक्ते कर्मचतुष्टयम् ।
कर्मबन्धव्यतिक्रान्तो निर्योगोऽष्टानुदीरकः[4] ॥ ९१ ॥

---

१ अप्रमत्तादयः । २ मिश्रं विनाऽऽद्य पंचगुणस्थानवर्तिनः आवलिकाशेषे सति पंच कर्माणि उदीरयान्ति । ३ अंतभागे पंच कर्माण्युदीरयति शेष भागे षट् । ४ अष्टकर्मणामुदीरणारहितः ।

द्वितयोदीरको योगी वेद्यस्यैकस्य वंधकः ।
भुंक्ते चत्वार्यघातीनि घातिकर्मनिसुंभकः ॥ ९२ ॥
बंधकौ वेदनीयस्य शांतक्षीणकषायकौ ।
भुंजते सप्त कर्माणि पंचकोदीरणापरौ ॥ ९३ ॥
षट्कं बध्नाति भुंक्तेऽष्टौ दशमः षडुदीरकः ।
द्वयोः क्रमाच्च पंचानां क्षीणसूक्ष्मावुदीरकौ ॥ ९४ ॥
षट्कस्योदीरकाः सप्तबंधकाः क्रमतस्त्रयः ।
अनिवृत्त्यादयः शश्वदष्टकर्माणि भुंजते ॥ ९५ ॥
बध्नंत्युदीरयंत्यन्ये सप्ताष्टौ चाष्ट भुंजते ।
भुंक्तेष्टौदीरयत्यष्ट सप्त बध्नाति मिश्रकः ॥ ९६ ॥
आयुर्बंधनमारभ्य प्रमत्ताख्येऽप्रमत्तताम् ।
यत्समापयते गत्वा सप्तानां बंधकस्ततः ॥ ९७ ॥
अप्रमत्तो अनारंभकत्वादिति विशेषः ।

वंध	७।८	७।८	७	७।८	७।८	७।८	७	७	७	६	२	२	१	०
उदय	८	८	८	८	८	८	८	८	८	८	७	७	४	४
उदीरण	८।७	८।७	८	८।७	[illegible]।७	८।७	६	६	६	६।५	५	५।२	२	०

ज्ञानदृष्ट्यावृती वेद्यं मोहनीयायुषी बुधाः ।
नामगोत्रान्तरायाश्च मूलेऽष्ट प्रकृतीर्विदुः ॥ ९८ ॥
क्रमात्पंच नव ज्ञेया द्वे अष्टाविंशतिर्बुधः ।
चतस्रो द्व्यधिकाश्चत्वारिंशद्द्वे पंच चोत्तराः ॥ ९९ ॥
तदित्थम्—५ । ९ । २ । २८ । ४ । ४२ । २ । ५ ।

आर्यावृत्तम् ।

ज्ञेयाः सादिरनादिध्रुवाध्रुवाः स्थानमथ भुजाकाराः ।
अल्पतरावस्थितकस्वामित्वानीह नव बंधाः ॥ १०० ॥

अनुष्टुप् छन्दः ।

बध्नात्यबंधके सादिरनादिः[1] [2]श्रेण्यसंक्रमे ।
ध्रुवोऽभव्येऽध्रुवो बंधे बंधविध्वंसनेऽथ[3] वा ॥ १०१ ॥
कर्मबन्धविशेषो यः सः स्थानमिति[4] कथ्यते ।
भुजाकारो[5] मतः सद्भिर्बद्ध्वाल्पं बहुबंधनम् ॥ १०२ ॥
उक्तोऽल्पतरो बंधो बहु बध्वाल्पबंधनम् ।
सर्वदा बध्नतस्तुल्यं कर्मावस्थितकः स्मृतः ॥ १०३ ॥
कर्मबंधविशेषस्य कर्त्तृता स्वामिता मता ।
ज्ञातव्यं नवभेदानां बंधानामिति लक्षणम् ॥ १०४ ॥
चत्वारः कर्मणां षण्णां[6] साद्यनादिध्रुवाध्रुवाः ।
वेद्यस्येति विना सादिं त्रयोऽनादिध्रुवाध्रुवाः[7] ॥ १०५ ॥
साद्यध्रुवौ मतौ बंधावायुषौ द्वावबन्धकैः ।
चत्वारोऽपीति ते ज्ञेया उत्तरप्रकृतिष्वपि ॥ १०६ ॥
कषायाः षोडश ज्ञानरोधान्तराययोर्दश ।
उपघातो जुगुप्सा भीर्दर्शनावरणे नव ॥ १०७ ॥

---

१ गुणस्थानान्तरसंक्रमे सति बंधव्युच्छित्तिं कृत्वा पुनः पूर्वगुणस्थान प्राप्तेसति बन्धप्रारम्भः सादिबन्धः । २ अनादिकालक्रमायातबन्धसन्तति रूपोऽनादिबन्धः । ३ यत्र गुणस्थाने कर्म बध्नाति तत्रैव चेन्मुंचति स बंधविध्वंसनस्तस्मिन्नध्रुवबंधः । ४ यथाऽयुष्कर्म षट् गुणस्थानं यावद्बध्नाति ईदृग्विधो यः कर्मबंधविशेषः सः स्थानमिति कथ्यते । ५ कश्चिज्जीव उपशांतकषाये चढितः पश्चान्मोहोदयात्पतितः सूक्ष्मसांपरायानिवृत्तिकरणयोः प्राप्तस्तत्रैकां प्रकृतिं बध्नाति पश्चाद्यथा यथाऽधःपतति तथा तथा बहु बध्नाति, अल्पं बध्वा पश्चाद्बहुबंधनं स भुजाकारबंधः । ६ वेदनीयायूरहितानां । ७ अनुपलम्भान्मयाप्रक्षिप्तोऽयम्पाठः " त्रयोऽनादि " इति ।

मिथ्यात्वागुरुलघ्वाह्वानिर्मिद्वर्णचतुष्टयम् ।
तैजसं कार्मणं सप्त चत्वारिंशत् ध्रुवा मताः ॥ १०८ ॥
आसां[1] भवंति चत्वारः साद्यनादिध्रुवाध्रुवाः ।
साद्यध्रुवा मताः शेषास्तथा सपरिवृत्तयः ॥ १०९ ॥
आहारकद्वयं तीर्थकृत्वमायुश्चतुष्टयम् ।
परघातातपोद्योतोच्छ्वासाः शेषा इमा मताः ॥ ११० ॥
इति निःप्रतिपक्षाः ११ ।
गोत्रे संस्थानसंहत्योः षट्कं हास्यचतुष्टयम् ।
वैक्रियिकद्वयं वेद्ये गतयो द्वे नभोगती ॥ १११ ॥
चतुष्कमानपूर्वीणां दशयुग्मानि जातयः ।
औदारिकद्वयं वेदा ज्ञेयाः सपरिवृत्तयः ॥ ११२ ॥
सप्रतिपक्षा इत्यर्थः । ६२ ।
जिनैः[2] स्थानानि चत्वारि भुजाकारास्त्रयस्त्रयः ।
बंधे चाल्पतराः प्रोक्ताश्चत्वारोऽष्टै[3]स्त्ववस्थिताः ॥ ११३ ॥
बंध[4]स्थानानि ८।७।६।१ । भुजाकाराः[5] १,६।६,७।७,८ ।
अल्पतराः[6] ६,१।७,६।८,७। अवस्थिताः[7] ८,८।७,७।६,६।१,१।

---

१ ध्रुवप्रकृतीनां । २ मूल-प्रकृतीनां चत्वारिबन्धस्थानानि । ३ कर्मसु । ४ मिश्रं विनाऽप्रमत्तं यावत् अष्टैव कर्माण बध्नाति, मिश्रापूर्वानिवृत्तिकेषु सप्तकर्माणि बध्नात्यायुर्विना, सूक्ष्मसांपराये षट्कर्माणि बध्नाति मोहं विना, उपरिस्थगुणस्थानेषु एकं वेद्यकं सातकं बध्नाति, इति कर्मबंधे चत्वारि स्थानानि भवंति । ५ उपशांतादिषु त्रिष्वेककं कर्म बध्नाति, सूक्ष्मे षट्, अपूर्वानिवृत्तिकयोः सप्त, पुनः सप्त, अप्रमत्तादधोऽष्टकर्माणि बध्नातीति भुजाकारबंधः । ६ सूक्ष्मसांपराये षट्, उपशांतादिष्वेकं, अपूर्वानिवृत्तिकयोः सप्त, सूक्ष्मे षट्, अप्रमत्तपर्यन्तमष्टकर्माणि, अपूर्वानिवृत्तिकयोः सप्त कर्माणि बध्नंति । ७ अप्रमत्तं यावत् मिश्रं बिना अष्ट अष्ट, अपूर्वानिवृत्तिकयोः सप्त सप्त, सूक्ष्मे षट् षट्, उपशांतादिष्वेकैकं कर्म बध्नाति ।

दर्शनावरणे त्रीणि स्थानानि दश मोहने ।
नाम्नोऽष्टेषु भुजाकाराः शेषेषु स्थानमेककम् ॥ ११४ ॥
स्थानानि नवकं षट्कं चतुष्कं त्रीणि दृग्रुधि ।
भुजाकारोऽत्र वाच्योऽल्पतरोऽवस्थितको बुधैः ॥ ११५ ॥
बंधस्थानानि ९।६।४ । भुजाकारात्पतरौ ४,६।६,९।६,४।
९,६ । अवस्थिताः ९,९।६,६।४,४ ।
नवकं सकलाः षट्कं स्त्यानगृद्धित्रयं विना ।
चतुष्कं प्रचलानिद्राहीनाः स्थानेष्विति त्रिषु ॥ ११६ ॥
९ । ६ । ४ ॥
द्वावाद्यौ नव, मिश्राद्याः षट् षट् बध्नंति दृग्रुधि ।
अपूर्वान्ताश्चतस्रोऽत्रापूर्वाद्याः सूक्ष्मपश्चिमाः ॥ ११७ ॥
९ । ९ । ६ । ६ । ६ । ६ । ६ ।
अपूर्वप्रथमसप्तमभागे ६ । अपूर्वद्वितीयसप्तमभागादारभ्य याव-
त्सूक्ष्मं ४ ।

द्व्येकाग्रे विंशती सप्तदश बंधे त्रयोदश ।
नव पंचचतुष्कत्रिद्व्येकस्थानानि मोहने ॥ ११८ ॥
२२ । २१ । १७ । १३ । ९ । ५ । ४ । ३ । २ । १ ।
द्वाविंशतिः समिथ्यात्वाः कषायाः षोडशैकक: ।
वेदो हास्यादिकेष्वेकं युग्मं भयजुगुप्सते ॥ ११९ ॥
१ । १६ । १ । २ । १ । १ । मिलिताः २२ ।
एषादिमे द्वितीये सा निर्मिथ्यात्वनपुंसकः ।
न्यूनाऽनंतानुबंधिस्त्रीवेदैर्मिश्रेऽव्रते तथा ॥ १२० ॥

---

१ प्रथम गुणस्थाने २२, मिथ्यात्वं विनैकविंशतिः सासादने, अनंता-
नुबंधिभिर्विना सप्तदश मिश्राव्रतयोः ।

मिथ्यादृष्टौ २२ । प्रस्तारः । २ । भंगाः ६ । सासने २१ ।
भंगाः ४ । मिश्रासंयतयोः १७ । भंगाः २ ।

मिथ्यादृष्टौ	सासने	मिश्रे	असंयते
२	२	२	२
२।२	२।२	२।२	२।२
१।१।१	१।१	१	१
१६	१६	१२	१२
१			

हीनाः द्वितीयकोपाद्यैर्देशे षष्ठे तृतीयकैः ।
सप्तमाष्टमयोर्ज्ञेयाः शोकारतिंविना कृताः ॥ १२१ ॥

देशे १३ ।		प्रमत्ते ९ ।		अप्रमत्तापूर्वयोः ९ ।	
२	भंगौ	२	भंगौ	२	भंगः १
२।२	२	२।२	२	२	
१		१		१	
८		४		४	

सन्ति[1] पुंवेदसंज्वालाः संज्वाला नवमे क्रमात् ।
विनैकद्वित्रिभिर्बन्धे पंच स्थानानि मोहने ॥ १२२ ॥
५।४।३।२।१।
षट् स्युर्द्वाविंशतेर्भङ्गाश्चत्वारस्त्वेकविंशतेः ।
स्थानत्रये ततो द्वौ द्वावेकोऽतो मोहबन्धने ॥ १२३ ॥
६।४।२।२।२।२।१।१।१।१।
एषामानयनमाह,—
अभ्यस्ते युग्मयुग्मेन वेदानां त्रितये सति ।
भंगा द्वाविंशतेर्बन्धे मिथ्यादृष्टेः षडीरिताः । ६ ॥ १२४ ॥

---

१ प्रथमभागे पुंवेदसंज्वलनाः, द्वितीये संज्वलनः, तृतीये क्रोधं विना त्रयः चतुर्थे मानंविना द्वौ पंचमे मायां विनैकः ।

विना षण्ढं हते द्वाभ्यां वेदाभ्यां युगलद्वये ।
सन्त्येकविंशतेर्बन्धे चत्वारः सासने तु ते । ४ ॥ १२५ ॥
मिश्रासंयतयोः सप्तदशबंधविधायिनोः ।
संयतासंयतस्थस्य त्रयोदशकबंधिनः ॥ १२६ ॥
प्रमत्तस्य च विज्ञेयं नववंधविधायिनः ।
युगभंगद्वयं प्राज्ञैर्बन्धस्थानत्रये स्फुटम् । २ ॥ १२७ ॥
अप्रमत्तो यतोऽपूर्वः शोकारत्योरबंधकौ ।
एकैकोऽतस्तयोर्भङ्गो विज्ञेयो नवबंधिनोः ॥ १२८ ॥
एकद्वित्रिचतुःपंचबंधके चानिवृत्तिके ।
एकैकः कथितो भंगो बंधस्थानेषु पंचसु ॥ १२९ ॥
५।४।३।२।१। एकैको भंगाः १।१।१।१।१।
मोहनीयभुजाकारा विंशतिर्गदिता बुधैः ।
बंधा एकादशैतास्मिन् क्रमादल्पतरा: पुनः ॥ १३० ॥
द्वावव्यक्तौ मतौ बंधौ त्रयस्त्रिंशदवस्थिताः ।
चतुर्विधेति विज्ञेया मोहे बंधप्ररूपणा ॥ १३१ ॥
२०।११।२।३३।

भुजाकाराः—

१	२	३	४	५	९	१३	१७	२१
२	३	४	५	९	१३	१७	२१	२२
१७	१७	१७	१७	१७	१७	२१	२२	
					२१	२२		
					२२			

अल्पतराः—

२२	१७	१३	९	५	४	३	२
१७	१३	९	५	४	३	२	१
१३	९	५					

एकं बध्नन्नधो गत्वा बध्नाति प्रकृतिद्वयम् ।
तत्र मृत्वाऽमरो भूत्वा जीवः सप्तदशार्जति ॥ १३२ ॥
सर्वत्रेत्युच्चारणा कार्या ।

अव्यक्तः कथ्यते,—

सूक्ष्मोपशमकोऽधस्तादवतीर्यानिवृत्तिकः ।
भूत्वा स्वीकुरुते कश्चिदेकां प्रकृतिमंगवान् ॥ १३३ ॥
सूक्ष्मोपशमको मृत्वा देवभूयं गतोऽथवा ।
बध्नाति प्रकृतीर्जीवः कश्चित्सप्तदश स्फुटम् ॥ १३४ ॥
अव्यक्तभुजाकारौ शून्यतः ०।१–१७ इति द्वौ

आर्यावृत्तम् ।

क्रमतोऽत्र भुजाकाराऽल्पतराव्यक्ताख्यबंधसंक्षेपे ।
सद्भिरवस्थितसंज्ञा बंधविशेषा विबोद्धव्याः ॥ १३५ ॥
भुजाकाराः २०। अल्पतराः ११। अव्यक्तौ द्वौ २। संक्षेपः ३३।
स्यात्त्रिभिर्विंशतिः पंच षडष्टनवभिः क्रमात् ।
दशैकादशभिर्युक्ता स्थानमेकं च नामनि ॥ १३६ ॥
२३।२५।२६।२८।२९।३०।३१।१।
क्रमेण गतियुक्तानि श्वभ्रातिर्यङ्नृनाकिनाम् ।
एकपंचत्रिपंचाहुर्बन्धस्थानानि नामनि ॥ १३७ ॥
१।५।३।५।
तत्र श्वभ्रद्वयं हुडं निर्माणं दुर्भगास्थिरे ।
पंचेन्द्रियमनादेयमयशो दुःस्वराशुभे ॥ १३८ ॥
तेजोवैक्रियिकद्वन्द्वं कार्मणासन्नभोगती ।
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ॥ १३९ ॥

इत्यष्टाविंशतिस्थानमेकं मिथ्यात्ववाहिनः ।
युक्तं श्वभ्रगतिपंचाक्षपूर्णैर्बध्नंति जन्तवः ॥ १४० ॥
भंगः १ ।
एकाक्षविकलाक्षाणां बध्यन्ते नात्र जातयः ।
श्वभ्रगत्या समं तासां सर्वदा वृत्त्यभावतः ॥ १४१ ॥
दशभिर्नवभिः षड्भिः पंचभिर्विंशतिस्त्रिभिः ।
युक्तस्थानानि पंचेति तिर्यग्गतियुतानि वै ॥ १४२ ॥
३० । २९ । २६ । २५ । २३ ।
तत्र संहतिसंस्थानषट्कस्यैकतरद्वयम् ।
नभोगतियुगस्यैकतरमौदारिकद्वयम् ॥ १४३ ॥
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ।
स्थिरादिपंचयुग्मेष्वेकतरं पंचाक्षनिर्मिती ॥ १४४ ॥
तैजसं कार्मणं तिर्यग्द्वयमुद्योतमादिमम् ।
पंचाक्षोद्योतपर्याप्ततिर्यग्गतियुतामिमाम् ॥ १४५ ॥
मिथ्यादृष्टिः प्रबध्नाति त्रिंशतं सासनोऽपि च ।
एतां द्वितीयकां हुंडासंप्राप्तापाकृतां पराम् ॥ १४६ ॥

तत्र प्रथमत्रिंशति षट्संस्थान षट् संहनननभोगतियुगलस्थिरादिषट् युगलानि । ६ । ६ । २ । २ । २ । २ । २ । २ । २ । अन्योन्याभ्यस्तानि भंगा । ४६०० ।

द्वितीयत्रिंशति सासनेऽतिमसंस्थानसंहनने बंधं न गच्छतस्तद्योग्यतीव्रसंक्लेशाभावात् । अतः;—५ । ५ । २ । २ । २ । २ । २ । २ । २ । अन्योन्याभ्यस्तानि भंगाः ३२०० ।
एते पूर्वप्रविष्टाः पुनरुक्ता इति न गृह्यन्ते ।

परा त्रिंशत्तृतीयेयं तिर्यग्द्विकतयकार्मणे ।
तैजसौदारिकद्वन्द्वहुंडासंप्राप्तदुर्भगम् ॥ १४७ ॥
त्रसाद्यगुरुलघ्वादिवर्णादीनां चतुष्टयम् ।
विकलेन्द्रियजात्येकतरं दुःस्वरनिर्मिती ॥ १४८ ॥
यशःस्थिरशुभद्वन्द्वत्रितयैकतरत्रयम् ।
उद्योतासन्नभोरीती अनादेयं तृतीयकम् ॥ १४९ ॥
विकलोद्योतपर्याप्ततिर्यग्गतियुतामिमाम् ।
मिथ्यात्वकलितस्वान्तो जीवो बध्नाति दुर्मनाः ॥ १५० ॥

अत्र विकलेन्द्रियाणां हुंडसंस्थानमेवैकं, तथैतेषां बंधोदययोर्दुःस्वरमेवेति । तिस्रो जातयस्त्रीणि युगलानि । ३ । २ । २ । २ अन्योन्याभ्यस्तानि, भंगाः २४ ।

यथैतास्त्रिंशतास्तिस्र एकोनत्रिंशतस्तथा ।
विशेषोऽयं परं तासु यदुद्योतो न बध्यते ॥ १५१ ॥

एतासु पूर्वोक्ता भंगाः ४६०८ । २४ ।

षड्विंशतिरियं तेजास्तिर्यग्द्विकतयकार्मणे ।
बादरौदारिकैकाक्षहुंडपर्याप्तदुर्भगाः ॥ १५२ ॥
उद्योतातपयोरेकं प्रत्येकं स्थावरं परम् ।
शुभद्वन्द्वयशोद्वन्द्वास्थिरद्वन्द्वत्रयैककम् ॥ १५३ ॥
निर्मित्त्वागुरुलघ्वादिवर्णादीनां चतुष्टयम् ।
अनादेयमितीमां च स्वीकरोति कुदर्शनः ॥ १५४ ॥
बादरैकाक्षपर्याप्ततिर्यग्गातिभिरन्विताम् ।
तथैकतरसंयुक्तामातपोद्योतयोरपि ॥ १५५ ॥

अत्राष्टांगाभावादेकेन्द्रियस्यांगोपांगं नास्ति । संस्थानमप्ये-

कं हुंडमेव, यस्मात्तस्मादातपोद्योतास्थिरास्थिरशुभाशुभयशोऽयशोयुगानि । २ । २ । २।२। अन्योन्याभ्यस्तानि भंगाः १६ ।

षड्विंशतिरियं तस्य जायते पंचविंशतिः ।
निरुद्योतातपा सूक्ष्मप्रत्येकद्वितयैकयुक् ॥ १५६ ॥

अत्र प्रथमायां पंचविंशतौ सूक्ष्मसाधारणे भवनादीशानान्ताः देवाः न बध्नन्ति । ततोऽत्र यशःकीर्त्तिं निरुध्य स्थिरास्थिरभंगौ शुभाशुभभंगाभ्यस्तौ ४ । अयशःकीर्तिं निरुध्य वादरप्रत्येकस्थिरशुभयुगानि । २ । २ । २ । २ । अन्योन्याभ्यस्तान्ययशःकीर्तिभंगाः १६ । द्वयेऽपि । २० ।

पंचविंशतिरत्रान्या तिर्यग्द्वितयकार्मणे ।
पंचाक्षविकलाक्षैकतरमौदारिकद्वयम् ॥ १५७ ॥
प्रत्येकागुरुलघ्वाह्वे तेजोऽपर्याप्तनिर्मिती ।
उपघातायशोहुंडाऽस्थिरासंप्राप्तदुर्भगम् ॥ १५८ ॥
वादरत्रसवर्णाद्यनादेयमशुभं त्विमाम् ।
सतिर्यग्गत्यपर्याप्तत्रसां बध्नाति वामदृक् ॥ १५९ ॥

अत्र द्वितीयायां पंचविंशतौ परघातोच्छ्वासनभोगतिदुःस्वराणामपर्याप्तेन सह बंधो नास्ति विरोधात् । अपर्याप्तकाले ह्येषामुदयाभावादत्र चत्वारो जातिभंगाः । ४ ।

त्रयोविंशतिरेषात्र तेजस्तिर्यग्द्वयाशुभे ।
कार्मणौदारिके हुंडमयशोवर्णचतुष्टयम् ॥ १६० ॥
एकाक्षागुरुलघ्वाह्वे दुर्भगं स्थावरास्थिरे ।
उपघातमनादेमपर्याप्तकनिर्मिती ॥ १६१ ॥
सूक्ष्मप्रत्येकयुग्मैकतरे मिथ्यात्वदूषितः ।
वध्नात्यपूर्णैकैकाक्षतिर्यग्गातियुतामिमाम् ॥ १६२ ॥

अत्र संहननबंधो नास्ति, एकाक्षेषु संहननोदयाभावात् । ततः सूक्ष्मबादरयोः प्रत्येकसाधारणाभ्यामभ्यासे चत्वारो भंगाः ४। इत्थं तिर्यग्गतियुताः सर्वे भंगाः, ९३०८ ।

विंशतिर्दशभिर्युक्ता नवभिः पंचभिः क्रमात् ।
नृगत्यां त्रीणि जायंते बंधस्थानानि नामनि ॥ १६३ ॥

३० । २९ । २५ ।

त्रिंशदेषाऽत्र पंचाक्षं नृद्वयौदारिकद्वये ।
सुस्वरं सुभगादेयमाद्ये संस्थानसंहती ॥ १६४ ॥
शुभस्थिरयशोयुग्मैकैकं शस्तनभोगतिः ।
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ॥ १६५ ॥
तीर्थकृत् कार्मणं तेजोनिर्मिद्बध्नात्यसंयतः ।
इमांनृगतिपंचाक्षपूर्णतीर्थकरैर्युतां ॥ १६६ ॥
न दुर्भगमनादेयं दुस्वरं याति बंधतां ।
सम्यक्त्वतीर्थकृत्त्वाभ्यां सह बंधविरोधतः ॥ १६७ ॥

सुभगसुस्वरादेयानामेव यतोऽत्र बंधस्ततस्त्रीणि युगानि, २ । २ । २ । अन्योन्याभ्यस्तानि, भंगाः ८।

विना तीर्थकृता त्रिंशदेकोनत्रिंशदस्त्यमूम् ।
युक्तां मनुष्यगत्याद्यैर्बध्नीतो मिश्रनिर्व्रतौ ॥ १६८ ॥

२९ । अत्राष्टौ भंगाः पुनरुक्ताः ८ ।

एकोनत्रिंशदन्यैवं द्वितीयैकतरैर्युता ।
युग्मानां सुस्वरादेयसुभगानां त्रिभिः स्फुटम् ॥ १६९ ॥
एतां संहतिसंस्थानषट्कैकतरसंयुताम् ।
सनभोगतियुग्मैकतरां बध्नाति वामदृक् ॥ १७० ॥

२।२।२।२।२।२।६।६।२। एषामन्योन्याभ्यासे
भंगाः ४६०८।

तृतीयापि द्वितीयेव बध्यते स्वस्तदृष्टिना।
हुंडासंप्राप्तके त्यक्त्वा तच्छेषैकतरान्विता॥ १७१॥

२।२।२।२।२।२।५।५।२। एषामन्योन्यबंधे भंगाः ३२००।
एते पुनरुक्तत्वान्न गृह्यन्ते।

पंचविंशतिरेषात्र मनुष्यद्वयकार्मणे।
हुंडासंप्राप्ततेजांसि पंचाक्षौदारिकद्वये॥ १७२॥
प्रत्येकागुरुलघ्वाह्वस्थूलापर्याप्तदुर्भगम्।
उपघातमनादेयं त्रसं वर्णचतुष्टयम्॥ १७३॥
अयशोऽस्थिरनिर्माणमशुभं स्वीकरोत्यमूम्।
नृगत्यपर्याप्तपंचाक्षयुक्तां मिथ्यात्ववासितः॥ १७४॥
२५।

संक्लेशाद्बध्यमानेन नापूर्णेन सह स्फुटम्।
शुद्धानां कर्मणां बन्धः स्थिरादीनां प्रजायते॥ १७५॥

यतस्ततो भंगाः २। एवं मनुष्यगतेः सर्वे भंगाः ४६१७।

एकद्वित्रिचतुर्न्यूना द्वात्रिंशद्गदिता क्रमात्।
चत्वारि देवगत्यामा निर्गत्यैकं तु पंचमाम्॥ १७६॥

३१।३०।२९।२८।१।

तत्रैकत्रिंशदाद्येयं कार्मणं त्रिदशद्वयम्।
पंचेन्द्रियाद्यसंस्थाने तेजोवैक्रियिकद्वयम्॥ १७७॥
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम्।
सुभगं सुस्वरं शस्तव्योमरीतियशःशुभम्॥ १७८॥

स्थिरमाहारकद्वन्द्वं निर्माणादेयतीर्थकृत् ।
अर्जयत्यप्रमत्तोऽमूमपूर्वकरणोऽपि च ॥ १७९ ॥
तीर्थकृत्त्वपर्याप्तपंचाक्षाहारकद्वयैः ।
एकत्रिंशदियं युक्ता स्थानं देवगतौ मतम् ॥ १८० ॥
देवगत्या समं बंधः संहतेर्नात्र जायते ।
उदयाभावतस्तस्या यतो देवेषु सर्वदा ॥ १८१ ॥
ततो भंगः १ ।
एकात्रिंशदियं त्रिंशत्त्यक्ता तीर्थकृता भवेत् ।
जायेते संयतौ तस्या बंधकौ सप्तमाष्टमौ ॥ १८२ ॥
न बंधोऽत्रास्थिरादीनां यतः संक्लेशभाविनाम् ।
विशुद्धया सममेतेषां सदा बंधविरोधतः ॥ १८३ ॥
ततो भंगः २ ।
एकत्रिंशद्भवत्यत्र निरस्ताहारकद्वया ।
एकोनत्रिंशदाद्यैषा बध्यते सप्तमाष्टमैः ॥ १८४ ॥
भंगः १ ।
एकोनत्रिंशदन्यैवं बध्यतेऽस्यां परं त्रिभिः ।
यशः शुभस्थिरद्वन्द्वेष्वेकैकं निश्रितादिभिः ॥ १८५ ॥

अत्र देवगत्या सहाङ्गोतो न बध्यते तत्र तस्योदयाभावात् । तिर्यग्गातिमपाकृत्य तस्यान्यया गत्या सह बंधविरोधात् । देहदीप्तिर्देवानां तर्हि कुतः ? वर्णनामकर्मोदयात् । अत्र त्रीणि युगानि २ । २ । २ । अन्योन्याभ्यस्तानि, भंगाः ८ ।

---

१ अप्रमत्तधारी अपूर्वगुणधारी यामेकत्रिंशतं देवगतिकारणां बध्नाति तस्या भंग एक एव भवति यतो देवगतौ संहननस्थिरादीनां युग्मान्यपि न संति ।

एकत्रिंशद्विना तीर्थकर्तृत्वाहारकद्वयैः ।
अष्टाविंशतिराद्येमां गृह्णीतः सप्तमाष्टमौ ॥ १८६ ॥
अत्र भंगः १ । पुनरुक्तः ।
अष्टाविंशतिरेकोनत्रिंशदस्ति द्वितीयका ।
अन्या तीर्थकरेणोना तं बध्नंति षडादिमाः ॥ १८७ ॥
अप्रमत्तादीनामुपरिजानामस्थिराशुभायशसां बंधाभावाद्भंगाः८
एवं देवेषु भंगाः १९ ॥
अपूर्वादित्रयेऽत्रैकं यशोभंगास्तु नामनि ।
चतुर्दशसहस्राणि पंचपंचाशतं विना ॥ १८८ ॥
१३९४५ ।
द्वाविंशतिर्भुजाकारा नामन्यल्पतराः पुनः ।
एकविंशतिरव्यक्ता स्त्रयः सर्वेऽप्यवस्थिताः ॥ १८९ ॥
२२।२१।३।४६।

नामनि भुजाकाराः—

१	२३	२५	२६	२८	२९	३०
२८ २९ ३० ३१	२५ २६ २८ २९ ३०	२६ २८ २९ ३०	२८ २९ ३०	२९ ३० ३१	३० ३१	३१
४	५	[illegible]	३	३	२	१

अल्पतराः—

३१	३०	२९	२८	३१	३०	२९	२८	२६	२५
१	१	१	१	३० २९	२९ २८ २६ २५ २३	२८ २६ २५ २३	२६ २५ २३	२५ २३	२३
				२	५	४	३	२	१

अवतीर्योपशान्ताऽधो भूत्वा सूक्ष्मकषायकः ।
स्वीकरोति यशःकीर्तिं शमकत्वमधिष्ठितः ॥ १९० ॥
तत्र मृत्वाऽथ वा शान्तो गृह्णात्यमरतां गतः ।
त्रिंशतं नृगतिश्लिष्टमेत्रिंशतमप्यसौ ॥ १९१ ॥

अव्यक्ताः भुजाकाराः शून्यतः ०।१–३०–३१ ते सन्ति भुजाकारात्पतराव्यक्तकाः समासतो ज्ञेयाः, चत्वारिंशद्युल्का बंधाः षड्भिस्त्ववस्थिताः ४६ । भुजाकाराः २२ । अल्पतराः २१ । अव्यक्ताः ३ । सर्वे मिलिता अवस्थितकाः ४६ ।

इति स्थानबंधः समाप्तः ।

समिथ्यात्वेन बध्यन्ते सर्वाः प्रकृतयोऽगिना ।
विनैवाहारकद्वन्द्वतीर्थकर्त्तृत्वनामाभिः ॥ १९२ ॥
सम्यक्त्वंतीर्थकर्तृत्वे वृत्तमाहारकद्वये ।
बंधस्य हेतुरन्यासु मिथ्यात्वासंयमादयः ॥ १९३ ॥

गुणस्थानेषु प्रकृतीनां स्वामित्वं कथ्यते—

हीनास्तीर्थकराहारद्वन्द्वाभ्यां प्रथमे मताः ।
विना नरसुरायुर्भ्यां मिश्रके पूर्विकाः पुनः ॥ १९४ ॥
तीर्थकृन्नृसुरायुर्भिश्चतुर्थे सहिता मताः ।
आहारद्वयेनामा प्रमादपरिवर्जिताः ॥ १९५ ॥

मिथ्यात्वादिषु सप्तसु,—

११७	१०१	७४	७७	६७	६३	५९
१६	२५	०	१०	४	६	१

अपूर्वे सप्तसु भागेषु—

५८	५६	५६	५६	५६	५६	२६
२	०	०	०	०	३०	४

अनिवृत्तौ पंचसु भागेषु—

२२	२१	२०	१९	१८
१	१	१	१	१

सूक्ष्मादिषु—

१७	१	१	१	०
१६	०	०	१	०

तत्र मिथ्यात्वनपुंसकवेदनरकायुर्नरकद्वयप्रथमजातिचतुष्कसूक्ष्मसाधारणातपापर्याप्तासंप्राप्तहुंडस्थावराणां षोडशानां प्रकृतीनां मिथ्यादृष्टौ बंधविच्छेदः १६। स्त्यानगृद्धित्रयतिर्यगायुस्तिर्यग्द्वयप्रथमकषायचतुष्कानादेयस्त्रीवेदनीचोद्योतदुःस्वरसंहननसंस्थानमध्यचतुष्कद्वयदुर्भगाप्रशस्तनभोगतीनां पंचविंशतीनां सासादने २५। मिश्रं व्यतिक्रम्य, द्वितीयकषायचतुष्काद्यसंहननरायुर्नरद्वयौदारिकद्वयानां दशानामसंयते १०। चतुर्णां तृतीयकषायाणां संयतासंयते ४। शोकारत्यसातास्थिराशुभायशसां षण्णां प्रमत्ते ६। एकस्य देवायुषोऽप्रमत्ते १। अपूर्वस्य प्रथमे सप्तमभागे द्वयोर्निद्राप्रचलयोः २। तैजसकार्मणपंचाक्षस्थिरदेवद्वयवैक्रियिकद्वयप्रथमसंस्थानशुभत्रसाद्यगुरुलघ्वादिवर्णादिचतुष्टयत्रयसुभगसुस्वरादेयनिर्माणाशस्तनभोगत्याहारकद्वयतीर्थकृतां त्रिंशतः षष्ठे ३०। हास्यरतिजुगुप्साभियां चतसृणां सप्तमे ४। पुंवेदसंज्वालक्रोधमानमायालोभानां पंचानां क्रमादनिवृत्तिपंचभागेषु ५। उच्च-

गोत्रयशोदर्शनावृतिचतुष्कज्ञानावृतिपंचकान्तरायपंचकानां षोडशकानां सूक्ष्मसांपराये १६ । शान्तक्षीणकषायौ व्यतीत्यैकस्य सातस्य सयोगे बंधविच्छेदो द्रष्टव्यः ।

इति स्वामित्वं समाप्तम् ॥

गत्यादाविति योग्यानां प्रकृतीनां यथागमम् ।
स्वामित्वमवबोद्धव्यं सिद्धानामोघरूपतः ॥ १९६ ॥

इति प्रकृतिबंधः समाप्तः ।

त्रयाणां सांतरायाणां प्रकर्षेणाद्यकर्मणाम् ।
कोटीकोट्यः स्थितिस्त्रिंशत्सागराणामुदाहृताः ॥ १९७ ॥
सप्ततिर्मोहनीयस्य विंशतिर्नामगोत्रयोः ।
आयुषोऽस्ति त्रयस्त्रिंशत्समुद्राणां स्थितिः परा ॥ १९८ ॥
सप्तस्वब्दशतं वार्द्धिकोटीकोटीस्थितेर्बुधैः ।
[१]आबाधायुषि विज्ञेया पूर्वकोटित्रिभागता ॥ १९९ ॥
प्रकृतीनां पराऽऽबाधा सर्वासामनुरूपतः ।
सान्तर्मुहूर्त्तमुद्दिष्टा जघन्याखिलकर्मणाम् ॥ २०० ॥
संज्ञी पंचेन्द्रियः पूर्णो घोरमिथ्यात्ववासितः ।
कर्मणामिह सप्तानामुत्कृष्टां कुरुते स्थितिम् ॥ २०१ ॥
सम्यग्दृष्टिरसद्दृष्टिः पर्याप्तौ कुरुतः स्थितिम् ।
प्रकृष्टमायुषो जीवौ शुद्धिसंक्लेशभाजिनौ ॥ २०२ ॥

---

१ सप्तसु कर्मसु एकस्याः कोटीकोटीस्थितेः वर्षशतं वर्षशतमाबाधा विज्ञेया, आबाधाकिमुच्यते—उदीरणां विना कर्मपरमाणवो यावत्कालपर्यन्तं नोदीर्यंते तावत्कालमाबाधास्थितिर्विज्ञेया । आयुषि पूर्वकोटेस्त्रिभागता, पूर्वा एते ३३३३३३३३$\frac{1}{3}$ ।

सम्यग्दृष्टिरसंक्लिष्टो जघन्यां कुरुते स्थितिम् ।
सप्तानां जीवितव्यस्य मिथ्यादृष्टिः कुमानसः ॥ २०३ ॥
तत्रोत्कृष्टाऽऽबाधा—
आद्यानां सांतरायाणां त्रयाणां कर्मणां त्रयः ।
सहस्राः सप्त मोहस्य द्वौ ज्ञेयौ नामगोत्रयोः ॥ २०४ ॥
३०००।३०००।३०००।३०००।७०००।२०००।२००० ।
त्रयस्त्रिंशज्जिनैर्लक्षाः सत्रिभागा निवेदिताः ।
आबाधा जीवितव्यस्य पूर्वकोटीस्थितेः स्फुटम् ॥ २०५ ॥
पूर्वाणां त्रयस्त्रिंशल्लक्षा इति शेषः । ३३$\frac{1}{3}$
कर्मणामिह सप्तानां सा त्रैराशिकतः क्रमात् ।
आनेतव्याऽऽयुषो भागं हृत्वा दक्षैस्त्रिभिः पुनः ॥ २०६ ॥
यावत्कालमुदीयन्ते न कर्मपरमाणवः ।
उदीरणां विनाऽऽबाधा तावत्कालेऽभिधीयते ॥ २०७ ॥
[1]आबाधा नास्ति सप्तानां स्थितिः कर्मनिषेचनम् ।
कर्मणामायुषोऽवाचि स्थितिरेव निजा पुनः ॥ २०८ ॥

पंचसंग्रहाभिप्रायेणेदं; सिद्धान्ताभिप्रायेण पुनरायुषोऽप्याबाधो नास्ति; स्थितिः कर्मनिषेचनम् ।

[2]आबाधोर्द्ध्वस्थितावस्यां समयं समयं प्रति ।
कर्माणुस्कन्धनिक्षेपो निषेकः सर्वकर्मणाम् ॥ २०९ ॥

---

१ अपरसिद्धांताभिप्रायेण सप्तकर्मणामाबाधो नास्ति, तर्हि किमस्ति? कर्मनिषेचनं । कर्मनिषेचनं किं गालनं शोषणं वाऽपोषणं, आयुष्कर्मणोऽप्यात्मीया स्थितिः कथिता । पंचसंग्रहाभिप्रायेण सप्तानां कर्मणामाबाधाऽस्ति, आयुष्कर्मणोऽपि ज्ञातव्यं । २ सर्वकर्मणामाबाधोर्द्ध्वस्थितावस्यां कर्मणामणुस्कंधयोर्निक्षेपः निषेकः प्रोच्यते समयं समयं प्रति ।

परतः परतः स्तोकः पूर्वतः पूर्वतो बहुः ।
समये समये ज्ञेयो यावत्स्थितिसमापनम् ॥ २१० ॥

स्वां स्वामाबाधां मुक्त्वा सर्वकर्मणां निषेकाः वक्तव्यास्तेषां च गोपुच्छाकारेणापस्थितिः ॥

उत्तरप्रकृतीनां स्थितिः कथ्यते—

ज्ञानदृग्रोधविघ्नानामसातस्य च विंशतेः ।
कोटीकोट्यः स्थितिस्त्रिंशद्विज्ञातव्या सरस्वताम् ॥ २११ ॥

२० कर्मणाम् ३० कोटीकोट्यः ।

मिथ्यात्वे सप्ततिः कोटीकोट्यः पंचदशोदिताः ।
सातस्त्रीनरयुग्मेषु चत्वारिंशत्क्रुधादिषु ॥ २१२ ॥

मिथ्यात्वे कर्म १, ७० को. । सातादिषु कर्म ४, १५ को. । षोडशसु कषायेषु १६, ४० को. ।

श्वभ्रदेवायुषोरब्धित्रयस्त्रिंशत्परा स्थितिः ।

२ । ३३ सा. ।

तिर्यङ्नरायुषोरुक्ता त्रिपल्योपमसम्मिता ॥ २१३ ॥

२ । ३ प. ।

नीचैर्गोत्रारती शोको जुगुप्सा भीर्नपुंसकम् ।
श्वभ्रतिर्यग्द्वये हुंडं पंचाक्षं कर्मतेजसी ॥ २१४ ॥
उद्योतौदारिकद्वन्द्वे निर्मिद्वैक्रियिकद्वयम् ।
वर्णागुरुत्रसादीनि चतुष्कान्यस्थिराशुभे ॥ २१५ ॥
एकाक्षासन्नभोरीती दुर्भगं स्थावरातपौ ।
असंप्राप्तमनादेयं दुःस्वरायशसी मता ॥ २१६ ॥

---

१ यथा गोपुच्छमुपरिष्टात्स्थूलाऽग्रेऽग्रे क्षीणा तदाकारेण सर्वेषां कर्मणां निषेकाः वक्तव्याः, निजामाबाधां मुक्त्वा ।

कोटीकोट्योंबुराशीनामेतासां विंशतिः स्थितिः ।
त्रिचत्वारिंशतोऽवाचि प्रकृतीनां परा बुधैः ॥ २१७ ॥
कर्म ४३ । आसां स्थितिः २० को. ।
नरवेदोऽरतिर्हास्यं सुस्वरं सन्नभोगतिः ।
सुरद्वन्द्वं स्थिरादेये शुभोच्चैः[1] सुभगं यशः ॥ २१८ ॥
संस्थानसंहती चाद्ये कोटीकोट्यो दश स्थितिः ।
समुद्राणां परैतासां प्रकृतीनां निवेदिताः ॥ २१९ ॥
कर्म १५ । आसां स्थितिः १० को. ।
द्वित्र्यक्षचतुरक्षेषु सूक्ष्मापर्याप्तयोः स्थितिः ।
साधारणे जिनैः कोटीकोट्योऽष्टादश भाषिताः ॥ २२० ॥
कर्म ६ । स्थितिरासां १८ को. ।
स्थितिः संस्थानसंहत्योः कोटीकोट्यो द्वितीययोः ।
अब्धीनां द्वादशप्राज्ञैश्चतुर्दश तृतीययोः ॥ २२१ ॥
कर्म २ । १२ को. । कर्म २ । १४ को. ।
तुर्ययोः षोडशाब्धीनां तयोः पंचमयोरिमाः ।
कोटीकोट्यः पटीयोभिरष्टादश निवेदिताः ॥ २२२ ॥
कर्म २ । १६ को. । कर्म २ । १८ को. ।

जघन्याऽऽबाधा कथ्यते—

सुदृश्याहारकद्वन्द्वतीर्थकृत्कर्मसु[2] त्रिषु ।
अन्तर्मुहूर्त्तमाबाधाऽन्तःकोटीकोट्यथ स्थितिः ॥ २२३ ॥
कर्म ३ ।

---

१ उच्चगोत्रं । २ सम्यग्दृष्टौ, आहारकद्वयतीर्थकरेषु अन्तःकोटीकोटी-स्थितिः ।

मुहूर्त्ता द्वादश प्रोक्ता वेद्येऽष्टौ नामगोत्रयोः ।
स्थितिरन्तर्मुहूर्त्ताऽस्ति जघन्यान्येषु कर्मसु ॥ २२४ ॥
ज्ञानरोधान्तरायाणां दशानां दृक्चतुष्टये ।
अन्त्ये संज्वलने लोभे स्थितिरन्तर्मुहूर्त्तका ॥ २२५ ॥
अष्टोच्चयशसोः साते मुहूर्त्ताःद्वादशोदिताः ।
क्रोधे मासद्वयं माने मासोऽर्द्धं निकृतौ मतम् ॥ २२६ ॥

अत्र संज्वलने क्रोधे मासौ २ । माने मासः १ । निकृतौ (मायायाम्) पक्षः ।

नृतिर्यगायुषोरन्तर्मुहूर्त्ता [1]शेषयोः स्थितिः ।
दशवर्षसहस्राणि पुंवेदे वत्सराष्टकम् ॥ २२७ ॥
असातसहिते पूर्वे दर्शना[2]वृतिपंचके ।
मिथ्यात्वेऽस्ति कषायाणामाद्ये द्वादशके स्थितिः ॥ २२८ ॥
नोकषायाष्टकेंऽभोधेस्त्रिकसप्तचतुर्द्वयाः ।
सप्त भागाः क्रमात्पल्याऽसंख्यभागविवर्जिताः ॥२२९॥ युग्मम्

तदित्थम्—

३	७	४	२
७	७	७	७
क६	१	१२	८
अ १			
निद्रा	मि	क.	नो.
५	१		८

मर्त्यतिर्यग्गतिद्वन्द्वे आतपो जातिपंचकम् ।
षट्के संस्थानसंहत्योरुद्योतो द्वे वियद्गती ॥ २३० ॥

---

१ देवनारकयोः । २ निद्रादिपंचके ।

वर्णाद्यगुरुलघ्वादिचतुष्के कर्मतेजसी ।
नव त्रसादियुग्मानि[1] नीचमौदारिकद्वयम् ॥ २३१ ॥
निर्माणमयशःकीर्त्तिर्जघन्याऽऽसां स्थितिर्मता ।
द्वौ पल्यासंख्यभागोनौ सप्तभागौ पयोनिधेः ॥ २३२ ॥
कर्म ५८ स्थितिः[2] $\frac{२}{७}$
पयोनिधिसहस्रस्य[3] सप्तभागौ स्थितिः स्मृता ।
द्वौ वैक्रियिकषट्कस्य पल्यासंख्यांशवर्जितौ ॥ २३३ ॥

$\frac{२०००}{७}$

अपूर्वक्षपके तीर्थकरत्वाहारयुग्मयोः ।
जघन्यास्थितिबंधोऽतःकोटीकोटी सरस्वताम् ॥ २३४ ॥
सर्वत्रान्तर्मुहूर्त्तवर्त्तिनी जघन्याबाधा ॥

उत्कृष्टानुत्कृष्टजघन्याजघन्यसाद्यनादिध्रुवाध्रुवस्वामित्वलक्षणाः नवबंधाः तत्र[4]—

स्थितिबंधश्चतुर्भेदः सप्तानामजघन्यकः ।
साद्यध्रुवास्त्रयोऽन्ये स्युश्चत्वारोऽप्यायुषो द्विधा ॥ २३५ ॥
इति मूलप्रकृतिषु बंधमुक्त्वोत्तरास्वाह—
दृक्चतुष्टयसंज्वालज्ञानरोधान्तरायकाः ।
अष्टादश चैतुर्द्वासां प्रकृतीनामजघन्यकः ॥ २३६ ॥

---

१ त्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशःकीर्त्तिसेतराणि ।
२ सागरस्यैकस्य सप्त भागाः क्रियते, तादृशौ पल्यासंख्यभागहीनौ ।
३ सागरस्यैकस्य सप्त भागास्तादृशा द्विसहस्रभागास्तर्हि कियंतो लभ्यंते २००० एषु ७ इत्येषां भागे दत्ते लब्धं २८५$\frac{५}{७}$ वैक्रियिकषट्कस्य । ४ नवसु । ५ द्व्यधिकशतप्रकृतिनां उत्कृष्टादयश्चत्वारः कालाः साद्यध्रुवाः स्थितिबंधा भवंति ।

१८ ।

[1]आसामष्टादशानां ते शेषाःसाद्यध्रुवास्त्रयः । १५ ।
संत्युत्कृष्टादयोऽन्यासां चत्वारः सादयो ध्रुवाः । १०२ ।
शुभाशुभेषु सर्वेषु समस्ताः स्थितयोऽशुभाः[2] ।
तिर्यङ्नरसुरायूंषि संति सन्त्यष्टकर्मसु ॥ २३८ ॥
बध्यन्ते स्थितयः सर्वाः कषायवशतो यतः ।
तिर्यङ्मर्त्यामरायूंषि तत्प्रायोग्यविशुद्धितः[3] ॥ २३९ ॥
अप्रशस्तास्ततः सर्वाः कर्मणां स्थितयो मताः ।
आयुषां त्रितयं मुक्त्वा तिर्यगादिभवां बुधैः ॥ २४० ॥
[4]उत्कृष्टा स्थितिरुत्कर्षे संक्लेशस्य जघन्यका ।
विशुद्धेरन्यथा ज्ञेया तिर्यङ्नरसुरायुषाम् ॥ २४१ ॥
विशुद्धिः सातबंधस्य योग्या परिणतिर्मता ।
संक्लेशोऽसातबंधस्य योग्या साऽत्र मनीषिभिः ॥ २४२ ॥
संक्लेशवृद्धितो यस्माद्वर्द्धन्ते स्थितयोऽखिलाः ।
विशुद्धिवृद्धितस्तस्माद्धीयंते ता निसर्गतः ॥ २४३ ॥

तत्रोत्कृष्टस्थितौ विशुद्धयः स्तोका भूत्वा तावद्वर्द्धन्ते

---

१ पूर्वोक्तानां ते शेषा उत्कृष्टानुत्कृष्टजघन्यास्त्रयः कालाः साद्यध्रुवाः स्थितिबंधा भवंति । २ पापसम्बन्धिन्यः । ३ योगविशुद्धित्वात् । ४ तिर्यङ्नरसुरायुषां स्थितिरुत्कृष्टा कस्यापि जीवस्य पतिता भवति पश्चात्स जीवः संक्लेशवान् भवति, संक्लेशस्योत्कर्षे सति सा स्थितिर्जघन्यिका भवति, कस्यापि जीवस्य तिर्यङ्नरसुरायुषां जघन्यस्थितिः पतिता पश्चात्स जीवो विशुद्धिमान् तदा विशुद्ध्युत्कर्षे सति सा जघन्या स्थितिरन्यथोत्कृष्टा भवतीति ज्ञेयम् ।

यावज्जघन्यस्थितिहेतवः, जघन्यास्थितौ संक्लेशाः स्तोका भूत्वा तावत्क्रमेण वर्द्धन्ते यावदुत्कृष्टस्थितिहेतवः ॥

समिथ्यात्वेन बध्यन्ते प्रकृष्टाः स्थितयोऽखिलाः ।
मुक्त्वाऽऽहारकदेवायुस्तीर्थकर्तृत्वकर्मणाम् ॥ २४४ ॥
निर्व्रतस्तीर्थकर्तृत्वे प्रमत्तस्त्रिदशायुषि ।
करोत्याहारके[1] बंधमप्रमत्तः परस्थितेः ॥ २४५ ॥
श्वभ्रतिर्यङ्नरायूंषि षट्कं वैक्रियिकाह्वयम् ।
विकलत्रितयं सूक्ष्मं साधारणमपूर्णकम् ॥ २४६ ॥
नृतिर्यंचः[2] स्थितिं पंचदशानां कुर्वते पराम् । १५ ।
आतपस्थावरैकाक्षेष्वीशानांताः[3] सुरास्त्रिषु । ३ ॥ २४७ ॥
तिर्यग्द्वयमसंप्राप्तमुद्योतौदारिकद्वये ।
नारकत्रिदशाः षण्णामुत्कृष्टां कुर्वते स्थितिम् ॥ ६ । २४८ ॥
चतुर्गतिगता जीवाः शेषाणां कर्मणां स्थितिम् ।
मध्यमोत्कृष्टसंक्लेशाः प्रकृष्टां कुर्वते स्फुटम् ॥ ९२ । २४९ ॥

जघन्यस्थितिस्वामित्वं कथ्यते—

आहारकद्वये पूर्वस्तीर्थकृत्त्वे च संयतः । ३ ।
अनिवृत्तिस्तु पुंवेदे संज्वालानां चतुष्टये ॥ ५ । २५० ॥
दशके ज्ञानविघ्नस्थे प्रथमे दृक्चतुष्टये ।
जघन्यां कुरुते सूक्ष्मस्तां[4] सातोच्चयशःस्वपि ॥ १७ । २५१ ॥

---

१ अप्रमत्तमुनिराहारके बंधं करोति । २ मनुष्यातिर्यञ्चः पंचदशानामुत्कृष्टां स्थितिं कुर्वते । ३ आतपादिषु त्रिषु कर्मसु भवनवास्यादीशानांता देवा उत्कृष्टां स्थितिं कुर्वते नान्ये । ४ दशमगुणस्थानधारी जीवः सप्तदशसु जघन्यां स्थितिं कुरुते ।

असंज्ञीविक्रिया षट्के जघन्यां कुरुते स्थितिं ।
चतुर्णामायुषामेनां यथास्वं संश्य[1]संज्ञिनौ ॥ २५२ ॥
दशानामासाम्पुनर्विशेषमाह—
पूर्णः पंचेन्द्रियोऽसंज्ञीश्वभ्रगतिद्वये स्थितिं ।
तद्योग्यप्राप्तसंक्लेशो विदधाति जघन्यिकाम् ॥ २५३ ॥
सुररीतिद्वयेऽप्येष जघन्यां कुरुते स्थितिं ।
वहमानः परां शुद्धिं योग्यां वैक्रियिकद्वये ॥ २५४ ॥
सम्प्राप्तशुद्धिसंक्लेशौ पंचाक्षौ संश्यसंज्ञिनौ ।
जघन्यां कुरुते पूर्णौ श्वभ्रदेवायुषोः स्थितिम् ॥ २५५ ॥
कुर्वते नरतिर्यंचो योग्यसंक्लेशभागिनः ।
नृतिर्यगायुषोरेनामभोगा[2]वनिजाः स्थितिं ॥ २५६ ॥
एकाक्षो बादरः पूर्णः प्राप्तसर्वविशुद्धिकः ।
प्रकृतीनाम्परा[3]सान्तु जघन्यां कुरुते स्थितिम् ॥ २५७ ॥
नारकाः विबुधाः जीवाः भोगविश्वंभराभवाः ।
भोगभूप्रतिबद्धा ये ते षड्मासायुषिस्थितिं ॥ २५८ ॥
यथास्वं कुर्वते योग्यशुद्धिसंक्लेशभागिनः ।
त्रिभागेष्वायुषः शेषेस्थितेः सति परे पुनः ॥ २५९ ॥ युग्मम्
भोगभूप्रतिभागोऽसौ यदंतरमुदाहृतम् ।
मानुषोत्तरशैलस्य स्वयंप्रभनगस्य च ॥ २६० ॥

इति स्थितिबन्धः समाप्तः ।

---

१ संज्ञीपर्याप्तः संप्राप्तशुद्धिः नरकायुष स्थितिं जघन्यां कुरुते असंज्ञीपंचेन्द्रियः पर्याप्तः संप्राप्तसंक्लेशो देवायुषो जघन्यां स्थितिं कुरुते । २ कर्मभूमिजाः । ३ अन्यासां पंचाशीतिप्रकृतीनाम् ।

कर्मणां रसविशेषोऽनुभागस्तस्यभेदानाह—

अष्टभिरुत्कृष्टाद्यैः सहानुभागे चतुर्दश ज्ञेयाः ।
शस्ताशस्तौ संज्ञा स्वामित्व प्रत्ययविपाकाः ॥ २६१ ॥
घातीनामजघन्यो वेद्ये नामनिभवन्त्यनुत्कृष्टः ।
अजघन्यानुत्कृष्टौ गोत्रे सर्वे चतुर्द्धा ते ॥ २६२ ॥
चतुर्भेदाः भवन्त्येते साद्यनादिध्रुवाध्रुवाः ।
परे साद्यध्रुवाः बंधाः जायन्तेपूर्वकर्मणां ॥ २६३ ॥
चत्वारोप्यायुषो द्वेधा बुधैः साद्यध्रुवाः मताः ।
अनुभागो भवत्येवं मूलप्रकृतिगोचरः ॥ २६४ ॥
कार्मणागुरुलघ्वाह्व शस्तं वर्णचतुष्टयं ।
तैजसं निर्मिदष्टानामनुत्कृष्टश्चतुर्विधः ॥ २६५ ॥
शेषाःसाद्यध्रुवास्तासामनुत्कृष्टोज्झितास्त्रयः ।
बंधध्वंसिभिरष्टानामनुभागाः निवेदिताः ॥ २६६ ॥
दशज्ञानांतरायस्थाःदृग्रोधे नव षोडश ।
कोपादयो जुगुप्साभीः निंद्यवर्णचतुष्टयम् ॥ २६७ ॥
मिथ्यात्वमुपघातश्च त्रिचत्वारिंशतः स्मृताः ।
अजघन्यश्चतुर्भेदः परे साद्यध्रुवास्त्रयः ॥ २६८ ॥ युग्मम् ॥
उत्कृष्टाद्याः समस्तानाम्प्रकृतीनामुदाहृताः ।
चत्वारोऽपि द्विधान्यासां साद्यध्रुवविकल्पतः ॥ २६९ ॥
स्वमुखेनैवपच्यन्ते मूलप्रकृतयोऽखिलाः ।
उत्तरास्तुल्यजातीयाः पुनरन्यमुखेन च ॥ २७० ॥
आयुर्दर्शनचारित्रमोहप्रकृतयः परं ।
स्वमुखेनैवपच्यंते सर्वदैवोत्तरास्वपि ॥ २७१ ॥

---

१ । ७३ प्रकृतीनाम् ।

उदीयते मनुष्यायुर्नरकायुर्मुखेन नो ।
चारित्रमोहनं जातु दृष्टिमोहमुखेननो ॥ २७२ ॥
अनुभागः प्रकृष्टोऽस्ति प्रशस्तानाम् विशुद्धितः ।
संक्लेशतोऽप्रशस्तानां जघन्यः पुनरन्यथा ॥ २७३ ॥
द्वाचत्वारिंशतस्तीव्रः प्रशस्तानां विशुद्धितः ।
संक्लेशतोऽप्रशस्तानां द्वाशीतेर्वामदृष्टिषु ॥ २७४ ॥
त्रीण्यायूंषि शरीराणि पंच त्रसचतुष्टयम् ।
अंगोपागत्रयं निर्मिदाद्ये संस्थानसंहती ॥ २७५ ॥
परघातागुरुलघ्वाह्वे सुरद्वयनरद्वये ।
सुभगोच्चस्थिरोच्छ्वासाः सन्नभोरीतिसुस्वरे ॥ २७६ ॥
पंचेन्द्रियं शुभादेये शस्तं वर्णचतुष्टयं ।
तीर्थकृत्त्वातपोद्योताः यशःसाते शुभाःस्मृताः ॥ २७७ ॥
॥ विशेषकम् ॥

प्रशस्तास्वातपोद्योततैरश्चमनुजायुषाम् ।
तीव्रोमिथ्यादृशि ज्ञेयः शेषाणाम् शुद्धदर्शने ॥ २७८ ॥
मानुषौदारिकद्वंद्वे जीवौ संहतिमादिमाम् ।
प्रकृष्टीकुरुतः पंच सदृष्टी सुरनारकौ ॥ २७९ ॥
द्वाचत्वारिंशतस्तस्या देवायुरप्रमत्तकः ।
तीव्रां द्वात्रिंशतं शेषां कुर्वते क्षपकाःपरं ॥ २८० ॥
४+५+१+३२=मिश्रिताः ४२ ॥
दशज्ञानांतरायस्थाःदर्शनावरणे नव ।
नीचं षड्विंशतिं मोहे निद्यं वर्णचतुष्टयं ॥ २८१ ॥
श्वभ्रतिर्यग्द्वये पंच संस्थानान्यशोऽशुभं ।
नारकायुरनादेयमसातं विकलत्रिकम् ॥ २८२ ॥

पंचसंहतयः सूक्ष्मं दुःस्वरासन्नभोगती ।
साधारणमपर्याप्तं दुर्भगं स्थावरास्थिरे ॥ २८३ ॥
एकाक्षमुपघातं च द्व्यशीतिर्वामदृष्टिना ।
प्रकृतीनामप्रशस्तानां प्रकृष्टीक्रियतेऽगिना ॥ २८४ ॥ कलापकम्
श्वभ्रतिर्यङ्नरायूंषि श्वभ्रद्वयमपूर्णकम् ।
विकलत्रितयं सूक्ष्मं साधारणकमित्यमूः ॥ २८५ ॥
एकादशनृतिर्यञ्चः प्रकृतीरप्रशस्तकाः ।
मिथ्यात्ववासितस्वांतास्तीव्रीकुर्वंतिजन्तवः ॥ २८६ ॥ युग्मम् ॥
देवो वामदृगुत्कृष्टानेकाक्षांस्थावरातपान् ।
उद्योतं कुरुते श्वाभ्रः सप्तमीभूमिमाश्रितः ॥ २८७ ॥
तिर्यग्द्वयमनादेयं प्रकृतीनामिदं त्रयं ।
प्रकृष्टीकुरुतो देवौ कुदृष्टी देवनारकौ ॥ २८८ ॥
प्रकृतीनामष्टषष्टिं चतुर्गतिगताःपरं ।
उत्कृष्टीकुर्वते तीव्रकषायाःवामदृष्टयः ॥ २८९ ॥
तिर्यगायुर्मनुष्यायुरातपोद्योतलक्षणम् ।
प्रशस्तासु पुरादत्तं प्रकृतीनां चतुष्टयम् ॥ २९० ॥
तीव्रानुभागबंधासु मध्ये यद्यपि तत्त्वतः ।
संभवापेक्षयाभूयो मिथ्यादृष्टेः प्रदीयते ॥ २९१ ॥
अप्रशस्तं तथाप्येतत्केवलंव्यपनीयते ।
षडशीतेरपनीते द्व्यशीतेर्जायते पुनः ॥ २९२ ॥
८६ अपनयने ८२ ॥
दशज्ञानांतरायस्थाःदृगावृतिचतुष्टयम् ।
मंदत्वं नयते सूक्ष्मः समयेंत्ये चतुर्दश ॥ २९३ ॥

पंच पुंवेदसंज्वालाः प्रकृतीरनिवृत्तिकः ।
रतिं हास्यं जुगुप्साभीर्निद्यं वर्णचतुष्टयं ॥ २९४ ॥
नयते प्रचलितानिद्रे उपघातमपूर्वकः ।
मंदानुभागबंधत्वमेकादशविशुद्धधीः ॥ २९५ ॥
आहारकद्वयं शश्वदप्रमत्तेन साधुना ।
शोकारती प्रमत्तेन मंदत्वं नीयते पुनः ॥ २९६ ॥
मिथ्यात्वमादिकोपादि चतुष्कं स्त्यानगृद्धयः ।
तिस्रश्चाष्टेतिनीयन्ते मंदत्वंवामदृष्टिना ॥ २९७ ॥
असंयतो द्वितीयानां कषायाणाम् चतुष्टयं ।
देशव्रतस्तृतीयानाम् मंदत्वं नयते पुनः ॥ २९८ ॥
इत्येताःप्रकृतीरेते संयमाभिमुखास्त्रयः ।
मन्दानुभागबन्धत्वं नयन्ते षोडशक्रमात् ॥ २९९ ॥
आयुश्चतुष्टयं सूक्ष्मं षट्कं वैक्रियिकाह्वयं ।
साधारणमपर्याप्तं त्रयं विकलगोचरम् ॥ ३०० ॥
मिथ्यादृशोनृतिर्यञ्चो मंदीकुर्वंति षोडश ।
उद्योतौदारिकद्वंद्वे तिस्रस्त्रिदशनारकाः ॥ ३०१ ॥
तिर्यग्द्वितयनीचानां तिसृणां कुर्वतेऽगिनः ।
मंदानुभागबंधत्वं सप्तमीमवनीङ्गताः ॥ ३०२ ॥
मंदे स्थावरैकाक्षे द्वे तिर्यग्देवमानवाः ।
कुर्वते मध्यमे भावे वर्तमानाः शरीरिणः ॥ ३०३ ॥
एकं सौधर्मदेवान्ता आतपं वामदृष्टयः ।
मनुष्यास्तीर्थकर्तृत्वं मंदीकुर्वन्त्यसंयताः ॥ ३०४ ॥
उच्छ्वासागुरुलघ्वाह्वे निर्मित्त्रसचतुष्टयं ।
पंचाक्षं कार्मणं तेजश्चारुवर्णचतुष्टयम् ॥ ३०५ ॥

परघातं च संक्लिष्टाश्चतुर्गतिनिवासिनः ।
मंदाः पंचदशाप्येताः कुर्वते वामदृष्टयः ॥ ३०६ ॥
मिथ्यात्वाकुलितास्तीव्रविशुद्धिगतमानसाः ।
आरोपयन्ति मंदत्वं स्त्रीनपुंसकवेदयोः ॥ ३०७ ॥
वेद्यद्वयं स्थिरद्वंद्वं शुभद्वंद्वं शुभद्वयम् ।
मनुष्यद्वयमादेयद्वयं हि सुभगद्वयं ॥ ३०८ ॥
विहायोगमनद्वंद्वं विंशतिं त्रिभिरान्विताम् ।
प्रपन्नाः मध्यमं भावं मन्दीकुर्वन्ति दुर्दृशः ॥ ३०९ ॥
संज्ञाः कथ्यन्ते—
भवन्ति सर्वघातिन्यः कषायाः द्वादशादिमाः ।
आद्याः दृग्रोधने पंच प्रान्ते ज्ञानेक्षणावृती ॥ ३१० ॥
मिथ्यात्वं विंशतिर्बंधे सम्यग्मिथ्यात्वसंयुताः ।
उदये ताः पुनर्दक्षैरेकविंशतिरीरिताः ॥ ३११ ॥
बंधे २० । उदये २१ ॥
दर्शनावरणे तिस्रः चतस्रो ज्ञानरोधने ।
संज्वालाः नोकषायाश्च मोहने विघ्नपंचकं ॥ ३१२ ॥
जायन्ते देशघातिन्यो बंधने पंचविंशतिः ।
षड्विंशतिर्भवन्त्येताः सम्यक्त्वेन सहोदये ॥ ३१३ ॥
बंधे २५ । उदये २६ । पिंडिताः ४७ ॥
वेद्यायुर्नामगोत्राणां प्रोक्ताःप्रकृतयोऽखिलाः ।
अघातिन्योऽखिलाः प्राज्ञैरेकोत्तरशतप्रमाः ॥ ३१४ ॥
अघातिन्यः १०१ ॥ पिंडिताः १४८ ॥
घातिकाभिरिमा युक्ता घातिका सन्त्यघातिका ।
घातिकास्तत्रपापाख्याः पुण्यपापाभिधाः पराः ॥ ३१५ ॥

संज्वालाः ज्ञानरुध्याद्याश्चतस्रो विघ्नपंचकं ।
तिस्रो दृग्रुधि पुंवेदः संति सप्तदशेति याः ॥ ३१६ ॥
चतुर्विधेन भावेन सदा परिणमंति ताः ।
त्रिविधेन पुनः शेषाः सप्तोत्तरशतप्रमाः ॥ ३१७ ॥
लतादार्वस्थिपाषाणतुल्यास्ता भावतो मताः ।
अन्याःदार्वस्थिपाषाणतुल्याःसप्तोत्तरंशतम् ॥ ३१८ ॥
प्रशस्तानां समाःभावाः गुडखंडसितामृतैः ।
अन्यासां निंबकंजीरविषहालाहलैर्मताः ॥ ३१९ ॥
योगेन बध्यते सातं मिथ्यात्वेनात्रषोडश ।
असंयमेन पंचाग्रा त्रिंशदन्याःकषायतः ॥ ३२० ॥
वृत्तं आहारकद्वंद्वं सम्यक्त्वं तीर्थकारिणि ।
प्रधानप्रत्ययास्तासामितिबन्धो न तैर्विना ॥ ३२१ ॥
इति प्रधानप्रत्ययनिर्देशः । अपरेप्येवमाहुः[1]—
मिथ्यात्वस्योदये यांति षोडश प्रथमेगुणे ।
संयोजनोदये बंधं सासने पंचविंशतिः ॥ ३२२ ॥
कषायाणां द्वितीयानामुदये निर्व्रते दश ।
स्वीक्रियन्ते तृतीयानां चतस्रो देशसंयते ॥ ३२३ ॥
सयोगे योगतः सातं शेषाःस्वे स्वे गुणे पुनः ।
विमुच्याहारकद्वंद्वतीर्थकृत्वे कषायतः ।
षष्ठिः पंचाधिका बंधं प्रकृतीनाम् प्रपद्यते ॥ ३२४ ॥

---

१ सोलसपणवीसणभं दसचउछक्केकबंधवोच्छिण्णा ।
दुगतीस चदुरपुव्वे पण सोलस जोगिणो एक्को ॥

आहारकद्वयस्योक्तः संयमस्तीर्थकारिणः ।
सम्यक्त्वं कारणं पूर्वं बंधने बंधवेदिभिः ॥ ३२५ ॥

मिथ्यात्वं षोडशानामिह प्रधानं कारणमन्येषामप्रधानम् इत्यादिज्ञेयं ॥

शरीरपंचकं वर्णपंचकं रसपंचकं ।
षट्के संस्थानसंहत्योरष्टकं स्पर्शगोचरं ॥ ३२६ ॥
अंगोपांगत्रयं गंधद्वयं प्रत्येकयुग्मकं ।
निर्माणागुरुलघ्वाह्वे स्थिरद्वंद्वं शुभद्वयम् ॥ ३२७ ॥
परघातोपघाताह्वे देहबंधनपंचकं ।
आतपोद्योतसंघातपंचकानीति भाषिताः ॥ ३२८ ॥
द्वाभ्यां पुद्गलपाकिन्यः षष्ठि प्रकृतयो युताः ।
एतदीयेन पाकेन शरीराद्युपलब्धितः ॥ ३२९ ॥
ज्ञानदृग्रोधविघ्नस्थाः वेद्यमोहनगोत्रजाः ।
गतयो जातयस्तीर्थकृदुच्छ्वासो नभोगती ॥ ३३० ॥
त्रससुस्वरपर्याप्तस्थूलादेययशःशुभाः ।
सेतरा जीवपाकाः स्युरष्टाग्रा सप्ततिः पुनः ॥ ३३१ ॥
ज्ञानरोधादयः सर्वाः यतो जीवं विकुर्वतो ।
जीवपाकास्ततोज्ञेयास्तत्र तत्पाकदृष्टितः ॥ ३३२ ॥

अत्रात्मनि निबद्धाः सप्तविंशति नामप्रकृतयः तासां तत्रविपाकोपलब्धेः ।

आनुपूर्व्यश्चतस्रोऽपि क्षेत्रपाका निवेदिताः ।
जिनैरायूंषि चत्वारि भवपाकानि सर्वदा ॥ ३३३ ॥

इत्युनुभागबंधः समाप्तः ॥

स्वामित्वभागभागाभ्यामष्टोत्कृष्टादयः सह ।
दश प्रदेशबन्धस्य प्रकाराः कथिताः जिनैः ॥ ३३४ ॥
पुद्गलाः ये प्रगृह्यन्ते जीवेन परिणामतः ।
रसादित्वमिवाहाराः कर्मत्वं यांति तेऽखिलाः ॥ ३३५ ॥
एकक्षेत्रावगाढास्ते योग्याः सर्वप्रदेशगाः ।
गृह्यन्ते हेतुतो जीवैः सादयोऽनादयः सदा ॥ ३३६ ॥
गंधवर्णरसैः सर्वैः स्पर्शैश्चतुर्भिरन्वितैः ।
विमुक्तानंतभागोस्ति[1] कर्मानंतप्रदेशकं ॥ ३३७ ॥
एकैकत्रक्षणे येऽत्र बंधमायान्ति पुद्गलाः ।
अष्टधा बध्नतः कर्म तेषाम्भागप्रकल्पना ॥ ३३८ ॥
शीतोष्णस्निग्धरूक्षत्वकलिताः परमाणवः ।
योग्यत्वं प्रतिपद्यन्ते कर्मबंधस्य नापरे ॥ ३३९ ॥
एकेन परिणामेन गृहीताः परमाणवः ।
अष्टकर्मत्वमायांति शुद्धिसंल्केशवृद्धितः ॥ ३४० ॥
वृद्धिर्यथायथाक्षाणां विवर्द्धते तथा तथा ।
जंतोर्विशुद्धिसंक्लेशौ हीयेते परथा पुनः ॥ ३४१ ॥
स्वल्पस्तत्रायुषस्तुल्यो गोत्रनाम्नोस्ततोऽधिकः ।
विघ्नदृग्ज्ञानरोधेषु समोभागस्ततोऽधिकः ॥ ३४२ ॥
समस्तो परमो भागो मोहनीये निवेदितः ।
वेदनीयेऽधिकस्तस्मादितीत्थं भागकल्पना ॥ ३४३ ॥
सुखदुःखे यतोऽनल्पे दत्तोभागस्ततोऽधिकः ।
वेदनीये परेषान्तु भूयेवस्थाव्यपेक्षया ॥ ३४४ ॥

---

१ सिद्धानंतिमभागः

आवल्यसंख्यभागेन खंडिते कर्मसंचये ।
आधिक्यमेकखंडेन कर्तव्यं सर्वकर्मसु ॥ ३४५ ॥
अनुत्कृष्टो मतः षण्णां चतुर्भेदस्त्रयः परे ।
बंधाः साद्यध्रुवाः सर्वे मोहनीयायुषो द्विधा ॥ ३४६ ॥
दर्शनावरणे षट्कं स्त्यानगृद्धित्रिकं बिना ।
दश ज्ञानान्तरायस्थाः कषायाः द्वादशान्तिमाः ॥ ३४७ ॥
जुगुप्साभयमित्यासां प्रकृतीनां चतुर्विधः ।
अनुत्कृष्टस्त्रयः शेषाः बन्धाः साद्यध्रुवाः द्विधा ॥ ३४८ ॥
उत्कृष्टाद्याः द्विधा बंधाश्चत्वारः सादयोऽध्रुवाः ।
प्रकृतीनाम् प्रदेशाख्याः शेषाणां नवतेः पुनः ॥ ३४९ ॥
जघन्योनाधरो यस्मादजघन्योऽस्ति साधरः ।
उत्कृष्टो नोत्तरो यस्मादनुत्कृष्टोऽस्ति सोत्तराः ॥ ३५० ॥
उत्कृष्टो जायते बंधः षट्सु मिश्रं विनायुषः ।
प्रदेशाख्यो गुणस्थाननवके मोहकर्मणः ॥ ३५१ ॥
अनायुर्मोहनीयानाम् षण्णाम्भवति कर्मणाम् ।
अपर्याप्तस्य सूक्ष्मस्य निगोतस्य शरीरिणः ॥ ३५२ ॥
क्षुद्रभवग्रहस्योक्तं त्रिभागे परमायुषः ।
बंधनं कर्मणाम्प्राज्ञैरन्येषाम्प्रथमे क्षणे ॥ ३५३ ॥
दृग्ज्ञानरोधविघ्नानां चतस्रः पंचपंच च ।
सातमुच्चंयशः सप्त दशानां विदधाति वै ॥ ३५४ ॥
प्रदेशबंधमुत्कृष्टं सूक्ष्मलोभगुणस्थितः ।
संज्वालनरवेदानां पंचानामनिवृत्तिकः ॥ ३५५ ॥
तीर्थकृत्प्रचलानिद्राषट्कं हास्यादिगोचरं ।
नवानां कुरुते बंधमुत्कृष्टं शुभदर्शनः ॥ ३५६ ॥

चतुष्कस्य द्वितीयस्य कषायाणामसंयतः
विदधाति तृतीयस्य प्रकृष्टं देशसंयतः ॥ ३५७ ॥
सुरद्वितयमादेयं सुभगं नृसुरायुषी ।
आद्ये संहतिसंस्थाने सुस्वरः सन्नभोगतिः ॥ ३५८ ॥
असातं विक्रियाद्वंद्वमित्येताः यास्त्रयोदश ।
तासां सद्दृष्टिदुर्दृष्टी बंधोत्कृष्टत्वकारिणौ ॥ ३५९ ॥
आहारकद्वयस्योक्तः प्रदेशोत्कर्षणक्षमः ।
अप्रमत्तः, परासान्तु जीवो मिथ्यात्वदूषितः ॥ ३६० ॥
उत्कृष्टयोगवान् संज्ञी पूर्णांगी स्तोकबंधकः ।
प्रकृष्टं कुरुते बंधं जघन्यं विपरीतकः ॥ ३६१ ॥
चतस्रः श्वभ्रदेवायुःश्वभ्रद्वितयलक्षणाः ।
असंज्ञी कुरुते स्वल्पा मध्ययोगव्यवस्थितः ॥ ३६२ ॥
आहारकद्वयं साधुः प्रमादरहिताशयः ।
पंच निःसंयमः तीर्थकृद्देवस्य चतुष्टयं ॥ ३६३ ॥
शेषाः सूक्ष्मनिगोतोऽगी स्वल्पत्वं नयते पुनः ।
मध्ययोगस्थितः सर्वा नवाधिकशतप्रमाः ॥ ३६४ ॥
प्रदेशप्रकृती बन्धौ योगतः स्तः कषायतः ।
जन्तोः स्थित्यनुभागौ स्तः तद्व्यपाये व्यपायतः ॥ ३६५ ॥
स्वभावः प्रकृतिर्ज्ञेया स्वभावादच्युतिः स्थितिः ।
अनुभागो रसस्तासां प्रदेशोंऽशावधारणम् ॥ ३६६ ॥
प्रकृतिस्तिक्तता निंबे स्थितिरच्यवनं पुनः ।
रसस्तस्यानुभागः स्यादित्येवं कर्मणामपि ॥ ३६७ ॥
कालं क्षेत्रं भवं द्रव्यमुदयः प्राप्य कर्मणाम् ।
जायमानो मतो द्वेधा विपाकेतरभेदतः ॥ ३६८ ॥

भागोऽसंख्यातिमः श्रेणेर्योगस्थानानि देहिनः ॥
ततोऽसंख्यगुणो ज्ञेयः सर्वप्रकृतिसंग्रहः ॥ ३६९ ॥
ततोऽसंख्यगुणानि स्युः स्थितिस्थानान्यतः स्थितेः ।
स्थानान्यध्यवसायानामसंख्यातगुणानि वै ॥ ३७० ॥
असंख्यातगुणान्यस्माद्रसस्थानानि कर्मणाम् ।
ततोऽनंतगुणाः संति प्रदेशाः कर्मगोचराः ॥ ३७१ ॥
अविभागपरिच्छेदाः सर्वेषामपि कर्मणाम् ।
एकैकत्र रसस्थाने ततोऽनंतगुणाः मताः ॥ ३७२ ॥

उपजातिवृत्तम् ।

कर्मप्रवादांबुधिविन्दुकल्प—
श्चतुर्विधो बंधविधिः स्वशक्त्या ।
संक्षेपतो यः कथितो मयाऽसौ ।
विस्तीरणीयो महनीयबोधैः ॥ ३७३ ॥

बंधविचारं बहुतमभेदं यो हृदि धत्ते विगलितखेदम् ।
याति स भव्यो व्यपगतकष्टां सिद्धिमबंधोऽमितगतिरिष्टाम् ॥
गुणस्थानविशेषेषु प्रकृतीनां नियोजने ।
स्वामित्वमिह सर्वत्र स्वयमेव विबुध्यताम् ॥ ३७५ ॥

इति श्रीमदमितगत्याचार्यवर्यप्रणीते पंचसंग्रहाख्यग्रंथे
शतकं समाप्तम् ।

नत्वाहमर्हतो भक्त्या घातिकल्मषघातिनः ।
स्वशक्त्या सप्ततिं वक्ष्ये बंधभेदावबुद्धये ॥ ३७६ ॥
बंधोदयसत्त्वानां सिद्धपदैर्दृष्टिवादपाथोधेः ।
स्थानानि प्रकृतीनामुद्धृत्य समासतो वक्ष्ये ॥ ३७७ ॥

वंधे कत्युदये सत्त्वे संति स्थानानि वा कति ।
मूलोत्तरगताः सन्ति कियंत्यो भंगकल्पनाः ॥ ३७८ ॥
अष्टकं सप्तकं षष्ठं बंधेऽष्टोदयसत्वयोः ।
एकबंधे त्रयो भेदा एको बंधविवर्जिते ॥ ३७९ ॥

बंध	८	७	६
उदय	८	८	८
सत्ता	८	८	८

एकबंधे—

बंध	१	१	१
उदय	७	७	४
सत्ता	८	७	४

अबंधे—

बं.	०
उ.	४
स.	४

त्रयोदशसु सप्ताष्टौ बंधेऽष्टोदयसत्तयोः ।
भेदाः संज्ञिनि पर्याप्ते पंच द्वौ केवलिद्वये ॥ ३८० ॥

त्रयोदशसु जीवसमासेषु—

बं.	७	८
उ.	८	८
स.	८	८

एकस्मिन् संज्ञिनि पूर्णे—

८	७	६	१	१
८	८	८	७	७
८	८	८	८	७

केवलिद्वये,—१, ० । ४, ४ । ४, ४ ।

द्वौ विकल्पौ गुणस्थानषट्के मिश्रं विनाष्टसु ।
एकैकः कर्मणां बंधः पाकसत्वेषु जायते ॥ ३८१ ॥

मिथ्यादृष्ट्यादीनां षण्णां मिश्रवर्जितानां द्वौ विकल्पौ—
८, ७ । ८, ८ । ८, ८ ।

एकैकोऽष्टानां—

मिश्र	अपू.	अ.	सू.	उ.	क्षी.	स.	अ.
७	७	७	६	१	१	१	०
८	८	८	८	७	७	४	४
८	८	८	८	८	७	४	४

बंधोदयास्तिता मूलप्रकृतीनां निवेदिताः ।
उत्तरप्रकृतीनां ताः कथयिष्यामि साम्प्रतम् ॥ ३८२ ॥
बंधादित्रितये पंच विघ्ने ज्ञानावरोधने ।
शांते क्षीणे च निर्बन्धे पंचानामुदयास्तिते ॥ ३८३ ॥

दशसु,—५, ५ । ५, ५ । ५, ५ । शान्तक्षीणयोः—०, ० । ५, ५ । ५, ५ ।

नव स्युः षट् चतस्रश्च दृग्रोधे बंधसत्वयोः ।
स्थानानि त्रीणि पाके द्वे चतस्रः संति पंच वा ॥ ३८४ ॥

भवंति नव सर्वाः षट् स्त्यानगृद्धित्रयं विना ।
चतस्रः प्रचलानिद्रारहिताः बंधसत्त्वयोः ॥ ३८५ ॥

९ । ६ । ४

चतस्रोऽत्रोदये चक्षुर्दर्शनावरणादयः ।
जायंते पंच वा निद्रादीनामेकतरोदये ॥ ३८६ ॥

४ । ५ ।

बंधत्रये संति नवात्र सत्त्वे
षट्कं चतुर्बन्धिनि बंधहीने ।
नवाथ षट् द्वौ सकलेषु पाकौ
सत्वे च पाके च चतुष्कमंत्ये ॥ ३८७ ॥

द्वयोर्नव द्वयोः षट्कं चतुर्षु च चतुष्टयम् ।
पंच पंचसु शून्यानि भंगाः संति त्रयोदश ॥ ३८८ ॥

बंध	९	९	६	६	४	४	४	४	०	०	०	०	०
उदय	४	५	४	५	४	५	४	५	४	५	४	५	४
सत्ता	९	९	९	९	९	९	६	६	९	९	६	६	४

बंधत्रये ९ । ६ । ४ सर्वे मूलभंगाः १३ ।

सत्तायां नवकंषट्के द्वयेषट्कं नव द्वये ।
द्वितये षट्कमेकत्र गतबंधे चतुष्टयम् ॥ ३८९ ॥

इति मूलभंगेषु सत्त्वभंगाः । उदयभंगाश्चत्वारः पंच वा सर्वत्र ।

द्वितये नवकं षट्कं ततोऽपूर्वस्य पूर्वकम् ।
यावद्भागं ततः सूक्ष्मं बंधे यावच्चतुष्टयम् ॥ ३९० ॥
गुणस्थानेषु बंधः—९।९।६।६।६।६।६।६।४।४।०।०।०।० ।
सत्वे नवोपशांतांताः क्षीणे षट् प्रथमे क्षणे ।
चतस्रोऽत्रांतिमे ज्ञेयाः सत्त्वं नास्ति ततः परम् ॥ ३९१ ॥
क्षपके संत्यपूर्वस्य नव प्रकृतयः स्फुटम् ।
अनिवृत्तेरसंख्येयभागेषु षडतः परम् ॥ ३९२ ॥

९	९	९	९	९	९	९	९	९	९	९	६	४	०	०
							९	९।६	६		क्षी.प्र.	क्षी.अं.		
							क्ष							

सर्वत्र चत्वारः पंच चोदये परं क्षीणस्यांत्यक्षणे चतुष्टयमिति ।

४	४	४	४	४	४	४	४	४	४	४	४
५	५	५	५	५	५	५	५	५	५	५	५

मिथ्यादृष्टिसासनयोः—बंधः ९, ९ । उदयः ४, ५ । सत्ता ९, ९ । सम्यङ्मिथ्यादृष्ट्यादिषु द्विविधापूर्वकरणप्रथमसप्तमभागं यावत्—बं. ६, ६ । उ. ४, ५ । स. ९, ९ । शेषापूर्वानिवृत्तिसूक्ष्मोपशमकेषु, क्षपकेषु चापूर्वकरणस्य सप्तभागेषु षट्स्वनिवृत्यसंख्यातान् बहून् भागान् यावत्—बं. ४, ४ । उ. ४, ५ । स. ९, ९ । ततः परं क्षपितषोडशप्रकृतेरनिवृत्तेः शेषसंख्यातभागे सूक्ष्मक्षपके च—

बं. ४, ४ । उ. ४, ५ । स. ६, ६ । उपशांते—बं. ०, ० । उ. ४, ५ । स. ९, ९ । क्षीणे प्रथमे क्षणे—बं. ०, ० । उ. ४, ५ । स. ६, ६ । क्षीणांत्यक्षणे—बं. ० । उ. ४ । स. ४ ।

सप्त गोत्रेऽष्ट वेद्ये स्युर्भंगाः पंच नवोदिताः ।
नव पंचक्रमाच्छ्वभ्रातिर्यङ्नरसुरायुषाम् ॥ ३९३ ॥

गोत्रे ७ । वेद्ये ८ । आयुषि ५ । ९ । ९ । ५ ।

उच्चं द्वयोर्द्वयोर्नीचं बंधे पाके चतुष्टये ।
उच्चनीचोच्चनीचानि द्वयं सत्त्वे चतुष्टये ॥ ३९४ ॥
पंचमे सकलं नीचमित्थं वेद्येऽपि बुध्यताम् ।
एकोऽङ्कः प्रथमेऽन्यत्र शून्यस्तत्र निवेश्यते ॥ ३९५ ॥

बंध	१	१	०	०	०
उदय	१	०	१	०	०
सत्ता	१।०	१।०	१।०	१।०	०।०

अत्रांकसंदृष्टेरुच्चे एको नीचे शून्यः १।० एकः साते शून्योऽसाते १।० ।

आद्ये पंचादिमाः भंगाश्चत्वारः स्रस्तदर्शने ।
द्वावाद्यौ त्रितयेऽन्यत्र पंचमेऽस्त्येक आदिमः ॥ ३९६ ॥

मिथ्यादृष्ट्यादिषु दशसु पंचानां विभागः ५ । ४ । २ । २ । २ । १ । १ । १ । १ । १ ।

उच्चं पाके द्वयं सत्त्वे चतुष्के बंधवर्जिते ।
अयोगस्योच्चमंत्येऽस्ति समये पाकसत्त्वयोः ॥ ३९७ ॥

चतुर्षु उ. १ । स. १।० । अयोगांत्यक्षणे १ । १ । एवं सप्त ७ ।

चत्वारो गोत्रवद्भंगाः वेद्यस्य प्रथमा मताः ।
आद्येषुषट्सु ते संति प्रथमौ द्वौ च सप्तसु ॥ ३९८ ॥
आद्यौ बंधपरित्यक्तावयोगे द्वावुपान्तिमे ।
द्वावसाते तथा साते तस्यान्ते पाकसत्त्वयोः ॥ ३९९ ॥

बं.	१	१	०	०				
उ.	१	०	१	०	१	०	०	१
स.	१०	१०	१०	१०	१०	१०	०	१

एवमष्ट ८ ।

श्वभ्रायुरुदितं सच्च तिर्यगायुरबध्नतः ।
बध्नतस्तत्र जायेते बध्यमानोदिते सती ॥ ४०० ॥
सती बद्धोदिते बद्धे मर्त्यायुष्यप्ययं क्रमः ।
एकद्वित्रिचतुर्भिश्च संज्ञांकैरायुषां क्रमात् ॥ ४०१ ॥

चतुर्णामायुषां संदृष्टिः १ । [2] २ । ३ । ४ ।

पाके श्वभ्रायुषोऽबंधे, बंधे तिर्यङ्नरायुषोः ।
सत्वे श्वभ्रयुषो भंगास्तदाद्योः परयोरपि ॥ ४०२ ॥

श्वभ्रायुषो भंगाः—						
५	०	२(ति.)	०	३(म.)	०
	१	१	१	१	१
	१	१।२	१।२	१।३	१।३
		न. ति.	न.ति.	न म.	न म.

तिर्यग्भवायुरुदयेऽबंधे, बंधे पुनश्चतुष्कस्य ।
तिर्यग्जीवितसत्त्वे सत्त्वे वा परचतुष्कस्य ॥ ४०३ ॥

तिर्यगायुर्भंगाः—										
९	०	१	०	२	०	३	०	४	०
	२	२	२	२	२	२	२	२	२
	२	२।१	२।१	२।२	२।२	२।३	२।३	२।४	२।४

मानवभवायुरुदयेऽबंधे, बंधे पुनश्चतुष्कस्य ।
मानुषजीवितसत्त्वे सत्त्वे चापरचतुष्कस्य ॥ ४०४ ॥

मनुष्यायुर्भंगाः—										
९	०	१	०	२	०	३	०	४	०
	३	३	३	३	३	३	३	३	३
	३	३।१	३।१	३।२	३।२	३।३	३।३	३।४	३।४

---

१ तिर्यगायुरबध्नतो जीवस्य श्वभ्रायुरुदयं सत्ताच्च । तिर्यगायुर्बध्नतो नारकजीवस्य तिर्यगायुर्बंधः नरकायुरुदयः द्वयोः सत्ता ।

२ (१) अंकेन नरकायुर्बोध्यम् (२) अंकेन तिर्यगायुः (३) अंकेन मनुष्यायुः (४) अंकेन देवायुः

पाके देवायुषो बंधे बंधे तिर्यङ्नरायुषोः ।
सत्वे देवायुषो भंगास्तदाद्योः परयोरपि ॥ ४०५ ॥

देवायुर्भंगा—	५	०	२	०	३	०
		४	४	४	४	४
		४	४।२	४।२	४।३	४।३

द्व्येकाग्रे विंशती ते त्रिसप्तन्यूने मनीषिणः ।
नव पंच च चत्वारि त्रीणि द्वे विदुरेककम् ॥ ४०६ ॥

यानीति मोहनीयस्य स्थानानि दश कर्मणः ।
बंधे संति गुणस्थाने तेषामस्तीति योजना ॥ ४०७ ॥

२२।२१।१७।१३।९।५।४।३।२।१।

मिथ्यात्वयुजि मिथ्यात्वं कषायाः षोडशैकक‌ः ।
वेदो हास्यादिकेस्वेकं युग्मं भययुगुप्सने ॥ ४०८ ॥

द्वाविंशतिरमिथ्यात्वषंढका स्रस्तदर्शने ।
न्यूनानंतानुबंधिस्त्रीवेदैर्मिश्रचतुर्थयोः ॥ ·०९ ॥

१।१६।१।२।१।१। मिळिताः २२ । इति ।

मिथ्यादृष्टौ प्रस्तारः—२ । २, २ । १, १, १ । १६ । १ । सासने २१ । प्रस्तारः—२ । २, २ । १, १ । १६ । मिश्राव्रतयोः १७ । प्रस्तारः,—२ । २,२ । १ । १२ ।

अप्रत्याख्यानकैरूना देशे षष्ठे तृतीयकैः ।
सप्तमाष्टमयोरेते शोकारातिं विना कृताः ॥ ४१० ॥

देशे १३ । प्रस्तारः—२ । २,२ । १ । ८ । षष्ठे ९ । प्रस्तारः,—२ । २,२ । १ । ४ । सप्तमाष्टमयोः ९ । प्रस्तारः—२ । २ । १ । ४ ।

बंधे पुंवेदसंज्वालाः संज्वाला नवमे क्रमात् ।
एकद्वित्रिभिरूनास्ते मोहने क्रमतो बुधैः ॥ ४११ ॥
नवमे ५ । ४ । ३ । २ । १ ।
भंगाः षडादिमे[1] बंधे चत्वारस्ते [2]द्वितीयके ।
द्वौ[3] द्वौ त्रिषु परेषु स्यादेकैको मोहकर्मणः ॥ ४१२ ॥
६।४।२।२।२।१।१।१।१।१।
उदयस्थानानि कथ्यन्ते—
नव स्थानानि मोहस्य क्रमाद्दश दशोदये ।
एकद्वित्रिचतुः पंचषडष्टनववर्जिताः ॥ ४१३ ॥
१०।९।८।७।६।५।४।२।१।
मिथ्यात्वमेकमेकं च कषायाणां चतुष्टयम् ।
वेद एकतमो युग्मं हास्यादिष्वेककं भयम् ॥ ४१४ ॥
जुगुप्सेत्युदये सन्ति दश प्रकृतयः स्फुटम् ।
मिथ्यादृष्टिगुणस्थाने द्वाविंशतिनिबंधने ॥ ४१५ ॥ युग्मम् ॥

तत्र मिथ्यात्वं १ । अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनेषु चत्वारः क्रोधमानमायालोभाः ४ । त्रिषु वेदेष्वेकतमो वेदः १ । हास्यरत्यरतिशोकयोरेकतरं युग्मं २ । भयं १ । जुगुप्सा १ । दशोदयस्थानमिदं द्वाविंशतिबंधस्थानानि मिथ्यादृष्टौ १० ।

मिथ्यात्वमाद्याः क्रमतो द्वितीया—
स्त्याज्यास्तृतीया भयजुगुप्सनैकैम् (?) ।

---

१ मिथ्यात्वे २२ स्थाने षट् भंगाः वेदत्रयहास्यादियुग्मद्वयगुणनेन ।
२ वेदद्वयहास्यादियुग्मद्वयगुणनेन ३ हास्यादियुग्मद्वयेन । ४ अत्रैकाक्षराधिक्येन छन्दोभङ्गः ।

तद्युग्महास्यादियुगे सवेदे
स्थाने परत्रोदययोजनाय ॥ ५१६ ॥

अस्यार्थः—दशोदयस्थानतो मिथ्यात्वत्यागे नवोदयस्थानमेकविंशतिबंधके सासने ९। ततः कषायाणामादिचतुष्कत्यागे परचतुष्कत्रयैकतरत्रयग्रहे एकतरवेदादिपंचकग्रहे चाष्टोदयस्थानं, सप्तदशबंधकस्य सम्यग्मिथ्यादृष्टेरसंयतस्यौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेश्च ८। ततो द्वितीयचतुष्कत्यागे परचतुष्कद्वयान्यतरद्वयग्रहे एकतरवेदादिपंचकग्रहे च सप्तोदयस्थानं, त्रयोदयबंधकस्य संयतासंयतस्यौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेश्च ७। ततस्तृतीयचतुष्कत्यागे चतुर्णां संज्वलनानामेकतरग्रहे एकतरवेदादिपंचकग्रहे च षडुदयस्थानं नवकबंधकानामौपशमिकक्षायिकसम्यग्दृष्टीनां प्रमत्ताप्रमत्तापूर्वाणां ६। ततो भयजुगुप्सयोरेकतरत्यागे पंचोदयस्थानं प्रमत्तादीनामेव ५। ततो भयजुगुप्साद्वयत्यागे चतुरुदयस्थानं प्रमत्तादीनामेव ४॥ एषामुदयस्थानानां दशादीनाम् कषाय चतुष्कवेदत्रययुग्मद्वयानां परस्पराभ्यासे चतुर्विंशतिभंगाः २४। ततो हास्यादित्यागे च चतुर्णां सज्वलनानामेकरतरग्रहे त्रयाणां च वेदानामेकतरग्रहे सवेदस्यानिवृत्तेर्द्विकमुदयस्थानं २। अस्य द्वादश भंगाः १२। चतुर्बंधकस्यानिवृत्तेरुदयस्थाने द्वावेकश्च तत्राद्ये द्वादशभंगाः। द्वितीये निर्वेदस्यानिवृत्तेश्चतुर्णां संज्वलनानामेकतरेणैकमुदयस्थानं १। अस्य चत्वारो भंगाः ४। त्रयबंधकस्य क्रोधवर्ज्यानां संज्वलनानामेकतरेणैकमुदयस्थानं १। अस्य त्रयो भंगाः ३। द्वयबंधकस्य क्रोधमानवर्ज्ययोः संज्वलनयोरेकतरेणैकमुदयस्थानं १। अस्य द्वौ

भंगौ २ । एकबंधकस्य लोभसंज्वलनेनैकमुदयस्थानं १ । अस्यैको भंगः १ । अबंधकस्यसूक्ष्मलोभस्य लोभसंज्वलनेनैकमुदयस्थानं १ अस्याप्येको भंगः ।

पंचदश सत्तास्थानानि कथ्यन्ते—

क्रमाद्द्वित्रिचतुःषट्कसप्ताष्टनववार्जितम् ।
सप्तकं त्रिंशतां कृत्वा त्रिद्व्येकसहितान् दश ॥ ४१७ ॥
एकद्वित्रिचतुःपंचहीनान् षण्मोहकर्मणः ।
सत्त्वे पंचदश प्राहुः स्थानानीति मनीषिणः ॥ ४१८ ॥

२८।२७।२६।२४।२३।२२।२१।१३।१२।११।५।४।३।२।१।

मोहेऽष्टाविंशतिः सर्वाः सम्यक्त्वे सप्तविंशतिः ।
क्रमात्षड्विंशतिर्मिश्रे भवत्युद्वेलिते सति ॥ ४१९ ॥

२८ । २७ । २६ ।

अष्टाविंशतितः क्षीणे कषायाणां चतुष्टये ।
प्रथमेऽसति मिथ्यात्वे मिश्रसम्यक्त्वयोः क्रमात् ॥ ४२० ॥
कोपादिकाष्टके षंढे स्त्रियां हास्यादिगोचरे ।
षट्के पुंसि क्रमान्नष्टे संज्वालानां त्रये सति ॥ ४२१ ॥

२४।२३।२२।२१।१३।१२।११।५।४।३।२।१।

सत्त्वस्थानानि शेषाणि ज्ञेयानीति यथागमम् ।
उदस्थानयोगोऽतो बंधस्थानेषु कथ्यते ॥ ४२२ ॥
पंचस्वाद्येषु बंधेषु पंचपाका दशादिकाः ।
द्वौ परे द्विकमेको वा परेऽन्येष्वेकको मतः ॥ ४२३ ॥

बं	२२	२१	१७	१३	९
उ	१०	९	८	७	६

अनिवृत्तौ—

ब	५	४	३	२	१
उ	२	२	१	१	१

सूक्ष्मे—

०
१

आद्ये संयोजनोनोऽन्यो द्वौ (च) सप्तदशे परौ ।
पाकौ समिश्रसम्यक्त्वो ससम्यक्त्वौ द्वयोः परौ ॥४२४ ॥

२२	२१	१७	१३	९
१० ९	९	९।८	८।७	७।६

भिया जुगुप्सया हीना द्वितयेन दशाप्यमी ।
उपर्युपरि त्रयो भंगाः एकैकत्र ततो मताः ॥ ४२५ ॥

२२		२१	१७		१३		९	
८	७	७	वे	उ. क्षा.	वे	उ. क्षा	वे	उ. क्षा.
९।९	८	८।८	७	६	६	५	५	४
१०	९।९	९	८।८	७।७	७।७	६।६	६।६	५।५
	१०		९	८	८	७	७	६

अत्रैको दशानामुदयः षट्, नवानामेकादशाष्टानां दश, सप्तानां सप्त, षण्णां चत्वारः पंचानामेकश्चतुर्णां द्वावनिवृत्तौ द्वयोः पंचानामेकैकभेदाः पाकाः ज्ञेयाः । तत्र पंचसु स्थानेषु १।६।११।१०।७।४।१। पिंडिताः ४० । अनिवृत्तौ २।४। सूक्ष्मे १ ।

तत्र द्वाविंशतेर्बंधे सप्ताद्या दशैकविंशतेर्नव सप्ताद्याः, सप्तदशानां नव षडाद्या स्त्रयोदशानामष्ट पंचाद्याः नवानां सप्त चतुराद्याः पाकाः द्रष्टव्याः १४० ।

कषायवेदयुग्मानां भंगाघाते परस्परम् ।
चतुर्विंशतिरादिष्टा बंधस्थानेषु पंचसु ॥ २४ । ४२६ ॥

चतुर्विंशत्या चत्वारिंशतस्ताडने संत्युदयभेदाः ९६० ।

भंगा वै द्वादश प्रोक्ताः वेदैः कोपादिताडने ।
आद्ययोर्बंधयोर्दक्षैर्द्वितयस्योदये सति ॥ ४२७ ॥

एकपाके चतुर्बंधे ज्ञेयं भंगचतुष्टयम् ।
त्रिद्व्येकबंधने भंगास्त्रिद्व्येकेऽन्यत्र चैककः ॥ ४२८ ॥

५	४	४	३	२	१
२	२	१	१	१	१
१२	१२	४	३	२	१

सूक्ष्मे ०,१,१ । सर्वे भंगा मिलिताः ३५ । पूर्वैः सहिताः ९९० ।

पाकप्रकृतिभिर्हत्वा पाकस्थानानि ताडयेत् ।
चतुर्विंशतिभंगाद्यैः पदबंधोपलब्धये ॥ ४२९ ॥

दशादीनि चतुरंतानि पाकस्थानानि

१०	९	८	७	६	५	४
१	६	११	१०	७	४	१

दशादिपाकप्रकृतिताडितानि—१०।५४।८८।७०।४२।२०।४ पिंडितानि २८८ । चतुर्विंशतिभंगताडितानि ६९१२ । अनिवृत्तौ पूर्वोक्ता द्विकादिपाकप्रकृतयः २।२।१।१।१।१। सूक्ष्मे १ । एभिर्भंगैरेताः १२।१२।४।३।२।१।१। गुणिता एतावंतः—२४।२४।४।३।२।१।१। पिंडिता ५९ । पूर्वैः सह पदबंधा एतावंतः ६९७१ ।

मोहप्रकृतिसंख्यायाः पदबंधा भवंत्यमी ।
एकोनत्रिंशता हीनाः सहस्राः सप्त निश्चितम् ॥ ४३० ॥

बंधस्थानं प्रति सत्तास्थानानि दीयंते—

आद्ये त्रीण्येकमन्यत्र त्रिषु पंच षडेककः ।
सप्तापरत्र चत्वारि सत्तास्थानान्यतः परे ॥ ४३१ ॥

मोहस्य सत्तास्थानानि बंधस्थानेषु सामान्येनाह—

बं.	२२	२१	१७	१३	९	५	४	३	२	१	०
स.	३	२	५	५	५	६	७	४	४	४	४

तानि विशेषेणाह—

आद्यमाद्ये त्रयं बंधे द्वितीये चाष्टविंशतिः ।
त्रिषु विंशतिरुक्ताष्टचतुस्त्रिद्व्येकसंयुता ॥ ४३२ ॥

पंचबंधके—

एषाष्टचतुरेकाग्रा त्रिद्व्येकाग्राः मताः दश ।
पंचाग्राणि परे तानि चत्वार्येव ततः परम् ॥ ४३३ ॥
प्रत्येकं विंशतिर्युक्ता तत्राष्टचतुरेककैः ।
बंधकाबंधकेष्वग्रे चतुस्त्रिद्व्येकका: परे ॥ ४३४ ॥

द्वाविंशति बंधके सत्तास्थानानि २८।२७।२६। एकविंशति-बंधके २८ । सप्तदशत्रयोदशनवबंधकेषु २८।२४।२३।२२।२१ पंचबंधके २८।२४।२१।१३।१२।११। चतुर्बंधके २८।२४।२१ १३।१२।११।५। त्रिबंधके २८।२४।२१।४। द्विबंधके २८।२४। २१।३। एकबंधके २८।२४।२१।२। अबंधके २८।२४।२१।१।

नामकर्म कथ्यते—

दश स्थानानि बंधेऽत्र मोहनीये नवोदये ।
सत्त्वे पंचदशाख्याय कथ्यन्ते नामकर्मणि ॥ ४३५ ॥
त्रिकपंचषडष्टाग्रा नवकाग्रा दशाधिका ।
एकादशाधिका ज्ञेया विंशतिर्नाम्नि चैककम् ॥ ४३६ ॥

नामनि बंधस्थानान्याह—२३।२५।२६।२८।२९।३०।३१।१।

एकं पंच त्रयं पंच श्वभ्रतिर्यङ्नृनाकिनाम् ।
क्रमतो गतियुक्तानि बंधस्थानानि नामनि ॥ ४३७ ॥
१ । ५ । ३ । ५ ।

हुंडं श्वभ्रद्वयं निर्मित्कार्मणं सुभगास्थिरे ।
अयशोऽसन्नभोरीतिस्तैजसं दुःस्वराशुभे ॥ ४३८ ॥
त्रसाद्यगुरुलघ्वादिवर्णादीनां चतुष्टयम् ।
पंचेन्द्रियमनादेयं द्वयं वैक्रियिकाह्वयम् ॥ ४३९ ॥
इत्यष्टाविंशतिस्थानमेकं मिथ्यात्ववासिताः ।
सश्वभ्रगतिपंचाक्षपूर्णं बध्नंति जन्तवः ॥ ४४० ॥

२८। स्थानं १। भंगाः ११। नरकगत्या सह वृत्तिविरोधादेकाक्षविकलाक्षजातिसंहननानि नात्र बध्यन्ते ।

एकत्रिंशद्वियुक्तैकद्विकपंचषडष्टकैः ।
पंच स्थानानि जायंते तिर्यग्गत्यामिति स्फुटम् ॥ ४४१ ॥

३०।२९।२६।२५।२३।

एकं संस्थानषट्कस्य षट्कस्यैकं च संहतेः ।
षण्णां स्थिरादियुग्मानामेकैकं कर्म तैजसम् ॥ ४४२ ॥
नभोगतियुगस्यैकं निर्मिदौदारिकद्वयम् ।
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ॥ ४४३ ॥
तिर्यग्द्वितयमुद्योतं पंचाक्षं त्रिंशदादिमा ।
पर्याप्तोद्योतपंचाक्ष तिर्यग्गतिसमन्विता ॥ ४४४ ॥
मिथ्यादृष्टिभिरेषात्र बध्यते सासनैरपि ।
द्वितीय त्रिंशदेषैव व्यन्त्यसंस्थानसंहतिः ॥ ४४५ ॥

तत्र प्रथमत्रिंशति संस्थानषट्कसंहननषट्कनभोरीतियुग्मस्थिरादियुग्मषट्कानां ६।६।२।२।२।२।२।२।२। परस्पराभ्यासे भंगाः ४६०८ पुनरुक्तत्वान्न गृह्यन्ते ।

हुंडमौदारिकद्वन्द्वं तेजोऽसंप्राप्तदुर्भगे ।
त्रसाद्यगुरुलघ्वादिवर्णादीनां चतुष्टयम् ॥ ४४६ ॥

यशः स्थिरशुभद्वन्द्वत्रितयैकतरत्रयम् ।
निर्मिद्विकलजात्येकमुद्योतासन्नभोगती ॥ ४४७ ॥
तिर्यग्द्वयमनादेयं कार्मणं दुःस्वरं त्विमाम् ।
तृतीयां त्रिंशतिं मिथ्यादृष्टिर्बध्नाति दुष्टधीः ॥ ४४८ ॥
विकलेन्द्रियपर्याप्ततिर्यग्गातिभिरान्विताम् ।
अत्रान्योन्याहतैर्भंगा जातित्रययुगत्रयैः ॥ ४४९ ॥
संस्थानं विकलाक्षाणां हुंडं भवति सर्वदा ।
जातिस्वभावतस्तेषां दुःस्वरं बंधपाकयोः ॥ ४५० ॥
३ । २ । २ । २ । भंगाः २४ ।
यथेति त्रिंशतिस्तिस्र एकोनत्रिंशतस्तथा ।
परं भेदोऽयमेतासु यदुद्योतो न बध्यते ॥ ४५१ ॥
४६०८ । २४ एते भंगाः राशौ न[1] गृह्यन्ते । सासनस्य ३२०० एते पूर्वोक्ता न गृह्यन्ते ।
पूर्वोक्तानादेये वर्णागुरुलघुचतुष्टयद्वितयम् ।
तिर्यग्द्वयमेकाक्षं तैजसमौदारिकं पूर्णम् ॥ ४५२ ॥
स्थिरशुभयशोयुगानामेकैकं दुर्भगाद्वयं स्थूलम् ।
स्थावरमुद्योतातपयोरेकं कार्मणं हुंडम् ॥ ४५३ ॥
निर्माणं षड्विंशतिरेतां बध्नाति वृद्धमिथ्यात्वः ।
पूर्णैकेन्द्रियतिर्यग्गतिवादरसंयुतां जीवः ॥ ४५४ ॥
एकेन्द्रियजीवानामष्टांगाभावतो यतो नास्ति ।
अंगोपांगं हुंडं संस्थानं जायते चैकम् ॥ ४५५ ॥

तस्मादातपोद्योतस्थिरास्थिरशुभाशुभयशोऽयशोयुगानां २। २।२।२। परस्पराभ्यासे भंगाः १६ । १

---

१ 'ख' पुस्तके "न" इत्यस्यपाठोनास्ति ।

उद्योतातपहीना षड्विंशतिमेकतरयुतां पूर्वाम् ।
प्रत्येकसूक्ष्मयुगयोः स्वीकुरुते पंचविंशतिं पूर्वः ॥ ४५६ ॥

मिथ्यादृष्टिर्भवनादीशानांताः सूक्ष्मं साधारणं न बध्नंति ।
अवरुध्यायशस्तस्मात्स्थिरयुग्मं ताड्यते शुभयुगेन । भंगाः ४।
स्थूलप्रत्येकास्थिरशुभयुग्मानां परस्पराभ्यासे ।
अयशःकीर्त्तिं श्रित्वा षोडश भंगाः प्रजायंते ॥ ४५७ ॥

चतुर्णां युगानां २ । २ । २ । २ । अन्योन्याभ्यासे भंगाः १६ । द्वये २० ।

अयशःकीर्त्युपघाते तेजोऽगुरुलघुहुंडास्थिरे त्रसापूर्णे ।
वर्णचतुष्कं स्थूलं निर्मित्तिर्यग्द्वयमनादेयम् ॥ ४५८ ॥
प्रत्येकमसंप्राप्तं दुर्भगमौदारिकद्वयं परं कर्म ।
विकलेन्द्रियपंचेंद्रियजात्येकतरमशुभं ज्ञेयम् ॥ ४५९ ॥
साऽपूर्णत्रसतिर्यग्गातिमेतां पंचविंशतिं जीवः ।
बध्नाति वामदृष्टिर्भंगचतुष्टययुतामन्याम् ॥ ४६० ॥

यतोऽत्र परघातोच्छ्वासदुःस्वरविहायोगतीनामपर्याप्तेन सह बंधो नास्ति विरोधादपर्याप्तकाले तेषामुदयाभावाच्च । ततश्चत्वारो जातिभंगाः ४ ।

त्रयोविंशतिरेकाक्षं तिर्यग्द्वितयानिर्मिती ।
दुर्भगागुरुलघ्वाह्वे तेज औदारिके शुभम् ॥ ४६१ ॥
अयशःकीर्त्तिरेकैकं स्थूलप्रत्येकयुग्मयोः ।
उपघातमनादेयमपर्याप्तकदुर्भगे ॥ ४६२ ॥
वर्णचतुष्कं हुंडं स्थावरमथ कार्मणं समिथ्यात्वैः ।
तिर्यग्गत्येकाक्षाऽपूर्णयुता बध्यते दीनैः ॥ ४६३ ॥

अत्र संहननबंधो नास्ति एकेन्द्रियेषु संहननोदयाभावात् । अत्र बादरप्रत्येकयुग्मयोरन्योन्याभ्यासे चत्वारो भंगाः ४ ।

इति तिर्यग्गतिगताः सर्वे भंगाः ९३०८ ।

विंशतिर्दशाभिर्युक्ता नवाभिः पंचभिः क्रमात् ।
बंधस्थानानि जायंते नृगत्यां त्रीणि नामनि ॥ ४६४ ॥

३० । २९ । २९ ।

त्रिंशदेषात्र पंचाक्षं नृद्वयौदारिकद्वये ।
सुस्वरं सुभगादेये पूर्वे संस्थानसंहती ॥ ४६५ ॥
शुभस्थिरयशोयुग्मेष्वेकैकं सन्नभोगतिः ।
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ॥ ४६६ ॥
तीर्थकृत्कार्मणं तेजो निर्मिद्बध्नात्यसंयतः ।
एतां नृगतिपंचाक्षपूर्णतीर्थकरैर्युताम् ॥ ४६७ ॥

३० । अत्र दुर्भगदुःस्वरानादेयानां तीर्थकरसम्यक्त्वाभ्यां सह विरोधान्न बंधः सुभगसुस्वरादेयानामेव बंधो यतः, ततस्त्रयाणां युगानां २ । २ । २ । परस्पराभ्यासे भंगाः ८ ।

मानवगत्यादियुतामेकोनत्रिंशतं निबध्नीतः ।
हीनां त्रिंशतमेतां तीर्थकृता मिश्रसद्दृष्टी ॥ ४६८ ॥

२९ । अत्राष्टौ भंगाः पुनरुक्तत्वान्न गृह्यन्ते ८ ।

संहतिसंस्थानानां षण्णामेकतरसंयुतामेताम् ।
आदेयसुस्वरसुभगद्वंद्वानामेकतरयुक्ताम् ॥ ४६९ ॥
बध्नाति वामदृष्टिः षट्कद्वययुग्मषट्कोपेताम् ।
सगगनगतियुग्मैकामेकोनत्रिंशतं जीवः ॥ ४७० ॥

अत्रैषां ६।६।२।२।२।२।२।२।२। परस्परबधे भंगाः ४६०८ ।

तृतीयामपि बध्नाति द्वितीयामिव सासनः ।
व्यन्त्यसंहतिसंस्थानां शेषैकतरसंयुताम् ॥ ४७१ ॥

५।८।२।२।२।२।२।२।२। परस्पराभ्यासे भंगाः ३२०० ।

एते पूर्वप्रविष्टत्वान्न गृह्यन्ते ।

पंचविंशतिरुद्दिष्टा कार्मणं मानुषद्वयम् ।
तेजो हुंडमसंप्राप्तं पंचाक्षौदारिकद्वये ॥ ४७२ ॥
अपूर्णागुरुलघ्वाद्व स्थूलं प्रत्येकदुर्भगे ।
उपघातमनादेयं निर्माणमयशोऽशुभम् ॥ ४७३ ॥
त्रसमस्थिरकं वर्णचतुष्टयमिमामसौ ।
गृह्णात्यपूर्णपंचाक्षमनुष्यगतिसंयुताम् ॥ ४७४ ॥

अत्र संक्लशतो बध्यमानेनापर्याप्तेन सह स्थिरादीनां विशुद्धिप्रकृतीनां बंधाभावादेको भंगः १। नृगतौ सर्वे भंगाः ४६१७

इति नृगतिगताः सर्वे भंगाः समाप्ताः ।

एकद्वित्रिचतुस्त्यागे क्रमात् द्वात्रिंशतः स्फुटम् ।
चत्वारि देवगत्यां स्युरेकं निर्गातिपंचकम् ॥ ४७५ ॥

३१ । ३० । २९ । २८ । १ ।

एकत्रिंशादियं तत्र कार्मणां त्रिदशद्वयम् ।
पंचाक्षमाद्यसंस्थानं तेजोवैक्रियिकद्वयम् ॥ ४७६ ॥
वर्णाद्यगुरुलघ्वादित्रसादीनां चतुष्टयम् ।
सुस्वरं सन्नभोरीतिः शुभमाहारकद्वयम् ॥ ४७७ ॥
सुभगं यश आदेयं निर्मित्तीर्थकरस्थिरे ।
बध्यते सप्तमापूर्वैः पूर्णपंचेन्द्रियान्विता ॥ ४७८ ॥
देवेत्याहारकद्वन्द्वतीर्थकारित्वसंयुता ।
संहतिर्बध्यते नात्र तस्या देवेष्वभावतः ॥ ४७९ ॥

भंगः १ ।

एकात्रिंशदियं त्रिंशदुक्ता तीर्थकरोचिता ।
बध्यते निःप्रमादेन साऽपूर्वकरणेन च ॥ ४८० ॥

अत्र यतोऽस्थिरादीनां बंधो नास्ति विशुद्धया सह बंधविरोधात् । ततो भंगौ २ ।

आहारकद्वयत्यागे मतैकत्रिंशतो बुधैः ।
एकोनत्रिंशदाद्यासौ बध्यते सप्तमाष्टमैः ॥ ४८१ ॥

अत्र भंगः पुनरुक्तः २ । एकोनत्रिंशदियं त्रिभिरव्रतपूर्वकैः समाचर्या[1], स्थिरशुभयशोयुगानामेकतरेणान्विताऽन्यास्ति । अत्र देवगत्या सहद्योतो न बध्यते तस्यां तस्योदयो नास्ति, तिर्यग्गतिं मुक्त्वाऽन्यगत्या सह तस्य बंधविरोधाच्च । देहदीप्तिस्तु देवानां वर्णनामकर्मोदयात् । अत्र त्रयाणां युगानां २ । २ । २ । परस्परबधे[2] भंगाः ८ ।

एकत्रिंशदपास्ते तीर्थकराहारकद्वन्द्वे ।
अष्टाविंशतिराद्या स्वीकार्या सप्तमाष्टमकैः ॥ ४८२ ॥
एकोनत्रिंशतोऽपास्ते तीर्थकृत्वे प्रबध्यते ।
अष्टाविंशतिरन्यासौ सर्वदा षड्भिरादिमैः ॥ ४८३ ॥

कुतो यतोऽप्रमादादीनामस्थिराशुभायशसां बंधो नास्ति भंगा ८ । सर्वे देवेषु भंगाः १९ ।

अपूर्वाख्यानिवृत्त्याख्यसूक्ष्मलोभाह्वयास्त्रयः ।
एकं यशो निबध्नंति न परं नामकर्माणि ॥ ४८४ ॥
मिलितानामशेषाणां पंचपंचाशता विना ।
चतुर्दशसहस्राणि विकल्पाः संति नामनि ॥ ४८५ ॥

---

१ 'उपार्जनीया' इत्यपि पाठः । २ गुणने ।

१३९४५ ।

नाम्न उदयस्थानानि कथ्यन्ते—

अत्रैकविंशतेः पाके चतुर्विंशातिरिष्यते ।
सैकाद्वित्रिचतुः पंचषट्सप्ताग्रा नवाष्ट च ॥ ४८६ ॥

२१।२४।२५।२६।२७।२८।२९।३०।३१।९।८।

तत्रैकपंचसप्ताष्टनवाग्रा विंशतिः क्रमात् ।
पाकस्थानानि जायंते पंच श्वाभ्रगताविति ॥ ४८७ ॥

२१।२५।२७।२८।२९ ।

एकविंशतिमत्रेदं कार्मणं नारकद्वयम् ।
पर्याप्तागुरुलघ्वाह्वे तेजोवर्णचतुष्टयम् ॥ ४८८ ॥
पंचेन्द्रियमनादेयमयशो दुर्भगं त्रसम् ।
स्थूलं शुभास्थिरद्वन्द्वे निर्माणमिति भाषितम् ॥ ४८९ ॥
विग्रहर्त्तिमुपेतस्य नारकस्योदयस्य च ।
एको जघन्यतो ज्ञेयः समयौ द्वौ प्रकर्षतः ॥ ४९० ॥

२ । भंगः १ ।

त्यक्तश्वभ्रानुपूर्वीकं तद्युक्तं पांचविंशतम् ।
प्रत्येकांगोपघाताख्यहुंडवैक्रियिकद्वयैः ॥ ४९१ ॥
इदमात्तशरीरस्य ज्ञेयं श्वाभ्रस्य पूर्णताम् ।
यावच्छरीरपर्याप्तिर्गच्छंत्यतर्मुहूर्त्तिकी ॥ ४९२ ॥

२५ । भंगः १ ।

नास्त्यत्र संहतेः पाको देवनारकयोर्यतः ।
न तस्यां जायते बंधः कदाचन निसर्गतः ॥ ४९३ ॥
असद्गत्यन्यघाताभ्यां तद्युक्तं सप्तविंशतम् ।
पूर्णांगस्यानपर्याप्तिं यावत्कालोऽस्य जायते ॥ ४९४ ॥

२७ । भंगः १ ।

तदष्टविंशतं युक्ते स्यादुच्छ्वासेन पूर्णताम् ।
यावद्वचनपर्याप्तेः कालोऽस्यांतर्मुहूर्त्तकम् ॥ ४९५ ॥

२८ । भंगौ २ ।

एकोनत्रिंशतं युक्तं दुःस्वरेण तदिष्यते ।
एकैको जायते भंगः स्थानानामिति पंचके ॥ ४९६ ॥

२९ । भंगाः १ । सर्वे भंगाः ५ ।

दशवर्षसहस्राणि कालस्तस्य जघन्यकः ।
प्रकृष्टस्तु त्रयस्त्रिंशत्सागराः विनिवेदिताः ॥ ४९७ ॥

अन्तर्मुहूर्त्तोनं कालद्वयं ज्ञेयम् ।

इति श्वभ्रगतिः समाप्ता ।

एकविंशतिरुक्ता च चतुरादियुता च सा ।
एकत्रिंशत्पर्यन्तास्तिर्यग्गत्यां नवोदयाः ॥ ४९८ ॥

२१।२४।२५।२६।२७। ८।२९।३०।३१।

उद्योतस्योदयस्त्यक्त्वा तेजः पवनकायिकौ ।
स्थूलेष्वन्येषु सर्वेषु पूर्णेष्वस्ति त्रसेषु च ॥ ४९९ ॥

आतपस्योदयः पूर्णे वादरे क्षितिकायिके ।
सामान्यैकेन्द्रियस्योक्तं प्रथमं स्थानपंचकम् ॥ ५०० ॥

२१ । २४ । २५ । २६ । २७ ।

आतपोद्योतपाकेन सप्तविंशतिवर्जितम् ।
सामान्यैकेंद्रिये ज्ञेयमाद्यंपाकचतुष्टयम् ॥ ५०१ ॥

२१ । २४ । २५ । २६ ।

इति पाकचतुष्टयम् ।

अस्त्येकविंशतं स्थानं निरुद्योतातपोदयम् ।
कार्मणागुरुलघ्वाद्वे तिर्यग्द्वितयतैजसे ॥ ५०२ ॥

वर्णगन्धरसस्पर्शा निर्मितिस्थिरशुभद्वये ।
स्थूलपूर्णयशोयुग्मत्रितयैकतरत्रयम् ॥ ५०३ ॥
एकेन्द्रियमनादेयं स्थावरं दुर्भगं परम् ।
विग्रहर्त्ताविदं स्थानमेकद्वित्रिक्षणस्थिति ॥ २१ । ५०४ ॥
सूक्ष्मसाधारणापूर्णैः सार्धं नोदेति यद्यशः ।
एकोऽस्तोऽस्ति यशः पाके भंगोऽन्यत्र चतुष्टयम् ॥ ५०५ ॥

अत्रायशःपाके वादरपर्याप्तयुग्मयोरन्योन्याभ्यासे भंगाः ४ । यशःपाके भंगः १ । मिलिता भंगाः ५ ।

अतिर्यगानुपूर्वीकं चातुर्विंशतमस्त्यदः ।
स्थानमौदारिके हुंडे प्रत्येकयुगलैकके ॥ ५०६ ॥
उपघाते च निक्षिप्ते गृहीतांगस्य पूर्णता ।
यावच्छरीरपर्याप्तेरत्र भंगाः नवेरिताः ॥ २४ । ५०७ ॥

अत्रायशःपाके स्थूलपर्याप्तप्रत्येकयुग्मानामन्योन्याभ्यासे भंगाः ८ । यशःपाके भंगः १ । यतो यशःपाकेन सार्धं सूक्ष्मापर्याप्तसाधारणानामुदयो नास्ति । सर्वे भंगाः ९ ।

सान्यघातमपूर्णोनमस्तीदं पांचविशतम् ।
यावदुच्छ्वासपर्याप्तिस्तावत्कालोऽस्य भाषितः ॥ २५ । ५०८ ॥
भंगाः परस्पराभ्यासे स्थूलप्रत्येकयुग्मयोः ।
चत्वारोऽत्रायशःपाके परत्रैकोऽभिधीयते ॥ ५०९ ॥

अयशःपाके ४ । यशः पाके १ । मिलिताः ५ ।

सोच्छ्वासमानपर्याप्ताविदं षाड्विंशतं मतम् ।
अस्य वर्षसहस्राणि स्थितिर्द्वाविंशतिः परा ॥ ५१० ॥

२६ । भंगाः ५ स्थितिः २२००० । सर्वे भंगाः २४ ।

पांचविंशतमस्त्यस्य शेषं स्थानचतुष्टयम् ।
पंचकैकेंद्रियोक्तं यत्तदुद्योतातपोदये ॥ ५११ ॥
२१ । २४ । २६ । २७ ।
एकाग्रचतुरग्रे द्वे विंशती पूर्विके विना ।
सूक्ष्मसाधारणापूर्णैः सत्युद्योतातपोदये ॥ ५१२ ॥

२१ । २४ । तत्र सूक्ष्मपर्याप्तोनैकाविंशतिः २१ । साधारणोना चतुर्विंशतिः २४ । अत्रातपोद्योतोदयभागिनां सूक्ष्मापर्याप्तसाधारणशरीरोदयाभावाद्यशोयुग्मस्यैकतरभंगौ द्वौ द्वौ पुनरुक्तौ २ । २ ।

परघातातपोद्योतद्वितयैकतरान्वितम् ।
इदं षाड्विंशतं स्थानं पर्याप्तांगस्य जायते ॥ २६ । ५१३ ॥
अस्योत्कृष्टा जघन्या च स्थितिरन्तर्मुहूर्त्तकम् ।
भंगाः ४ ।
सोच्छ्वासमानपर्याप्तावस्तीदं साप्तविंशतम् ।
ज्ञेयंजीवितपर्यन्तं सविकल्वं चतुष्टयम् ॥ ५१४ ॥

अस्य स्थितिः परा द्वाविंशतिवर्षसहस्राणि २२००० । भंगाः ४ । एकेन्द्रियस्य सर्वे भंगाः ३२ ।

ज्ञेयैकविंशतिः पाके सामान्ये त्रिकलेन्द्रिये ।
सा क्रमात्पंच सप्ताष्टयुक्ता नवदशाधिका ॥ ५१५ ॥

विकलाक्षस्य षट् पाकस्थानानि २१।२६।२८।२९।३०।३१

विनैकत्रिंशतं पंच निरुद्योतोदये सति ।
तान्युद्योतोदयालीढे तत्राष्टाविंशतं विना ॥ ५१६ ॥

निरुद्योतोदये विकले २१।२६।२८।२९।३०। उद्योतोदययुक्ते विकले २१।२६।२९।३०।३१।

तत्रैकाविंशतं द्व्यक्षे निरुद्योतोदये सति ।
त्रसं तिर्यग्द्वयं द्व्यक्षं तेजः स्थिरशुभद्वये ॥ ५१७ ॥
कार्मणागुरुलघ्वाह्व स्थूलं वर्णचतुष्टयम् ।
अनादेयं यशः पूर्णद्वितयैकतरद्विकम् ॥ ५१८ ॥
निर्माणं दुर्भगं वक्रीतौ द्व्येकक्षणस्थितिः ।
एको भंगो यशः पाके द्वौ परत्रात्र भाषितौ ॥ ५१९ ॥

१ । २ । अत्रापर्याप्तोदयाभावाद्यशःकीर्त्त्युदये सत्येको भंगः १ । पर्याप्तापर्याप्तोदयसद्भावादयशःकीर्त्त्युदये द्वौ भंगौ २ । मिलिताः ३ ।

प्रत्येकौदारिकयुगहुंडासंप्राप्तकोपघातयुतम् ।
षाड्विंशतमानुपूर्वीरहितं स्वीकृतशरीरस्य ॥ ५२० ॥
अन्तर्मुहूर्त्तकालं कायग्रहणक्षणादिदमाद्यात् ।
भंगत्रितयोपेतं शरीरपरिपूर्णतां यावत् ॥ ५२१ ॥

२६ । भंगाः ३ ।

अष्टाविंशतमिष्टं परघातासन्नभोगतिसमेतम् ।
व्यपनीतापूर्णमिदं पूर्णांगे भंगयुगयुक्तम् ॥ ५२२ ॥

२८ । यशःपाके भंगः १ । प्रतिपक्षप्रकृत्युदयाभावादयशःपाकेप्येको भंगः १ । मिलितौ २ ।

पूर्णोच्छ्वासस्य सोच्छ्वासमेकोनत्रिंशतं स्मृतम् ।
भाषापर्याप्तिपर्यन्तमिदं भंगद्वयान्वितम् ॥ ५२३ ॥

२९ । भंगौ २ ।

इदंवचनपर्याप्तौ त्रिंशतं जीविताबधि ।
स्थानं भंगद्वयोपेतं सुदुःस्वरमुदाहृतम् ॥ ५२४ ॥

---

१ अत्रैकमात्रान्यूनता ।

स्थितिरस्य परा द्वादश वर्षाणि, अपराऽन्तर्मुहूर्त्तः । ३० । भंगौ २ ।

एकाग्रा च षडग्रा च विंशती द्वीन्द्रिये मते ।
अपूर्णरहिते पूर्वे प्राप्तोद्योतोदये सति ॥ ५२५ ॥

२१ । २६ । अत्र भंगाः पुनरुक्ताः २ । २ ।

सोद्योतासन्नभोरीती परघातं द्विभंगकम् ।
स्यात्षड्विंशतमेकोनत्रिंशतं पूर्णविग्रहे ॥ ५२६ ॥

२९ । भंगौ २ ।

सोच्छ्वासमानपर्याप्तौ त्रैशतं तद्द्विभेदकम् ।
भाषापर्याप्तिपर्यन्तः कालोऽस्यान्तर्मुहूर्त्तकः ॥ ५२७ ॥

३० । भंगौ २ ।

एकत्रिंशतमुद्दिष्टं वाक्पर्याप्तौ सुदुःस्वरम् ।
द्विभेदं स्थितिरस्योक्ता परा द्वादशवार्षिकी ॥ ५२८ ॥

३१ । भंगौ २ । सर्वे भंगाः १८ ।

अष्टादश मता भंगा द्वीन्द्रियस्येति पिंडिताः ।
तस्यैव स्थानभंगादि ज्ञेयं त्रिचतुरक्षयोः ॥ ५२९ ॥
त्रीन्द्रिये त्रिशतः कालस्तथैकत्रिंशतः परः ।
दिनान्येकोनपंचाशत्षण्मासाश्चतुरिन्द्रिये ॥ ५३० ॥

तत्र त्रीन्द्रियस्य निरुद्योतसोद्योतपाकयोः ३० । ३१ । स्थितिदिवसाः ४९ । सर्वे भंगाः १८ ॥ चतुरिन्द्रिये पूर्वस्थानयोः ३० । ३१ । स्थितिमासाः ६ । सर्वे भंगा १८ । एवं विकलेन्द्रिये सर्वे भंगाः ५४ ।

पाकास्तिरश्चि पंचाक्षे षडोघादेकविंशतिः ।
क्रमात्षड्विंशतिर्द्वित्रिचतुःपंचयुता च सा ॥ ५३१ ॥

२१।२६।२८।२९।३०।३१।

तान्यनुद्योतपाकस्य संत्येकत्रिंशतं विना ।
उद्योतपाकयुक्तस्य संत्यष्टविंशतं विना ॥ ५३२ ॥

उद्योतोदयरहिते पंचेंद्रिये २१।२६।२८।२९।३०। उद्योतोदयसहिते २१।२६।२९।३०।३१।

अनुद्योतोदयस्येदं पंचाक्षस्यैकविंशतम् ।
तिर्यग्द्वितयपंचाक्षे तेजोगुरुलघुत्रसम् ॥ ५३३ ॥
पर्याप्तसुभगादेययशः कीर्त्तिद्विकैककम् ।
निर्माणं कार्मणं स्थूलं वर्णानां च चतुष्टयम् ॥ ५३४ ॥
शुभस्थिरद्वये भंगा एकद्वित्रिक्षणस्थितौ ।
वक्रत्तौ पूर्णपाकेऽष्टावेकेऽन्यत्रोभये नव ॥ ५३५ ॥

अत्र पूर्णोदये भंगाः ८ । सुभगादेययशःकीर्त्तिभिः सहापूर्णोदयाभावादपूर्णोदये भंगाः १ । सर्वे ९ ।

इदं त्यक्त्वाऽऽनुपूर्वीकं स्थानं षाड्विंशतं स्मृतम् ।
क्षिप्ते संस्थानसंहत्योरेकत्रौदारिकाद्विके ॥ ५३६ ॥
प्रत्येक उपघाते च स्वीकृतांगस्य देहिनः ।
आनपर्याप्तिपर्यन्ता स्थितिरन्तर्मुहूर्त्तिकी ॥ ५३७ ॥
अस्य पूर्णोदये भंगा द्वादशोनं शतत्रयम् ।
एकोऽपूर्णोदये ज्ञेयो भंगमार्गविचक्षणैः ॥ २६ । ५३८ ॥

अत्र पूर्णोदये संस्थानषट्कसंहतिषट्कयुग्मत्रयाणां ६।६।२।२।२। परस्पराभ्यासे भंगाः २८८ । शुभैः सहापूर्णोदयस्याभावादपूर्णोदये भंगाः १ ।

उक्तं च—

असंप्राप्तमनादेयमयशो हुंडदुर्भगे ।
अपूर्णेन सहोदयंति (१) पूर्णेन तु सहेतराः ॥ ५३९ ॥
सर्वे २८९ ।
पूर्णाङ्गस्य गतापूर्णमाष्टाविंशतमीरितम् ।
परघातनभोरीतियुगलैकतरान्वितम् ॥ ५४० ॥
भंगानां षट्शतीस्याच्चचतुर्विंशतिं विना ।
जघन्या च प्रकृष्टा च स्थितिरान्तर्मुहूर्त्तिकी ॥ ५४१ ॥

२८ । एते पूर्वोक्ताः २८८ । नभोरीतियुगहता भंगाः ५७६
सोच्छ्वासमानपर्याप्तावेकोनत्रिंशतं मतम् ।
अत्र दक्षैर्विबोद्धव्याः स्थातिभंगाः पुरातनाः ॥ ५४२ ॥
२९ । भंगाः ५७६ ।
त्रैशतं पूर्णभाषस्य स्वरैकतरसंयुतम् ।
अत्र द्विगुणिता भंगाः परा पल्यत्रयं स्थितिः ॥ ५४३ ॥

३० । भंगाः पूर्वोक्ताः ५७६ । स्वरयुगलाहताः ११५२ ।
इत्थमुद्योतोदयरहिते पंचाक्षे भंगाः सर्वे, एवं २६०२ ।
प्राप्तोद्योतोदये एकषडग्रे विंशती बुधैः ।
पंचेंद्रिये मते पूर्वे त्यक्तापूर्णोदये परम् ॥ ५४४ ॥

२१।२६ अत्र भंगाः पुनरुक्ताः ८ । २८८ ।
स्थानं षाड्विंशतं ज्ञेयमेकोनात्रिंशतं बुधैः ।
पूर्णांगस्य खरीत्यन्यतरोद्योतान्यघातयुक् ॥ ५४५ ॥
शतानि पंच भंगानां षट्सप्तत्या समं स्फुटम् ।
प्रकृष्टोऽस्य जघन्यश्च कालोऽवाच्यंतर्मुहूर्त्तकः ॥ ५४६ ॥

---

१ नभोगति २ अत्रैकाक्षराधिक्यम् ।

२९ । भंगाः ५७६ ।

आनपर्याप्तिपर्याप्ते सोच्छ्वासं त्रैशतं स्मृतम् ।
कालभंगा विबोद्धव्याः सूरिभिः पूर्वभाषिताः ॥ ५४७ ॥

३० । भंगाः ५७६ ।

तत्स्वरैकतराश्लिष्टमेकात्रिंशतमीरितम् ।
द्विघ्ना भंगा वचःपूर्णे पल्यानां त्रितयं स्थितिः ॥ ५४८ ॥

३१ । भंगाः ११५२ ।

इत्थं सोद्योतोदये पंचाक्षे भंगाः सर्वे २३०४ । उद्योतरहि-पंचाक्षे २६०२ । एवे पंचेन्द्रिये सर्वे भंगाः ४९०६ ।

सहस्राः पंच भंगानामष्टहीना निवेदिताः ।
तिर्यग्गतौ समस्तानां पिंडितानां पुरातनैः ॥ ५४९ ॥

सर्वे तिर्यग्गतौ भंगाः ४९९२ ।

एवं तिर्यग्गतिः समाप्ता ।

पाका मनुष्यगत्याऽमा समस्ता मर्त्यजन्मनाम् ।
चतुर्विंशतिपाकोनदशशेषाः पुरोदिताः ॥ ५५० ॥

२१।२५।२६।२७।२८।२९।३०।३१।९।८।

यानि स्थानानि तिर्यक्षु निरुद्योतेषु पंच वै ।
पंचेंद्रियेषु मर्त्यानां तानि सामान्यभागिनाम् ॥ ५५१ ॥

२१।२६।२८।२९।३०।

अत्र तिर्यग्द्वयस्थाने भणनीयं नरद्वयम् ।
भंगास्तद्वन्मता द्व्यग्रषड्विंशतिशतप्रमाः ॥ २६०२ । ५५२ ॥

यद्यपि पूर्वमुक्तास्ते तथापि सुखार्थमुच्यन्ते—

तत्रैकाविंशतं तीर्थकृत्त्वाहारकोज्झिते ।
पंचेन्द्रियं नरद्वन्द्वं तेजोऽगुरुलघुत्रसम् ॥ ५५३ ॥
निर्माणं सुभगादेययशः पर्याप्तनामसु ।
युगेष्वेकतरं वर्णचतुष्कं स्थूलकार्मणे ॥ ५५४ ॥
शुभस्थिरद्वये भंगा एकाद्वित्रिक्षणास्थितौ ।
वक्रत्तौ पूर्णपाकेऽष्टावेकोऽन्यत्रोभये नव ॥ ५५५ ॥
२१ । पूर्णपाके भंगाः ८ । अपूर्णपाके १ । उभये ९ ।
प्रत्येकौदारिकद्वन्द्वोपघातसहितं स्मृतम् ।
तत्संस्थानस्य संहत्याः षट्कस्यैकतरेण च ॥ ५५६ ॥
स्थानं षड्विंशतं दक्षैरात्तदेहस्य देहिनः ।
निराकृतानुपूर्वीकं यावद्देहस्य पूर्णताम् ॥ ५५७ ॥
पर्याप्तस्योदये भंगा द्वादशोनं शतत्रयम् ।
एकोऽन्यस्योदये कालः कथितोऽन्तर्मुहूर्त्तकः ॥ ५५८ ॥
पर्याप्तोदये भंगाः २८८ । अपर्याप्तोदये १ । सर्वे २८९ ।
तदाष्टाविंशतं प्रोक्तमपर्याप्तविवर्जितम् ।
परघातखगत्येकतरयुक्तं शरीरिणः ॥ ५५९ ॥
शतानि पंच भंगानां षट्सप्तत्या सह स्फुटम् ।
पर्याप्तांगस्य निर्दिष्टः कालोऽत्रान्तर्मुहूर्त्तकः ॥ ५६० ॥
२८ । भंगाः ५७६ ।
सोच्छ्वासमानपर्याप्तावेकोनात्रिंशतं मतम् ।
बुधैरत्राववोद्धव्याः स्थितिभंगाः पुरातनाः ॥ ५६१ ॥
२९ । भंगाः ५७६ ।
स्वरैकतरसंयुक्तं वाक्पूर्णे त्रिंशतं मतम् ।
अत्र द्विसाहिवा भंगाः परा पल्यत्रयं स्थितिः ॥ ५६२ ॥

३० । भंगाः ११५२ । सर्वे मिलिताः २६०२ ।

आहारकोदयालीढे विशेष्टे नरनामनि ।
उदये पंचसप्ताष्टनवाग्रा विंशतिर्मता ॥ ५६३ ॥

२५ । २७ । २८ । २९ ।

पांचविंशतमत्रेदं नृगत्याहारकद्विके ।
कार्मणं सुभगादेये तेजो वर्णचतुष्टयम् ॥ ५६४ ॥
चतुरस्रोपघाताख्ये निर्मित्त्रसचतुष्टयम् ।
पंचाक्षागुरुलघ्वाह्वे शुभस्थिरयुगे यशः ॥ ५६५ ॥
आहारकोदयेस्तीदं यावत्तद्देहपूर्णताम् ।
ससद्गत्यन्यघातं तत्पूर्णांगे साप्तविंशतम् ॥ ५६६ ॥

२५ । भंगाः १ । २७ । भंगः १ ।

पूर्णोच्छ्वासस्य सोच्छ्वासमष्टविंशतमस्त्यदः ।
एको भंगोऽत्र कालस्तु विज्ञेयोऽन्तर्मुहूर्त्तकः ॥ ५६७ ॥

२९ । भंगः १ ।

एकोनात्रिंशतं स्थानं पूर्णेऽवाचि ससुस्वरम् ।
कालभंगौ मतौ पूर्वावैक्ये भंगचतुष्टयम् ॥ ५६८ ॥

२९ भंगौ २ । विशेषमनुष्ये भंगाश्चत्वारः ४ ।

तत्रैकत्रिंशतं ज्ञेयं योगिनस्तीर्थकारिणः ।
आद्ये संहतिसंस्थाने नृगत्यौदारिकद्वये ॥ ५६९ ॥
पंचाक्षं कार्मणादेये तीर्थकृत्सुभगं यशः ।
वर्णाद्यगुरुलघ्वादि त्रसादीनां चतुष्टयम् ॥ ५७० ॥
निर्मिच्छुभस्थिरद्वन्द्वे तेजः सद्गतिसुस्वरे ।
पूर्वकोटी परा वर्षपृथक्त्वं त्वपरा स्थितिः ॥ ५७१ ॥

३१ । भंगः १ । अत्रोत्कृष्टा स्थितिरन्तर्मुहूर्त्ताधिकागर्भाद्यष्टवर्षहीना पूर्वकोटी, जघन्या वर्षपृथक्त्वम् ।

नृगतिः पूर्णमादेयं पंचाक्षं सुभगं यशः ।
त्रसस्थूलमयोगेऽष्टौ पाके तीर्थकृतो नव ॥ ५७२ ॥

पाके ८ । भंगः १ । तीर्थकृता युता ९ । भंगः १ । सर्वे केवलिनो भंगाः ३ ।

षड्विंशतिशतान्युक्त्वा नवाग्राणि नृणां गतौ ।
भंगानतः परं वक्ष्ये सयोगे पाकसप्तकम् ॥ ५७३ ॥

२६०९ ।

उदये विंशतिः सैकषट्सप्ताष्टनवाधिका ।
दशाग्रा चेति विज्ञेयं सयोगे स्थानसप्तकम् ॥ ५७४ ॥

२० । २१ । २६ । २७ । २८ । २९ । ३० ।

नृगतिः कार्मणं पूर्णं तेजोवर्णचतुष्टयम् ।
पंचाक्षा गुरुलघ्वाह्व शुभस्थिरयुगे यशः ॥ ५७५ ॥
सुभगं वादरादेये निर्मित्त्रसमिति स्फुटम् ।
उदयं विंशतिर्याति प्रतरे लोकपूरणे ॥ ५७६ ॥

२० । भंगः १ ।

तत्र प्रतरे समयः १ । लोकपूरणे १ । पुनः प्रतरे १ । इत्थं त्रयः समयाः ३ ।

आद्ये संहनने क्षिप्ते प्रत्येकौदादिकद्वये ।
उपघाताख्यसंस्थानषट्कैकतरयोरपि ॥ ५७७ ॥
षाड्विंशतमिदं स्थानं कपाटस्थस्य योगिनः ।
संस्थानैकतरैः षड्भिर्भंगषट्कमिहोदितम् ॥ ५७८ ॥

२६ । भंगाः ६ ।

परघातखगत्यन्यतराभ्यां सहितं मतम् ।
तदाष्टाविंशतं स्थानं योगिनो दंडयायिनः ॥ ५७९ ॥

२८ । अत्र द्वादश भंगाः १२ ।

तदुच्छ्वाससयुतं स्थानमेकोनत्रिंशतं स्मृतम् ।
आनपर्याप्तपर्याप्तेर्भंगाः पूर्वनिवेदिताः ॥ ५८० ॥

२९ । भंगाः १२ ।

त्रैशतं पूर्णभाषस्य स्वरैकतरसंयुतम् ।
चतुर्विंशतिरत्रोक्ता भंगा भंगविशारदैः ॥ ५८१ ॥

३० । भंगाः २४ ।

पृथक्तीर्थकृता योगे स्थानानां पंचकं परम् ।
प्रथमं तत्र संस्थानं प्रशस्तौ च गतिस्वरौ ॥ ५८२ ॥

इति तीर्थकृति सयोगे स्थानानि । २१ । २७ । २९ । ३० । ३१ । एकैकेन पंचसु भंगाः ५ । एवं सयोगभंगाः ६० ।

अत्रैकत्रिंशतं स्थानं पंचमं पूर्वभाषितम् ।
भंगो न पुनरुक्तत्वात्तदीयः परिगृह्यते ॥ ५८३ ॥

शेषाः ५९ । सहैतैस्ते पूर्वोदिताः २६०९ । एतावंतः २६६८ । इति सर्वे नृगतिभंगाः ।

एवं मनुष्यगतिः समाप्ता ।

अस्त्येकपंचसप्ताष्टनवाग्रा विंशतिः क्रमात् ।
नाम्नो दिवौकसां रीतावुदये स्थानपंचकम् ॥ ५८४ ॥

२१ । २५ । २७ । २८ । २९ ।

तत्रैकविंशतं पूर्वं देवद्वितयकार्मणे ।
स्थूलं शुभस्थिरद्वन्द्वे यशो वर्णचतुष्टयम् ॥ ५८५ ॥
पंचाक्षसुभगादेये तेजोऽगुरुलघुत्रसम् ।
निर्माणमिति वक्रत्तविकद्वित्रिक्षणस्थितिः ॥ ५८६ ॥
२१ । भंगः १ ।
तदपास्तानुपूर्वीकं पांचविंशतमन्वितम् ।
प्रत्येकचतुरस्रोपघातवैक्रियिकद्विकैः ॥ ५८७ ॥
इदं गृहीतदेहस्य यावद्देहस्य पूर्णताम् ।
एको भंगोऽस्य कालस्तु भवेदन्तर्मुहूर्त्तकः ॥ ५८८ ॥
२५ । भंगः १ ।
सत्खगत्यन्यघाताभ्यां तद्युक्तं साप्तविंशतम् ।
कालोऽप्यस्यांगपर्याप्तौ विज्ञेयोऽन्तर्मुहूर्त्तकः ॥ ५८९ ॥
२७ । भंगः १ ।
पर्याप्तानस्य सोच्छ्वासं तदाष्टविंशतं स्मृतम् ।
यावद्वचनपर्याप्तिस्तावत्कालोऽस्य भाषितः ॥ ५९० ॥
२८ । भंगः १ ।
एकोनत्रिंशतं भाषापर्याप्तौ तत्ससुस्वरम् ।
जीवितव्यावधिः कालो भंगानामेषु पंचकम् ॥ ५९१ ॥
२९ । भंगः १ । एकत्र ५ ।

---

१ तच्छिगिवीसं ठाणं देवदुगं तेज कम्म वण्णचदुं ।
अगुरुयलहुपंचिंदिय तस वारय पज्जत्तं ॥
थिरमथिरं सुभमसुभं सुहयं आदेज्जयं च सणिमिणं ।
विग्गहगई हिएए एक्कं वा दोव समयाणि ॥
(प्राकृतपंचसंग्रहात्)

भाषापर्याप्तिपर्याप्ते प्रथमात्क्षणतः स्थितिः ।
जीवितव्यावधिः प्रोक्ता कृतजीवितनिश्चयैः ॥ ५९२ ॥
दशवर्षसहस्राणि त्रयस्त्रिंशत्पयोधयः ।
अंतर्मुहूर्तहीने स्तस्ते जघन्याजघन्यके ॥ ५९३ ॥
सकलान्तर्मुहूर्त्तोना पूर्णभाषे स्थितिर्जिनैः ।
प्रोक्तोपपादिकेऽन्यत्र जघन्यांतर्मुहूर्त्तिकी ॥ ५९४ ॥

इति देवगतिः समाप्ता ।

सैकादशाः स्मृताः पाकाः षट्सप्ततिशतप्रमाः ।
एकोनषष्टिरन्यास्ति समुद्धातगते जिने ॥ ५९५ ॥
७६११ । समुद्धातगते नाम्नः पाका ५९ ।
त्रिद्व्येकसहिता सत्वे नवतिर्नवतिः परा ।
क्रमादष्टचतुर्द्व्यग्राऽशीतिः सा च निवेदिता ॥ ५९६ ॥
निरेकद्वित्रिकाशीतिर्नाम्नो दश नवापराः ।
सत्त्वस्थानानि विज्ञाय योज्यानीति त्रयोदश ॥ ५९७ ॥
९३।९२।९१।९०।८८।८४।८२।८०।७९।७८।७७।१०।९।
तत्र त्रिनवतिः सर्वास्तीर्थेशाहारकाद्विकैः ।
हीनाः स्थानत्रये कार्याः क्रमादेकद्विकत्रिभिः ॥ ५९८ ॥
आद्ये स्थाने ९३ । त्रिष्वतः स्थानेषु ९२।९१।९० ।
त्यक्ते देवद्वये श्वभ्रचतुष्के नृद्वये क्रमात् ।
नवतेर्नरतिर्यक्षु स्थानानां त्रितयं स्मृतम् ॥ ५९९ ॥
नरतिर्यक्षु ८८ । ८४ । तिर्यक्षु ८२ ।
तिर्यङ्नारकयोर्युग्मे एकाक्षं स्थावरातपौ ।
विकलत्रिकमुद्योतं सूक्ष्मं साधारणाह्वयम् ॥ ६०० ॥

आद्याच्चतुष्कतस्त्यक्त्वा क्रमादेतास्त्रयोदश ।
अनिवृत्यादिषु ज्ञेयमशीत्यादिचतुष्टयम् ॥ ६०१ ॥

अनिवृत्त्यादिषु पंचसु ८० । ७९ । ७८ । ७७ ।

पूर्णं सुभगमादेयं पंचेंद्रियनरद्वये ।
त्रसं स्थूलं यशस्तीर्थकृन्निर्योगे दश स्मृताः ॥ ६०२ ॥

अयोगे तीर्थकरे १० । तीर्थकरोनाः परत्र ९ ।

चत्वार्यसंयताद्येषु प्रथमान्यष्टसु स्फुटम् ।
सत्त्वे मिथ्यादृशः षट्कं द्वानवत्यादिकं विदुः ॥ ६०३ ॥

अत्रासंयताद्येषूपशांतांतेष्वष्टसु ९३ । ९२ । ९१ । ९० ।
मिथ्यादृशः ९२ । ९१ । ९० । ८८ । ८४ । ८२ ।

नवतिः सासने ज्ञेया मिश्रे द्वानवतिः पुनः ।
तिर्यक्षु द्वानवत्यामा नवत्यादिचतुष्टयम् ॥ ६०४ ॥

सासने ९० । मिश्रे ९२ । तिर्यक्षु ९२ । ९० । ८८ । ८४ । ८२ ।

आद्यं चतुष्टयं देवे श्वाभ्रे त्रिनवतिं विना ।
निद्व्र्यशीतीनि सर्वाणि स्थानानि नरजन्मसु ॥ ६०५ ॥

श्वाभ्रेषु ९२ । ९१ । ९० । देवेषु ९३ । ९२ । ९१ ।
९० नरेषु सर्वाणि द्व्यशीतिं विना १२ ।

नाम्नः सत्प्ररूपणा समाप्ता ।

त्रिपंचषडुपेताया विंशतेर्बंधने विदुः ।
उदये नव सत्तायां क्रमतः पंच सूरयः ॥ ६०६ ॥

बंध	२३	२५	२६
उदय	९	९	९
सत्ता	५	५	५

बंधेऽष्टाविंशतेरष्टौ पाके सत्त्वे चतुष्टयम् ।
एकोनत्रिंशतो बंधे नव सप्तान्ययोः क्रमात् ॥ ६०७ ॥

बं. २८ । उ. ८ । स. ४ । एकोनत्रिंशतो बंधे—बं २९ । उ ९ । स ७ ।

बंधने त्रिंशतः पाके नव सत्त्वे तु सप्तकम् ।
बंधादित्रितये नामस्थानानीति विदुर्बुधाः ॥ ६०८ ॥

बंध ३० । उदय ९ । सत्ता ७ ।

त्रिपंचषट्कयुक्ताया विंशतेर्बंधने सति ।
अंतिमं द्वितयं हित्वा ज्ञेयाः पाका नवादिमाः ॥ ६०९ ॥
स्थानानां पंचकं द्व्यग्रा नवतिः सा च केवला ।
अशीतिरपि सत्तायां सहिताष्टचतुर्द्विभिः ॥ ६१० ॥

बंधस्थानेषु २३।२५।२६ । प्रत्येकं नव पाकस्थानानि २१।२५।२६।२७।२८।२९।३०।३१ । सत्तास्थानानि ९२।९०। ८८।८४।८२ ।

पूर्वबंधत्रये ज्ञेयमुदये सप्तविंशतेः ।
द्व्यशीतिवर्जितं सत्त्वे पूर्वं स्थानचतुष्टयम् ॥ ६११ ॥

२३।२५।२६ । उदये २७ । सत्तायां ९२।९०।८८।८४ ।

इति बंधत्रयं समाप्तम् ।

चतुर्विंशतिमत्यस्य[1] तथा द्वितयमंतिमम् ।
अस्त्यष्टाविंशतेर्बंधे पाकानामष्टकं परम् ॥ ६१२ ॥
क्रमात् त्रिनवतिं तत्र निरेकद्वित्रिपंचकम् ।
सत्तास्थानानि चत्वारि सामान्येन विदुर्बुधाः ॥ ६१३ ॥

बंधे २८ । पाके २१।२५।२६।२७।२८।२९।३०।३१ । सत्त्वे ९२।९१।९०।८८ ।

---

१ त्यक्त्वा ।

विंशती स्तः षडेकाग्र पाके बंधेऽष्टविंशतेः ।
नवतिर्द्वानवत्यामा[1] सत्त्वे स्थानद्वयं पुनः ॥ ६१४ ॥
एषा क्षायिकसद्दृष्टौ मानवे कुरुवर्षजे ।
विशेषेणावबोद्धव्या स्थानत्रितयवेदिभिः ॥ ६१५ ॥
बंधे २८ । उदये २६।२१ । सत्त्वे ८२।८० ।
पंचसप्ताग्रविंशत्योः प्रमत्तस्योदये सति ।
अष्टाविंशतिर्बंधोऽस्ति सती[2] द्वानवतिः पुनः ॥ ६१६ ॥

आहारकारंभकेऽप्रमत्ते बंधे २८ । उदये २५।२७ । सत्त्वे ९२ ।

विंशती स्तो नवाष्टाग्रे पाके बंधेऽष्टविंशतेः ।
सत्तायां नवतिद्व्यग्रा नवतिः केवला परा ॥ ६१७ ॥
असंयतस्य सद्दृष्टेर्बंधेऽसावष्टविंशतेः ।
अप्रमत्ते च विज्ञेयः सदाहारककर्मणि ॥ ६१८ ॥
बंधे २८ । उदये २९।२८ । सत्त्वे ९२।९० ।
उदये त्रिंशतः सत्त्वे नवतिर्द्व्युत्तरा च सा ।
स्यादष्टाविंशतेर्बंधो मिथ्यादृष्ट्यादिपंचके ॥ ६१९ ॥
बंधे २८ । उदये ३० । सत्त्वे ९२।९० ।
बंधोऽष्टाविंशतेः पाकस्त्रिंशतो नवतिः सती ।
एकाग्रा तीर्थकर्तृत्वसत्त्वे द्वित्रिक्षितिश्रिताम् ॥ ६२० ॥
बंधे २८, उदये ३०, सत्त्वे ३१,
उदयस्त्रिंशतः सत्त्वमष्टाशीतेः प्रजायते ।
नरतिर्यक्षु बंधेष्टाविंशतेर्वामदृष्टिषु ॥ ६२१ ॥

---

१ सह । २ सत्ता ।

बंधे २८ । उदये ३० । सत्त्वे ८८ ।

एकाग्रत्रिंशतः पाके नवतिर्द्वयुत्तरा च सा ।
सत्त्वेऽष्टाविंशतेर्बन्धो मिथ्यादृष्ट्यादिपंचके ॥ ६२२ ॥

बंधे २८ । उदये ३१ । सत्त्वे ९२ । ९० ।

अष्टाशीतिः सती पाकः सैकायाः त्रिंशतः पुनः ।
मिथ्यादृष्टिषु तिर्यक्षु बंधेऽष्टाविंशतेः सति ॥ ६२३ ॥

बंधे २८ । उदये ३१ । सत्त्वे ८८ ।

इत्यष्टाविंशतेर्बंधः समाप्तः ।

एकोनत्रिंशतो बंधे त्रिंशतश्च नवोदयाः ।
अन्तिमं द्वितयं हित्वा सामान्येन निवेदिताः ॥ ६२४ ॥
सत्तायामादितः सप्त द्व्यशीत्यंतानि संति वै ।
अत्र स्थानानि सामान्यादतो वक्ष्ये विशेषतः ॥ ६२५ ॥

बंधे २९ । ३० । पाकाः प्रत्येकं नव २१ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । सत्तास्थानानि सप्त ९३ । ९२ । ९१ । ९० । ८८ । ८४ । ८२ ।

एकोनत्रिंशतो बंध उदयोऽस्त्येकविंशतेः ।
ऽ्येकाग्रे नवती सत्यौ बद्धतीर्थकरे नरि ॥ ६२६ ॥

विग्रहगतिगते बंधे २९ । उदये २१ । सत्त्वे ९३ । ९१ ।

पूर्वौ बंधोदयौ सत्त्वे नवतिर्द्वयुत्तरा च सा ।
चातुर्गतिकजीवानां विग्रहर्त्तिव्यतिक्रमे ॥ ६२७ ॥

बंधे २९ । उदये २१ । सत्त्वे ९२ । ९० ।

चतुरष्टयुताऽशीतिः सत्त्वे बंधोदयौ च तौ ।
नरतिर्यक्षु तिर्यक्षु द्व्यशीतिः श्रितविग्रहे ॥ ६२८ ॥

नरतिर्यक्षु बंधे २९। उदये २१। सत्त्वे ८४। ८८।
तिर्यक्षु बंधे २९। उदये २१। सत्त्वे ८२।

चतुर्विंशतिरेकाक्षे पाके बंधः पुरातनः।
सप्तादिमानि सत्तायां तृतीयप्रथमे विना॥ ६२९॥

अपूर्णैकाक्षे बंधे २९। उदये २४। सत्त्वे ९२। ९०। ८८
८४। ८२।

पंचाग्रा विंशतिः पाके बंधः पूर्णे पुरातनाः।
आद्यानि सप्त सत्तायां चतुर्गतिगतेंऽगिनि॥ ६३०॥
परं भवति तिर्यक्षु त्र्येकाग्रे नवती विना।
प्रजायंते न तिर्यंचः सत्त्वे तीर्थकृतो मतः॥ ६३१॥

बंधे २९। उदये २५। सत्त्वे ९३। ९२। ९१। ९०।
८८। ८४। ८२।

एकोनत्रिंशतो बंधः सदाद्यं स्थानसप्तकम्।
त्रिंशत्पाके तथा त्रिंशदेकाद्वित्रिचतुश्च्युताः॥ ६३२॥

बंधे २९। यथासंभवमुदये ३०।२९।२८।२७।२६। सत्त्वे
९३।९२।९१।९०।८८।८४।८२।

अस्त्येकत्रिंशतः पाके बंधः पूर्वनिवेदितः।
तृतीयप्रथमापोढं सदाद्यं स्थानसप्तकम्॥ ६३३॥

बंधे २९। उदये ३१। सत्त्वे ९२।९०।८८।८४।८२।

इत्येकोनत्रिंशतो बंधः समाप्तः।

एकोनत्रिंशतो बंधे पाकस्थानादि यन्मतम्।
तत्त्रिंशतोऽपि निःशेषं बंधस्थाने निबुद्ध्यताम्॥ ६३४॥
विशेषं त्रिंशतो बंधे स्यात्पाकः पंचविंशतेः।
सप्तादिमानि सत्तायां स्थानानीति विदुर्बुधाः॥ ६३५॥

त्र्येकाग्रे नवती सत्त्वे देवनारकयोर्मते ।
द्व्यशीतिरथ तिर्यक्षु पूर्वौ बंधोदयौ स्मृतौ ॥ ६३६ ॥
चातुर्गतिकजीवानां नवतिर्द्व्युत्तरा च सा ।
अशीतिश्चतुरष्टाग्रा सत्त्वे तिर्यक्षु नृष्वपि ॥ ६३७ ॥

सामान्येन त्रिंशद्बंधे ३० । उदये २५ । सत्त्वे ९३।९२।९१।९०।८८।८४।८२ । एषां सप्तस्थानानां विभागः देवनारकयोः ९३।९१ । तिर्यक्षु ९२ । चातुर्गतिकजीवेषु ९२ । ९० । नरतिर्यक्षु ८८।८४ ।

पाके षड्विंशतिः सत्त्वेऽशीतिस्तिर्यक्षु सद्विका ।
नवत्यादित्रयं तिर्यङ्नृषु द्वानवतिः परा ॥ ६३८ ॥

त्रिंशद्बंधे ३० । तिर्यक्षूदये २६ । सत्त्वे ८२ । तिर्यक्षु बंधे ३० । उदये २६ । सत्त्वे ९२।९०।८८।८४ ।

संत्येकपंचसप्ताष्टनवाग्रा विंशतिः क्रमात् ।
उदयास्त्रिंशतो बंधे सदाद्यं स्थानसप्तकम् ॥ ६३९ ॥

बंधे ३० । उदये २१।२५।२७।२८।२९ । सत्त्वे ९३।९२।९१।९०।८८।८४।८२ ।

त्रिंशत्सैका च सा पाके विंशतिः षट्चतुर्युता ।
सत्तास्थानानि तान्यत्र त्र्येकाग्रे नवती विना ॥ ६४० ॥

बंधे ३० । उदये ३१।३०।२६।२४ । सत्त्वे पंच ९२।९०।८८।८४।८२ ।

त्रिंशतो बंधः समाप्तः ।

एकाग्रत्रिंशतो बंधे त्रिंशत्पाकेऽस्ति नामनि ।
सप्तमाष्टमयोः सत्त्वे त्र्युत्तरा नवतिर्मता ॥ ६४१ ॥

बंधे ३१ । उदये ३० । सत्त्वे ९३ ।

भाषितो बध्नतश्चैकमुदयस्त्रिंशतः स्फुटम् ।

सत्तायां शमके प्राङ्गिराद्यं स्थानचतुष्टयम् ॥ ६४२ ॥

क्षपकेष्वष्ट सत्तायां विमुच्योपरिमद्वयम् ।

अग्रस्थानानि चत्वारि चेत्वारि प्रथमानि च ॥ ६४३ ॥

उपशमकेषु बंधे १ । उदये ३० । सत्त्वे ९३ । ९२ । ९१ । ९० । क्षपकेषु सत्त्वे ९३ । ९२ । ९१ । ९० । ८० । ७९ । ७८ । ७७ ।

त्रिंशत्सैका च सा पाके नष्टबंधे नवाष्ट च ।

चत्वार्याद्यानि सत्तायां षडग्राणि यथागमम् ॥ ६४४ ॥

नष्टबंधे पाकाः ३१ । ३० । ९ । ८ सत्त्वे ९३ । ९२ । ९१ । ९० । ८० । ७९ । ७८ । ७७ । १० । ९ ।

अस्य विशेषो व्याख्यायते—

क्षणेन्त्ये सप्तमेऽपूर्वेऽनिवृत्तिर्दशमो यशः ।

एकं बध्नंति चत्वारः परे संति न बंधकाः ॥ ६४५ ॥

यशोबंधकास्त्रयः १ । १ । १ । अबंधकाश्चत्वारः ० । ० । ० । ० ।

पाके त्रिंशदपूर्वादिपंचके योगिनः पुनः ।

त्रिंशत्सैका च सा पाके गतयोगे नवाष्ट च ॥ ६४६ ॥

अपूर्वादिषु पाके ३० । ३० । ३० । ३० । ३० । योगिनि ३० । ३१ । नियोगे ९ । ८ ।

शमकेषु चतुर्ष्विष्टमाद्यं स्थानचतुष्टयम् ।

षोडशप्रकृतिध्वंसमकुर्वत्यानिवृत्तिके ॥ ६४७ ॥

---

१ 'क' 'ख' पुस्तकयोर्नोपलब्धोयम् पाठः इति स्वकल्पित एव ।

सत्तत्र क्षपिते तास्मिन्नशीत्यादिचतुष्टयम् ।
तत्सूक्ष्मादित्रये सत्वे निर्योगोपांतिमे क्षणे ॥ ६४८ ॥
प्रोक्ता दश नव प्राज्ञैर्नियोगस्यांतिमे क्षणे ।
शमकचतुष्कापूर्वानिवृत्याद्यनवांशेषु[2] ॥ ६४९ ॥
९२ । ९२ । ९१ । ९० ।

अनिवृत्तिशेषनवांशाष्टकसूक्ष्मक्षीणसयोगनिर्योगोपांतिमक्षणेषु सत्त्वे ८० । ७९ । ७८ । ७७ । निर्योगांत्यक्षणे १० । ९ ।

एवं नामप्ररूपणा समाप्ता ।

स्थानानां त्रिविकल्पानां कर्त्तव्या विनियोजना ।
अतो जीवगुणस्थाने क्रमतः सर्वकर्मणाम् ॥ ६५० ॥
बंधनोदयसत्त्वेषु ज्ञानावृत्त्यंतराययोः ।
पंच जीवसमासेषु निर्बंधे पाकसत्त्वयोः ॥ ६५१ ॥

जीवसमासेषु त्रयोदशसु बंधे ५ । उदये ५ । सत्त्वे ५ । चतुर्दशे संज्ञिनि पर्याप्ते मिथ्यादृष्ट्यादिसूक्ष्मान्ते बंधत्रये, बंधे ५ । उदये ५ । सत्त्वे ५ । निर्बन्धोपरतबंधयोरुपशांतक्षीणयोः पाके सत्त्वे च ५ । ५ ।

त्रयोदशसु दृग्रोधे नव बंधनसत्त्वयोः ।
चतस्रः पंच वा पाके पूर्णे संज्ञिनि भाषिताः ॥ ६५२ ॥
गुणस्थानोदिता भंगा जीवस्थाने चतुर्दशे ।
वेद्यायुर्गोत्रकर्माणि भाषित्वा वच्मि मोहनम् ॥ ६५३ ॥

त्रयोदशसु, बं. ९,९ । उ. ४,५ । स. ९,९ । संज्ञिनि पूर्णे मिथ्यादृष्टिसासनयोः, ९,९ । ४,५ । ९,९ । मिश्राद्य-

---

२ छन्दोभंगः ।

पूर्वकरणद्वयप्रथमसप्तमभागं यावत्, ६,६ । ४,५ । ९,९ । शेषापूर्वानिवृत्तिसूक्ष्मोपशमकेषु क्षपकेष्वपूर्वशेषसप्तमभागेषु षट्स्वानिवृत्तेरसंख्यातभागं यावत्, ४,४ । ४,५ । ९,९ । ततः परमनिवृत्तेः शेषसंख्यातभागे सूक्ष्मक्षपके च ४,४ । ४,५ । ६,६ । शान्ते, ०,० । ४,५ । ९,९ । क्षीणाद्विचरमक्षणे, ०,० । ४,५ । ६,६ । क्षीणचरमक्षणे, ० । ४ । ४ । एवं सर्वे पिंडिताः १३ ।

वेद्यस्य द्वाषष्टिस्त्रियुतं शतमायुषो विकल्पानाम् ।
चत्वारिंशद्गोत्रे सप्ताग्राऽवाचि जीवेषु ॥ ६५४ ॥

जीवसमासेषु भंगाः ६२ । १०३ । ४७ ।

प्रत्येकं चत्वारो भंगाः संत्यादिमाश्चतुर्दशसु ।
षट्कं केवलियुग्मे द्वाषष्टिर्जायते वेद्ये ॥ ६५५ ॥

चतुर्दशसु प्रत्येकमादिमाश्चत्वारः

बं.	१	१	०	०
उ.	१	०	१	०
स.	१०	१०	१०	१०

इति, योगिनि द्वावाद्यौ बं १ । बं १ । उ. १ । उ. ० । स १० । स १० । अयोगेऽपि द्वौ बंधेन विनाद्यावुपांतिमे समये १,० । १०,१० । द्वावयोगस्यांत्ये समये ०,१ । ०,१ । इत्थं सर्वे ६२ ।

देवायुर्नरकायुर्बध्नीतः संज्ञ्यसंज्ञिनौ पूर्णौ ।
द्वादश नैकाक्षाद्या जीवसमासाः परे जातु ॥ ६५६ ॥
पंचैकादशयुक्ताः प्रत्येकमसंज्ञिनि नव पर्याप्ते ।
संज्ञिनि दशकापूर्णे विंशतिरष्टाधिकाऽपूर्णे ॥ ६५७ ॥

केवलिभंगेन युतं त्रियुतमायुषो विकल्पानाम् ।
विज्ञातव्यं सद्भिर्जीवसमासेषु सर्वेषु ॥ १०३ । ६५८ ॥

आसामर्थः—यस्मादेकादश जीवसमासाः श्वभ्रदेवायुषी न बध्नंति, ततस्तेषु तिरश्चामायुर्बंधभंगेभ्यो नवभ्यः श्वभ्रायुर्बंध भंगौ द्वौ, देवायुर्बंधभंगौ द्वौ, अपाकृत्य शेषा जीवसमासेष्वे-कादशसु पंचपंचेति पंचपंचाशद्भवंति ।

तत्र पंचानां संदृष्टिः—

०	२	०	३	०
२	२	२	२	२
२	२२	२२	२३	२३

ततः परमसंज्ञिनि पर्याप्ते नव तिर्यग्भंगाः—

०	२	०	१	०	३	०	४	०
२	२	२	२	२	३	२	२	२
२	२२	२२	२१	२१	२३	२३	२४	२४

संज्ञिनः दशापूर्णे यस्मादपूर्णसंज्ञी तिर्यङ्मनुष्यश्च श्वभ्रदे-वायुषी न बध्नीतस्तस्मात्तिरश्चां मनुष्याणां चायुर्बंधभंगेभ्यो नवभ्यः श्वभ्रायुर्बंधभंगौ देवायुर्बंधभंगौ च हित्वा शेषाः पंच पंचायुर्बंधभंगाः ५ । ५ ।

०	२	०	३	०
२	२	२	२	२
२०	२२	२२	२३	२३

०	३	०	२	०
३	३	३	३	३
३	३३	३३	३२	३२

इत्थमपूर्णे संज्ञिनि भंगाः १० ।

पंच श्वभ्रे भंगा नव नव तिर्यङ्मनुष्ययोर्ज्ञेयाः ।
क्रमतो बध्नन् स्वायुर्बंधेऽपि च पंचपंच देवेषु ॥ ६५९ ॥

५ । ९ । ९ । ५ ।

बं	०	२	०	३	०	०	१	०	२	०	३	०	४	०
उ	१	१	१	१	१	२	२	२	२	२	२	२	२	२
स	१	१२	१२	१३	१३	२	२१	२१	२२	२२	२३	२३	२४	२४

०	१	०	२	०	३	०	४	०	०	२	०	३	०
३	३	३	३	३	३	३	३	३	४	४	४	४	४
३	३१	३१	३२	३२	३३	३३	३४	३४	४	४२	२	४३	४३

पूर्णे संज्ञिनि श्वभ्रतिर्यङ्मनुष्यदेवायुर्बंधभंगा भवन्त्येते ५।९।९।५। पिंडिताः २८। एकः[1] केवलिनि, ०।३।३। इत्थं सर्वे १०३।

गोत्रभंगाः कथ्यंते—

उच्चं बंधे नीचं पाके सत्त्वं द्वयं द्वयोर्नीचम्।
उभयं सत्त्वे सर्वं नीचं भंगास्त्रयो ज्ञेयाः॥ ६६०॥

१	०	०
०	०	०
१०	१०	००

चत्वारिंशदितैका जीवसमासेषु ते त्रयोदशसु।
संज्ञिनि षट् पर्याप्ते प्रथमौ द्वौ केवलिद्वन्द्वे॥ ६६१॥

प्रत्येकं त्रयस्त्रयस्त्रयोदशास्विति ३९। संज्ञिनि पर्याप्ते सप्तानां भंगानां षट् प्रथमाः—

१	१	०	०	०	
१	०	१	०	०	१
१०	१०	१०	१०	००	१०

केवलिनोरंतिमौ द्वौ,—१,१। १०,१। एते ३९।६।२। पिंडिताः ४७।

गोत्रे भंगाः सर्वे चत्वारिंशद्भवंति सप्ताग्राः।
वक्ष्याम्यधुना मोहे भंगविकल्पान् समासेन॥ ६६२॥
सूक्ष्मस्यापूर्णानां सप्तानामष्टजन्मिनामित्थम्।
द्वाविंशतिरथ बंधे पाके सत्त्वे त्रितयमाद्यम्॥ ६६३॥

---

१ गत एका यस्याः।

अष्टानां, बंधे २२ । पाके १०।९।८ । सत्त्वे २८।२७।२६ ।

संज्ञिनमेकं हित्वा पंचानामादिमानि पूर्णानाम् ।
द्वे चत्वारि त्रीणि क्रमतः स्युर्बंधपाकसत्त्वेषु ॥ ६६४ ॥

पंचानां पूर्णानां, बंधे २२ । २१ । उदये १० । ९ । ८ । ७ । सत्त्वे २८ । २७ । २६ ।

संज्ञिनि पूर्णे बंधे दश पाके नव मतानि सत्तायाम् ।
पंचदश स्थानानि प्रमथितमोहारिभिर्मोहे ॥ ६६५ ॥

संज्ञिनि पूर्णे सर्वाणि बंधे २२।२१।१७।१३।९।५।४।३।२।१ । पाके १०।९।८।७।६।५।४।२।१ । सत्तायां २८।२७।२६।२४।२३।२२।२१।१३।१२।११।५।४।३।२।१ ।

इतो नामकर्म कथ्यते—

बंधे पाके सत्त्वे पंच द्वे पंच पंच चत्वारि ।
पंच त्रितये पंच क्रमतः पंचाथ षट् पंच च ॥ ६६६ ॥
षट् षट् पंचाष्टाष्टावेकादश नामकर्मणः संति ।
स्थानानि स्थानज्ञैर्जीवसमासेषु योज्यानि ॥ ६६७ ॥

५	५	५	५	६	८
२	४	५	६	६	८
५	५	५	५	५	११

सप्तापर्याप्तकाः सूक्ष्मो वादरो विकलत्रयम् ।
असंज्ञी क्रमतः संज्ञी स्वामिनः स्युश्चतुर्दश ॥ ६६८ ॥

क्रमादेषां स्वामिसंख्या ७।१।१।३।१।१ ।

विंशतिरपूर्णकानां त्रिपंचषट्नवदशाधिका बंधे ।
स्थानानि पंच दक्षैः सप्तानामिह निगद्यन्ते ॥ ६६९ ॥

२३।२५।२६।२९।३० ।

एकविंशतिपाकोऽस्ति सूक्ष्मापर्याप्तकेंगिनि ।
चतुर्विंशतिपाकोऽस्ति स्थूलापर्याप्तके पुनः ॥ ६७० ॥

२१ । २४ ।

पाकेऽन्येषामपूर्णानां पंचानां विंशती स्मृते ।
एकषड्सहिते प्राज्ञैरतः सत्त्वं निगद्यते ॥ ६७१ ॥

२१ । २६ ।

द्व्युत्तरा नवतिः सा च रहिता द्विषडष्टभिः ।
नवतिः क्रमतस्तेषां सत्त्वस्थानानि पंच वै ॥ ६७२ ॥

९२।९०।८८।८४।८२ ।

सप्तस्वपूर्णास्विति गतम् ।

सूक्ष्मे स्थानानि पूर्वाणि पर्याप्ते बंधसत्त्वयोः ।
पाकेऽस्त्येकचतुःपंचषडग्रा विंशतिः पुनः ॥ ६७३ ॥

सूक्ष्मे पूर्णे बंधाः २३ । २५ । २६ । २९ । ३० । उदयाः २१।२४।२५।२६ । सत्त्वानि ९२।९०।८८।८४।८२ ।

पूर्णो स्थानानि पूर्वाणि बादरे बंधसत्त्वयोः ।
सप्तविंशतिपर्यन्ताः पाकाः संत्येकविंशतेः ॥ ६७४ ॥

पूर्णे बंधाः २३।२५।२६।२९।३० । उदयाः २१।२४।२५।२६।२७ । संति ९२।९०।८८।८४।८२ ।

विकलत्रितये बंधसत्वस्थानानि पूर्णके ।
प्रत्येकं संति पूर्वाणि पंचसंख्यानि निश्चितम् ॥ ६७५ ॥

एकद्वित्रिचतुर्न्यूना द्वात्रिंशद्विंशतिः पुनः ।
षडेकाग्रात्क्रमात्षट्कं पाकस्थानगतं स्मृतम् ॥ ६७६ ॥

बंधे २३।२५।२६।२९।३० । उदये २१।२६।२८।२९।३०।३१ । सत्त्वे ९२।९०।८८।८४।८२ ।

त्रिंशदंताःमता बंधास्त्रयोविंशतिपूर्वकाः ।
विकलाक्षगताः सत्त्वपाकाः पूर्णे त्वसंज्ञिनि ॥ ६७७ ॥

बंधाः २३।२५।२६।२८।२९।३० । उदयाः २१।२६।२८।२९।३०।३१ । सन्ति ९२।९०।८८।८४।८२ ।

बंधे सर्वाणि पाकेऽष्ट पर्याप्ते सति संज्ञिनि ।
नवाष्टकं परित्यज्य चतुरग्रां च विंशतिम् ॥ ६७८ ॥
संति स्थानानि सत्तायां परिमुच्याग्रिमं द्वयम् ।
आद्यान्येकादशान्यानि क्रमेणात्र त्रिसंशयम् ॥ ६७९ ॥

बंधाः २३।२५।२६।२८।२९।३०।३१।१ । उदयाः २१।२५।२६।२७।२८।२९।३०।३१ । संति ९३।९२।९१।९०।८८।८४।८२।८०।७९।८७।७७ ।

उदये क्रमतस्त्रिंशदेकत्रिंशन्नवाष्ट च ।
षडग्रिमाणि सत्तायां संति केवलिनोर्द्वये ॥ ६८० ॥
उदये ३०।३१।९।८ । सत्तायां ८०।७९।७८।७७।१०।९ ।

इति जीवसमासप्ररूपणा समाप्ता ।

बंधनोदयसत्त्वेषु ज्ञानरोधान्तराययोः ।
गुणानां दशके पंच द्वितये पाकसत्त्वयोः ॥ ६८१ ॥

गुणस्थानदशके,–५,५ । ५,५ । ५,५ । शान्तक्षीणयोः–०,० । ५,५ । ५,५ ।

दृग्रोधे नवकं षट्कं चतुष्टयमिति त्रयम् ।
बंधे सत्त्वे द्वयं पाके चतुष्कं पंचकं च वै ॥ ६८२ ॥
आद्यद्वितीययोः संति बंध सत्त्वे नव स्फुटम् ।
चतस्रः पंच वा संति सर्वात्राप्युदये पुनः ॥ ६८३ ॥
मिथ्यादृष्टिसासादनयोः–बं. ९,९ । उ. ४,५ । स. ९,९ ।

षड्बंधकेषु सत्तायां संति प्रकृतयो नव ।
मिश्राद्येष्वादिमापूर्वसप्तभागावसानिका: ॥ ६८४ ॥

मिश्राद्येष्वपूर्वकरणद्वयप्रथमसप्तमभागं यावत्,–६,६ । ४,५ । ९,९ ।

चतुर्बंधो मतो द्वेधा शमकेतरभेदतः ।
शमके नव सत्तायां क्षपके षट् प्रकीर्त्तिताः ॥ ६८५ ॥
अष्टमे नवमे सूक्ष्मोपशमके नव भाषिताः ।
क्षपके नवमे सूक्ष्मे सत्तायां षट् निरूपिताः ॥ ६८६ ॥

शेषापूर्वानिवृत्तिसूक्ष्मशमकेषु,–४,४ । ४,५ । ९,९ ।
अनिवृत्तिसूक्ष्मक्षपकेषु–४,४ । ४,५ । ६,६ ।

निवृत्तबंधने[1] शान्ते सत्तायां नव भाषिताः ।
षडादिमे क्षणे ज्ञेयाश्चतस्रश्चरमे क्षणे ॥ ६८७ ॥

शान्ते–०,०।४,५।९,९ । क्षीणे–०,० । ४,५ । ६,६ ।
क्षीणांत्यक्षणे–०।४।४ । इति सर्वे दर्शनावरणीयस्य १३ ।

द्वाचत्वारिंशतं वेद्ये त्रयोदशयुतं शतम् ।
आयुष्याहुर्जिना भंगान् गोत्रे पंचाग्रविंशतिम् ॥ ६८८ ॥

४२ । ११३ । २५ ।

चत्वारः प्रथमाः षट्के द्वावाद्यौ सप्तके परे ।
अंत्या वेद्यस्य चत्वारो भंगा योगविवर्जिते[2] ॥ ६८९ ॥

तत्र मिथ्यादृष्टीनां प्रमत्तान्तानां षण्णां प्रत्येकं प्रथमाश्चत्वारः वेद्यस्य भंगाः–

१	१	०	०
१	०	१	०
१०	१०	१०	१०

---

१ गतबंधे । २ चतुर्दशमे गुणे वेद्यस्य भंगाः चत्वारः ।

इत्थं षट्के मिलिताः २४ । परत्र सप्तके प्रथमौ द्वौ द्वौ—१, १ । १, ० । १०, १० । इत्थं १४ । योगवर्जितेऽन्त्याश्चत्वारः—

१	०	०	१
१०	१०	०	१

इत्थं सर्वे ४२ ।

अष्टाविंशतिराद्ये षट्विंशतिः स्वस्तदर्शने ।
मिश्रे षोडश सद्दष्टौ विंशतिः षडतः परे ॥ ६९० ॥
त्रयस्त्रयर्द्वयोर्द्वौ द्वौ चतुर्ष्वेकैककस्त्रिषु ।
शतं त्रयोदशालीढं भंगानामायुषो मतम् ॥ ६९१ ॥

मिथ्यादृष्ट्यादिषु भंगाः २८।२६।१६।२०।६।३।३।२।२। २।२।१।१।१। मिलिताः ११३ ।

भंगाः पंच नव प्रोक्ता नव पंच यथाक्रमम् ।
श्वभ्रतिर्यङ्नृदेवानामष्टाविंशतिरैक्यतः ॥ ६९२ ॥

५।९।९।५। मिलिताः २८ ।

उदितं विद्यमानं च देहिन्यायुरबध्नति ।
बध्यमानोदिते ज्ञेये विद्यमाने प्रबध्नति ॥ ६९३ ॥
तत्र बद्धोदिते बद्धे विद्यमाने निवेदिते ।
ज्ञेया भंगाः क्रमादक्षैरित्थं गतिचतुष्टये ॥ ६९४ ॥

एषां संदृष्टिर्नारकेषु—

बं.	०	२	०	३	०
उ.	१	१	१	१	१
स.	१	१२	१२	१३	१३

---

१ यदा काले जीव आयुर्न बध्नाति तदाकाले देहिनि जीवे आयुः अबध्नति सति निजायुष उदयो भवति सत्त्वं च, एवं प्रथमकोष्ठकः । जीवे आयुबध्नति सति बंध उदयो भवति द्वे सत्त्वे भवतः, एकं पूर्व सत्त्वं द्वितीयं यत् अधुना बद्धं, एवं द्वितीयकोष्ठकः ।

तिर्यक्षु इत्थम्—

०	१	०	२	०	३	०	४	०
२	२	२	२	[illegible]	२	२	२	२
२	२१	२१	२२	२२	२३	२३	२४	२४

देवेषु—

०	२	०	३	०
४	४	४	४	४
४	४२	४२	४३	४३

मनुष्येषु—

०	१	०	२	०	३	०	४	०
३	३	३	३	३	३	३	३	३
३	३१	३१	३२	३२	३३	३३	३४	३४

मिथ्यादृष्टौ सर्वे २८। सासनः श्वभ्रं न गच्छतीति श्वभ्रायुर्बंधे तिर्यगायुरुदये द्वयोः सत्त्वे १। श्वभ्रायुर्बंधे मनुष्यायुरुदये द्वयोः सत्त्वे १। इति द्वौ भंगौ त्यक्त्वा सासने शेषाः २६। एकमप्यायुर्न बध्नाति यतो मिश्रस्ततस्तस्योपरतभंगाः[1] १६।

यतो बध्नाति सद्दृष्टिर्नरतिर्यग्गतिंगतः।
देवायुरेव नान्यानि श्वभ्रदेवगतिं गतः॥ ६९५॥
मर्त्यायुरेव नान्यानि भंगानामष्टकं ततः।
विहाय विंशतिः प्रोक्ता भंगास्तस्य मनीषिभिः॥ ६९६॥

तिर्यगायुर्बंधे श्वभ्रायुरुदये द्वयोः सत्त्वे १। श्वभ्रायुर्बंधे तिर्यगायुरुदये द्वयोः सत्त्वे २। तिर्यगायुर्बंधे तिर्यगायुरुदये सत्त्वे ३। नरायुर्बंधे तिर्यगायुरुदये द्वयोः सत्त्वे ४। श्वभ्रायुर्बंधे नरायुरुदये द्वयोः सत्त्वे ५। तिर्यगायुर्बंधे नरायुरुदये द्वयोः सत्त्वे ६। नरायुर्बंधे नरायुरुदये द्वयोः सत्त्वे ७। तिर्यगायुर्बंधे देवायुरुदये द्वयोः सत्त्वे ८।

२	१	२	३	१	२	३	२
१	२	२	२	३	३	३	४
१२	२१	२२	२२	२१	३२	३३	४२

१ तस्य मिश्रस्य बंधं विनोपरतषोडश भंगा बंधशून्यानाम्।

इत्थमसंयतस्याष्टौ त्यक्त्वा शेषाः २० ।

तिर्यगायुरुदयसत्त्वयोः १ । देवायुर्बन्धे तिर्यगायुरुदये द्वयोः सत्त्वे २ । तिर्यगायुरुदये तिर्यगायुर्देवायुषोः सत्त्वे ३ । नरायुरुदयसत्त्वयोः ४ । देवायुर्बन्धे नरायुरुदये द्वयोः सत्त्वे ५ । नरायुरुदये नरदेवायुषोः सत्त्वे ६ । इत्थं देशसंयतस्य सर्वे ६ ।

नरायुरुदयसत्त्वयोः २ । देवायुर्बन्धे नरायुरुदये द्वयोः सत्त्वे २ । नरायुरुदये नरदेवायुषोः सत्त्वे ३ । इत्थं प्रमत्ते सर्वे ३ ।

त एवाप्रमत्तेऽपि । अपूर्वकरणादारभ्य यावदुपशान्तांतं चतुर्णां शमकानां क्षपकानां च नरायुरुदयसत्त्वयोः १ । उपशमकानाश्रित्य नरायुरुदये नरदेवायुषोः सत्त्वे २ । इत्थं द्वाभ्यां द्वाभ्यां भंगाभ्यां चतुर्ष्वष्टौ ८ । क्षीणसयोगायोगेषु नरायुरुदयसत्त्वयोः २ । इत्थं त्रिषु त्रयः ३ । सर्वेऽप्यायुषि भंगाः ११३ ।

प्रथमे पंच चत्वारो द्वितीये त्रितये द्वयम् ।
एकैकोऽष्टसु गोत्रे द्वावंतेन्त्यौ पंचविंशतिः ॥ ६९७ ॥

गुणेषु गोत्रभंगाः ५।४।२।२।२।१।१।१।१।१।१।१।१।२ ।

उच्चोच्चमुच्चनीचं नीचोच्चं नीचनीचामिति ज्ञेयम् ।
बंधे पाके सत्त्वे द्वंद्वं सर्वं क्रमान्नीचम् ॥ ६९८ ॥

चं.	१	१	०	०	०
उ.	१	०	१	०	०
स	१०	१०	१०	१०	००

प्रथमे प्रथमाः पंच चत्वारः सासने मताः ।
द्वौ द्वौ त्रिष्वादिमौ भंगौ पंचस्वेकैक आदिमः ॥ ६९९ ॥

मिथ्यादृष्ट्यादिषु सूक्ष्मांतेषु भंगाः ५।४।२।२।२।१।१।१।१।१ ।

उच्चं पाके सत्त्वे द्वितयं शान्तादिकेषु विज्ञेयम् ।
निर्बन्धकेष्वयोगे पाके सत्त्वं च पुनरुच्चम् ॥ ७०० ॥

शान्तक्षीणसयोगेषु [1]चतुर्षु चत्वारः $\frac{1}{10}\Big|\frac{1}{10}\Big|\frac{1}{10}\Big|\frac{1}{10}$ अयोगस्यांत्यक्षणे एकः १, १ । एवं गोत्रे सर्वे भंगाः २५ ।

मोहनीयस्य बंधाः कथ्यन्ते—

द्वाविंशतिः समिथ्यात्वे सासनेऽस्त्येकविंशतिः ।
द्वयोः सप्तदशैकत्र त्रयोदश नवत्रिषु ॥ ७०१ ॥
एकद्वित्रिचतुःपंचहीनाः षडनिवृत्तिके ।
क्रमतो मोहनीयस्य बंधस्थानानि संति वै ॥ ७०२ ॥

२२।२१।१७।१७।१३।९।९।९ । अनिवृत्तौ ५।४।३।२।१ ।

भंगाः कथ्यते—

षडाद्ये संति चत्वार एकविंशतिबंधके ।
परे चतुष्टये द्वौ द्वावेकैकोऽन्येषु पंचसु ॥ ७०३ ॥

६।४।२।२।२।२ । शेषेस्वेकः १ ।

संत्येकाद्विचतुः पंच षट् सप्ताष्ट नव क्रमात् ।
दश च मोहनीयस्य कर्मणोऽस्य नवोदयाः ॥ ७०४ ॥

१०।९।८।७।६।५।४।२।१ ।

---

१ अयोगस्योपांत्यक्षणे ।

मिथ्यात्वं संति चत्वारः कोपाद्या वेद एककः ।
हास्यादियुग्मयोरेकं भीजुगुप्सा दशोदयाः ॥ ७०५ ॥
मिथ्यात्वदृष्टितः प्राप्ते नास्ति संयोजनोदयः ।
यावदावलिकां यस्मात्तस्मादन्यो नवोदयः ॥ ७०६ ॥
इति मिथ्यादृष्टौ द्वावुदयौ १० । ९ ।
मिथ्यात्वं सासने मिश्रद्वये चाद्याः क्रुधादयः ।
द्वितीयाः पंचमे हेयास्त्रिष्वन्येषु तृतीयकाः ॥ ७०७ ॥
सासनादिषु ९।८।८।७।६।६।६ ।
सम्यङ्मिथ्यात्वपाकेन मिश्रके मोहनोदयः ।
सम्यक्त्वस्योदयोऽन्योऽस्ति क्षयोपशमदर्शने ॥ ७०८ ॥
सम्यङ्मिथ्यात्वयोगे मिश्रे ९ ।
शामिकक्षायिके न स्तः सम्यक्त्वे द्वे यदा तदा ।
चतुर्थे पंचमे षष्ठे सप्तमेऽप्युदयः परः ॥ ७०९ ॥

सम्यक्त्वोदये यतश्चतुष्टयेऽन्योऽप्युदयो द्वितीयस्ततो द्वौ द्वावुदयौ, तत्र ९,८।८,७।७,६।७,६ ।

सम्यक्त्वस्योदयाभावे षण्णामेवोदये यतः ।
एक एव सदाऽपूर्वे ततः षट्कोदयो मतः ॥ ७१० ॥
भिया जुगुप्सया द्वाभ्यां सर्वे हीनाः क्रमाद्यतः ।
ततोऽन्येऽप्युदयास्तेषामेकैकस्योपरि त्रयः ॥ ८११ ॥

तत्र मिथ्यादृष्टौ—८,९,९,१० । ७,८,८,९ । सासने—७,८,८,९ । मिश्रे—७।८,८।९ ।

असंयते—

क्षायो.	औप.
७	६
८८	७७
९	८

देशे—

वेद.	क्षायि.
६	५
७७	६६
८	७

प्रमत्ते–५,६,६,७।४,५,५,६। अप्रमत्ते–५,६,६,७।४,५,५,६।

सम्यक्त्वं विद्यते पूर्वे यतो जातु न वेदकम्।
मुनिभिर्गदितं तत्र पाकस्थानत्रयं ततः। ४।५,५।६ ॥७१२॥
प्रथमे दश सप्ताद्याः सासने मिश्रके नव।
षडाद्या नव निर्वृत्ते पंचाद्याः पंचमेऽष्ट वै ॥ ७१३ ॥
चतुराद्या द्वयोः सप्त चतुराद्याः षडष्टमे।
द्वावेको नवमे सूक्ष्मे सदैकस्योदयो मतः ॥ ७१४ ॥
कोपाद्यन्यतमो वेदो द्वावित्थं प्रथमे क्षणे।
गतवेदस्य तस्यैकः कोपाद्यन्यतमः परे ॥ ७१५ ॥

तत्र चतुर्णां कषायाणामन्यतमो, वेदश्चेति द्वावुदयस्थानं सवेदेऽनिवृत्तौ प्रथमे क्षणे, परेषु चतुर्षु भागेषु यथासंभवमवेद-कषायाणामेकतमः १। इत्यनिवृत्तौ २, १। सूक्ष्मे १।

सप्तोदया दशाद्या, यांति चतुर्विंशतिं स्फुटं भेदात्।
कोपादिवेदयुग्मैः क्रमाच्चतुस्त्रिद्विभिर्वाते ॥ ७१६ ॥

इति दशाद्युदया सप्त १०।९।८।७।६।५।४। एते कषाया-दिभिर्गुणिताः प्रत्येकं चतुर्विंशतिभेदास्तेषां संख्यामाह—

दुर्दृष्टावष्ट चत्वारि द्वयोरष्ट चतुष्टये।
अपूर्वे संति चत्वारि पाकस्थानानि मोहने ॥ ७१७ ॥

८।४।४।८।८।८।८। अपूर्वे ४।

अपूर्वान्ता अमी पाकाश्चतुर्विंशतिताडिताः।
योगोपयोगलेश्याभिर्गुणनीया यथायथम् ॥ ७१८ ॥
सासने मिश्रके पूर्वे पाकाः षण्णवतिर्बुधैः।
पंचस्वन्येषु ते प्रोक्ताः सकला द्विगुणा पुनः ॥ ७१९ ॥

इति मिथ्यादृष्ट्यादिषु पाकविकल्पाः १९२ । ९६ । ९६ । १९२ । १९२ । १९२ । ९६ । सवेदेऽनिवृत्तौ १२ । अवेदे ४ । सूक्ष्मे १ । मिलिताः १७ ।

या पाकस्थानसंख्या सा पाकभेदा निरूपिता ।
पंचषष्टियुतं तेषां शतद्वादशकं मतम् । १२६५ ॥ ७२० ॥
अष्टषष्ठिः समिथ्यात्वे द्वात्रिंशद्द्वितये मतः ।
सा षष्ठिरष्टहीना सा चतुर्थे पंचमे क्रमात् ॥ ७२१ ॥
चत्वारिंशच्चतुर्युक्ताः प्रमत्तेतरयोर्द्वयोः ।
अपूर्वे विंशतिर्ज्ञेयाः पाकप्रकृतयः स्फुटम् ॥ ७२२ ॥
दशकाद्युदयानांताश्चतुर्विंशतिसंगुणाः ।
पूर्वत्र कथिता मोहे ज्ञेयाः संख्याविशारदैः ॥ ७२३ ॥

पूर्वोदितदशकाद्युदयानां प्रकृतयो मिथ्यादृष्ट्यादिषु ६८ । ३२।३२।६०।५२।४४।४४ । अपूर्वे २० । अनिवृत्तौ २१ । सूक्ष्मे १ । एताश्चतुर्विंशतिगुणा यावदपूर्व मिथ्यादृष्टौ ८६४। ७६८ । उभयोर्मिलिताः १६३२ । सासनादिषु ७६८ । ७६०।१४४०।१२४८।१०५६।१०५६।४८० । एता मिलिता ८४४८ ।

एतदुक्तम्—

चतुःषष्ठ्या शतान्यष्टावष्टषष्ठ्यात्र सप्त च ।
मिथ्यादृष्टौ शतान्यैक्ये द्वात्रिंशानीति षोडश । १६३२॥७२४॥
मिश्रसासनयोः सप्त साष्टा षष्ठीन्यसंयते ।
चत्वारिंशानि विद्वांस शतान्याहुश्चतुर्दश ॥ ७२५ ॥

७६८ । ७६८ । १४४० ।

विना पंचाशतं द्व्यग्रां तानि देशे त्रयोदश ।
षष्ठसप्तमयोर्ज्ञेयं षट्पंचाशं सहस्रकम् ॥ ७२६ ॥
१२४८ । १०५६ । १०५६ ।
अपूर्वेऽशीतिसंयुक्तं ज्ञेयं शतचतुष्टयम् ।
पंचाशीतिशतान्येके स्युर्द्वापंचाशतं विना ॥ ७२७ ॥
अपूर्वे ४८४ ।
सर्वाः पदबंधाख्याः प्रकृतयः ८४४८ ।
अनिवृत्तेर्भंगाः कथ्यन्ते—
वेदसंज्वलनाभ्यासे द्वादश स्युर्द्विकोदयाः ।
एकोदयास्तु चत्वारः संज्वालान्यतमोदये ॥ ७२८ ॥
एकः सूक्ष्मे भवत्येवं द्वये सप्तदशोदयाः ।
एकोनत्रिंशदैक्ये ते द्वाभ्यामभ्यसने सति ॥ ७२९ ॥

सवेदेऽनिवृत्तौ द्विकोदयाः १२ । अवेदे त्वेकोदयाः ४ । सूक्ष्मलोभे एकः १ । सर्वे मिलिताः १७ । द्वाभ्यामभ्यसने द्विकोदयेषु प्रकृतयः २४ । एकोदये ४ । सूक्ष्मे १ । पिंडिताः २९ । पदबंधाख्याः प्रकृतयः ।

पाकप्रकृतिसंख्यायाः पदबंधा भवंति ते ।
पंचाशीतिशतान्याहुस्तां त्रयोविंशतिं विना । ८४७७॥७३०॥
ये भवंति गुणे यत्र पाकाः प्रकृतयश्च याः ।
योगोपयोगलेश्याभिस्ते गुण्यास्ताश्च यत्नतः ॥ ७३१ ॥
त्रयोदश द्वयोर्योगा दशान्यत्र त्रयोदश ।
नवैकादश ते षट्के नव सप्त च योगिनि ॥ ७३२ ॥

---

१ गुणने ।

गुणेषु योगाः १३।१३।१०।१३।९।११।९।९।९।९।९।९।७।० । गुणेषु पाकभेदाः पूर्वोदिता मिथ्यादृष्टौ ९६ । ९६ । सासनादिषु ९६।९६।१९२।१९२।१९२।१९२।९६ । अनिवृत्तौ १२।४ । सूक्ष्मे १ । इति द्वयोः १७ ।

मिश्रो वैक्रियिको योगः स तथौदारिकोऽगिनि ।
कार्मणश्च त्रयो नैते मिथ्यात्वं दृष्टितो गते ॥ ७३३ ॥
त्रयोदश ततो योगा मिथ्यादृष्टौ दशाथवा ।
सासने द्वादश प्रोक्ता द्वयोर्दश नवापरे ॥ ७३४ ॥
एकत्रैकादश ज्ञेया नव योगा द्वयोस्ततः ।
पाकप्रकृतयः पाकास्तैरभ्यस्या यथायथम् ॥ ७३५ ॥

मिथ्यादृष्टौ योगाः १३।१० । सासनादिषु १२।१०।१०।९।११।९।९ । योगैः षण्णवत्यादयः पाकविकल्पाः पूर्वोदिता गुणिता मिथ्यादृष्टौ १२४८ । ९६० पिंडिताः २२०८ । सासनादिषु ११५२।९६०।१९२०।१७२८।२११२।१७२८।८६४ । पिंडिताः १२६७२ ।

न श्वभ्रं सासनो याति मिश्रवैक्रियिके यतः ।
षंढवेदो न तस्यास्ति ततस्तत्र कदाचन ॥ ७३६ ॥
वेदकोपादियुग्मोत्थैभंगैः षोडशभिस्ततः ।
चतुःषष्ठिर्मताः पाकाश्चत्वारो गुणिताः परे । ६४ ॥ ७३७ ॥
षंढो वैक्रियिके मिश्रे नरके त्रिदिवे पुमान् ।
पुमानौदारिके मिश्रे जायते नृष्वसंयतः ॥ ७३८ ॥
भंगैः षोडशभिर्गुण्या वेदकोपादियुग्मकैः ।
कर्मवैक्रियमिश्राभ्यां निर्व्रतोष्टोदयस्तथा ॥ ७३९ ॥

पुंनपुंसकवेदद्वयकषायचतुष्कहास्यादियुग्मानामन्योन्याभ्यासे भंगाः १६। एतैरष्टोदया हताः १२८। वैक्रियिकमिश्रकार्मणयोगाभ्यां हताः २५६।

युग्मैकवेदकोपादिभंगैरष्टभिराहताः।
अष्टावौदारिके मिश्रे चतुःषष्ठिसदाहताः ॥ ७४० ॥

युग्मैकवेदकोपादीनामन्योन्यबधे भंगाः ८। एतेऽष्टोदयहताः ६४। औदारिकमिश्रहताः ६४।

एवमसंयते पूर्वैः सहोदयविकल्पाः परे ३२०।

नवमे दशमे पाकाः पूर्वं सप्तदशोदिताः।
योगैर्नवभिरभ्यस्तास्त्रिपंचाशं शतं मतम् ॥ ७४१ ॥

सवेदेऽनिवृत्तौ वेदाः ३। संज्वलनाः ४। परस्परबंधे द्विकोदयाः १२। नवयोगहताः १०८। निर्वेदे शेषेषु पंचमभागेषु चतुर्षु संज्वालान्यतमोदयाः ४। योगनवकगुणिताः ३६। द्वयेऽप्यनिवृत्तौ मिलिताः १४४। सूक्ष्मे सूक्ष्मलोभसंज्वालस्यैकस्योदयः १। नवभिर्योगैर्गुणिताः ९। इत्थं सर्वे पिंडिताः १५३।

मोहनोदयभंगा ये योगानाश्रित्य मेलिताः।
नवोत्तरशते ते द्वे सहस्राणि त्रयोदश ॥ १३२० । ७४२ ॥

साम्प्रतं पदबंधा योगानाश्रित्य कथ्यन्ते—

तत्र मिथ्यादृष्ट्यादिषु पूर्वोदितैर्योगैरेतैः १३। १०। सासनादिषु १२।१०।९।९।११।९।९। क्रमादेताः प्रकृतयः पूर्वोदिता मिथ्यादृष्टौ ८६४। ७६८। सासनादिषु ७६८।

७६८।१४४०।१२४८।१०५६।१०५६।४८० । गुणिता जाता मिथ्यादृष्टौ ११२३२।७६८०। सासनादिषु ९२१६।७६८०। १४४०।११२३२।११६१६।९५०४।४३२०।

पाकप्रकृतयः संति चतुर्विंशतिभंगजाः ।
षडशीतिसहस्राणि साशीति च शताष्टकम् ॥ ७४३ ॥

८६८८० ।

द्वात्रिंशत्षोडशाभ्यस्ताः पाकप्रकृतयः स्फुटम् ।
सह द्वादशभिर्ज्ञेयं सासने शतपंचकम् ॥ ७४४ ॥

सासने चत्वारः पाकाः ७,८,८,९ । एवं प्रकृतयः ३२ । पूर्वोदितैः षोडशत्रिभंगैर्गुणयित्वा वैक्रयिकमिश्रयोगबंधेऽन्येपिपदबंधाः ५१२ ।

पाकाष्टकगता षष्ठिःप्रकृतीनामसंयते ।
हताः षोडशाभिर्भंगैर्वेदकोपादियुग्मजैः ॥ ७४५ ॥
कर्मवैक्रियमिश्राभ्यां योगाभ्यां ताडिता सती ।
सहस्रं नव विंशानि शतानि च भवंति ताः ॥ ७४६ ॥

असंयतेऽष्टोदयाः ७,८,८,९ । ६,७,७,८ । एषां प्रकृतयः ६० । षोडशभंगगुणिताः ९६० । वैक्रियिकमिश्रकार्मणयोगाभ्यां हताः १९२० ।

पाकप्रकृतयो भंगैरष्टषष्टिभिराहताः ।
निहतौदारिकामिश्रेण सहाशीत्या चतुःशती ॥७४७॥

असंयतेऽन्येप्यौदारिकमिश्रयोगे भंगाः ४८० । एवं निर्व्रते योगत्रये अन्येपि मिलिताः पदबंधाः २४०० ।

---

१ ' अष्ट ' इति स्वकल्पितपाठः ।

एकोनत्रिंशदभ्यस्ता नवमे दशमे च ताः ।
योगैर्नवभिरादिष्टं सैकषष्टिशतद्वयम् ।। ७४८ ।।

नवमे उदये २ । द्वादशभिर्द्विकोदयैर्घाते २४ । चतुर्भिरेकोदयैः १।४। सर्वाः २८ सूक्ष्मे एकोदयः १ । मिलिताः २९। एता नवभिर्योगैरभ्यस्ता २६१ ।

पदबंधाः मताः सर्वे मिलिता मोहकर्मणि ।
नवतिः स्युः सहस्राणि त्रिपंचाशानि निश्चितम् ।। ७४९ ।।

इति मोहे योगानाश्रित्य गुणेषु पदबंधाः ९००५३ ।

गुणस्थानेषु ये पाका पदबंधाश्च संति ये ।
उपयोगैर्हता ज्ञेयास्ते निःशेषा विचक्षणैः ।। ७५० ।।
द्वयोः पंच क्रमेणैते त्रिषु षट् सप्त सप्तसु ।
द्वयोर्द्वाववबोद्धव्या गुणस्थानेषु कोविदैः ।। ७५१ ।।

गुणेषूपयोगाः ५।५।६।६।६।७।७।७।७।७।७।७।२।२। गुणेष्वष्टसु पाकविकल्पाः १९२।९६।९६।१९२।१९२।१९२। १९२।९६। नवमे १२।४ दशमे १ । द्वयोः १७ ।

उपयोगगुणा एते एतावंतो निवेदिताः ।
उपयोगं प्रति प्राज्ञैः पाकभेदा यथागमम् ।। ७५२ ।।

९६०।४८०।५७६।११५२।११५२।१३४४।१३४४।६७२। मिलिताः ७६८० ।

नवमे दशमे पाकाः पूर्वं सप्त दशोदिताः ।
उपयोगगुणाः संति शतं सैकोनविंशति ।। ७५३ ।

११९ । मिलिताः ७७९९ ।

भेदा मोहनपाकानामुपयोगहता मताः ।
ऐक्ये नवनवत्यामा शतानां सप्तसप्ततिः ।। ७५४ ।।

गुणस्थानाष्टके संति पाकप्रकृतयो यकाः ।
उपयोगैः क्रमादेताः पदबंधा हता मताः ॥ ७५५ ॥

गुणेष्वष्टसु पाकप्रकृतयः १६३२।७६८। ७६८। १४४०। १२४८।१०५६।१०५६।४८०। एताः यथास्वमुपयोगगुणाः पदबंधाः ८१६०।३८४०।४६०८।८६४०।७४८८।७३९२। ७३९२।३३६०। मिलिताः ५०८८० ।

सूक्ष्मानिवृत्तिकस्थानपाकप्रकृतयो हताः ।
सप्तकेनोपयोगानां त्र्युत्तरे द्वे शते मते ॥ ७५६ ॥

द्वयोः पाकप्रकृतयः २९ । उपयोगसप्तकहताः २०३ ।

उपयोगगताः सर्वे पदबंधा निरूपिताः ।
सहस्राण्येकपंचाशत्सत्र्यशीतीनि सूरिभिः ॥ ७५७ ॥

५१०८३ ।

लेश्याश्चतुष्टये षट् षट् तिस्रस्तिस्रस्त्रये शुभाः ।
एकैकास्ति गुणानां सा षट्के निर्लेश्यमंतिमम् ॥ ७५८ ॥

६।६।६।६।३।३।३।१।१।१।१।१।१।० । अष्टसु गुणस्थानेषु पाकविकल्पाः १९२।९६।९६।१९२।१९२।१९२।१९२।९६ । एते यथाक्रमं लेश्यागुणाः लेश्यासु पाकभेदाः—११५२।५७६। ५७६।११५२।५७६।५७६।५७६।९६ । अनिवृत्तिसूक्ष्मयोरुदयाः १७ । शुक्ललेश्यागुणाः १७। सर्वे पिंडिताः ५२९७ ।

त्रिहीनानि त्रिपंचाशच्छतान्येवं गुणेषु वै ।
लेश्यापाकविकल्पानां भवंत्येकत्र मोहने ॥ ७५९ ॥

गुणाष्टके पदबंधे पाकप्रकृतयः १६३२।७६८।७६८।१४-४०।१२४८।१०५६।१०५६।४८० । यथाक्रमं लेश्याहताः पदबंधा आगताः ९७९२।४६०८।४६०८।८६४०।३७४४।

३१६८।३१६८।३१६८।४८० । मिलिताः ३८२०८ । नवमदशमयोः पाकप्रकृतयः २१ । शुक्ललेश्याहताः २९ । सर्वे मिलिताः ३८२३७ ।

संति लेश्याहताः सर्वे पदवंधा विसंशयम् ।
अष्टत्रिंशत्सहस्राणि सप्तत्रिंशं शतद्वयम् ॥ ७६० ॥
मोहनीयोदया ह्येताः समस्ता वेदताड़िता ।
गुणस्थानाष्टकैर्याश्च चतुर्विंशतिसंगुणाः ॥ ७६१ ॥

मिथ्यादृष्ट्यादिस्वष्टसूदयाः ८।४।४।८।८।८।८।४ । एते त्रिवेदताड़िताः २४।१२।१२।२४।२४।२४।२४।१२ । चतुर्विंशतिसंगुणाः ५७६।२८८।२८८।५७६।५७६।५७६।५७६।२८८। सर्वैक्ये ३७४४ । अनिवृत्तौ संज्वाला वेदत्रयगुणाः १२ ।

वेदैस्तु त्रिभिरभ्यस्ताः संज्वाला अनिवृत्तिके ।
सप्तत्रिंशच्छतान्याहुः षट्पंचाशीनि मेलने ॥ ७६२ ॥

पाकस्थानानि । एवं ३७५६ ।

पाकप्रकृतयः सर्वाः वेदत्रयहता मताः ।
गुणस्थानाष्टके मोहे चतुर्विंशतिताड़िताः ॥ ७६३ ॥

६८।३२।३२।६०।५२।४४।४४।२० । त्रिवेदे गुणाः २०४। ९६।९६।१८०।१५६।१३२।१३२।६० । चतुर्विंशतिताड़िताः ४८९६ । २३०४ । २३०४।४३२०।३७४४।३१६८।३१६८। १४४० । मिलिताः २५३४४ । अनिवृत्तौ संज्वालाः ४ । प्रकृतिद्वयगुणाः ८ । त्रिवेदगुणाः २४ ।

अनिवृत्तिस्थसंज्वालाः प्रकृतिद्वयसंगुणाः ।
वेदैस्त्रिभिरभ्यस्ता मेलनीया विचक्षणैः ॥ ७६४ ॥

शतत्रयाष्टषष्टिश्च सहस्रा पंचविंशतिः ।
पदसंख्या विबोद्धव्या त्रिवेदी प्रति मोहने ॥ ७६५ ॥

२५३६८ ।

त्रिसंयमगुणाः पाकाः षष्ठसप्तमयोर्मताः ।
अपूर्वे गुणिता द्वाभ्यां सर्वे तीर्थकरैर्हताः ॥ ७६६ ॥

षष्ठसप्तमयोरुदयाः ८।८ । संयमत्रयहताः २४।२४ । अपूर्वे पाकाः ४ । द्विसंयमगुणाः ८ । चतुर्विंशतिगुणाः सर्वे ५७६। ५७६।१९२ । सर्वैक्ये १३४४ ।

षोडशैकस्तथा पाकाः संयमे गुणिताः क्रमात् ।
अनिवृत्तौ तथा सूक्ष्मे द्वाभ्यामेकेन कोविदैः ॥ ७६७ ॥

अनिवृत्तावुदयाः १६ । संयमद्वयगुणाः ३२ । सूक्ष्मे पाकाः २ । एकसंयमगुणे मिलिताः ।

सप्तसप्ततियुक्तानि त्रयोदश शतानि ते ।
त्रिकल्पाः संति पाकानां संयमं प्रति मोहने ।१३७७॥७६८॥

षष्ठसप्तमयोः पाकास्त्रिभिर्द्वाभ्यां च संयमैः ।
हत्वा प्रकृतिसंघातांस्ताडयेत्तीर्थकारिभिः ॥ ७६९ ॥

प्रमत्ताप्रमत्तयोः पदबंधाः ४४।४४ । संयमत्रयाभ्यस्ताः १३२।१३२ । अपूर्वे पदबंधाः २० । द्विसंयमगुणाः ४० । चतुर्विंशति गुणाः ३१६८।३१६८।९६० । सर्वैक्ये ७२९६ ।

द्वयं द्वादशभिर्हत्वा चतुर्भिरेककं पुनः ।
संयमद्वितयाभ्यस्ता विधेयमनिवृत्तिके ॥ ७७० ॥

अनिवृत्तौ द्वौ द्वौ द्वादशगुणौ २४ । एकश्चतुर्गुणः ४ । द्वावपि द्विसंयमगुणौ ५६ । एकः सूक्ष्मे १ । एकसंयमगुणः १ ।

चतुर्थे संयमेनैको हन्यात्सूक्ष्मकषायके ।
त्रिसप्ततिशतान्याहुस्त्रिपंचाशीनि मेलिताः ॥ ७७१ ॥
७३५३ ।
चतुर्थादिगुणैः पाकाः सम्यक्त्वैस्त्रिभिराहताः ।
द्वाभ्यां पुनरपूर्वाख्ये हंतव्याः पाकवेदिभिः ॥ ७७२ ॥
चतुर्विंशतिघ्नाः सर्वे कार्याः प्रकृतिवेदिभिः ।
अनिवृत्तौ तथा सूक्ष्मे सम्यक्त्वद्वयताडिताः ॥ ७७३ ॥

असंयतादिगुणचतुष्टये उदये ८।८।८।८ । त्रिसम्यक्त्वाभ्यस्ताः २४।२४।२४।२४ । अपूर्वे पाकाः ४ । सम्यक्त्वद्वयाभ्यस्ताः ८ । सर्वे चतुर्विंशतिगुणाः ५७६।५७६।५७६।५७६।१९२ । एते मिलिताः २४९६ । अनिवृत्तिसूक्ष्मयोः पाकाः १७ । द्विदर्शनगुणाः ३४ । सर्वे मिलिताः—

त्रिंशदभ्यधिका ज्ञेया शतानां पंचविंशतिः ।
पाकभंगाः विबोद्धव्याः सम्यक्त्वं प्रति मोहने ।२५३०॥७७४॥
सद्दृष्ट्यादिगुणस्थानचतुष्के ताडितास्त्रिभिः ।
चतुर्विंशतिविध्वस्ताः कर्त्तव्याः सकला बुधैः ॥ ७७५ ॥

गुणस्थानचतुष्टये पाकप्रकृतयः ६०।५२।४४।४४ । सम्यक्त्वत्रयगुणाः १८०।१५६।१३२।१३२ । अपूर्वे उदयप्रकृतयः २० । दर्शनद्वयाभ्यस्ताः ४० । सर्वाश्चतुर्विंशतिभंगघ्नाः ४३२०।३७४४।३१६८।३१६८।९६० । सर्वैक्ये १५३६० ।

अनिवृत्तौ तथा सूक्ष्मे पाकप्रकृतयो बुधैः ।
सम्यक्त्वद्वितयाभ्यस्ताः कर्तव्याःबुद्धिशालिभिः ॥ ७७६ ॥
अनिवृत्तिसूक्ष्मयोः पाकप्रकृतयः २९ । दर्शनद्वयगुणाः ५८ ।

अष्टादशाधिकं ज्ञेयं बुधैः शतचतुष्टयम् ।
तथा पंचदश ज्ञेयाः सहस्राः मिलिते सति ॥ ७७७ ॥
१५४१८ ।

ये मोहनीये पदबंधपाक-
त्रयोपयोगैः क्रमतः सलेश्यैः ।
निघ्नंति निर्मूलितमोहबंधा-
स्ते यांति सद्योऽमितगत्यभीष्टम् ॥ ७७९ ॥

इत्यमिगत्याचार्यवर्यप्रणीते पंचसंग्रहे मोहपाकस्थान-
प्ररूपणा समाप्ता ।

गुणेषु मोहसत्त्वस्थानान्याह—
त्रीण्येकं द्वे क्रमात्पंच सत्त्वे गुणचतुष्टये ।
त्रीणि स्युर्दश चत्वारि त्रीणि स्थानानि मोहने ॥ १ ॥
क्रमादेकादशगुणेषु—३।१।२।५।५।५।५।३।१०।४।३ ।
अष्टसप्तषडग्रास्ति विंशतिः प्रथमे ततः ।
परे विंशतिरष्टाग्रा मिश्रे साष्टचतुर्युता ॥ २ ॥
मिथ्यादृष्टौ २८।२७।२६ । सासने २८ । मिश्रे २८।२४ ।
क्रमतोष्टचतुस्त्रिद्वियुक्ता सैका च विंशतिः ।
पंच स्थानानि जायंते सत्त्वे गुणचतुष्टये ॥ ३ ॥
चतुर्थपंचमषष्ठसप्तमेषु चतुर्षु पंच २८।२४।२३।२२।२१ ।
सैवाष्टचतुरेकाग्रा स्थानानां शमके त्रयम् ।
अपूर्वे क्षपके सैका विंशतिः कथिता परम् ॥ ४ ॥
अपूर्वस्य शमके २८।२४।२१ । क्षपके २१ ।

सैवाष्टचतुरेकाग्रा सैकाग्रा नवमे दश ।
सत्रिद्व्येका क्रमात्पंच चत्वारस्त्रिद्वयो मताः ॥ ५ ॥

अनिवृत्तेः शमके २८।२४।२१ । अनिवृत्तेः क्षपके २१ । १३।१२।११।५।४।३।२ ।

सूक्ष्मेषु चतुरेकाग्रां विंशतिं क्रमतो विदुः ।
एकं च क्षपके तस्य त्रयं शान्ते पुरातनम् ॥ ६ ॥

सूक्ष्मस्य शमके २८।२४।२१ । क्षपके १ । शांते २८।२४।२१ ।

इत्थं मोहसत्ताप्ररूपणा समाप्ता ।

बंधादित्रितयं नाम्नो गुणानां दशके क्रमात् ।
पाकसत्त्वद्वयं योज्यं परे तस्माच्चतुष्टये ॥ ७ ॥
बंधे पाके क्रमात्सत्त्वे स्युः षट् नव षडादिमे ।
सासने त्रीणि सप्तैकं द्वे त्रीणि द्वे च मिश्रके ॥ ८ ॥
निर्व्रते त्र्यष्टचत्वारि द्विद्विचत्वारि पंचमे ।
षष्ठे द्विपंचचत्वारि चत्वार्येकं चतुष्टयम् ॥ ९ ॥
सप्तमेऽपूर्वके पंच ज्ञेयमेकं चतुष्टयम् ।
एकमेकं क्रमादष्ट गुणस्थानद्वये ततः ॥ १० ॥
एकं चत्वारि शांताख्ये क्षीणे चोदयसत्त्वयोः ।
त्रयोदशे द्विचत्वारि द्वे षट्कं च चतुर्दशे ॥ ११ ॥

बं.	६	३	२	३	२	२	४	५	१	१	०	०	०	०
उ.	९	७	३	८	२	५	१	१	१	१	१	१	२	२
स	६	१	२	४	४	४	४	४	८	८	४	४	४	६

षडादितः समिथ्यात्वे बंधपाके नवादितः ।
षट् स्थानान्यादितः सत्त्वे संति त्रिनवतिं विना ॥ १२ ॥

बंधे २३।२५।२६।२८।२९।३० । पाके २१।२४।२५।२६। २७।२८।२९।३०।३१ । सत्त्वे ९२।९१।९०।८८।८४।८२ ।

चतुस्त्रिद्विच्युता बंधे द्वात्रिंशत्सप्त सासने ।
सप्ताष्टाग्रे विना पाके विंशती नवतिः सती ॥ १३ ॥

बंधे २८।२९।३० । पाके २१।२४।२५।२६।२९।३०।३१ । सासनस्तीर्थकराहारकद्वयसत्कर्मा न भवतीति ९० ।

मिश्रे साष्टनवा बंधे सैकादश दशोदये ।
सनवा विंशतिद्व्यग्रा नवतिः सा तथा सती ॥ १४ ॥

बंधे २८।२९ । पाके २९।३०।३१ । सत्त्वे ९२।९० ।

चतुस्त्रिद्विच्युता बंधे द्वात्रिंशदादितोऽत्रते ।
द्वितीयोनानि पाकेऽष्ट सत्त्वेऽस्त्याद्यं चतुष्टयम् ॥ १५ ॥

बंधे २८।२९।३० । पाके २१।२५।२६।२७।२८।२९।३०। ३१ । सत्त्वे ९३।९२।९१।९० ।

नवाष्टसहिते बंधे विंशती पंचमे मते ।
त्रिंशत्सैका च सा पाके सच्चतुष्टयमादिमम् ॥ १६ ॥

बंधे २८।२९ । पाके ३०।३१ । सत्त्वे ९३।९२।९१।९० ।

बंधे साष्टनवा षष्ठे प्रथमं सच्चतुष्टयम् ।
पंचत्रिद्व्येकनिर्मुक्ता त्रिंशत्सा च मतोदये ॥ १७ ॥

बंधे २८।२९ । पाके २५।२७।२८।२९।३० । सत्त्वे ९३।९२।९१।९० ।

चतुस्त्रिद्व्येकसंत्यक्ता बंधे द्वात्रिंशदीरिता ।
उदये सप्तमे त्रिंशदादिमं सच्चतुष्टयम् ॥ १८ ॥

बंधे २८।२९।३०।३१ । पाके ३० । सत्त्वे ९३।९२।९१।९०।

शमके क्षपकेऽपूर्वे बंधेऽन्त्यस्थानपंचकम् ।
उदये जायते त्रिंशत्पूर्वं सत्त्वे चतुष्टयम् ॥ १९ ॥

बंधे २८।२९।३०।३१।१ । पाके ३० । सत्त्वे ९३।९२।९१।९० ।

सप्तमेऽन्त्यक्षणेऽपूर्वो नवमो दशमस्त्रयः ।
बध्नंत्येकं यशः शेषाश्चत्वारः संत्यबंधकाः ॥ २० ॥

१।१।१।०।०।०।० ।

अष्टमादित्रये शांते क्षीणे त्रिंशन्मतोदये ।
त्रिंशत्सैका च सा योगयुक्ते योगे नवाष्ट च ॥ २१ ॥

अपूर्वादिषु पंचसु पाके ३०।३०।३०।३०।३० । सयोगे उदये ३० । ३१ । अयोगे उदये ९ । ८ ।

शमकत्रितये शांते क्षपकाणामपूर्वके ।
षोडशप्रकृतिध्वंसमकुर्वत्यनिवृत्तिके ॥ २२ ॥
चतुष्कं प्रथमं सत्त्वे परतोऽतः क्षणाष्टके ।
नवमे दशमे क्षीणे सयोगे योगवर्जिते ॥ २३ ॥
चतुष्टयमशीत्यादिनियोगांत्यक्षणे परम् ।
ज्ञेया नव दश प्राज्ञैरिति नाम प्ररूपितम् ॥ २४ ॥

तत्रोपशमश्रेण्यामपूर्वादीनां चतुर्णां क्षपकाणामपूर्वेऽनिवृत्तिप्रथमनवांशे च । सत्त्वे ९३।९२।९१।९० । अनिवृत्तिक्षपकशेषनवांशेष्वष्टसु सूक्ष्मक्षीणसयोगनियोगोपांतिमक्षणेषु च । सत्त्वे ८०।७९।७८।७७ । नियोगांत्यक्षणे १० । ९ ।

एवं नामप्ररूपणा समाप्ता ।

मार्गणां प्रति बंधादित्रयं कथ्यन्ते—
बंधे पाके सत्त्वे द्वे पंच त्रीणि संति नरकेषु ।
षट् नव पंच त्रितये संति स्थानानि तिर्यक्षु ॥ २५ ॥
अष्टादश द्वादश च त्रितये स्थानानि संति मानुष्ये ।
चत्वारि पंच चत्वारि त्रिदिवे तत्र जायंते ॥ २६ ॥

तदित्थं—

बं.	२	६	८	४
उ.	५	९	१०	५
स.	३	५	१२	४

नवदशसहिता बंधे नरके विंशतिरुदाहृता पाके ।
एषैकपंचसप्ताष्टनवाग्रा जायते तत्र ॥ २७ ॥
एकद्वित्रिपरित्यक्ता तत्र त्रिनवतिः सती ।
उक्त्वा बंधादिकं श्वभ्रे तिर्यक्षु कथयाम्यतः ॥ २८ ॥

श्वभ्रे बंधे २९।३० । उदये २१।२५।२७।२८।२९ । सत्त्वे ९२।९१।९० ।

आद्यानि तत्र षड्बंधे नवाद्यान्युदये विदुः ।
त्र्येकाग्रे नवती सत्वे सप्ताद्यानि विना क्रमात् ॥ २९ ॥

तिर्यक्षु बंधे २३।२५।२६।२८।२९।३० । पाके २१।२४। २५।२६।२७।२८।२९।३०।३१ । तीर्थकृत्सत्कर्मा तिर्यक्षु न यातीति तेन विना सत्त्वे ९२।९०।८८।८४।८२ ।

सर्वे बंधे नृत्वे क्रमाच्चतुर्विंशतिं विना पाकाः ।
सत्वे द्व्यशीत्यूनस्थानान्यखिलानि जायंते ॥ ३० ॥

नृत्वे बंधाः २३।२५।२६।२८।२९।३०।३१।१ । पाकाः २१।२५।२६।२७।२८।२९।३०।३१।९।८ । सन्ति[1] ९३।९२।

१ सत्वस्थानानि ।

९१।९०।८८।८४।८०।७९।७८।७७।१०।९ ।

बंधे पंचषडग्रा नवदशयुक्ता च विंशतिः स्वर्गे ।
सा सैकपंचसप्ताष्टनवपाके विनिर्दिष्टा ॥ ३१ ॥
सत्त्वे प्रथमचतुष्कं बंधादित्रितयमुक्तमिति नाके ।
इदमिन्द्रियेस्विदानीं कथयामि यथागमं ज्ञात्वा ॥ ३२ ॥

स्वर्गे बंधे २५।२६।२९।३० । पाके २१।२५।२७।२८।२९ । सत्तायां ९३।९२।९१।९० ।

एकाक्षे त्रितये पंच विकलत्रितये मताः ।
पंच षट् पंच पंचाक्षे त्वष्टौ दश त्रयोदश ॥ ३३ ॥

तदित्थम्—

	ए.	वि.	पं.
बं.	५	५	८
उ	५	६	१०
स.	५	६	१२

बंधे त्रिपंचषट्नवदशयुक्ता विंशतिर्मतैकाक्षे ।
पाकाः पंच प्रथमाः प्रथमतृतीये विना संति ॥ ३४ ॥

स्थानानीति शेषः । बंधे २३।२५।२६।२९।३० । पाकाः २१।२४।२५।२६।२७ । संति ९२।९०।८८।८४।८२ ।

एकेन्द्रियवद्बंधे सत्त्वे विकलत्रये प्रजायंते ।
एकषडष्टनवदशैकादशयुग्विंशतिः पाके ॥ ३५ ॥

बंधे २३।२५।२६।२९।३० । पाकाः २१।२६।२८।२९।३०।३१ । सत्त्वे ९२।९०।८८।८४।८२ ।

बंधे सत्त्वे जीवे सर्वस्थानानि संति पंचाक्षे ।
तानि चतुर्विंशत्या पाके हीनानि जायंते ॥ ३६ ॥

बंधे २३।२५।२६।२८।२९।३०।३१।१ । पाके २१।२५।

२६|२७|२८|२९|३०|३१|९|८ । सत्त्वे ९३|९२|९१|९०|
८८|८४|८२|८०|७९|७८|७७|१०|९ ।

सर्वासु मार्गणास्वेवं सत्संख्याद्यष्टकेऽपि च ।
बंधादित्रितयं नाम्नो योजनीयं यथागमम् ॥ ३७ ॥
न चत्वारिंशतं सैकं परित्यज्यान्यकर्मणाम् ।
पाकोदीरणयोरस्ति विशेषः स्वाम्यतः स्फुटम् ॥ ३८ ॥
मिश्रसासादनापूर्वशांतायोगान् विमुच्य सा ।
योजनीया गुणस्थाने विभागेन विचक्षणैः ॥ ३९ ॥

एकचत्वारिंशत्प्रकृतयो गुणस्थानं प्रति दीयन्ते—

मिथ्यात्वं तत्र दुर्दृष्टौ तुर्ये श्वभ्रसुरायुषी ।
तैरश्चं जीवितं देशे षडेताः सप्रमादके ॥ ४० ॥
सातासातमनुष्यायुस्त्यानगृद्धित्रयाभिधाः ।
सम्यक्त्वं सप्तमे वेदत्रितयं त्वनिवृत्तिके ॥ ४१ ॥
लोभः संज्वलनः सूक्ष्मे क्षीणाख्ये दृक्चतुष्टयम् ।
दश ज्ञानांतरायस्था निद्राप्रचलयोर्द्वयम् ॥ ४२ ॥
त्रसपंचाक्षपर्याप्तबादरोच्चनृरीतयः ।
तीर्थकृत्सुभगादेययशांसि दश योगिनि ॥ ४३ ॥

१|०|०|२|१|६|१|०|३|१|०|१६|१०|०| मिलिताः ४१|

त्रिभिर्विरहितं तीर्थकर्तृत्वाहारकद्विकैः ।
स्वीकरोति समिथ्यात्वः शतं सप्तदशोत्तरम् ॥ ४४ ॥
सासनः शतमेकाग्रं चतुर्भिः सप्तभिर्युताम् ।
सप्ततिं मिश्रनिर्वृतौ सप्तभिस्त्रिभिरन्विताम् ॥ ४६ ॥
षड्विंशतिं च गृह्णाति ततो द्वाविंशतिं परः ।
एकद्वित्रिचतुर्न्यूनामेतां संयमपंचके ॥ ४७ ॥

सूक्ष्मः सप्तदशैकस्य शान्तक्षीणाख्ययोगिनाम् ।
सातस्य कर्मणो बंधो निर्योगो बंधवर्जितः ॥ ४८ ॥

तीर्थकराहारकद्वयहीना मिथ्यादृष्टौ–१६,११७,३,३१ । सासने–२५,१०१,१९,४७ । मर्त्यदेवायुषी विना मिश्रे–०,७४,४६,७४ । तीर्थकरमर्त्यदेवायुर्भिः सहासंयते–१०,७७,४३,७१ । देशे–४,६७,५३,८१ । प्रमत्ते–६,६३,५७,८५ । आहारकद्विकेन सहाप्रमत्ते–१,५९,६१,८९ ।

अपूर्वे सप्तसु भागेषु–

२	०	०	०	०	३०	४
५८	५६	५६	५६	५६	५६	२६
६२	६४	६४	६४	६४	६४	९४
९०	९२	९२	९२	९२	९२	११२

अनिवृत्तौ पंचसु भागेषु–

१	१	१	१	१
२२	२१	२०	१९	१८
९८	९९	१००	१०१	१०२
१२६	१२७	१२८	१२९	१३०

सूक्ष्मे–१६,१७,१०३,१३१ । शांते–०,१,११९,१४७ । क्षीणे–०,१,११९,१४७ । सयोगे–१,१,११९,१४७ । निर्योगे–०,०,१२०,१४८ ।

प्रकृतीनामतो योज्यं स्वाम्यं गतिचतुष्टये ।
सामान्येन पटोयोभिः पर्यालोच्य यथागमम् ॥ ४९ ॥
तीर्थकृच्छ्वभ्रदेवायुस्त्रयं रीतित्रये स्मृतम् ।
पराः प्रकृतयः संति सर्वा रीतिचतुष्टये ॥ ५० ॥
तीर्थकृत्त्वं न तिर्यक्षु श्वभ्रायुस्त्रिदशेषु नो ।
नारकेषु न देवायुः संत्यन्याः सर्वरीतिषु ॥ ५१ ॥

चतुष्टयं कषायाणामादिमं दर्शनत्रयम् ।
शांता निर्व्रतमारभ्य यावत्सप्तानिवृत्तिकम् ॥ ५२ ॥
शांतः षंढः स्त्री नोकषायषट्कं क्रमेण पुंवेदः ।
कोपाद्येषु द्वौ द्वावेकैकोऽतोऽथ संज्वालः ॥ ५३ ॥
उक्तं च—
पार्यते नोदयो दातुं यत्तत् शांतं निगद्यते ।
संक्रमोदययोर्यन्न तन्निधत्तं मनीनिभिः ॥ ५४ ॥
शक्यते संक्रमे पाके यदुत्कर्षापकर्षयोः ।
चतुर्षु कर्म नो दातुं भण्यते तन्निकांचितम् ॥ ५५ ॥

अनिवृत्तौ ७।१।१।६।१।२।२।२।२ । सूक्ष्मे १ । शांते १ ।

पिंडिताः सप्तभिः सह २८ ।
ताः समुदिताः प्राह—
शांताः क्रमेण सप्ताष्ट नव पंचदश क्रमात् ।
षोडशाष्टादश ज्ञेया विंशतिद्व्युत्तरा च सा ॥ ५६ ॥
चतुर्भिः पंचभिः षड्भिः सहिता साऽनिवृत्तिके ।
सप्तभिः सहिता सूक्ष्मे शान्ते साष्टभिरन्विता ॥ ५७ ॥

७।८।९।१५।१६।१८।२०।२२।२४।२५।२६ । सूक्ष्मे २७ ।

शान्ते २८ ।
मिथ्यात्वमथ सम्यक्त्वं मिश्रमाद्याः क्रुधादयः ।
चतुर्षु संयताद्येषु क्षीयंते सप्त कुत्रचित् ॥ ५८ ॥
स्त्यानगृद्धित्रयं तिर्यग्द्वितयं नारकद्वयम् ।
आतपस्थावरद्वन्द्वमाद्यं जातिचतुष्टयम् ॥ ५९ ॥

सूक्ष्मसाधारणोद्योताः षोडशेता[1] निवृत्तिके ।
संख्यातव्यतमे भागे यांति प्रकृतयः क्षयम् ॥ ६० ॥
तिर्यग्द्वयादयः सद्भिस्तिर्यग्गतिगता मताः ।
श्वभ्रद्वयादयो जैनैः श्वभ्रगतिगताः पुनः ॥ ६१ ॥
अष्टौ कोपादयो मध्याः क्षिप्यंतेऽतोनपुंसकम् ।
स्त्रीवेदः क्रमतः षट्कं ततो हास्यादिगोचरम् ॥ ६२ ॥
पौंस्नं पौंस्ने विनिक्षिप्य क्रोधः क्रोधे परे परः ।
माया ततोऽथ मायायां सूक्ष्मे लोभो निकृत्यते ॥ ६३ ॥
८।१।१।६।२।१।१।१।१ ।
द्वे निद्राप्रचले क्षीणे प्रथमेंऽत्ये चतुर्दश ।
क्षणे ज्ञानांतरायस्था दश दृष्टिचतुष्टयम् । २।१४ ॥ ६४ ॥
जीवेतरविपाकानां द्वासप्ततिमयोगकः ।
उपांतिमे क्षणे हंति चरमे तु त्रयोदश ॥ ६५ ॥
स्वरद्वयमनादेयमयशोऽपूर्णदुर्भगौ ।
नभोगतिद्वयं वेद्यमेकमुच्छ्वासनीचके ॥ ६६ ॥
जीवपाकाः स्युरेत्यामा नाम्नोऽन्याः पुद्गलोदयाः ।
एकोनषष्टिसंख्याना दक्षैः प्रकृतयः स्मृताः । १२।५९ ॥६७॥
कायबंधनसंघाताः प्रत्येकं पंचकप्रमाः ।
निर्माणगंधयोर्युग्मं षट्कं संहतिगोचरम् ॥ ६८ ॥
प्रत्येकागुरुलघ्वाह्वे परघातोपघातके ।
एकोनषष्टिरेषात्र विज्ञेया पुद्गलोदया । ५९ ॥ ६९ ॥

---

१ गता इत्यर्थः ।

सह देवानुपूर्व्यैता मिलिताः क्षेत्रपाकया ।
ज्ञेया सप्तभिः संति सर्वाः प्रकृतयः स्फुटम् ॥ ७० ॥
मिलिताः ७२ ।
वेद्यमेकतरं स्थूलं नरायुर्नृद्वयं त्रसम् ।
यशः पर्याप्तमादेयं उच्चं पंचाक्षस्वभंगे ॥ ७१ ॥
हत्वा तीर्थकृता सार्द्धं तीर्थकारी त्रयोदश ।
इतरः केवली याति द्वादशैव शिवास्पदम् ॥ ७२ ॥

कार्यक्षयक्रममाह—

श्वभ्रदेवतिर्यगायुर्भिर्विना मिथ्यादृष्टौ—०,१४५,३ । तीर्थकराहारकद्वयहीनाः सासने—०,१४२,६ । आहारकद्विकेन सह मिश्रे—०,१४४,४ । तीर्थकरेण सहाविरते—७,१४५,३ । देशे—७,१४५,३ । प्रमत्ते—७,१४५,३ । अप्रमत्ते—७,१४५,३ । अपूर्वे—०,१३८,१० ।

	१६	८	१	१	६	१	१	१	५
अनिवृत्तेर्नवसु भागेषु—	१३२	१२२	११४	११३	११२	१०६	१०५	१०४	१०३
	१०	२६	३४	३५	३६	४२	४३	४४	४५

सूक्ष्मे—२,१०२,४७ । शांते । क्षीणे क्षणद्वये—१४,९९,४९ । सयोगे—०,८५,६३ । अयोगे समयद्वये—७२,८५,६३ । १३,१३,१३५ । सिद्धे—०,०,१४८ ।

रत्नत्रयफलं प्राप्ता निर्बाधं कर्मवर्जिताः ।
निर्विशंति सुखं सिद्धास्त्रिलोकशिखरस्थिताः ॥ ७३ ॥

अष्टचत्वारिंशतं कर्मभेदा-
नित्थं हत्वा ध्यानतो निर्वृता ये ।

स्वस्थानंतामेयसौख्याब्धिमग्ना-
स्ते नः सद्यः सिद्धये संतु सिद्धाः ॥ ७४ ॥
यस्मात्सर्वं कृत्रिमं नाशि दृष्टं
संत्यज्यैकं पावनं सिद्धिलाभम् ।
तस्मादन्यत्सद्भिरत्यस्य कार्यं
कार्यो यत्नः सर्वदा सिद्धिलब्ध्यै ॥ ७५ ॥
कल्मषाष्टकमयास्य सर्वथा
ये गुणाष्टकमवापुरूर्जितम् ।
जातिमृत्युभवदुःखवर्जिता-
स्ते वसंतु मम निर्वृता हृदि ॥ ७६ ॥
दृष्टिवादमकराकरादिदं
प्राभृतैकलवरत्नमुद्धृतम् ।
ज्ञानदर्शनचरित्रबृंहकं
गृह्यतां शिवनिवासकांक्षिभिः ॥ ७७ ॥
बंधं पाकं कर्मणां सत्त्वमेत-
द्वक्तुं शक्तं दृष्टिवादप्रणीतम् ।
शास्त्रं ज्ञात्वाऽभ्यस्यते येन नित्यं
सम्यक् तेन ज्ञायते कर्मतत्त्वम् ॥ ७८ ॥
कर्मबंधगुणजीवमार्गणा-
स्थानयोजनपरायणोऽस्ति यः ।
सत्तपोदलितकर्मसंहतिः
सोऽस्तु तेऽमितगतिः शिवास्पदम् ॥ ७९ ॥

इति श्रीमदमितगत्याचार्यवर्यप्रणीते पंचसंग्रहे सप्ततिः समाप्ता ।

---

१ त्यक्त्वा । २ त्यक्त्वा । ३ दृष्टिवादो द्वादशांगः स एव मकराकरः समुद्रस्तस्मात् ।

नत्वा जिनेश्वरं वीरं बंधस्वामित्वसूदनम् ।
वक्ष्याम्योघविशेषाभ्यां बंधस्वामित्वसंभवम् ॥ १ ॥

गुणस्थानं प्रति बंधः कथ्यते—

सप्तदशैकालीढे शते ततः सप्तर्ति चतुर्युक्ताम् ।
सप्ततिमथ सप्तयुतां सप्तत्यग्रे क्रमात्षष्ठी ॥ २ ॥
एकविहीनां षष्टिं प्रकृतीः सप्तादिमा निबध्नंति ।
षष्टिं द्विचतुर्न्यूनां षड्विंशतिमष्टमस्तस्मात् ॥ ३ ॥
विंशती द्व्येकसंयुक्ते तां ते चैकद्विवर्जिते ।
नवमः पंचकेंशानां सूक्ष्मः सप्तदशैव ताः ॥ ४ ॥
तस्मादेकं त्रयः सातमयोगो बंधवर्जितः ।
विंशतं शतमोघेन बंधप्रकृतयो मताः ॥ ५ ॥

सम्यक्त्वसम्यङ्मिथ्यात्वैकगंधस्पर्शसप्तकरसचतुष्कवर्णचतुष्टयबंधनपंचकसंघातपंचकलक्षणामष्टाविंशतिं वर्जयित्वा शेषा बंधप्रकृतयः १२० । अबंधाः २८ ।

तीर्थकराहारकद्वये सम्यक्त्वसंयमाभ्यां बध्येते, यस्मात्तस्मात्ताभ्यां विना मिथ्यादृष्टौ—१६,११७ । सासने—२५, १०१ । नरसुरायुर्भ्यां विना मिश्रे—०,७४ । नरसुरायुस्तीर्थकरैः सहासंयते—१०,७७ । पंचमे—४,६४ । प्रमत्ते—६,६३ । आहारकद्विकेन सहाप्रमत्ते—१,५९ । अपूर्वे सप्तसु भागेषु—२,५८।०,५६।०,५६।०,५६।०,५६।३०,५६।४,२६ । नवमे पंचभागेषु—१,२२।१,२१।१,२०।१,१९।१,१८। सूक्ष्मादिषु—१६,१७।०,१।०,१।१,१।०,० ।

बंधविच्छेदः कथ्यते—

आद्ये षोडश बंधा द्वितीयके पंचविंशतिस्तुर्ये ।
दश पंचमे चतस्रः षट् षष्ठे सप्तमे चैका ॥ ६ ॥
द्वे त्रिंशच्चतस्रोऽपूर्वे नवमे क्षणेषु चैकैकाः ।
पंचसु विच्छिद्यंते षोडश सूक्ष्मे जिने सातम् ॥ ७ ॥
आद्यं जातिचतुष्कं श्वभ्रत्रिदशायुषी सुरद्वन्द्वम् ।
सूक्ष्मस्थावरसाधारणातपापूर्णनारकयुगानि ॥ ८ ॥
वैक्रियिकाहारकयोर्युग्मे चैकोनविंशतिं हित्वा ।
शतमेकोतरमन्याः प्रकृतीः स्वीकुर्वते श्वाभ्राः ॥ ९ ॥
आद्यस्तीर्थकृतोना हुंडासंप्राप्तषंढमिथ्यात्वैः ।
सासादनो विहीनः सप्ततिमथ मिश्रकः श्वाभ्रः ॥ १० ॥
त्यक्त्वा मर्त्यायुषा युक्तामोघोक्तां पंचविंशतिम् ।
मिश्रे षण्णवतेर्ज्ञेया सप्ततिः सासने स्थितेः ॥ ११ ॥
निर्व्रतसम्यग्दृष्टिर्मर्त्यायुस्तीर्थकृत्वयुक्तां ताम् ।
सप्तमनरके हीनं नरायुषा शतमुपादत्ते ॥ १२ ॥
मर्त्यद्वितयोच्चोनं मिथ्यादृष्टिस्तदत्र बध्नाति ।
मिथ्यात्वतिर्यगायुर्हुंडास्यां प्राप्तषंढोनम् ॥ १३ ॥
बध्नाति सासनाख्यः सासादनपंचविंशतिं त्यक्त्वा ।
तिर्यग्जीवितहीनां मर्त्यद्वयगोत्रसंयुक्ताम् ॥ १४ ॥
मिश्राव्रतसदृष्टी बध्नीतः सप्तमे स्फुटं श्वभ्रे ।
श्वभ्रगतिर्निर्णीता विज्ञातव्या पराप्येवम् ॥ १५ ॥

ओघेन नरके बंधप्रकृतयः–१०१,९९ । मिथ्यादृष्टौ–१००,२० । सासने–९६,२४ । मिश्रे ७० । निर्व्रते ७२ । चतुर्थपंचमषष्ठश्वभ्रेषु चतुर्थगुणे तीर्थकृता विना ७१ ।

पृथिवीषट्कं बंधप्रकृतिशतां नरायुषा हीनमोघेन सप्तमे नरके ९९ । मिथ्यादृष्टौ ९६ । सासने ९१ । मिश्रे ७० । निर्व्रते ७० ।

एवं नरकगतिः समाप्ता ।

प्रकृती रहितास्तीर्थकर्त्तृत्वाहारकद्विकैः ।
तिर्यंचो गृह्णते सर्वाः सामान्येन विसंशयम् । ११७ ॥ १६ ॥
तिर्यश्चस्तास्तिरश्च्योपि पर्याप्ता वामदृष्टयः ।
बध्नंति प्रकृतीः सर्वाः सासनाः षोडशोज्झिताः ॥ १७ ॥
मिथ्यादृशः ११७,३ । सासनः १०१ ।
मर्त्यदेवायुषी मर्त्यद्वयमौदारिकद्वयम् ।
पंचविंशतिमोघोक्तां विमुच्याद्यां च संहतिम् ॥ १८ ॥
एकोनसप्ततिं मिश्रा शेषाः स्वीकुर्वते ततः ।
सप्ततिं गृह्णते युक्ता निर्व्रतास्ताः सुरायुषा ॥ १९ ॥
मिश्राः ६९,३२ । निर्व्रताः ७० ।
तिर्यंचो गृह्णते हीना द्वितीयैस्ताः क्रुधादिभिः ।
एकं स्त्रीपुरुषाः पूर्णाः पंचाक्षा देशसंयताः ॥ २० ॥
मुक्त्वा वैक्रियिकं षट्कं नारकत्रिदशायुषी ।
स्वीकुर्वन्त्योघतोऽपूर्णाः शतं शेषं नवोत्तरम् । १०९ ॥ २१ ॥

इति तिर्यग्गतिः समाप्ताः ।

प्रथमाः पंच बध्नंति तिर्यग्वत्प्रकृतीर्नराः ।
चतुर्थाः पंचमास्तत्र परं तीर्थकराधिका ॥ २२ ॥
शतं नवोत्तरं मर्त्यास्तास्तिर्यग्वदपूर्णकाः ।
समर्जन्ति प्रमत्ताद्याः प्रकृतीरौघिकी स्फुटा ॥ २३ ॥

प्रथमाः मिथ्यादृष्ट्यादयः पंच ११७ । १०१ । ६९।७१। ६७ । प्रमत्ताद्याः सर्वे ६३।५९।५८,५६,२६।२२....१८। १७।०१ । अपूर्णा मनुष्याः १०९ ।

इति मनुष्यगतिः समाप्ता ।

सूक्ष्मं वैक्रियिकं षट्कं साधारणमपूर्णकम् ।
आहारकद्वयं द्वन्द्वं नारकत्रिदशायुषोः ॥ २४ ॥
विकलत्रितयं मुक्त्वा षोडशप्रकृतीरिमाः ।
अपराः गृह्णते देवाश्चतुर्भिः सहितं शतम् ॥ २५ ॥

ओघेन देवाः १०४ ।

विना तीर्थकृता शेषं मिथ्यादृक् त्र्युत्तरं शतम् ।
एकेन्द्रियमसंप्राप्तं मिथ्यात्वं हुंडमातपम् ॥ २६ ॥
षंढकं स्थावरं सप्त त्यक्त्वा षण्णवतिः पराः ।
प्रकृतीः सासनः सर्वाः स्वीकरोति विसंशयम् ॥ २७ ॥

मिथ्यादृष्टिः १०३ । सासनः ९६ ।

हित्वा मर्त्यायुषा युक्तामोघोक्तां पंचविंशतिम् ।
एताभ्यो गृह्णते मिश्राः सप्ततिं प्रकृतीः पराः । ७० ॥ २८ ॥
मर्त्यायुस्तीर्थकर्तृत्वयुक्तां द्वासप्ततिं ततः ।
प्रकृतीः परिगृह्णाति सम्यग्दृष्टिरसंयतः । ७२ ॥ २९ ॥
प्रथमे गृह्णते सर्वे निकायत्रितये सुराः ।
चतुर्निकायजाः देव्यः स्थिता गुणचतुष्टये ॥ ३० ॥
प्रकृतीस्त्रिदशौघोक्तास्तीर्थकर्तृत्ववर्जिताः ।
त्रैदशीरौघिकीः सर्वाः सौधर्मैशानकल्पगाः ॥ ३१ ॥

भावनादिष्योघेन १०३ । मिथ्यादृगादिषु चतुर्षु १०३।

९६।७०।७० । सौधर्मैशानकल्पजेष्वोघेन १०४ । मिथ्यादृ-
ष्ट्यादिषु १०३।९६।७०।७२ ।

आतापस्थावरैकाक्षैरौघिकीर्गूढते विना ।
पराः सनत्कुमाराद्याः सहस्रारावसानगाः । १०१ ॥ ३२ ॥
एतास्तीर्थकृता हीनाः स्वीकुर्वंति कुदृष्टयः ।
हुंडासंप्राप्तमिथ्यात्वषंढोना भ्रष्टदृष्टयः ॥ ३३ ॥

१०० । ९६ ।

ता मर्त्यायुर्युतां हित्वा मिश्रकाः पंचविंशतिम् ।
बध्नंति समनुष्यायुस्तीर्थकृत्वामसंयताः ॥ ३४ ॥

७२ । ७० ।

तिर्यग्द्वितयमेकाक्षं तिर्यग्जीवितमातपः ।
उद्योतः स्थावरं चेति मुक्त्वा प्रकृतिसप्तकम् ॥ ३५ ॥
अपराः प्रकृतीर्देवाः स्वीकुर्वंत्यानतादिषु ।
अंत्यग्रैवेयकांतेषु देवौघप्रतिपादिताः ॥ ३६ ॥

आनतादिस्वोघेन ९७ ।

हीनास्तीर्थकृता मिथ्यादृष्टयः सासनाः पुनः ।
अंत्यग्रैवेयकांतेषु देवौघप्रतिपादिताः ॥ ३७ ॥

आनतादिस्वोघेन ९७ ।

हीनास्तीर्थकृता मिथ्यादृष्टयः सासनाः पुनः ।
रहिताः षंढमिथ्यात्वहुंडासंप्राप्तकैरिमाः ॥ ३८ ॥

९६ । ९२ ।

त्यक्त्वा मर्त्यायुषा युक्तामोघोक्तां पंचविंशतिम् ।
मिश्रास्तिर्यग्द्वयोद्योततिर्यगायुरपाकृताम् । ७० ॥ ३९ ॥

सतीर्थकृन्नरायुष्कास्ताः स्वीकुर्वन्ति निर्व्रताः ।
सर्वार्थसिद्धिपर्यन्तास्ता एवोर्द्ध्वं व्यवस्थिताः ॥ ४० ॥

निर्व्रताः ७२ । उपरिष्टात्सर्वार्थसिद्धिपर्यन्ता नवानुत्तराद्याः ७२ ।

इति देवगतिः समाप्ता ।

षट्कं वैक्रियिकं तीर्थकृत्त्वं श्वभ्रसुरायुषी ।
आहारकद्वयं चेति विमुच्यैकादश स्फुटम् ॥ ४१ ॥
शतं नवोत्तरं शेषा एकाक्षविकलेन्द्रियाः ।
सामान्येन निबध्नंति घोराज्ञानतमोवृताः । १०९ ॥ ४२ ॥
श्वभ्रायुः श्वभ्रयुग्मोनास्ततः संत्यज्य षोडश ।
बध्नंति सासनाः शेषाः पंचाक्षास्त्वौघिकीः पुनः ॥ ४३ ॥
मिथ्यादृशः १०९,१३ । सासनाः ९६।१२० ।
यावच्छरीरपर्याप्तिमेकाक्षविकलोद्भवाः ।
सासना न प्रपद्यंते तावत्तिर्यङ्नरायुषी ॥ ४४ ॥
न बध्नंति यतस्ताभ्यां ततस्तेषु विना मताः ।
चतुर्नवतिरन्येषामभिप्रायेण बंधने । युग्मम् ॥ ४५ ॥
९४ ।

इतीन्द्रियमार्गणा समाप्ता ।

बध्नंत्येकाक्षवज्जीवा धरांभ अथ वा ९४ ।
नृद्वयोच्चनरायूंषि तेजः पवनकायिकाः ।
हित्वैकाक्षगताः शेषा गृह्णंत्योघगतास्त्रसाः ॥ ४६ ॥

तेजोवातकायिका मिथ्यादृशः १०५ । ओघगतास्त्रसकायिकाः १२० ।

कायमार्गणा समाप्ता ।

---

१ धरांभोवृक्षकायिकाः ।

योगेष्वोघगतो भंगो वाङ्मानसचतुष्कयोः ।
भवत्यौदारिके योगे भंगो मर्त्यौघसंभवः ॥ ४७ ॥

औदारिके ११७।१०१।६९।७१ ।

उपर्योघः—

सुरश्वभ्रयुषी श्वभ्रद्विकमाहारकद्विकम् ।
विहायौदारिके मिश्रे स्वीकुर्वन्त्योघतः पराः ॥ ४८ ॥

ओघेनौदारिके मिश्रे ११४ ।

देववैक्रियिकद्वन्द्वे हित्वा तीर्थकृता समम् ।
शतं नवाधिकं ताभ्यो गृह्णते वामदृष्टयः । १०९ ॥ ४९ ॥
श्वभ्रायुः श्वभ्रयुग्माभ्यामूनाः संत्यज्य षोडश ।
तिर्यङ्मर्त्यायुषी ताभ्यः सासना गृह्णते पराः । ९४ ॥ ५० ॥
मुक्त्वा निस्तिर्यगायुष्कामेताभ्यः पंचविंशतिम् ।
देववैक्रियिकद्वन्द्वतीर्थकृत्सहिताः पराः ॥ ५१ ॥
पंचसप्ततिसंख्यानाः परिगृह्णंत्यसंयताः ।
सयोगः सातमेवैकं मिश्रकौदारिके स्थितः ॥ ५२ ॥

क्रमेण ७५ । १ ।

योगवैक्रियिके भंगः सामान्यस्त्रिदशोदितः ।
तिर्यङ्मर्त्यायुषी हित्वा तदीये मिश्रके पराः ॥ ५३ ॥

ओघेन वैक्रियिके १०४ । मिथ्यादृष्ट्यादिषु १०३।९६।७०।७२ । ओघेन वैक्रियिकमिश्रे १०२ ।

हीनास्तीर्थकरेणाद्ये स्थावरैकेन्द्रियातपैः ।
हुंडासंप्राप्तमिथ्यात्वषंढैरपि च सासने ॥ ५४ ॥

मिथ्यादृष्टौ १०१ । सासने ९४ ।

पंचविंशतिमर्त्यस्य तिर्यगायुर्विवर्जिता ।
युक्तास्तीर्थकरेणान्या निर्व्रताः परिगृण्हते ॥ ५५ ॥
आहारकद्वये योगे षष्ठवद्गृह्णते विना ।
आहारकद्वयश्वभ्रद्वितयायुश्चतुष्टयैः ॥ ५६ ॥
कार्मणे गृण्हते योगे शेषा मिथ्यादृशस्त्विमाः ।
देववैक्रियिकद्वन्द्वतीर्थकर्तृत्ववर्जिताः ॥ ५७ ॥

आहारकाहारकमिश्रद्वये ६३ । ओघेन कार्मणे योगे ११२ । मिथ्यादृशः १०७ ।

श्वभ्रायुर्नारकद्वन्द्वत्यक्ताः संत्यज्य षोडश ।
एताभ्यः सासना योगे गृह्णते कार्मणे पराः । ९४ ॥५८॥
नृतिर्यगायुषी हित्वा पंचविंशतिमव्रते ।
सुरवैक्रियिकद्वन्द्वतीर्थकर्तृत्वसंयुताः । ७५ ॥ ५९ ॥
सयोगा गृण्हते सातं प्रतरे लोकपूरणे ।
यौगिकी मार्गणा ख्याता वेदी सा कथ्यतेऽधुना ॥ ६० ॥

इति योगमार्गणा समाप्ता ।

एकाग्रविंशतियोवद्धंधकोऽस्त्यनिवृत्तिकः ।
ओघो वेदत्रये तावत्संत्यवेदास्ततः परे ॥ ६१ ॥

इति वेदमार्गणा समाप्ता ।

ओघोदितः कषायेषु बंधो मिथ्यादृगादिषु ।
नवमं दशमं यावन्निःकषायेषु चेरितः ॥ ६२ ॥

ओघेन कषायचतुष्काणां १२० । विशेषतो मिथ्यादृष्ट्यादीनामेकविंशतिविंशत्येकोनविंशतिर्बंधकानिवृत्तिपर्यन्तानां

सकषायचतुष्काणामोघभंगः, ततः सलोभकषायाणां सूक्ष्मसांपरायणामोघः, ततोऽकषायाणां शांतक्षीणसयोगानामोघः ।

इति कषायमार्गणा ।

अज्ञानं ज्ञानमप्यस्ति गुणे यद्यत्र तत्त्वतः ।
तत्तत्र विदुषा बुद्ध्वा बंधस्यौघो नियोज्यताम् ॥ ६३ ॥

तत्रौघेनाऽज्ञानत्रये ११७ । मिथ्यादृष्टौ ११७ । सासने १०१ । ततोऽसंयतादीनां मत्यादिज्ञानत्रये नवानामोघभंगः, ततो मनःपर्यये प्रमत्तादीनां सप्तानामोघः, ततः केवले सयोगायोगयोरोघः ।

इति ज्ञानमार्गणा ।

ओघः सामायिके वृत्ते छेदोपस्थापनेऽपि च ।
प्रमत्तादिचतुष्केऽस्ति परिहारेऽपि चाद्ययोः ॥ ६४ ॥
सूक्ष्मे सूक्ष्मकषायोऽसौ यथाख्याते चतुर्ष्वतः ।
देशे देशचरित्रेऽसौ चतुष्केऽप्यस्त्यसंयमे ॥ ६५ ॥

इति संयममार्गणा ।

चक्षुषोऽचक्षुषो दृष्टाबोघो द्वादशके मतः ।
गुणानामव्रतादीनां नवकेऽवधिदर्शने ॥ ६६ ॥
सयोगायोगयोरोघो ज्ञेयः केवलदर्शने ।
मार्गणा दर्शनस्योक्ता लेश्यानां तां वदाम्यतः ॥ ६७ ॥
आद्यलेश्यात्रयालीढा विमुच्याहारकद्वयम् ।
एतास्तीर्थकरेणोनाः स्वीकुर्वन्ति कुदृष्टयः ॥ ६८ ॥

कृष्णनीलकापोतलेश्यासामान्येन ११८ । कुदृष्टयः ११७ ।

सासनाः षोडश त्यक्त्वा मिश्रकाः पंचविंशतिम् ।
देवमर्त्त्यायुषी चान्याः सप्तति चतुरन्विताम् ॥ ६९ ॥
सासनाः १०१ । मिश्राः ७४ ।
तीर्थकृन्नृसुरायुर्भिर्युक्तां बध्नंत्यसंयताः ।
तेजोलेश्या विमुच्यैताः श्वभ्रायुर्विकलत्रयम् ॥ ७० ॥
श्वभ्रद्वयमपर्याप्तं सूक्ष्मं साधारणं पराः ।
हित्वा वामदृशस्तीर्थकर्तृत्वाहारकद्विके ॥ ७१ ॥
असंयताः ७७ । ओघेन तेजोलेश्याः १११ । वामदृशः १०८
एकेन्द्रियमसंप्राप्तं स्थावरं षंढहुंडके ।
मिथ्यात्वमातपं हित्वा परा बध्नंति सासनाः । १०१ ॥ ७२ ॥
औघिकीः परिगृह्णंति प्रकृतीः सकलाः स्फुटम् ।
तेजोलेश्यास्थिताः पंच सम्यङ्मिथ्यादृगादयः ॥ ७३ ॥
७४।७७।६७।६३।५९ ।
श्वभ्रायुर्नारकद्वंद्वसूक्ष्मसाधारणातपान् ।
एकेन्द्रियमपर्याप्तं स्थावरं विकलत्रयम् ॥ ७४ ॥
पद्मलेश्या निरस्यैता द्वादश प्रकृतीः पराः ।
आत्मसात्कुर्वते सर्वाः अष्टोत्तरशतप्रमाः ॥ ७५ ॥
ओघेन पद्मलेश्याः १०८ ।
विहायाहारकद्वन्द्वतीर्थकृत्त्वं कुदृष्टयः ।
सासनाः षंढमिथ्यात्वहुंडासंप्राप्तकैर्विना ॥ ७६ ॥
कुदृष्टयः १०५ । सासनाः १०१ ।
स्वीकुर्वन्त्यौघिकीः पंच मिश्रदृष्टिपुरोगमाः ।
शुक्ललेश्याः प्रबध्नंति स्थावरं नारकद्वयम् ॥ ७७ ॥

तिर्यग्द्वयातपैकाक्षाण्युद्योतं विकलत्रिकम् ।
तिर्यक्श्वभ्रायुषी सूक्ष्मं साधारणमपूर्णकम् ॥ ७८ ॥
षोडशेति परित्यज्य प्रकृतीर्गृण्हते पुनः ।
हित्वा मिथ्यादृशस्तीर्थकारित्वाहारकद्वये ॥ ७९ ॥
असंप्राप्तकमिथ्यात्वषंढहुंडविवार्जिताः ।
सासना गृण्हते शेषाः शुक्ललेश्याव्यवस्थिताः ॥ ८० ॥

ओघेन शुक्ललेश्याः १०४ । मिथ्यादृशः १०१ । सासना ९७ ।

मिश्रास्तिर्यग्द्वयोद्योततिर्यगायुरपाकृताम् ।
हित्वामरनरायुर्भ्यां सहितां पंचविंशतिम् ॥ ८१ ॥
अपरा गृह्णते शेषाः प्रकृतीरव्रताः पुनः ।
तीर्थकृन्नृसुरायुर्भिरोघोक्ता निखिला युताः ॥ ८२ ॥

७४ । अव्रताः ७४ ।

इति लेश्यामार्गणा ।

औघिकीर्गृण्हते भव्यास्ता अभव्याः कुदृष्टिगाः ।
ओघो वेदकदृष्टीनां निर्व्रतादिचतुष्टये ॥ ८३ ॥
ओघः क्षायिकदृष्टीनामेकादशगुणाश्रिताम् ।
विबुध्यासंयतादीनां योजनीयो यथागमम् ॥ ८४ ॥
ओघो मर्त्यसुरायुर्भ्यां हीनः शामिकदर्शने ।
बध्नंति नैकमप्यायुर्यतस्तत्र व्यवस्थिताः ॥ ८५ ॥
मुक्त्वा द्वितीयकोपादिचतुष्कादिमसंहती ।
नृद्वयौदारिकद्वन्द्वे शेषा गृण्हंत्यणुव्रताः ॥ ८६ ॥

असंयताः ७५ । अणुव्रताः ६६ ।

हित्वा तृतीयकोपादिचतुष्कं ताः प्रमादिनः ।
शोकस्थिराशुभासातायशोऽरतिविवर्जिताः ॥ ८७ ॥
आहारकद्वयाः शेषाः स्वीकुर्वन्त्यप्रमत्तकाः ।
शान्तान्तेषु परेष्वोघो द्रष्टव्योऽपूर्वकादिषु ॥ ८८ ॥
प्रमत्ताः ६२ । अप्रमत्ताः ५८ ।

इति भव्यसम्यत्क्वमार्गणा ।

ओघोक्ताः संज्ञिनां मिथ्यादृष्टियातास्त्वसंज्ञिनाम् ।
एतेषां सासनस्थानां ज्ञातव्याः सासनस्थिताः ॥ ८९ ॥

इति संज्ञिमार्गणा ।

अस्त्याहारकेष्वोघः कर्मप्रकृतिबंधने ।
ज्ञेयः कार्मणयोगस्थो अंगोऽनाहारकेषु तु ॥ ९० ॥

इति आहारकमार्गणा ।

ग्रंथकर्तुः प्रशस्तिः ।

श्रीमाथुराणामनघद्युतीनां
संघोऽभवद्वृत्तविभूषितानाम् ।
हारो मणीनामिव तापहारी
सूत्रानुसारी शशिरश्मिशुभ्रः ॥ १ ॥

माधवसेनगणी गणनीयः
शुद्धतमोऽजनि तत्र जनीयः ।
भूयसि सत्त्ववतीव शशांकः
श्रीमति सिंधुपतावकलंकः ॥ २ ॥

शिष्यस्तस्य महात्मनोऽमितगतिर्मोक्षार्थिनामग्रणी-
रेतच्छास्त्रमशेषकर्मसमितिप्रख्यापनायाकृत ।
वीरस्येव जिनेश्वरस्य गणभृद्भव्योपकारोद्यतो
दुर्वारस्मरदन्तिदारणहरिः श्रीगौतमोऽनुत्तमः ॥ ३ ॥

यदत्र सिद्धांतविरोधि बद्धं,
ग्राह्यं निराकृत्य तदेतदार्यैः ।
गृण्हंति लोका ह्युपकारि यद्वत्,
त्वचं निराकृत्य फलं पवित्रम् ॥ ४ ॥

अनश्वरं केवलमर्चनीयं
यावत्स्थिरं तिष्ठति मुक्तपंक्तौ ।

तावद्धरायामिदमत्र शास्त्रं
स्थेयाच्छुभं कर्मनिरासकारि ॥ ५ ॥

त्रिसप्तत्याधिकेऽब्दानां सहस्रे शकविद्विषः ।
मसूतिकापुरे जातमिदं शास्त्रं मनोरमम् ॥ ६ ॥

इत्याचार्यवर्यश्रीमदमितगतिविरचितः पंचसंग्रहः समाप्तः ।

समाप्तोऽयं ग्रन्थः ।

DAMAGE BOOK

UNIVERSAL LIBRARY
OU_184237
UNIVERSAL LIBRARY

S294 534 R.a. S2391
S25S
सत्याषाढ
श्रौतसूत्रम् . पं. भाग.
1927.

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No S294 534 S255 Accession No P.G. S2391

Author सत्याषाढ

Title श्रौतसूत्रम् · पं · भाग · 1927 ·

This book should be returned on or before the date last marked below

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५३

सत्याषाढविरचितं श्रौतसूत्रम् ।

महादेवशास्त्रिसंकलितप्रयोगचन्द्रिकाव्याख्यासमेतम् ।

एकादशादिचतुर्दशान्तप्रश्नात्मकः पञ्चमो भागः ।

एतत्पुस्तकं

वे० शा० सं० रा० शंकरशास्त्रीमारूलकर

इत्येतैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८४९

खिस्ताब्दाः १९२७

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

मूल्यं रूप्यकत्रयम् (३)

आदर्शपुस्तकोल्लेखपत्रिका ।

अथास्य प्रयोगचन्द्रिकाव्याख्यासहितस्य सत्याषाढविरचितहिरण्यकेशि-श्रौतसूत्रस्य पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रकाश्यन्ते—

(क.) इति संज्ञितम्—केवलं व्याख्यानं दण्डवत्युपाख्यभट्टरघुनाथदीक्षितानाम् । आन्ध्राक्षरलिखितं पत्राणि १६१० संपूर्णम् ।

(ख.) इति संज्ञितम्—दण्डवत इत्युपाह्वय शिवदीक्षित इत्येतेषाम् । संपूर्णम् ।

(ग.) संज्ञितम्—वे० शा० सं० शंकरदीक्षित तापसकर इत्येतेषाम् । प्रश्नाः ११-१४ पत्राणि ३२७

(घ.) इति संज्ञितम्—वे० शा० सं० गुरुनाथदीक्षित मुळगुन्दकर इत्येतेषाम् । प्रश्नौ ११-१२ पत्राणि ११७

(ङ.) इति संज्ञितम्—मूलमात्रम् । पाचवड (सातारा) ग्रामनिवासिनां श्रौतचूडामणिपदविभूषितानां स्वाध्यायसंपादकानां वे० शा० सं० धुण्डिराज दीक्षित सोमयाजी बापट इत्येतेषां संपूर्णम् ।

(च.) इति संज्ञितम्— मूलमात्रम् । संपूर्णम् । पुण्यपत्तननिवासिनां वे० शा० सं० 'अण्णंभट्ट अभ्यंकर' इत्येतेषाम् ।

(छ.) इति संज्ञितम्—मूलमात्रम् । प्रश्नाः-(११।१२।१५।२४।२५) समाप्ति किंचित्त्रुटितम् (गौर्मेण्ट मैसूर—ओरियण्टल् लैब्ररी) संस्कृतग्रन्थसंग्रहालयस्थं नागराक्षरं देवनागराल्लिखितम् ।

(ज.) इति संज्ञितम्—मूलमात्रम् । प्रश्नौ (२१।२२) लेले इत्युपाह्वधर्ममार्तण्डेत्युपाधिविभूषितानां कै० ब्रह्मश्री काशीनाथ शास्त्री सोमयाजी वाई इत्येतेषाम् ।

आदर्शपुस्तकोल्लेखपत्रिका ।

अथ सत्याषाढविरचितहिरण्यकेशिश्रौतसूत्रस्य पुस्तकानि यैः परहितैकप्रवणस्वान्ततया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रदर्श्यन्ते–

(क.) इति संज्ञितम्—एकादशप्रश्नादारभ्य समाप्तिपर्यन्तं पुण्यपत्तनस्थानां वे. रा. रा. वामन 'रघुनाथभट्ट डोंगरे' इत्येतेषाम् । अस्य लेखनकालः शकाब्दाः १७०९

(ख.) इति संज्ञितम्—२२० पत्रात्मकं त्रुटितं रा. रा. 'कुशाभाऊ अभ्यंकर वकील' इत्येतेषाम् ।

(ग.) इति संज्ञितम्—१६३ पत्रात्मकं त्रुटितं वे. रा. 'विनायकशास्त्री वाईकर' इत्येतेषाम् ।

(घ.) इति संज्ञितम्—२४७ पत्रात्मकं त्रुटितं वे. रा. 'बाळशास्त्री अभ्यंकर निवासस्थानं वाई' इत्येतेषाम्

(ङ.) इति संज्ञितम्—३०१ पत्रात्मकं त्रुटितं वे. रा. 'भास्कर कृष्णंभट्ट लिमये दीक्षित निवासस्थानं पुणें' इत्येतेषाम् ।

एवं हिरण्यकेशीयचयनाश्वमेधराजसूयकाठककाम्यपशुप्रायश्चित्तादिप्रयोगाणां हस्तलिखितपुस्तकानि मिलित्वा विंशतिसंख्याकानि वे. मू. रा. 'भास्कर कृष्णंभट्ट लिमयेदीक्षित' इत्येतैरवलोकनार्थं प्रदत्तानि। तैः प्रयोगचन्द्रिकायाः संशोधनकर्मणि बहूपकृतमिति ।

महादेवशास्त्रिसंकलितप्रयोगचन्द्रिकाव्याख्यायामुदाहृतग्रन्थानां ग्रन्थप्रणेतॄणां च अकरादिमातृकाक्रमेण निर्देशः ।

अष्टाध्यायी—पाणिनिमुनिविरचिता ।
अग्निपुराणम्—महर्षि वेदव्यासप्रणीतम् ।
अथर्ववेदः—
अत्रिस्मृतिः—
आङ्गिरःस्मृतिः—
अमरकोषः—
अनन्तदेवकृता श्रौतपद्धतिः—
अण्डिलाचार्यकृता (आपस्तम्बश्रौतप्रयोग) दीपिका ।
आपस्तम्बस्मृतिः—
आपस्तम्बसूत्रम्—
आश्वलायनस्मृतिः—
आश्वलायनसूत्रम्—
उद्गातृपद्धतिः—रामकृष्णत्रिपाठीकृता ।
ऋग्वेदसंहिता—सायणभाष्योपेता ।
एकाग्निकाण्डः—हरदत्तकृतभाष्योपेतः ।
ऐतरेयब्राह्मणम्—सायणभाष्योपेतम् ।
ऐतरेयारण्यकम्—सायणभाष्योपेतम् ।
औशनःस्मृतिः—
कपर्दिकारिका—
कपर्दिस्वामिविरचितं (आपस्तम्ब)श्रौतसूत्र भाष्यम् ।
कर्मान्तसूत्रम्—
कर्मप्रदीपः—कात्यायनविरचितः ।
कश्यपपसंहिता—
कर्कभाष्योपेतं—कात्यायनश्रौतसूत्रम् ।

कृष्णयजुर्वेदसंहिता—भट्टभास्करभाष्योपेता ।
कृष्णयजुर्वेदब्राह्मणम्—,,
कृष्णयजुर्वेदारण्यकम्—,,
कृष्णयजुर्वेदमन्त्रब्राह्मणम् ।
काशीखण्डः (स्कान्दे) रामेश्वरयोगिव्याख्या-समेतः ।
काण्वसंहिता—सायणभाष्योपेता ।
कात्यायनसूत्रम्—
कात्यायनस्मृतिः—
कौषीतिकीसूत्रम्—
खादिरगृह्यसूत्रम्—रुद्रस्कन्दभाष्योपेतम् ।
गृह्यसूत्रम् (सत्याषाढविरचितम्)
,, मातृदत्तभाष्योपेतम् ।
,, गोपीनाथकृतवृत्तियुतम् ।
,, महादेवशास्त्रिसंकलिता प्रयोग-
,, चन्द्रिका ।
गृह्यसूत्रम्—(आश्वलायनीयम्) गार्ग्यनारायणवृत्ति०
गृह्यसूत्रम् आपस्तम्बविरचितम्—
,, कपर्दिस्वामिभाष्योपेतम् ।
,, हरदत्तकृतवृत्तिसहितम् ।
,, अण्डिलाचार्यप्रयोगवृत्तिसमेतम् ।
,, सुदर्शनाचार्यभाष्योपेतम् ।
,, महादेवयज्वकृतवृत्तियुतम् ।
गृह्यसंग्रहः—(छन्दोग)
गृह्यपरिशिष्टम्—(आश्वलायनियम्)

गृह्यरत्नकण्ठभूषणम्—वैदिकसार्वभौमकृतम् ।
गोभिलगृह्यसूत्रम्-चन्द्रकान्तभट्टाचार्यभाष्योपेतम् ।
गोतमसूत्रम्-मस्करीभाष्योपेतम् ।
गोतमसूत्रम्(क्रियाकाण्ड. ।)
गोत्रप्रवरनिबन्धसंग्रह·—
चन्द्रचूडीभट्टकृत(आपस्तम्बगृह्य) संस्कारनिर्णयः ।
चन्द्रिका(श्रौतवृत्ति.) ।
छन्दोगपरिशिष्टम्—नारायणकृतभाष्यं चन्द्रकान्तवृत्तियुतं च ।
जैमिनिगृह्यसूत्रम्— भट्टकुमारिलभाष्योपेतम् ।
जैमिनिश्रौतसूत्रम्—
जैमिनिसूत्रं(पूर्वमीमासा) शाबरभाष्योपेतम्।
जैमिनिन्यामाला माधवाचार्यविरचिता ।
जैमिनिसूत्रवृत्ति.–(ज्योतिषम् ।
तत्त्वमुक्तावलिः-नन्दपण्डितकृता ।
तन्त्ररहस्य—रामानुजाचार्यकृतम् ।
तैत्तिरीयसहिता—माधवीयभाष्योपेत ।
तैत्तिरीयब्राह्मणम्—माधवीयभाष्योपेतम् ।
तैत्तिरीयारण्यकम्—
तैत्तिरीयप्रातिशाख्या-त्रिभाष्यरत्नसहिता ।
त्रिकाण्डमण्डनम्- भट्टभास्करविरचितम् ।
दत्तकमीमासा—नन्दपण्डितकृता ।
दत्तकचन्द्रिका—कुबेरकृता ।
दत्तकौस्तुभः—अनन्तदेवकृत. ।
दत्तकदर्पणः—
दत्तकसारः—
दशानिर्णयः—वैदिकसार्वभौमकृतः ।

दक्षस्मृतिः—
दानखण्डः— (हेमाद्रेः)
द्वैधसूत्रम्—
द्राह्यायणगृह्यसूत्रम्- रुद्रस्कन्दभाष्योपेतम् ।
धर्मप्रदीपः—
धर्मप्रवृत्तिः—
धर्मसूत्र सत्याषाढविरचितम् । महादेवकृतवैजयन्तीव्याख्या०
,, (आपस्तबीयं) हरदत्तकृतं उज्ज्वलासहितम् ।
" (बोधायनीयं) गोविन्दाचार्यवृत्तियुतम् ।
" (वैखानसीयं) ।
धूर्तस्वामिभाष्योपेतमापस्तम्बसूत्रम् ।
नृसिंहकृतप्रयोगपारिजातः ।
नारसिंहप्रतापः–रुद्रदेवकृत. ।
निर्णयामृतः–
निर्णयसिन्धुः–
पराशरमाधवीयः
परिभाषासूत्रं–बोधायनीयम् ।
पाकयज्ञनिर्णयः–
पितृमेधसूत्रम्–(भरद्वाजविरचितं) कपर्दिभाष्योपेतम् ।
पारस्करगृह्यसूत्रम्–हरिहरभाष्योपेतम् ।
पितृमेधसूत्रम् (आपस्तम्बीयम्) गोपालयज्वभाष्योपेतम्।
" " महादेवयज्वभाष्योपेतम् ।
" " यल्लाजीयविवरणोपेतम् ।
पितृमेधसूत्रम् (बोधायनीयम्)
पितृमेधसूत्रम् (वैखानसीयम्)
प्रयोगरत्नं (हिरण्यकेशीयं) महेशभट्टीयम्।

प्रायश्चित्तशतद्वयी—वेंकटेशकृतव्याख्यास०
प्रायश्चित्तप्रदीपः—गोपालयज्वकृत. ।
प्रायश्चित्तदीपिका—वरदराजयज्वकृता ।
प्रायश्चित्तचन्द्रिका—गणेशयज्वकृता ।
बौधायनश्रौतसूत्रं — महादेवयज्वकृतवृत्तियुतम् ।
बौधायनगृह्यसूत्रम्
बृहस्पतिस्मृतिः
ब्रह्मपुराणम्
भरद्वाजश्रौतसूत्रम्— महादेवयज्वकृतभाष्योपेतम् ।
भरद्वाजगृह्यसूत्रम्
भाट्टदीपिका — खण्डदेवकृता ।
भाट्टरहस्यम्—
भाट्टाध्वरमीमांसा—वासुदेवदीक्षितकृता ।
मनुस्मृतिः—कुल्लूकभट्टकृतव्याख्यास.०
महाभाष्यं (पतञ्जलिः)
माध्यंदिनसंहिता—महीधरभाष्योपेता ।
मानवकल्पसूत्रम्—
मत्स्यपुराणम्—
यमस्मृतिः—
याज्ञवल्क्यस्मृतिः—मिताक्षरा ।
" अपरार्कटीका ।
याजुषहौत्ररत्नमाला—महादेवयज्वकृता ।
रामाण्डारवृत्ति.—(धूर्तस्वामिभाष्यस्य) ।
रुद्रदत्तवृत्तिः—(आपस्तम्बश्रौतसूत्रस्य) ।
लाट्यायनश्रौतसूत्रम्—अग्निस्वामिभाष्योपेतम् ।
लिखितस्मृतिः—
वासिष्ठधर्मशास्त्रम्—
वाराहगृह्यसूत्रम्—
विधानमाला—नृसिंहभट्टकृता ।
विष्णुस्मृतिः-
विश्वप्रकाशः (संस्कारकाण्डः)
विद्यारण्यकृतापस्तम्बगृह्यसूत्रवृत्ति ।
वैजयन्तीव्याख्यासमेत सत्याषाढसूत्रम् ।
वैखानसश्रौसूत्रम्—महादेवयज्वकृतवृत्तियुतम् ।
वैखानसगृह्यसूत्रम्—
व्यासस्मृतिः—
शङ्खस्मृतिः—
शतपथब्राह्मणम्—सायणभाष्योपेतम् ।
शातातपस्मृतिः—
शान्तिरत्नमाला—
शान्तिकमलाकरः—
शान्तिसारः—
शास्त्रदीपिका—
शारीरकशाङ्करभाष्यम्—
शाङ्खायनगृह्यसूत्रम्—
शाङ्खायनश्रौतसूत्रम्—
शुल्बसूत्रम् (बौधायनीयम्)
शुल्बसूत्रम् (आपस्तम्बीयम्)
कपर्दिभाष्योपेतम् ।
" "
महादेवयज्वभाष्योपेतम् ।
" " करविन्दीयविवरणोपेतम् ।
" " सुन्दरराजीयवृत्तिसहितम् ।
श्रौतसूत्रवृत्तिः (आपस्तम्बीया) महादेवयज्वकृता ।
श्रौतसूत्रं—(आपस्तम्बीयं) चौण्डपाचार्यभाष्योपेतम् ।
संकर्षणकाण्डः—भाट्टचन्द्रिका भास्कररायकृता ।

संवर्तस्मृतिः—
सर्वदर्शनसंग्रहः—
स्मृतिसमुच्चयः—
स्मृत्यर्थसारः—श्रीधराचार्यकृतः ।
स्मृतिचन्द्रिका—देवणभट्ट. (संस्कारकाण्डः)
,, ,, (श्राद्धकाण्डः)
स्मृतिमुक्ताफलम्—वैद्यनाथदीक्षितकृतम् ।
स्मृतिरत्नाकरः—विष्णुभट्टकृतः ।
,, ,, वैदिकसार्वभौमकृतः ।
स्मृतिकौस्तुभः —अनन्तभट्टकृत ।
संस्कारकौस्तुभः— ,,
संस्काररत्नमाला—गोपीनाथदीक्षितकृता ।
,, ,, महादेवयज्वकृता ।
संस्कारनिर्णयः—शंकरयज्वकृतः ।
संस्कारपद्धतिः—भास्करशास्त्रिकृता ।
स्कन्दमहापुराणम्—
स्मार्तप्रयोगवैजयन्ती—महादेवकृता ।
सापिण्ड्यमाला—नागेशभट्टकृता । सव्याख्या ।
सामवेदसंहिता—
सामविधानब्राह्मणम्—सायणभाष्योपेतम् ।
हिरण्यकेशि(सत्याषाढ) सूत्रम्
हारीतस्मृतिः—
हरदत्तकृतापस्तम्बसूत्रवृत्तिः ।
हेमाद्रिः (श्राद्धकाण्डः)
,, (व्रतखण्डः)
हौत्रमीमांसा—रामशास्त्रिकृता ।
हौत्रपद्धतिः—सायणाचार्यविरचिता ।

प्रस्तावना ।

—+—

अद्य खलु श्रीमदनन्तसद्गुणगणालंकृतानन्तकोटिब्रह्माण्डमण्डलाखण्डलप्रभृतिवृन्दारकवृन्दवन्दितपदारविन्दनिष्यन्दमानामन्दानन्दसंदोहमिलिन्दायमानमानसवैखानसमुनिजनजेगीयमानविमलबिरुदावलिविराजमानदिव्यलीलावतारसमनुगृहीतसमस्तभक्तजनकामनापरिपूरणनिबद्धपरिकरश्रीपरमेश्वरकृपाप्रसादसमवाप्तविशुद्धशेमुषीविशेषविकसितविद्यावैभवकृतार्थीकृतधरित्रीवलयानां समस्तधरणीतलविराजमानविविधसभ्यसंभावितसभासभाजितविद्वत्त्वसौजन्यसौशील्यप्रभृतिसद्गुणगणावाप्तप्रसरबुधजनसरस्वतीजेगीयमानविमलयशोवलक्षीकृतदिङ्मण्डलानां परमपूज्यताभाजनसमस्तसज्जनशिरःसरोजसंभावितनमस्क्रियाप्रभृतिपुरस्क्रियाणां सकलवेदशास्त्रपारावारपारदृश्वनां निखिलकलाकलापकौशल्यशल्योत्खलितदुर्बुद्धिनिबद्धाशयानां समस्तभूमण्डलनिवासिनां सन्मान्यविद्वज्जनानां पुरतोऽद्य नूतनपरिचयप्रभावपरिस्फुरदभिनवादरातिशयसमुत्कण्ठितसरस्वतीसुप्रसादसमवाप्तसुमङ्गलमयगीर्वाणवाग्देवतामधुरतरविलासप्रोल्लासविकसितैः प्रास्ताविकैः कतिपयैर्वाक्यनिकुरम्बैः सुमङ्गलमयमभिनवोदन्तं निवेदयितुं समुत्कण्ठतेऽस्मदीयं मानसम् । तदत्र समस्तविद्वज्जनानां सुविचाराविलासितचित्तमासमन्ततो विविधविचारणीयप्रस्तुतकार्यकदम्बकादावर्ज्य प्रकृतेऽस्मदीयेऽभिनवोदन्तनिवेदनीये वक्तव्यांशे समवधानाय कृतक्षणं जायतामिति सप्रश्रयं साञ्जलिबन्धं संप्रार्थ्य संप्रति निजवक्तव्यांशमुपोद्घातमुखेन प्रस्तोतुमारभामहे—

अयि समस्तसज्जनाः—विदितमेव खलु सकलवैदिकधर्ममार्गानुयायिनां सदाचारसंपन्नानां तत्रभवतां भवताम् । यत्सकलवाङ्मयस्याऽऽदिबीजभूतो वेदो भगवद्रूप इति । तदेतदेव किंचिदत्र विविच्यते—

> तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् ।
> तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं प्रवदन्ति सोऽभूत् ॥

इति भूतिमैत्रेयोक्तेः साक्षाद्विष्णुरूपः स्वयंभूः सर्ववेदोपवेदेतिहासपुराणोपपुराणवार्तादण्डनीत्यान्वीक्षिक्यादिभिः स्वोत्पन्नज्ञानविभूतिभिः सह सदैव विराजमानो वरीवर्ति । तस्मादेव च ज्ञानस्वरूपेणोपादानकारणरूपाद्भगवतो वेदविद्याविर्भाव समभवत् । तदुक्तम्—

> ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ।
> शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥
> आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः ।
> स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥

इतिहासपुराणानि पञ्चम वेदमीश्वरः ।
सर्वेभ्य एव वक्त्रेभ्य ससृजे सर्वदर्शन. ॥ (भा० तृ०) ।

इत्यादिना । तांश्च स्वस्वरूपवन्नित्यसिद्धान्वेदान्भगवान्निजाचिन्त्यशक्त्या वैधदीक्षया ब्रह्माणमुपदिदेश । एतदेवोक्तं श्रुतौ—

'यो ब्रह्माण विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति ।
अनया श्रुत्या च नित्यसिद्धानेव स्वान्त स्थितान्वेदान्प्रणवमातृकारूपेण सुसूक्ष्मान्ब्रह्ममुखेभ्य ऋगादिस्थूलरूपेणाऽऽविर्भावयामासेति तावदुच्यते । अत एव—

'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ' ॥ इति स्मृतेः ।

'वाचा विरूपनित्यया' (तै० सं० २।६।११) इति श्रुतेश्च वेदानां नित्यत्वम् । यच्चोक्तम्–'ऋचः सामानि जज्ञिरे ' (तै० आ० ३।११) इति । तत्राप्याविर्भाव एव बोध्यः । जनेः प्रादुर्भावार्थकत्वात् ।

ननु—शास्त्रयोनित्वात् (ब्र० सू० १।१।३) इति व्याससूत्रस्य का गतिरिति चेत्—तत्र योनिशब्द. प्रमाणार्थक एव बोध्यः । तेन 'तं त्वौपनिषदं पुरुष पृच्छामि' इत्युपनिषद्वेद्यत्व ब्रह्मणस्तत्सूत्र प्रशास्ति । किंच " एव वा अरेऽस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेद सामवेद. " (बृह०२।४।१०) इत्यादिश्रुतिरपि वेदानामुत्पत्ति निराकरोति । श्वासप्रश्वासादिवद्भगवान्नन्त.स्थितान्वेदाँल्लीलयाऽऽविर्भावितवानित्यस्मिन्नेवार्थे श्रुतेस्तात्पर्यात् । ननु—लीलयाऽऽविर्भावकर्तृत्वेऽपि ब्रह्मोपादानता वेदाना जातैव । तथात्वे च तेषा पौरुषेयत्व कथ न भविष्यति । न च ब्रह्मकार्यत्वेऽपि तेषा वेदाना पौरुषेयत्वं नास्ति—पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे वर्णाना नित्यत्वेऽप्यानुपूर्वीविशेषस्य पुरुषजन्यत्वान्मीमासकमन्यस्यापि वेदाप्रामाण्यप्रसङ्गात् वर्णनित्यत्वमात्रेणैवापौरुषेयत्वव्यवस्थापने लौकिकतदादिवाक्यस्याप्यपौरुषेयत्वप्रसङ्गाच्च । तस्मान्मानान्तरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वं सापेक्षत्वलक्षणाप्रामाण्यप्रयोजकम् । तच्च न वेदेषु वेदार्थस्य मानान्तरागोचरत्वात् । इदमेव हि श्रुत्या निःश्वासदृष्टान्तेन दर्शितम् ।

तथा हि—निःश्वासः पुरुषाज्जायमानोऽपि न पुरुषचिकीर्षाजन्यः सुषुप्तावपि तद्दर्शनात् । एवं समग्रो वेदो ज्ञानस्वरूपेणोपादानकारणरूपाद्ब्रह्मणो जायमानोऽपि न ब्रह्मचिकीर्षाजन्यः । वेदार्थस्य वेदातिरिक्तमानाविषयत्वात् । इत्यनया विधया ' कारणगुणा हि कार्यगुणानारभन्ते ' इति न्यायेन कारणरूपस्य ब्रह्मणो नित्यत्ववत्तदाविर्भूतवेदानामपि नित्यत्व तावत्सिद्धम ।

एतेषां वेदानां च प्रथमत प्रणवरूपेण सूक्ष्मतयाऽवस्थितिरासीत . ततः प्रणवतो मातृकाणामाविर्भावोऽभवत् । तास्ता एव मातृका या अक्षरसमाम्नायत्वेनोच्यन्ते । तस्मादक्षरसमाम्नायत एव सर्वा आन्वीक्षिक्यादयोऽष्टादशविद्या अपि ब्रह्मद्वारा संभूताः । तदेतदुक्तं श्रीमद्भागवते तृतीयस्कन्धे विदुरं प्रति मैत्रेयेण —

' ऋग्यजु सामाथर्वाख्यान्वेदादीन्मुखतोऽसृजत् । इत्यारभ्य
आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च ' इत्यादिना

' शब्दब्रह्मात्मनस्तात ' इत्यन्तेन । तत्रैतासामष्टादशविद्याना भेदाः प्रत्येकशोऽनन्तशाखावशादनन्तशः प्रसृताः सन्ति । मुख्यतया ता अष्टादशविद्याश्चाधुनोद्देशादिक्रमेण स्तोकं प्रदर्श्यन्ते—

तत्र—ऋग्यजुःसामाथर्वभेदेन वेदाश्चत्वारः । शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिःशास्त्रं छन्दोविचितिरिति षड्वेदाङ्गानि । पुराणानि न्यायविस्तर मीमासा धर्मशास्त्रमिति चत्वार्युपाङ्गानि । आयुर्वेदधनुर्वेदगान्धर्वार्थशास्त्राणीति चत्वार उपवेदा इति मिलित्वा संकलनयाऽष्टादश विद्या भवन्ति । तत्र च महापुराणेषूपपुराणानामन्तर्भाव. । न्यायनये वैशेषिकनयस्यान्तर्भावः । मीमासाया वेदान्तस्यान्तर्भावः । धर्मशास्त्रे च महाभारतरामायणयो साख्यपातञ्जलपाशुपतवैष्णवादीना चान्तर्भावः । एवमष्टादशविद्यारूपाण्येतावन्ति ह्यास्तिकाना धर्मप्रस्थानानि भवन्ति । अन्येषामेकदेशिना धर्मप्रस्थानानामेष्वेवान्तर्भावः । इत्थमिह साक्षात्परम्परया परमार्थोपयोगिना वेदोपाकरणानामेव प्रस्थानानां भेदो दिङ्मात्रेण दर्शित. ।

अथैतेषा प्रस्थानाना स्वरूपभेदहेतु· प्रयोजनभेदस्तावत्किंचिदुच्यते— तत्र धर्मप्रतिपादकमपौरुषेय वाक्य वेद. । स च मन्त्रब्राह्मणात्मक. । 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप० श्रौ० परि०) इति तत्स्वरूपस्यान्यत्रोक्तेः । तत्र मन्त्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः । ते चर्ग्यजु.सामभेदेन त्रिविधा । अथर्वणवेदस्यैतेषु त्रिष्वेवान्तर्भूतत्वेन पृथक्तयाऽनभिधानम् । तदेवं निरूपिता मन्त्रा । मन्त्रव्याख्यानरूप ब्राह्मणमपि त्रिविधम् । विधिरूपमर्थवादरूप तदुभयविलक्षण चेति । तत्र विध्यादीना लक्षणभेदादिविस्तरोऽन्यतोऽवसेयः । तदेतद्ब्राह्मण च पुनरष्टविधम् । तदुक्तं बृहदारण्यके— ' इतिहासः पुराण विद्या उपनिषद श्लोकाः सूत्राणि व्याख्यानान्यनुव्याख्यानान्यस्यैव निःश्वसितानि ' इति । तत्र कथाप्रतिपादक इतिहासः । विश्वस्य पूर्वावस्थानिरूपक पुराणम् । उपासनात्मविद्याप्रतिपादिका विद्याः । या चोपास्यदेवरहस्यप्रतिपादिका सोपनिषत् । ये मन्त्राः श्लोकवत्पठ्यन्ते ते श्लोकाः । सक्षिप्तार्थप्रतिपादकं सूत्रम् । विस्तृतार्थप्रतिपादकं व्याख्यानम् । व्याख्यानस्यापि स्फुटतापादकमनुव्याख्यानम् । एता-

न्यष्ट ब्राह्मणानि । शिक्षाकल्परहस्यादीनां च वेदसाङ्गतापादकत्वमेव मन्त्रब्राह्मणयोर्व्याख्येयव्याख्यानताभावोऽस्ति । तच्च 'मान्त्रवर्णिकम्' इति सूत्रव्याख्याने प्रतिपादितं वृत्तिकारैः । एवं च कर्मकाण्डगुणकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च हौत्राध्वर्यवौद्गात्रप्रयोगत्रयरूपेण यज्ञकर्मविभागनिर्वाहार्थं भिन्नः । अथर्ववेदस्तु चतुर्थो वेदत्रय्यवशिष्टब्रह्मत्वकर्तव्यताप्रतिपादकोऽपि (गार्ह्याणि कर्माणि) शान्तिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेन सर्वोपयोग्येव । आचार्यप्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः सन्ति । तज्ज्ञानं च चरणव्यूहाख्यवैदिकग्रन्थाद्बोध्यम् ।

अथ षण्णां शिक्षादिवेदाङ्गानां च प्रयोजनं तावदुच्यते । तत्र शिक्षाया व्याकरणस्य च सुस्पष्टवर्णोच्चारपदसाधुत्वविज्ञानार्थमुपयोगः । मन्त्रपदार्थज्ञानार्थं निरुक्तस्योपयोग. । तत्र हि निरुक्ते नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निर्वचनेन निरूप्य वैदिकपदानामर्थः प्रदर्शित. । एवमृङ्मन्त्राणां पादबद्धानुष्टुबादिच्छन्दोविशिष्टत्वात्तद्ज्ञाने च निन्दाश्रवणाच्छन्दोज्ञानार्थं पिङ्गलविरचितायाश्छन्दोविचितेरुपयोग. । एवं वैदिककर्मदर्शादिकालज्ञानार्थमादित्यप्रभृतिप्रणीतस्य ज्यौतिषस्योपयोग. । एव शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषविज्ञानायाऽऽश्वलायनसांख्यायनसत्याषाढापस्तम्बबौधायनवाधूलभरद्वाजवैखानसाग्निवेशजैमिनिमानववराहमैत्रायणीकात्यायनपारस्करलाट्यायनद्राह्यायणगोभिलखादिरकौशिकादिप्रणीतानां कल्पसूत्राणामुपयोगः । एव निरूपितः षण्णां वेदाङ्गानां प्रयोजनभेद. ।*

अथ चतुर्णामुपाङ्गानां प्रयोजनभेदस्तावत्किंचिदुच्यते । तत्र सर्गप्रतिसर्गमन्वन्तरवंशवंश्यानुचरितप्रतिपादकानि भगवता बादरायणेन निरूपितानि पुराणानि । तानि च महापुराणोपपुराणोपोपपुराणभेदाच्चतुःपञ्चाशत् । तेषां पुराणानां च सर्गप्रतिसर्गादिज्ञानं सद्धर्माचरणप्रवृत्तिदर्शनमेव सम्यक्प्रयोजनम् । न्याय आन्वीक्षिकी विद्या गौतमप्रणीता। प्रमाणप्रमेयादिषोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानान्निःश्रेयसाधिगम एव तत्प्रयोजनम् । कणादादिप्रणीतं वैशेषिकं शास्त्रमपि सप्तपदार्थवि(व्यु)त्पादनैकप्रयोजनम् । तच्च न्याय एवान्तर्भूतमित्युक्तं प्राक् ।

मीमांसा द्विविधा—धर्ममीमांसा शारीरमीमांसा चेति । तत्र (द्वादशाध्यायी) । षोडशाध्यायी । धर्ममीमांसा 'अथातो धर्मजिज्ञासा' इत्यारभ्य (अन्वाहार्ये च दर्शनात् ।) 'यथा याज्यसंप्रैषो यथा याज्यसंप्रैष.' इत्यन्ता भगवता जैमिनिना प्रणीता । तस्याश्च धर्मप्रमाणादिविज्ञानपूर्वककर्मकाण्डव्यवस्थापरिज्ञानायोपयोग. । शारीरकमीमांसा च—

* तद्विषये विशेषतोऽत्र पृथग्वक्तव्यं तदुपरिष्टाद्वक्ष्याम. ।

' अथातो ब्रह्मजिज्ञासा ' इत्यारभ्य–' अनावृत्तिः शब्दादनावृत्तिः शब्दात् ' इत्यन्ता जीवब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता । तस्याश्च जीवब्रह्मैक्यसाक्षात्कारः प्रयोजनम् ।

एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णुयमाङ्गिरोवसिष्ठदक्षशातातपपराशरगौतमशङ्खलिखितहारीतापस्तम्बोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि । वर्णाश्रमधर्मविशेषविज्ञानमेवैषां प्रयोजनम्। एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं चेतिहासत्वेन प्रसिद्धे । ते च धर्मशास्त्र एवान्तर्भूते इत्युक्तं प्राक् । एवं सर्वदेवसाधारणमन्त्रशास्त्रं श्रीमहादेवब्रह्मगौतमादिप्रणीतं धर्मशास्त्र एवान्तर्भूतम् । स्वेष्टदेवतायाः सकाशात्स्वाभीप्सितफलप्राप्तिस्तत्प्रयोजनम् । एवं निरूपितश्चतुर्णामुपाङ्गानां प्रयोजनभेदः ।

अथ चतुर्णामुपवेदानां प्रयोजनभेदस्तावत्किंचिदुच्यते । वेदचतुष्टयस्य च क्रमेण चत्वार उपवेदाः । तत्रर्ग्वेदोपवेदस्य ब्रह्मप्रजापत्यश्व्यादिनिर्मितस्याऽऽयुर्वेदस्याष्टौ स्थानानि भवन्ति । सूत्रं शारीरमैन्द्रियं चिकित्सा निदानं विमानं कल्पं प्रसिद्धिश्चेति । कामशास्त्रस्याप्यायुर्वेद एवान्तर्भावः । सुश्रुतेन वाजीकरणाख्यकामशास्त्रस्याभिधानात् । एवं समस्तस्याऽऽयुर्वेदस्य रोगतद्धेतुरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम् । तच्च मोक्षसाधनीभूतशरीरारोग्यसंपादकत्वेन मोक्षोपयोग्येव । एवं यजुर्वेदोपवेदो धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । क्षत्रियाणां स्वधर्माचरणं युद्धं दुष्टदस्युचौरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम् । एवं सामवेदोपवेदो गान्धर्वं शास्त्रं भरताचार्येण प्रणीतम् । तत्र नृत्यगीतवाद्यभेदेन बहुविधोऽर्थः प्रपञ्चितः । तस्य गान्धर्ववेदस्य देवताराधननिर्विकल्पकसमाध्यादिसिद्धिः प्रयोजनम् । रसशास्त्रं च बहुविधं भरतेनैव प्रणीतं गान्धर्ववेदान्तर्भूतम् । तच्च रसरीतिशब्दालंकारार्थालंकारनायकनायिकादिवर्णनरूपम् । अथार्ववेदोपवेदोऽर्थशास्त्रम् । तच्चैहिकसर्वसुखोपलब्धिप्रयोजनम् । अत्र च तदनुसार्येव नीतिशास्त्रमपि मन्वादिभिः सूत्रितं कामन्दकादिभिः प्रणीतम् । तत्संधिविग्रहादिभेदैरनेकधा । लौकिकसर्वव्यवहारनैपुण्यमेव तत्प्रयोजनम् । एवमश्वशास्त्रं गजशास्त्रं शिल्पशास्त्रं सूपशास्त्रं चतुःषष्टिकलाशास्त्रं चेति नानाशास्त्राणि शालिहोत्रादिनानामुनिभिः प्रणीतानि । तेषां च सर्वेषां लौकिकतत्तत्प्रयोजनभेदो द्रष्टव्यः ।

एवमष्टादश विद्याः सप्रयोजनाः संक्षेपतो नामनिर्देशेन प्रोक्ताः । एवमेव कपिलमुनिप्रणीतं सांख्यशास्त्रं पतञ्जलिमुनिप्रणीतं योगशास्त्रं भगवता पशुपतिना निर्मितं पाशुपतशास्त्रं नारदादिभिः कृतं पाञ्चरात्रादिकं वैष्णवशास्त्रं चेत्येवमादिर्वेदानुकूलः प्रस्थान-

भेदः प्रदर्शितः । इत्थं हि वेदराशिमयस्य भगवतो ज्ञानमयं शरीरमित्याख्यायते । एतस्माद्वेदमयाद्ब्रह्मण एव सकलसृष्ट्युत्पत्त्यादिव्यवस्था प्रचाचलीतीति सर्वमनवद्यम् ।

अथ प्रकृतमनुसरामः । यदुक्तं प्राग्वेदमयस्य भगवत (उपाङ्गेषु) अङ्गेषु परिगणनमिति । तद्विषयेऽधुना किंचिद्विवेकः प्रस्तूयते—'यदृचोऽध्यगीषत' (तै० आ० २।९) इत्युपक्रम्य ' पुराणानि कल्पान् ' (तै० आ० २ । ९) इति कल्पाः । ' कल्पसूत्राणि प्रयोगप्रतिपादकानि' इति माधवः । तथा चाथर्ववेदीयगोपथब्राह्मणे—'एवमिमे सर्वे वेदा निर्मिताः सकल्पाः ' (गो० पू० प्र० २ ९) इति । तथा च मुण्डकोपनिषदि—'तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते' (मु० १।१।५ इति । कल्पः सूत्रग्रन्थः । अनुष्ठेयक्रमः कल्प इत्यर्थः ।

कल्पसूत्राणां स्वतःप्रामाण्याधिकरणे (जै०सू० १।३।७) । कल्पसूत्राणि किं स्वतन्त्रतया प्रमाणमुत परतन्त्रतयेति विप्रतिपत्तौ तानि पौरुषेयाणि—उतापौरुषेयाणीति चिन्तायां प्रामाण्यान्यथानुपपत्तेरपौरुषेयत्वेन स्वतन्त्रतया प्रामाण्यमेव कल्पसूत्रादीनामिति ब्रूमः । मूलकल्पने गौरवात् । ' षडङ्गमेके ' इति स्मरणात् । कल्पसूत्रेषूपलभ्यमानानां प्रत्यक्षश्रुतिवाक्यानां पौरुषेयत्वे सार्थक्यस्य दुरुपपादत्वात् । सत्याषाढीयादिसमाख्यानां शाकलादिवदुपपत्तेः । ' पुराणानि कल्पान् ' (तै० आ० २।९ १०) इति कल्पानामपि अध्ययनविधिदर्शनाच्चेति पक्षोपक्षेपः । तन्निराकरणं च—सत्याषाढीयादिसमाख्यानां दृढकर्तृस्मरणात्प्रवचननिबन्धनत्वायोगेन पौरुषेयत्वस्याक्षतत्वात् । दुर्बोधोपसंहारार्थेषु कल्पेषु सुबोधकैः शब्दैः प्रत्यक्षनिबन्धनस्याप्यावश्यकत्वात् । नित्यब्रह्मयज्ञविधिविषयत्वस्य प्रवाहनित्यतयाऽप्युपपत्तेश्च न स्वतन्त्रतया कल्पसूत्रजालं प्रमाणमिति । अर्थवादाभावोऽप्यत्र कल्पस्यावेदत्व एव लिङ्गम् । प्रयोजनं च—'सर्वोऽपरपक्षः' (खा० गृ० ७।१) इत्याद्यशेषु संनिहिताभिः—'अमावास्याय म् ' (स० सू० १।३।१९) इत्यादिप्रत्यक्षश्रुतिभिर्बाधितेषु कल्पसूत्राणामप्रामाण्यम् । अत्र भाष्यकृदभिमतं ' सर्वोऽपरपक्ष. ' इत्याद्युदाहरणं चिन्त्यम् । पूर्वपक्षापरपक्षयोरपि दर्शपूर्णमासकालत्वस्य प्रत्यक्षश्रुतिसिद्धत्वात् । दर्शपूर्णमासकालातिक्रमप्रायश्चित्तपथिकृदिष्टेस्तत्समानतन्त्रतानिन्दापूर्वकं दार्शपूर्णमासिकस्याऽऽग्नेययागस्यैव पथिकृद्गुणकत्वविधायिन्या सूत्रकाराद्युदाहृतायाम्–' अथैकेषां विवा एतस्य ' (स० श्रौ० १९।३।२) इत्यादिशाखान्तरीयश्रुतावनवगम्यमानया निन्दया नहि निन्दान्यायेन पथिकृद्गुणकत्वप्रशंसामात्रपरया विकल्पेन समानतन्त्रताया अपि शाखान्तराभिमतत्वेनानुमिते ' समानतन्त्रे

वा ' (स० श्रौ० १५।४।२) इत्यादिभिः सत्याषाढादिवाक्यैरनुगृहीताया अन्यथा-नुपपत्त्या कालान्तरेऽपि दर्शपूर्णमासकरणस्य संभवाच्च । यच्च वार्तिकादिषु— 'अविशेषादुभौ वा' (का० श्रौ० ३।८४) इत्यादिसूत्राणां श्रुतिविरोधेन तत्तन्न्यायाभासमूलकतया चाप्रामाण्यमभिप्रेत तदप्यनुपपन्नमिति द्रष्टव्यम् ।

अयं च सत्याषाढाख्यसूत्रकारः कस्मिन्नदीतीरे कस्मिन्क्षेत्र आसीदिति वृत्तं किंचिन्निवेदयामः ।

महर्षिवैशम्पायनवंशसंभूतो महामुनिः सत्याषाढः सह्याद्रेः पूर्वभागे परशुरामक्षेत्रे वा हरणकाशीनदीतीरे बभूवेति स्कन्दोपपुराणतोऽवगम्यते । एकदा मुनिः सत्याषाढः स्वाश्रममागच्छन्तं परमपूज्यं वेदव्यासमपश्यत् । यथावत्कृतातिथ्यं सुस्थितं च तं पप्रच्छ देवेषु कः श्रेष्ठ इति । तदा तस्य मुखाच्छिव एव श्रेष्ठ इत्यवगत्य तपसे हरणकाशीं ययौ । ततश्च तपसा सुसंतुष्टः शंकरः प्रत्यक्षीभूय तस्मै वरानिष्टान्वितताार । एवं शिवप्रसादतोऽधिगतदिव्यचक्षुर्मुनिः सत्याषाढो हिरण्यकेशी सर्वत्र पूज्यो बभूवेति सुविदितमेव प्रायो निगमविदाम् । तस्य च सूत्रानुयायिनः परशुरामक्षेत्रे (देशे देशे) बहवो निवसन्ति । तस्मिन्सूत्रे पदार्थाश्च संक्षेपतो लिख्यन्ते—

' व्यासाद्गुरोरधिगतार्थयजुःसमाख्य-
वेदप्रवर्तकमुनेरधिगत्य शाखाम् ।
देहेन तित्तिरखगाकृतिना मुनीन्द्रा
नध्यापयन्मुनिवरो व्यभजत्स्वशाखाम् ॥
हिरण्यकेशी भगवान्सत्याषाढाभिधानकः ।
सप्तविंशतिप्रश्नाख्यं कल्पसूत्रमुदैरयत् ॥
आद्यप्रश्नद्वये दर्शपूर्णमासौ सुविस्तरौ ।
तृतीये साङ्गमाधानमग्निहोत्रसमन्वितम् ॥
चतुर्थे पशुबन्धं च चातुर्मास्यानि पञ्चमे ।
षष्ठे हविर्याजमानं प्रवासविधिमे(रे)व च ॥
ज्योतिष्टोमाध्वर्यवं च त्रिभिः प्रश्नैरुदैरयत् ।
दशमे तद्याजमानं ब्रह्मत्वं दक्षिणाविधिम् ॥
प्रश्नद्वयेऽग्निचयनमुखासंभरणादिकम् ।
त्रयोदशे वाजपेयमश्वमेधं चतुर्दशे ॥
ततः पञ्चदशे प्रश्ने प्रायश्चित्तं सविस्तरम् ।
अग्निहोत्रं चैष्टिकं च पाशुकं सौमिकं तथा ।

षोडशे तु द्वादशाहं महाव्रतविधिं गवाम् ।
ततः सप्तदशप्रश्ने एकाहाहीनसत्क्रियाम् ॥
अष्टादशे ततः प्रश्ने सत्राणि विविधानि च ।
एकोनविंशे विंशे तु गृह्यकर्मविनिर्णयम् ॥
अथैकविंशे प्रश्ने तु हौत्रप्रवरनिर्णयौ ।
काम्येष्टिकाम्यपशवः प्रश्ने द्वाविंश ईरिता ॥
त्रयोविंशे च कौकिलीं सौत्रामणीं सकाठकाम् ।
चतुर्विंशे प्रवर्ग्यं च सप्रायश्चित्तकं तथा ॥
पञ्चविंशे विशेषेण विहारयोगनिर्णयम् ।
षड्विंशे सप्तविंशे तु सर्वधर्मानशेषतः ॥
एवं सामान्यतः सर्वप्रश्नानामर्थसंग्रहः ।
पुनरेव हविः सोमः पाकयज्ञ इति त्रिधा ॥
अग्निहोत्रं दर्शपूर्णमासावाग्रयणं पशुः ।
चातुर्मास्यं पिण्डयज्ञः सौत्रामणी हविः क्रियाः ॥
अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यषोडशिनौ तथा ।
वाजपेयातिरात्राप्तोर्यामाः सोमक्रतोर्भिदाः ॥
होमौ पाकावमाश्राद्धं माग्यावर्षं तथाऽष्टकाः ।
श्रवणाकर्माग्रहायणीः पाकयज्ञाः स्मृता बुधैः ॥

इत्थेव भगवान्सत्याषाढः सप्तविंशतिप्रश्नात्मके सूत्रे श्रौतगार्ह्यसामयाचारिकान्धर्मान्व्याख्यातवान् ।

ननु—'चोदनालक्षणोऽर्थो धर्मः' (जै० सू० १ । १ । २) इत्यत्र परोक्षापरोक्षद्विविधचोदनाया अपि संग्रहो विद्यत इति प्रत्यक्षवेदस्य विधिमन्त्रार्थवादरूपस्य प्रामाण्यविचारानन्तरं परोक्षतद्वाक्यप्रामाण्यविचार इत्युपपन्नम् । परोक्षत्वं चेदं न मन्वादिदृष्ट्या किंत्वस्मदादिदृष्ट्या । मन्वादीनां तु तदपि प्रत्यक्षमेव । परंतु तत्तद्वाक्यं मन्वादिस्मृतिमूलभूतं विप्रकीर्णशाखागतमिति न तस्यापि मन्वादिभिः संप्रदायोच्छेदादिभिया पाठनं स्वकीयस्मृतीनामिव कृतमिति न दोषः ।

अयं भावः—'स्वाध्यायोऽध्येतव्यः' (तै० आ० २। १५) इति विधिवाक्ये अध्यायस्य स्वत्वविशेषणादेकवेदगतस्वपरम्पराप्राप्तशाखाध्यायनम् ।

'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्' ।

इति वचनाद्वेदान्तरीयसर्वशाखाध्ययनं च विधीयते । तथा च कृष्णयजु.शाखाध्यायिना यजुर्वेदगतशुक्लयजु.शाखाध्ययनादिकं, ऋग्वेदगतस्वपरम्पराप्राप्तैकशाखाध्यायिना तद्वेदगतशाखान्तराध्ययनं च निषिद्धं गम्यते । गुणोपसंहाराधिकरणे च (३ । ४ । २) सर्वशाखीयाना धर्मे सर्वैरनुष्ठानं कर्तव्यमसति विरोधे, सति तु विरोधे व्यवस्थितविकल्पादिकं निरूपितम् । तथा च शाखान्तरीयाणां धर्माणां शाखान्तरीयवाक्याध्ययनासंभवात्तेषामप्रत्यक्षत्वेऽपि मन्वादिस्मृतिमात्रपर्यालोचनया तादृशं किमपि वाक्यं शाखान्तरे स्यादिति विश्वासेन तदर्थानुष्ठानमावश्यकम् ।

तत्र च मन्वादिभिः स्वसाक्षात्कृतस्यापि शाखान्तरीयवाक्यस्याध्ययनं यदि क्रियेत तर्हि 'स्वाध्यायोऽध्येतव्य.' (तै० आ० २ । १९) इति विधिविच्छेदः कृतः स्यात् ।
सत्याषाढादिकल्पसूत्रकारमते ह्यपूर्वस्य फलदातृत्वम् । आपातत ईश्वरानङ्गीकारः । मन्त्रमयी देवता, न विग्रहवती । अतीन्द्रियसुखाभावः । क्रियापरः सर्वो वेदः । वटबीजवत्संसारोऽनादिः । स्वर्गसुखप्राप्तिरेव कर्मणा मोक्षः । क्रियान्विते शब्दशक्तिः । अख्यातिवादः । सर्वं ज्ञानं प्रमैव । स्थूलशरीराद्भिन्न आत्मा परमार्थनित्यः । धर्मस्य (कर्मणः) परमेश्वरबुद्ध्या निष्कामतयाऽऽचरणेऽन्त करणशुद्ध्या क्रमेण ब्रह्मात्मैक्यज्ञानेन कैवल्यमुक्तिरिति सत्याषाढगुरोर्व्यासमतं ब्रह्मकाण्डसिद्धान्तश्च ।

शास्त्रान्तरेषु यावन्ति पुस्तकान्यतिगभीराणि दुरवगाहाणि च वर्तन्ते ततोऽन्यून तानि कल्पसूत्रेऽपि विद्यन्त इति न वयमल्पज्ञा पारयामोऽस्य परिच्छेत्तुं गभीरतादिकम् ।

अस्य सत्याषाढसूत्रस्य प्राचीनं कौशिकगोत्रोत्पन्नभट्टमहादेवकृतवैजयन्तीव्याख्यानं विस्तृत प्रथमषट्कान्त, तत. सप्तमप्रश्नादारभ्य दशमान्त गोपीनाथभट्टकृतं ज्योत्स्नावृत्तिनामकं व्याख्यानमुपलभ्यते संमुद्रित च । तत एकादशप्रश्नादारभ्यापरं नूतन प्रयोगचन्द्रिकाव्याख्यान महादेवदीक्षितसोमयाजिसकलित स्वतन्त्रम् । अत्रेदानीं मुद्रितुमारब्ध भागश. सत्वरं प्रकाश्यतेति विज्ञाप्य श्रीमता विनायक गणेश आपटे बी. ए. तथा श्रीमता दत्तात्रेय विष्णु आपटे बी. ए. आनन्दाश्रमव्यवस्थापकानां चाऽऽयुरारोग्यादि संपदे भगवन्तमुमारमण रमारमण च सविनयं प्रार्थयते—

पुण्यपत्तने. कार्तिकवदि द्वादश्यामिन्दुवासरे शके १८४९ प्रभवसंवत्सरे	धारवाडग्रामनिवासी दण्डवत्युपाह्वत्रिकाण्डमण्डनाचार्य- महादेवदीक्षितः सोमयाजी ।

सत्याषाढचयनसूत्रोपोद्घातः ।

सत्याषाढ नमस्कृत्य महादेवः सतां मुदे ।
तनुते तत्प्रसादेन करणीमिष्टका शुभाम् ॥

अथ द्वितीयश्येनस्यैकविधस्येष्टकाकरणानि वक्ष्यन्ते । तत्राऽऽदौ पुरुषप्रमाणानयनम् । ' विधासप्तमकरणी पुरुषस्थानीया कृत्वा विहरेत् ' (स० शु० सू० २९ । ९) इति शुल्बसूत्रम् । यावत्योऽग्नेर्विधा सन्ति तासा सप्तम या करोति सा विधा सप्तमकरणी । ता पुरुषस्थाने कृत्वा तया चाऽऽत्मपक्षपुच्छानि विहरेत् । अयमर्थः-यद्येकविधोऽग्निस्तं पञ्चदशधा विभज्य द्वौ भागौ समस्य समचतुरश्र कृत्वा तस्य प्रमाण पुरुषस्थाने कृत्वाऽनेनाऽऽत्मपक्षपुच्छानि विहरेत् । एवमेव द्विविधादिषु कुर्यात् । चत्वारि सहस्राण्यशीति. सप्तमकरणीति ता (पुरुष·) तेषा वर्ग एककोटिः षट्त्रियुतानि षड्युतानि चत्वार्ययुतानि षट्सहस्राणि चत्वारि शतानि । ष्यष्टविधं पुरुषवर्गमष्टाभिर्गणयित्वा पूर्वराश्यर्धेन संयोज्य तत्पञ्चदशभिर्विभज्य लब्ध द्विगुणीकृत्य मूले गृहीते (स) तस्य पुरुषो भवति । अपचये त्वरत्निप्रादेशानामभावान्नार्धसयोग इतरदुपचयवदिति ।

अथ पुरुषानयनप्रकार. । विधासप्तमकरण्या अङ्गुलयः १२० । एत एव चतुस्त्रिंशताऽङ्कैः ३४ गुणिताश्चे ४०८० त्तिला भवन्ति । एते तिला एतैरेवाङ्कैर्गुणिता १६६४ ६४०० वर्गसज्ञा भवन्ति । वर्गेषु १५० भक्तेषु सत्सु लब्धाङ्का: ११०९-७६० । लब्धाङ्केषु द्विगुणितेषु सत्सु प्राप्ताङ्काः २२१९५२० । एतेषामङ्काना त्यक्त्वाऽन्त्याद्विषमाद्वर्गं मूल द्विघ्न न्यसेत्समे तद्धृते लब्धवर्गं हित्वाऽग्राद्विषमात्पुनः, इति रीत्या मूलगणिते कृते लब्धमूलाङ्का. १४८९ एते च तिलाः । एतेषु ३४ भक्तेषु सत्सु ४३ अङ्गुलय. अवशिष्टाः २७ तिला मूलावशेषितं सैकमिति रीत्या शिष्टतिलेष्वेकाङ्के मिलिते अङ्गुलयः ४३ तिला २८ अयमेकविधस्याग्नेः पुरुषो भवति । एतत्प्रमाणेनैव शुल्बोक्तप्रकारेणाग्निमानेष्टकाकरणादीनि विधेयानि ।

तत्रेयं प्रक्रिया—अष्टाविंशतितिलाधिकत्रिचत्वारिंशदङ्गुलप्रमाणः पुरुषः ४३ तिलाः २८ । एकत्रिंशत्तिलाधिकैकविंशत्यङ्गुलय २१ तिलाः ३१ पुरुषार्थम् । सार्धद्वात्रिंशत्तिला अधिकदशाङ्गुलयः १० तिला. ३२ पुरुषचतुर्थोऽशः । अष्टमांशो नवतिलाधिकषडङ्गुलयः ६ तिलाः ९ पुरुषसप्तमः सपादषोडशतिलाधिपञ्चाङ्गुलयः ५ तिलाः १६ पुरुषाष्टमोऽष्टमाशसहितपञ्चविंशतितिलाधिकाङ्गुलिद्वयं २ तिला. २५ पुरुषषोडशोष्टादशतिलाधिकपञ्चदशाङ्गुलय· १५ तिला. १८ पुरुषचतुर्थ. सविशेषः षड्विंशतितिला अधिकसप्ताङ्गुलयः ७ तिलाः २६ चतुर्थं सविशेषार्धं पादोनपञ्चदशतिला अधिकषोडशाङ्गुलयः १६ तिला· १४ त्रिगुणिताष्टमः पञ्चविंशतितिला अधिकचतु

दशाङ्गुलयः १४ तिलाः २९ पक्षेष्टकादीर्घकरणी दशतिलाधिकदशाङ्गुलयः १० तिलाः १० पक्षेष्टकाह्रस्वकरणी द्वाविंशतितिलाधिकाङ्गुलिद्वय २ तिलाः २२ पक्षकरणीसप्तमः—अष्टमांशेन त्रयोविंशतितिलाधिकपञ्चाङ्गुलय· ५ तिलाः २३ पक्षकरणीसप्तमः। पक्षायामस्त्रयोदशतिलाधिकनवत्यङ्गुलयः ९० तिला· १३ चतुर्दशतिलाधिकैकोनाशीत्यङ्गुलयः ७९ तिलाः १४ पक्षाग्रव्यतिरिक्तपक्षायामश्चतुर्विंशतितिलाधिकैकोनचत्वारिंशदङ्गुलयः ३९ तिलाः २४ पक्षकरणी अष्टादशतिलाधिकाष्टादशाङ्गुलयः १८ तिलाः १८ पक्षनमनी। सप्तदशतिलाधिकषट्चत्वारिंशदङ्गुलयः ४६ तिलाः १८ अष्टादशकरणी।

अत्र प्रक्रियायामुदाहृतप्रमाणाना केषांचिदिष्टकासूपयोग। केषांचिदग्निमाने।

अथेष्टकाकरणानि। तत्र तावद्द्वितीयश्येनेष्टका· षड्विधा· षोडश्यर्धा पादा पक्षा पक्षमध्यीया पक्षाग्रीया इति।

तत्राऽऽदौ षोडशी। षोडशीं चतुर्भि· परिगृह्णीयादष्टमेन त्रिभिरष्टमैश्चतुर्थेन चतुर्थसविशेषेण इति सूत्रम्। अस्यार्थ·—षोडशीसञ्ज्ञकामिष्टका चतुर्भि· फलकैः सपादयेत्। अष्टमेन सपादषोडशतिलाधिकपञ्चाङ्गुलिकेनैक फलकम्। त्रिभिरष्टमै, त्रिगुणिताष्टमेनेत्यर्थः। पादोनपञ्चदशतिलाधिकषोडशाङ्गुलिकेनैकं, इमे पार्श्वफलके। चतुर्थेन सार्धतिलोनैकादशाङ्गुलिकेनैकं तिर्यक्। चतुर्थसविशेषेण अष्टादशतिलाधिकपञ्चदशाङ्गुलिकेनैकमक्ष्णया तिर्यक्। इमे तिर्यक्फलके। एव चत्वारि। एतै· फलकै· षोडशी कार्या। एवमग्रेऽपि ज्ञेयम्।

अथार्धेष्टकाः। अर्धेष्टका त्रिभिर्द्वाभ्यां चतुर्भ्यां चतुर्थसविशेषणेति। अस्यार्थः पूर्ववत्। चतुर्थाङ्गुलयः (चतुर्थम्—अङ्गुलय) १० तिला ३२। एव द्वे चतुर्थसविशेषः। अङ्गुलयः १५ तिला· १८ इदमेकम्। एव त्रीणि फलकानि। एतैरर्धेष्टका कार्या। इय त्रिकोणा।

अथ पादेष्टका·। 'पादेष्टका त्रिभिश्चतुर्थैनैक चतर्थसविशेषार्धाभ्या च' इति। अर्थः पूर्ववत्। चतुर्थ, अङ्गुलयः १० तिला· ३२ इदमेकम्। चतुर्थसविशेषार्धेऽङ्गुलयः ७ तिलाः २६ इमे द्वे। एवं त्रिभिः फलकै· पादेष्टका कार्या। इयमपि त्रिकोणा।

अथ पक्षेष्टकाः। पक्षेष्टका चतुर्भिर्द्वाभ्या चतुर्थाभ्या सप्तमाभ्या चेति। अर्थः पूर्ववत्। चतुर्थमङ्गुलयः १० तिलाः ३२ इमे द्वे पार्श्वे फलके। सप्तमम्—अङ्गुलयः ६ तिलाः ९ इमे द्वे फलके तिर्यक्। एतैश्चतुर्भि· फलकै· पक्षेष्टका कार्या।

दीर्घचतुरश्रं कृत्वाऽनन्तरं नमयेत्। नमनप्रकारमाह सूत्रकार·—'पक्षकरण्याः सप्तम तिर्यङ्मानी पुरुषचतुर्थं च पार्श्वमानी तस्या अक्ष्णया रज्ज्वा करणं प्रजम्भयेत्'

---

१ नक्षनमनी सप्तम। २ चेति।

इति । अस्यार्थः-पूर्वोक्तप्रकारेण दीर्घचतुरश्रं चतुष्फलकैः कृत्वाऽऽग्नेयकोट्यामेकां रज्जुं प्रबद्ध्य वायव्यकोट्यामेकां रज्जुं प्रबध्य च बलेन रज्ज्वाऽऽकर्षयेत् । यथा कर्षणे कृते पार्श्वमान्योरन्तरालमृजुत्वेन पक्षकरणी सप्तमेन किंचिदूनत्रयोविंशतितिला-धिकपञ्चाङ्गुलिकेन समं भवति तथाऽऽकर्षयेत् । तिर्यङ्मान्योरन्तरालं तु पुरुषचतुर्थ-मेकं न तस्य ह्रासः किंतु पार्श्वमान्योरन्तरालस्यैव । एवं च वायव्यकोणमारभ्याऽऽग्नेय-कोणपर्यन्तं पञ्चविंशतितिलाधिकचतुर्दशाङ्गुलयो १४ तिलाः २५ भवन्ति । नैर्ऋत्य(र्ती)-कोणमारभ्यैशानीपर्यन्तं दशतिलाधिकदशाङ्गुलयः १० तिलाः १० भवन्ति । अथ पक्ष-मध्यीयाः । पक्षमध्यीया चतुर्भिर्द्वाभ्यां द्विसप्तमाभ्यां चेति । अर्थः पूर्ववत् । चतुर्थे अङ्गु-लयः १० तिलाः ३२ इमे द्वे पार्श्वे फलके । द्विसप्तमेऽङ्गुलयः १२ तिलाः १७ इमे द्वे तिर्यक्फलके । एवं चतुर्भिः फलकैः पक्षमध्यीया कार्या ।

एवं दीर्घचतुरश्रं कृत्वाऽनन्तरं नमयेत् । नमनप्रकारमाह सूत्रकारः—'पक्षनमन्याः सप्तमेन फलकानि नमयेत्' इति । अस्यार्थः—पूर्वोक्तचतुरश्रस्य द्विसप्तमात्मकफलकयो-र्मध्यभागौ संनमयेत् । अथ (त्र) मध्ये नमने कृते पक्षमध्यीया भागद्वयं पक्षकरण्या सप्तमेन किंचिदूनत्रयोविंशतितिलाधिकपञ्चाङ्गुलिकेन समं भवति, तथा नमयेत् । तिर्य-ङ्मान्योरन्तरालं तु पुरुषचतुर्थमेव । अष्टादशतिलाधिकाष्टादशाङ्गुलात्मकपक्षनमन्याः सप्तमेन द्वाविंशतितिलाधिकद्व्यङ्गुलात्मकेनैकस्मिन् तिर्यक्फलकमध्यभागे उन्नतिं चैक स्मिन्निम्निर्ति (म्नतां) च कुर्यात् ।

तथा चायं निष्कर्षः । एकां पक्षेष्टकामाग्नेयोन्नतकोणां संस्थाप्य तद्दक्षिणतोऽन्यामी-शानोन्नतकोणां संश्लेषयेत् । संश्लिष्टमध्यफलके द्वे उद्धरेत् । एवं कृते पक्षेष्टकाद्वयपरि-मिता षट्कोणा भवन्ति ।

अथ पक्षाग्रीयाः । पक्षाग्रीया त्रिभिश्चतुर्थेनैकं चतुर्थसप्तमाभ्यामेकं चतुर्थसविशेष-सप्तमाभ्यां चेति । अर्थः पूर्ववत् । चतुर्थे—अङ्गुलयः १० तिलाः ३२ । इदं पार्श्व-फलकम् । चतुर्थसप्तममङ्गुलयः १७ तिलाः ७ चतुर्थसविशेषसप्तम—अङ्गुलयः २१ तिलाः २७ इमे द्वे तिर्यक्फलके । एवं त्रिभिः फलकैः पक्षाग्रीया कार्या ।

एवं चैशानोन्नतकोणामेकां पक्षां संस्थाप्य तद्दक्षिणतः पूर्वभागस्थचतुर्थसविशेष-पूर्वफलकामर्धां संश्लेषयेत् । संश्लिष्टमध्यफलके द्वे उद्धरेत् । एवं कृते पक्षेष्टकार्धेष्ट-कोभयपरिमिता पञ्चकोणा भवन्ति । एवं षड्विधाः । सहस्रचितिपक्षे षड्विधेष्टकाना प्रत्येकैकाः संख्याः—षोडश्यः (१९२) अर्धेष्टकाः (१०४) पादेष्टकाः (१६८) पक्षेष्टकाः (४६४) पक्षमध्यीयाः (२४) पक्षाग्रीयाः (४८) इति संभूय संख्याः (१०००) एतासामिष्टकानामाकाराः प्रदर्श्यन्ते—आदौ षोडश्या -अर्धेष्टकायाः—पादे ष्टकायाः—पक्षेष्टकायाः ।



अथ गार्हपत्यधिष्णियानां चतुरश्रकरणत्वमित्येकः पक्षः पीरमण्डल-

मित्यपरः. तत्र चतुरश्र पक्षे करणानि आकारः परिमाणं

च वक्ष्यन्ते



होतुर्धिष्णियाकार



आग्नीध्रीयधिष्णियाकार·



अथ प्रशास्तृ पोतृ नेष्टृच्छावाक उगमित्र चात्वालावभृथधिष्णियाना

करणानि, आकार परिमाणंच प्रदर्श्यन्ते।

प्रशास्त्राद्यष्टाना धिष्णियाकार·



मार्जालीयधिष्णियेष्टकाकार:



षोडश्यादयः सर्वा इष्टकाः सार्धत्रयोदशतिलाधिकषडङ्गुलोच्छ्रायाः कार्याः। एतासां पाकवशेन प्रमाणह्रास उपधानकाले पुरीषेण ता पूरयेत्। ब्राह्मणाच्छंसिधिष्णियेष्टका एकादश (११) तासा मध्ये नवहोतृधिष्णियेष्टका (९) द्वे होत्रकधिष्णियेष्टके एवमेकादश (११)। अथवा प्रशास्त्रादिधिष्णियाना करणमपि नास्त्येव। होतुमार्जालीयधिष्णियाभ्या, एव चरितार्थत्वात्। संप्रदायवशादत्र प्रदर्शितमस्माभिः। एवं धिष्णियानां पञ्च करणानि। एकविधेऽग्नौ। गार्हपत्यातिरिक्तधिष्णियानां चतुर्विंशत्यङ्गुलसमचतुरश्रता। परस्परमष्टादशाङ्गुलः संचारः (संचरः) सदसि पृष्ठ्याया दक्षिणत उत्तरतश्च द्वादशाङ्गुल इति। होतुर्धिष्णियदक्षिणतः प्रशास्तुः—उत्तरतो ब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकानामाग्नीध्रीयादयः स्वस्वस्थानीयाः (स्थानेषु)।

अथ विहारः। तत्र साग्निक्या वेदेर्द्विपदक्रमेण प्रमाणम्। एकविधे तु द्वादशाङ्गुलप्रमाणं पदम्। चतुर्विंशत्यङ्गुलात्मकप्रक्रमेण विमानम्। आदौ पञ्च पञ्चदशारत्न्यायामा त्रिंशदरत्निविस्तरां देवयजनयोग्या भूमिं कृत्वा प्राक्पश्चिमप्रान्तमध्यदेशे शङ्कू निखाय तयोः शङ्क्वो रज्जु प्रसारयेत्। एषा रज्जुः पृष्ठ्यासंज्ञिका। पश्चिमनिहिताच्छङ्कोः पुरस्तादनुपृष्ठ्यं षोडशप्रक्रमे शङ्कुः। प्रथमशङ्कोर्दक्षिणतः षट्प्रक्रमे शङ्कुः। एवमुत्तरतः। द्वितीयशङ्कोर्दक्षिणतः षट्प्रक्रमे शङ्कुः। एवमुत्तरतः। एवं षोडशारत्न्यायामो द्वादशारत्निविस्तारः प्राग्वंशः। प्राग्वंशस्य पुरस्तादनुपृष्ठ्यं त्रिषु प्रक्रमेषु शङ्कुः। एष शङ्कुर्महावेदेः पश्चिममर्यादा।

अथ महावेदिः पूर्वोक्तवेदिमर्यादा शङ्कोः पुरस्तादनुपृष्ठ्यं विंशतिशङ्कवः। पृष्ठ्यान्तप्राचीशङ्कुमर्यादाशङ्कुभ्यां सह द्वाविंशतिः। तथाहि मर्यादाशङ्कुः प्रथमः। ततः—त्रया (३) ङ्के (६) के (१) क (१) भू (१) चन्द्र (१) दृक् (२) चन्द्र- (१) द्वय (२) वह्निषु (३)। भू (१) द्व्ये (२) क (१) द्वि (२) तथैकेषु (१) तथा द्व्ये(२) कै (१) क (१) भूमिषु (१)। आदिमेन सहैवात्र स्युर्द्वाविंशतिशङ्कवः। (इति) एतत्संख्याव्यवहितेषु प्रक्रमेषु शङ्कून्निहन्यात्। ततः षट्त्रिंशत्परिमितामेकां रज्जुमुभयतःपाशां कृत्वा तस्या षोडशप्रक्रमे कर्षणार्थं लक्षणं कुर्यात्। अस्यां षोडशिका तिर्यङ्मानी विंशतिका अक्ष्णया रज्जुः। अन्या रज्जुं द्वादशप्रक्रमपरिमितामुभयतःपाशां कुर्यात्। अस्या द्वादशिकेति सञ्ज्ञा। विमानकाले अभिमतशङ्कुषु द्वादशिका प्रसार्य तयोः शङ्क्वोरेव षट्त्रिंशिका, पाशौ प्रतिमुच्य वक्ष्यमाणस्थानानि कल्पयेत्। आद्यषष्ठयोर्द्वादशिका प्रसार्य तत्रैव षट्त्रिंशिका पाशौ प्रतिमुच्य षोडशिका पश्चिमत. कृत्वा लक्षणेनापायम्य प्रथमशङ्कोर्दक्षिणतः पञ्चदशे शङ्कुः। एवमुत्तरतः। इयं महावेद्याः पश्चिममर्यादा। एवमग्रेऽपि विमाने क्रमो ज्ञेयः। द्वितीयशङ्कोर्दक्षिणतो दशप्रक्रमे शङ्कु। उत्तरतोऽष्टप्रक्रमे शङ्कुः। एषा सदसः पश्चिममर्यादा। तृतीयचतुर्थयोः शङ्क्वोर्दक्षिणतो द्वादशाङ्गुले शङ्कुः। एवमुत्तरतः। अयं होतुर्धि-

ष्णियोऽरत्निपरिमित समचतुरश्रो भवति । परस्परमष्टादशाङ्गुल संचरोऽवशिष्यते । होतुर्धिष्णियस्य दक्षिणत प्रशास्तु, तद्दक्षिणतो ब्रह्मसदनम् । होतुर्धिष्णियस्योत्तरतो ब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाना धिष्णिया होतृधिष्णियवत्कार्या । षष्ठशङ्कोः पूर्ववत्सदो विमायाम्मादेव शङ्कोरुत्तरत एकादशप्रक्रमे सप्तदशप्रक्रमे च शङ्कू । एषाऽऽग्नीध्रमण्डपस्य पश्चिममर्यादा । अष्टमशङ्कोर्दक्षिणतो द्वादशप्रक्रमे शङ्कुः । एष मार्जालीयस्य मध्यशङ्कुः । एवमुत्तरतः । एष आग्नीध्रीयस्य मध्यमशङ्कुः । नवमशङ्कोर्दक्षिणतः सार्धप्रक्रमचतुष्टये शङ्कु । एवमुत्तरत. । इय हविर्धानस्य पश्चिममर्यादा । दशमशङ्कोरुत्तरतः पूर्ववदाग्नीध्रमण्डप. । त्रयोदशशङ्कोरुत्तरतश्च चतुर्दशप्रक्रमे शङ्कु । अयमुत्कर । ततः षट्त्रिंशिकाया पाशयोर्विपर्यास कुर्यात् । चतुर्दशशङ्कोर्दक्षिणत उत्तरतश्च पूर्ववद्धविर्धानम् । विंशतिशङ्कोरुत्तरत सार्धपञ्चदशप्रक्रमे शङ्कु । एष शामित्रः पूर्वप्रान्तशङ्कोर्दक्षिणतो द्वादशप्रक्रमे शङ्कु. । एवमुत्तरत. । इमौ महावेद्या असौ । इय महावेद्याः प्राङ्मर्यादा । अस्मादेव शङ्कोरुत्तरतस्त्रयोदशप्रक्रमे शङ्कु । एषा चात्वालदक्षिणमर्यादा । दक्षिण(तो) हविर्धानस्य पश्चात्सार्धप्रक्रमद्वय त्यक्त्वा पार्श्वयोरपि पादन्यूनप्रक्रमद्वयं त्यक्त्वाऽरत्निमात्र समचतुरश्र कुर्यात् । इदमुपरवाणा स्थानम् । एवं विमाय महावेदि सदो हविर्धानमाग्नीध्रमण्डप धिष्णिय चात्वालं च रज्ज्वा परिवेष्टयेत् । परिवेष्टितेषु तेषु सभूय प्रमाणम् । महावेदि. षट्त्रिंशत्प्रक्रमायामा पश्चात्त्रिंशत्प्रक्रमविस्तारा पुरस्ताच्चतुर्विंशतिप्रक्रमविस्तारा विषमदीर्घचतुरश्रा भवति । सदश्चाष्टादशप्रक्रमोदगायतं नवप्रक्रमविस्तार भवति हविर्धान तु नवारत्निविस्तार नवायाम भवति । आग्नीध्रमण्डप तु षट्प्रक्रमायाम षट्प्रक्रमविस्तारमर्धमन्तर्धिष्णियाश्चतुर्विंशत्यङ्गुलसमचतुरश्रा । चात्वाल शम्यामात्र । औदुम्बरीस्थानं तु सदोमध्ये पृष्ठ्याया दक्षिणतः प्रक्रमे । यूपस्थान तु महावेद्या पूर्वे वेद्यर्धं बहिर्वेदि, पूर्वप्रान्तशङ्कुरर्धमन्तर्वेद्यर्धं बहिर्वेदि । प्राग्वंशस्य पश्चात्पत्नीशाला यथासभवविस्तारायामा ।

अथाऽग्निविमानम् । पूर्वोक्तपुरुषचतुर्थं सार्धतिलोनैकादशाङ्गुलात्मक प्रक्रमं कृत्वा तेनाऽग्नि विमिमीयात् । तद्यथा—पूर्वनिहितद्वाविंशतिशङ्कुषु षोडशशङ्क्वोः पुरत, एकादशशङ्कून्निहन्यात् । तत्र क्रम.—षोडशद्व्याह्वि(?) (३) भू (१) चन्द्र (१) शशि (१) चन्द्रे (१) क (१) भूमिषु (१) । चन्द्रे (१) क (१) शशि (१) चन्द्रेषु (१) हन्याच्छंकरशङ्कुकान् । एव निहत्य पञ्चविंशतिप्रक्रमात्मिकामेका रज्जुमुभयत.पाशा कृत्वा तस्या द्वादशप्रक्रममिताया कर्षणार्थं चिह्नं कुर्यात् । अस्या द्वादशिका तिर्यग्रज्जुस्त्रयोदशिकाक्ष्णया रज्जु । अस्या. पञ्चविंशतिकेति सज्ञा ।

विमानकालेऽभिमतशङ्कुषु पञ्चविंशतिकापाशयोर्मध्य एवैषा यथा भवेत्तथा कृत्वा विमिमीयात् । षोडशशङ्कुमारभ्य प्रथमादिव्यवहार. ।

अथ विमानम् । षोडशशङ्कौ पञ्चिकाया एकं पाशं प्रतिमुच्यान्यं यत्र समो भवति तत्र प्रतिमुच्यैतयोरेव शङ्क्वोः पञ्चविंशतिकापाशौ प्रतिमुच्य द्वादशिकां तिर्यक्कृत्वा दक्षिणतो लक्षणेनायम्य चतुर्षु प्रक्रमेषु शङ्कुः । एवमुत्तरत । इद पुच्छाग्रम् । एवमग्रेऽपि विमाने क्रमो ज्ञेय. । द्वितीयशङ्कोर्दक्षिणत प्रक्रमे शङ्कुरेवमुत्तरत· । एष प्रथमः पुच्छाप्ययश्चतुर्थशङ्कोर्दक्षिणतः प्रक्रमत्रये शङ्कुत्रये । एवमुत्तरत· । एषोऽपर· पुच्छाप्यय । एवं चाग्रेऽष्टप्रक्रमविस्तारो मध्ये द्विप्रक्रमविस्तारो मूले षट्प्रक्रमाविस्तारः पञ्चप्रक्रमायाम· पुच्छो भवति । अस्मादेव शङ्कोर्दक्षिणतः पञ्चविंशतितिलसहितद्व्यङ्गुलाधिकसप्तप्रक्रमे शङ्कु । एष पक्षायाम. । अस्माच्छङ्कोर्दक्षिणत एकप्रक्रमे शङ्कुः । इद पक्षाग्रम् । एवमुत्तरत. शङ्कुत्रयम् । एव पञ्चमादित्रिभ्य· शङ्कुभ्यो दक्षिणत उत्तरतश्च शङ्कुत्रयम्[1] । एव कृते सार्धपुरुषोदगायाम पुरुषविस्तार आत्मा चतुर्दशतिलाधिकैकोनाशीत्यङ्गुलोदगायामौ पुरुषमात्रविस्तारौ पक्षौ । पुरुषमात्रप्रागायामे प्रक्रमविस्तारे पक्षाग्रे च भवन्ति । ततो दशमशङ्कोर्दक्षिणत. प्रक्रमे शङ्कु । एवमुत्तरत. । एवमेकादशशङ्कोर्दक्षिणत उत्तरतश्च प्रक्रमे शङ्कू । इद शिर.स्थानम् । एव कृते शिरसि प्रक्रमात्मकानि चत्वारि चतुरश्राणि भवन्ति । तत्राग्रिमचतुरश्रद्वये दक्षचतुरश्र ईशानकोणमारभ्य निर्ऋतिकोणपर्यन्त रेखामालिख्याक्ष्णया भागद्वय कृत्वाऽऽग्नेयभाग त्यजेत् । उत्तरचतुरश्र आग्नेयकोणमारभ्य वायव्यकोणपर्यन्त लेखामालिख्येशानभागं त्यजेत् । पक्षाग्रयोरपि चत्वारि चत्वारि प्रक्रमात्मकचतुरश्राणि कृत्वा दक्षिण(दक्ष)पक्षचतुरश्रेषु शिरोग्रदक्षचतुरश्रवदाग्नेयभागत्यागः । उत्तरपक्षाग्रचतुरश्रेषु शिरोग्रस्योत्तरचतुरश्रवदीशानभागत्याग ।

अथ पक्षसंनमनम् । अत्राष्टमप्रक्रमपरिमितामेकां रज्जुमुभयत·पाशां कृत्वा तस्यां कर्षणार्थं मध्ये चिह्न कृत्वा दक्षपक्षायामपश्चिमप्रान्तशङ्क्वो· पाशौ प्रतिमुच्य लक्षणेन पूर्वत कर्षयेत् । चिह्न यत्र पतति तत्र शङ्कु निहन्यात् । एव दक्षपक्षायामपूर्वप्रान्तशङ्क्वोः पाशौ प्रतिमुच्य पूर्ववदाकृष्य चिह्न यत्र पतति तत्र शङ्कुं निहन्यात् । एव कृते पक्षपूर्वोन्नत. पश्चिमनिम्नो भवति । एवमुत्तरपक्षस्यापि विमानम् । तत. सर्वतः स्पन्द्यया वेष्टयेत् ॥

प्रयोगचन्द्रिकावृत्तेः(त्ति.)सत्याषाढमुनेर्वच. ।
कल्पसूत्रस्येह कृतः सूत्रार्थन्यायनिर्णय. ॥
शेखरे चन्द्रचूडस्य तुष्टयेऽस्तु मयाऽर्पित. ।
गृह्णाति हि किमप्येष भक्तैर्यद्यत्तत कृतम् ॥

इति सत्याषाढचयनसूत्रोपोद्घातः ।

---

१ अनन्तरमष्टमशङ्को पाशौ विपर्यस्य दक्षिणत उत्तरतश्च शङ्कुत्रयम् ।

ॐ तत्सद्ब्रह्मणे नमः ।

सत्याषाढविरचितं श्रौतसूत्रम्

महादेवशास्त्रिसंकलितप्रयोगचन्द्रिकाव्याख्यासमेतम् ।

अथैकादशप्रश्नप्रारम्भ. ।

तत्र प्रथम पटल ।

यदर्पितं कर्म फलाय कल्पते यदर्पितं बन्धविमुक्तयेऽपि च ।
सच्चित्सुखानन्तमनन्तमीश्वरं नमामि विष्णु दुरितेभदारणम् ॥ १ ॥
वेदत्रयात्मन[न]लत्रयात्मन्नीशत्रयात्मन्प्रकृतेर्गुणात्मन् ।
जन्तोरवस्थात्रितयानुबिम्बी(म्बि)बिम्बत्रयात्मन्नव मामनर्थात् ॥ २ ॥
विनेययुक्ताखिलसिद्धवर्यलसच्चिदानन्दसुखं मुनीन्द्रम् ।
नमामि सूत्रार्थविदे मुदाऽहं हिरण्यकेश्याख्यगुरुं कृपाब्धिम् ॥ ३ ॥

गुरुं गणपतिं नौमि जन्मज्ञानप्रदौ तथा ।
सह गौर्या महेशानं नौमि विष्णुं च पद्मया ॥ ४ ॥
ज्योतिष्टोमयाजमान दशमप्रश्न ईरितम् ।
एकादशद्वादशयोर्वक्ष्यन्ते (ते) चयनक्रतुम् (तु) ॥ ५ ॥

ननु वैखानसाद्या आचार्याः सप्त संस्थाः सोमस्योपदिशन्ति—‘ अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमयज्ञसंस्थाः ’ (वै० श्रौ० १-१) इति । तासु चोत्तराः षडप्याद्यस्याग्निष्टोमस्य गुणविकारास्तत्केन विशेषेणात्यग्निष्टोमवाजपेययोरनुपादानमिति चेन्न—प्रकृतिभूतानामेव ज्योतिष्टोमसस्थानामत्रानुक्रमणस्याभिप्रेतत्वात् । न तु सोमसंस्थामात्रस्याग्निष्टोमगुणविकारमात्रस्य वा । तत्र न तावदत्यग्निष्टोमः कस्यचित्क्रतोःप्रकृतिः । वाजपेयस्तु न प्रकृति. । नापि ज्योतिष्टोमः, सर्वसप्तदशत्वाद्वाजपेयस्य । अतो युक्तमेवानयोरनुपादानम् । तम्मादेवं सिद्धं पञ्चशाखोऽग्निष्टोमो ज्योतिष्टोम एव सर्वसोमाना प्रकृतिरिति । तथा सर्वक्रतूना प्रकृतिरग्निष्टोम इत्येतदभिप्रायं द्रष्टव्यम् । न च—‘ अग्निं व्याख्यास्यामः । स उत्तरक्रत्वर्थ ’ इति वक्ष्यमाणसूत्रादुत्तरक्रत्वर्थत्वस्याग्निविषये विधानेनार्थादग्निष्टोम उत्तरवेदिसिद्धे, आपस्तम्बेन भगवता परिभाषासूत्रे—‘ अग्निष्टोम उत्तरवेदिः ’ ‘ उत्तरेषु क्रतुष्वग्निः ’ (आप०

पारि० ४ । ७ । ८) इति स्पष्टवचनाच्चोक्थ्यादीनामग्निष्टोमविकारत्वादुक्थ्यादिष्वप्यग्निचित्या निषेधोऽस्त्विति वाच्यम् । गुणाविकृतेन रूपेण तेषामनग्निष्टोमत्वादुत्तरक्रतुत्वाच्च । न च—' अग्निष्टोम उत्तरवेदि. ' इत्यापस्तम्बसूत्रमपि पञ्चशाख(खा)प्रकृत्यभिप्रायम्—' उत्तरेषु क्रतुषु ' इति तु तद्विकाराभिप्रायमिति वाच्यम् । अन्यत्र साद्यस्क्रेभ्यो वाजपेयात्षोडशिनः, (आप० पारि० ४ । ८) इति षोडशिपर्युदासानुपपत्तेः । न च षोडशिविकाराद्वाजपेयादिति वाजपेयविशेषणतया षोडशी योज्यः इति वाच्यम् । व्यभिचाराभावेन विशेषणवैयर्थ्यात् । संभवव्यभिचाराभ्या स्याद्विशेषणमर्थवदित्यभियुक्तोक्तेः । न ह्यषोडशिविकारोऽपि वाजपेयोऽस्ति येन तद्व्यवच्छेदाद्विशेषणमर्थवद्भवेत् । किमिदानीमुक्थ्यादिषु लभ्यत एवोत्तरवेदि. । नैवम् । सर्वास्वेव विकृतिषु लभ्यते विकल्पेन । अपचितिकामोऽपचितिभ्यामुभयसामानौ भवत पक्षिभ्यां साग्निचित्याभ्याम्, (स० श्रौ० १७ । ११) इत्यत्र नियमदर्शनात् । ' अनग्निकान्वा यज्ञक्रतूनाहरेत् ' इति बौधायनोक्तेश्च । तस्मात्सिद्धमुक्थ्यादिष्वपि भवत्येव पक्षेऽग्निचित्येति । अथेदानीमुत्तरेषु क्रतुष्वाकाङ्क्षितमग्निचयनकर्म वक्तु शिष्यावधानाय प्रतिजानीते—

अग्निं व्याख्यास्यामः ॥ १ ॥

अग्निरग्निशब्दो यागनामप्रतीयेत(तये) । अग्निस्तोत्रमग्नेः शस्त्रमिति स्तोत्रशस्त्रयुक्ततया निर्देशरूपलिङ्गदर्शनात् स्तोत्रशस्त्रयोः क्रत्वेकसम्बन्धत्वादिति स्तोत्रशस्त्रवाक्येऽनुपपत्तिबलाल्लक्षणयाऽग्निशब्दस्य तद्युक्तक्रतुपरत्वमात्रेण विद्वद्वाक्ये यागनामत्वमग्निशब्दस्य, त व्याख्यास्यामो व्यक्तं वक्ष्याम इत्यर्थः ॥

ननु—' य एव विद्वानग्निं चिनुते ' इति श्रुतं तथेमान्यपि वचनानि—अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन इत्यादि । तत्र संदेहः, किमयमग्निं चिनुत इति यागविधिरुताग्निसंस्कारमात्र स्वतन्त्र विधीयते, किवा ज्योतिष्टोमादिषु गुणो विधीयत इति । तदर्थं च किमग्निशब्दो यागनामधेयमुत द्रव्यवचन इति । तत्राश्वदाभ्यवत्प्रकरणे पुनः संकीर्तनाभावान्न क्रतुसंयोगस्तदभावे च संस्कारमात्रं स्वतन्त्रमनर्थकम् , ' अतोऽग्निं कुर्यात् ' इति यागविधिः । चिनोतिश्चेष्टकाभिरग्निं चिनुते, इति वाक्यप्राप्तानुवादो निर्वपतिवत् । कथ पुनरसति यजिश्रवणे यागविधानम् । उच्यते—अग्निं कुर्यादिति तावत्संज्ञयैव कर्मान्तरेऽवधारिते—'अथातोऽग्निमग्निष्टोमेनानुयजन्ति ' इति यदग्निं यजति तदा(द)ग्निष्टोमेनेति संस्थाविधिपरे वाक्ये यजतिनाऽनुवादादुत्पत्तौ यागवचनोऽग्निशब्द इति गम्यते । यद्यपि नाय संस्थाविधि. किंत्वग्निष्टोमसंस्थेन यागेनाग्निमनुयजन्तीति तथाऽप्यग्नेर्यागत्वम् । न ह्यन्यथाभूतमन्यैरनुयष्टुं शक्यते । यथा देवदत्तमनुगच्छति

यज्ञदत्त इत्युक्ते देवदत्तोऽपि गच्छतीति प्रतीयते, अन्यथाऽनुगमानुपपत्तेरेवमनुयजनवशादेवाग्नेर्यागत्वसिद्धिः । तस्माद्यागविधानं स्यादिति प्राप्तेऽभिधीयते—

‘ अग्नेश्चयनसंस्कारमात्रमत्र विधीयते ।
तस्याथातोऽग्निमित्यादिवाक्यैः स्यात्क्रतुसगतिः ॥
वह्नौ रूढोऽग्निशब्दोऽयं न हि यागस्य वाचकः ’ ।

नह्यग्निशब्दोऽत्यन्तरूढत्वाद्वाक्यभेदतत्प्रख्यतद्व्यपदेशविधुरत्वाच्च यागनामत्वं प्रतिपद्यते । तेन ज्वलनस्ये(स्यै)वाऽय चयनसंस्कारो विधीयते । तस्य च संस्कारस्य क्रतुसंबन्धपराण्यथातोऽग्निमग्निष्टोमेनानुयजन्ति, इत्यादीनि । अत्राग्निशब्दः प्रकरणाच्चयनसंस्कृतेऽग्नौ वर्तते । अनुशब्दश्चयनापेक्षया पश्चाद्भाव्यग्निष्टोमादि नामाऽऽह । तेन चयनसंस्कृतेऽग्नावग्निष्टोमादिभिर्यजेतेत्यर्थः । न त्वत्राप्यग्निशब्दो यजिसमानाधिकरणो येन नाम स्यात् । न चावश्यं तुल्यरूपाणामेव पौर्वापर्यम् । ‘ पाकमनुभुङ्क्ते ’ इत्यादिषु विजातीयानामपि दर्शनात् । तस्मादपि ज्योतिष्टोमादिषु गुणविधिः ॥ १ ॥

**स उत्तरक्रत्वर्थः । अन्यत्र साद्यस्क्रेभ्यो
वाजपेयात्षोडशिनः सारस्वताच्च सत्रा-
त् । अग्निशिनस्तोमो यथोपदिष्टं वा । रात्रि-
सत्रेषु समहाव्रतेष्वश्रवणार्था पुनश्चितिः ॥ २ ॥**

स चाग्निः षोडशिनि तद्विकारे च वाजपेयेऽसंकीर्तनान्न भवति । साद्यस्क्रेषु सद्यः परिसमाप्तेरसंभवाच्चयनाभावः । सारस्वते सत्रेऽनवस्थानान्नाग्निश्चीयते । अत एतेभ्योऽन्यत्रोत्तरेषु क्रतुष्वग्निः । उत्तरेषु क्रतुष्वग्निविधानात्तत्र प्रकरणाम्नातोत्तरवेदि, तत्राऽऽहवनीयात्प्रणीयते । उत्तरेषु क्रतुष्वग्निष्टोमोत्तरकालकार्येषु साद्यस्क्रादिभ्योऽन्यत्राग्निष्टुज्ज्योतिष्टुदादिविकृतिष्वनारभ्याधीतोऽग्निश्चीयते । चितावाहवनीयप्रणयनम् । तेषूत्तरवेदिरपि लभ्यते—‘ साग्निचित्यो भवति पक्षिभ्यां साग्निचित्याभ्याम् ’ इति क्वचिन्नियमविधानादन्यत्रानियम इति केचिदाहुः । ‘ उत्तरवेद्यां ह्यग्निश्चीयते ’ इत्यनारभ्याधीतोऽग्निरुत्तरवेदिद्वारेण प्रकृतिं गच्छति । यथा स्रुवद्वारेण खदिरः । तत्राग्निचयनेन प्रकृतावरुद्धायां बह्वृचवचनात्—‘अग्निर्वै देवाना होता तस्यैष स्वो लोको य उत्तरनाभिः ’ इति प्रणेयोऽग्निरुत्तरनाभौ प्रतिष्ठाप्यः । एवमुत्तरवेद्यन्तः प्रत्यायनमग्निचयनं विकृत्यर्थं भविष्यति साप्तदश्यवत् । तदाहाऽऽपस्तम्बः—अग्निष्टोम उत्तरवेदिः । उत्तरेषु क्रतुष्वग्निः, (आप० परि० ४-८) इति । तत्रैवाग्निष्टोमसंस्थे ज्योतिष्टोमे वचनादग्निचयनं भविष्यति । ‘ अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं

द्विरात्रेण तं त्रिरात्रेण ' इति । अतः प्रकृतावेवाग्निचयनोत्तरवेद्योर्विकल्पितयोः प्रकृतिवद्विकृतिष्वपि विकल्पः । अत एव सर्वत्र विकृतिषु विकल्पप्रसक्तौ–'साग्निचित्यो भवति । पाक्षिभ्या साग्निचित्याभ्याम् ' इति नियमविधिरुपपद्यते, व्रीहिमयपशुपुरोडाशवत् । द्विरात्रादिष्वग्निचयनविधानमौपदेशिकत्वेन गुणकामादिसिद्ध्यर्थमिति ।

नन्वग्निरनारभ्यवादविहितः स वाक्येन प्रकृतौ विकृतिषु च कासुचिद्विनियुज्यते– 'अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं त्रिरात्रेण ' इत्येवमा द्वादशरात्रादनुक्रान्त सोऽयमग्निर्यासु विकृतिषु वाक्येन नोपदिष्टो यथा षोडशिषु वाजपेये च तत्र किं चोदकप्राप्त्या कर्तव्यो नेति संशय । तथाऽतिग्राह्या नाम ग्रहाः प्रकृतौ श्रुता, विकृतिष्वपि कासुचिदुपदिष्टाः–'उक्थ्ये गृह्णीयात्पृष्ठे गृह्णीयात् विश्वजिति प्रगृ-(ग्र)हीतव्याः ' इति । तेऽपि विकृत्यन्तरेषु ग्राह्या नेति संशयः ।

तत्र—'चोदकेनाग्न्यतिग्राह्यं विकृतौ न प्रदिश्यते ।
कासुचिच्छ्रवण तस्य तथाहि स्यादनर्थकम् ॥
तस्मात्तदर्थवत्त्वाय प्रदेशो नेति कल्प्यते ।
तेन यत्रोपदेशोऽस्य तत्रैवान्यत्र न क्रिया' ॥

उच्यते—'अङ्गान्तरवदस्यापि प्राप्तिश्चोदकतो ध्रुवा ।
चोदकार्थस्य कृत्स्नत्वात्कासुचिच्छ्रवणं पुनः ॥
सामान्यविध्यसिद्ध्यर्थं नातिदेशं निवारयेत् ।
चेत्सामान्यविधौ कोऽर्थो गुणकामप्रवर्तनम् ' ॥

यासु विकृतिषु विधीयते तासु प्रकृतौ च समानं विधानं भवति । विकृत्यन्तरेषु तु चोदकत प्राप्तिरिति न प्रकृतितुल्यं विधानं, समानविधानत्वे च प्रयोजनमग्न्याश्रितानां गुणकामानाम्–'श्येनचितं चिन्वीत स्वर्गकामः' इत्यादीनां तास्वपि विकृतिषु प्रवृत्तिः । गुणकामा हि प्रकृतमग्निमाश्रयन्ति प्रकृतश्चाग्निः प्रकृतिविकृतिसाधारणभूत इति तथाभूतस्याऽऽश्रयत्वाद्विकृतिष्वपि गुणकामप्रवृत्ति. । यासु विधिर्नास्ति तासु तु न गुणकामाः प्रवर्तन्ते 'निवृत्तिर्वा कर्मभेदात् ' इति न्यायात् । तदेवं गुणकामप्रवृत्त्यर्थं विकृतिषु कासुचिच्छ्रवणमिति न तद्बलेनातिदेशाभावः शक्यते कल्पयितुम् । तस्मादस्त्यतिदेशः ।

अत्र केचिदाहु —अनारभ्याधीतोऽग्निः प्राकरणिकोत्तरवेदिविरोधात्प्रकृतौ न लभ्यते निवेशम् । अप्राकृतश्च न विकृतिष्वतिदिश्यते तेनोपदेशेनैवास्य विकृतिषु प्राप्तिरित्यनुपदेशात. षोडशिवाजपेययोर्नाग्निश्चेतव्य इति । तदयुक्तम् । अग्निष्टोमवाक्येन प्रकृतावपि विधानात् । न तु विकृत्यग्निष्टोमाभिप्रायं तद्भविष्यति प्रकृतौ प्राकरणिकोत्तरवे-

दिविरोधात् । न हि प्रकरणेन वाक्यसंकोचो युक्तः । किंच प्रकृतेरेवाग्निष्टोमत्वमन्यापेक्षं विकृतीनां स्वातिदेशापेक्षमिति प्रकृतिरेवानेनाभिधीयते । न चात्र साद्यस्क्रन्यायः, साद्यस्क्रस्य हि सामिधेनीमात्रसंबन्धो वाक्येनावगम्यते क्रतुसंबन्धः कल्पयितव्यः । पाञ्चदश्यस्य तु प्रकरणेन संबन्धः क्लृप्त इति युक्त बलाबलम् । अग्निष्टोमशब्दस्तु क्रतुमेवाभिधत्त इति तत्संबन्धो वाक्यकृत इति न प्रकरणेन बाधमर्हति । तस्मादस्ति प्रकृतावग्निरिति विकृतिष्वप्यतिदिश्यते । तत्र साद्यस्क्रेषु सारस्वतेषु च सत्रेष्वशक्यत्वास्काममग्निर्न चीयतां षोडशिवाजपेययोस्तु चेतव्य. ॥ २ ॥

अपि वा धार्यमाणेऽग्नौ प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्यन्तर्वेदिमभिमृशेत् । तिस्रो वा स्वयमातृण्णा उपधाय तासामुपधानकल्पः स्वयमातृण्णा साम पुरीषं विश्वज्योतिः । एवं विहिता द्वितीया पुरीषा तृतीया ॥ ३ ॥

अपि वा तिस्रश्च स्वयमातृण्णाः सर्वाश्च विश्वज्योतिषस्तासामुपधानकल्पः स्वयमातृण्णा साम पुरीषं विश्वज्योतिरेवं विहिता द्वितीया तृतीयस्यां तु विश्वज्योतिः प्रथमा । अथ पुरीषम् । अथ स्वयमातृण्णाम् । अथ साम ॥ ४ ॥

शर्कराख्याना क्षुद्रपाषाणाना मध्ये पुरुषप्रयत्नमन्तरेण या स्वत एव च्छिद्रयुक्ता सेयं शर्करा स्वयमातृण्णा, तामत्रोपदध्यात् । विश्वशब्दोपेतैश्च मन्त्रै (तै० सं० ४ ४ । ६) रुपधेया विश्वज्योतिषः । ताश्च तिस्रः प्रथममध्यमोत्तमचितिषूपदध्यात् । शेषं स्पष्टम् ॥ ३ ॥ ४ ॥

तं चेष्यमाणोऽमावास्यायां पौर्णमास्यामापूर्यमाणपक्षे वा पुण्ये नक्षत्र ऋत्विजो वृत्वा ॥ ५ ॥

अग्न्याधारत्वादिष्टकास्थण्डिलमुच्यते तत्संयोगात्क्रतुरप्यग्निरुच्यते । अग्निं चेष्यमाणः (आप० श्रौ० १६–३–१) इत्यापस्तम्बोक्ते. । तं चेष्यमाणः स्थण्डिलरूपाग्निगुणकेन क्रतुना यक्ष्यमाणो भवति । तस्याग्नेः सोमाङ्गत्वात्सोमाङ्गैरिह व्यतिषङ्गः । तस्याग्नेरनारभ्याधीतत्वात्स च सोमाङ्गेन पृथक्फलक । उत्तरवेदिकार्ये तस्यैष स्वर्लोको यदुत्तरवेदिर्नाभिः, इति प्रणयने प्रकृतौ श्रूयते । साग्निचित्ये तु क्रतौ स्वयमातृण्णायामासादनम् । तस्माद्विकृत्यर्थमकाम्यत्वात् । यदि काम्यः स्याद्गोदोहनादिवत्प्रकृतौ

निविशेत । तेनाऽग्निगुणकेन क्रतुना यक्ष्यमाण· । अमावास्यायां पौर्णमास्यामेकाष्टकायां वोखासंभरणं करोतीत्यापस्तम्बः । एकाष्टका व्याख्याता सूत्रकारेण-या माघ्याः पौर्णमास्या इति । अषाढा व्यालिखितेष्टका मध्य उपधीयते तामधिकृत्यैके शाखिनो धर्मान्पठन्ति । तदा तूष्णीं, ये तूष्णालिङ्गमन्त्राः 'दधतूखे' (इत्येवमादयस्तेषां निवृत्ति· । यथा व्रीहिलिङ्गस्य मन्त्रस्य यवेषु । अत्र संभारानाह बौधायनः— 'उखाः संभरिष्यन्नुपकल्पयतेऽश्वं च गर्दभं च तयोरेव रशने मौञ्ज्यौ वा कुशमय्यौ वाऽभ्रिं च ब्राह्मणसंपन्नां मृदं च भाविता करणीया वल्मीकवपा कृष्णाजिनं च पुष्करपर्णं च योक्त्रमुदकुम्भꣳ हिरण्यमर्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि वैश्यꣳ सदशꣳ सूनामधिकरणीमुखाकृत कुशलमिति । अ(आ)मावास्येन वा हविषेष्ट्वा नक्षत्रे वाऽग्रेण शालाꣳ शम्यान्यासे गर्तं खनयीत । तद्भावितां मृदमवलेपयति । समा बिलेन करोति । तदुपसादयति कृष्णाजिनं च पुष्करपर्णं च योक्त्रमुदकुम्भꣳ हिरण्यमिति, (बौ० श्रौ० १०-१] इति ।

तत्र कर्म—ज्योतिषा त्रिकद्रुकेणाग्निष्टोमेन साग्निचित्ते(त्ये)न सहस्रदक्षिणेन यक्ष्ये, स्वर्गं लोकमवाप्नवानीत्युक्त्वा विद्युदसि सोमप्रवाकवरणादि करोति । ततो देवयजनयाच्ञा(च्ञा)न्ते देवतोपस्थानान्ते वा ये प्रधानस्य कर्तारस्त एवाङ्गानां स एव देश इति न्यायात् । पूर्वमृत्विग्वरणादि देवयजनयाच्ञा(च्ञा)क्रियते 'सहाङ्गं प्रधानम्' (आप० परि० २-३९) इति सूत्रान्तरवचनाच्च ॥ ५ ॥

बृहस्पतिपुरोहिता देवानां देवाः प्रथमजा देवा देवेषु पराक्रमध्वं प्रथमा द्वितीयेषु द्वितीयास्तृतीयेषु त्रिरेकादशास्त्रयास्त्रिꣳशा अनु व आरभ इदꣳ शकेयं यदिदं करोमि स्वाहेत्याहुतिं जुहोति ॥ ६ ॥

अग्नीन्विहृत्योखासंभरणार्थम् । अत्र बौधायनोऽप्याह—'परिस्तृणन्ति । दक्षिणत उपविशतो ब्रह्मा च यजमानश्च' (बौ० श्रौ० १०-१) इति । जुहोतिचोदनात्स्वाहाकारप्रदानम् । साधननियममपि—'आहवनीय आहुतयो जुह्वा हूयन्ते' इति पारिभाषके द्रष्टव्यम् । देवा देवता ॥ ६ ॥

जुहूꣳ स्रुवं च संमृज्य चतुर्गृहीतमाज्यमष्टगृहीतं वा गृहीत्वा युञ्जानः प्रथमं मन इति यजुरष्टमाभिर्ऋग्भिरन्तर्वेद्यूर्ध्वस्तिष्ठन्सावित्राण्येकामाहुतिं जुहोति ॥ ७ ॥

जुहूस्रुवयोस्तूष्णीं संमार्गः । दर्शपूर्णमासवत्समन्त्रक इति भाष्यकृत् । अत्राप्यष्टगृहीतेन होमः शाखान्तरीयः । चतुर्गृहीतहोमस्त्वस्मच्छाखोक्तः, 'चतुर्गृहीतेन जुहोति' (तै० सं० ५-१-१) इति विधिदर्शनात् । 'युञ्जानः प्रथमं मनः, इत्यारभ्य—इमं नो देव सवितर्यज्ञम्' (तै० सं० ४-१-१) इति यजुरष्टमाभिर्यजुरष्टमं यासां ताभिर्यजुरष्टमाभिर्ऋग्भिरेकामाहुतिमन्तर्वेदि गार्हपत्याहवनीययोर्मध्ये स्थितो जुहोति । सविता देवता ॥ ७ ॥

अत्रेदं चिन्तनीयम्—किमेकैकं मन्त्रमुच्चार्य जुहुयात्, आहोस्वित्सर्वाणि(न्) वाक्यान्यु (मन्त्रानु) च्चार्येति । तत्र हेयोपादेयावुभौ पक्षौ क्रमेण दर्शयति—

यं कामयेत पापीयान्त्स्यादित्येकैकं तस्य जुहुयात् । यं कामयेत वसीयान्त्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयात् ॥ ८ ॥

पापीयानातिशयेन पापो दरिद्र इत्यर्थः । वसीयान्वसुमत्तरः ॥ ८ ॥

अत्रेदमपरं चिन्तनीयम् । किमृग्रूपान्षण्मन्त्रानुच्चार्य—इमं नो देव सवितरिति यजुः सप्तमं कृत्वा पश्चात् देव सवितरित्यृचामन्तिमां कुर्यात् । किंवैतामृचं सप्तमीं कृत्वा तद्यजुरन्तिमं कुर्यादिति । तत्र हेयोपादेयपक्षौ क्रमेण दर्शयति—

यदि कामयेत च्छन्दाꣳसि यज्ञयशसेनार्पयेयमित्यृचमन्तिमां कुर्यात् । यदि कामयेत यजमानं यज्ञयशसेनार्पयेयमिति यजुरन्तिमं कुर्यात् ॥ ९ ॥

यज्ञयशसं यज्ञफलमर्पयेय संयोजयेयम् । छन्दोबद्धाया ऋचस्त्वन्तिमत्वे यज्ञफलं छन्दःसु गच्छेत् । यजुषस्तु च्छन्दोरहितत्वेन यज्ञफलं छन्दोगामि न भवति, किंतु यजमानगाम्येव भवति । तस्माद्यजुरेवान्तिमं कुर्यादित्यर्थः । एषोऽध्वर्युकाम इति भाष्यकृत् । यजुरष्टमविधेः प्रशंसेति न्यायः ॥ ९ ॥

ऋचा स्तोमꣳ समर्धयेति चतुर्गृहीतेनोत्तराम् ॥ १० ॥

आहुतिं जुहोतीत्यनुवर्तते । अग्निर्देवता ॥ १० ॥

देवस्य त्वेति चतुर्भिरभ्रिमादत्ते ॥ (ख० १) ॥ खादिरीं वैणवीं वा कल्माषीꣳ सुषिरामसुषिरां वोभयतः क्ष्णूं तामन्यतरतः क्ष्णूं तां वा पालाशीमौदुम्बरीमर्कमयीꣳ शमीमयीं वा । यो वा कश्चन वृक्षः फलग्राहिस्तस्य मुष्टिमात्रीं प्रादेशमात्रीं-

अरत्निमात्रीं बाहुमात्रीं व्याममात्रीमपरिमितां वा ॥ ११ ॥

देवस्य त्वेत्यारभ्य–आनुष्टुभेन त्वा छन्दसाऽऽददेऽङ्गिरस्वदित्येवमन्तैश्चतुर्भिर्मन्त्रैरभ्रिं (खनित्रं) काष्ठकुद्दालं गृह्णाति खादिरीं वैणवीं वा। कल्माषी कृष्णबिन्दुलाञ्छिता, सुषिरा अन्तश्छिद्रा, असुषिरा घना, क्ष्णु तेजन इत्यस्माद्धातोरुत्पन्नः क्ष्णुशब्दस्तीक्ष्णत्वमाचष्टे। उभयोरग्रमूलयोस्तीक्ष्णाऽभ्रिरुभयतःक्ष्णूस्तादृशी कार्या। अथवा पालाशी पर्णमयी, औ(उ)दुम्बरो जन्तुफलः, अर्कः प्रसिद्धः, शमी घण्टा। एतेषामभावे यो वा यः कश्चन यज्ञियवृक्षः फलग्रहिस्तस्याभ्रिः कार्येत्यर्थः। भाष्यकारस्तु—फलानि बहूनि गृह्णातीति फलग्रहिः। वनस्पतीना मध्ये यः फलग्रहिरस्ति एषा फलग्रहीणामपि मध्ये स वेणुरतिशयेन फलग्रहिः। व्रीह्याद्यप्रवृद्धेणूना समाप्तिसंवत्सरे गोधूमसदृशैर्बहुभिर्बीजैरुपेततत्वात्। तस्मादियमभ्रिर्वैणवी कार्येति। चतुर्भिररत्निभिस्तुल्यो व्यामः। एतावती कार्या। नियतपरिमाणराहितत्वमपारीमितत्वं विधत्ते—अपरिमिता भवति (तै० सं० ५। १। १) इति ॥

ननु—ये तु संख्यायुक्ता मन्त्राः ‘ चतुर्भिरभ्रिमादत्ते ’ (तै० सं० ५। १। १) इत्येवमादयस्तेषामपि पूर्ववद्विकल्पः। संख्यावशात्तु समुच्चयः। चतुःसंख्या हि कर्माङ्गभूता नासति समुच्चये सपद्यते। तत्र पूर्वप्रयुक्ताना मन्त्राणा संस्कारद्वारेण कारणत्वं चरमस्य तु साक्षादिति संख्यावचनसामर्थ्याद्ध्यवसीयते। तस्मात्समुच्चयः ॥ ११ ॥

इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादाय प्रतूर्तं वाजिन्नाद्रवेत्यश्वमभिदधाति ॥ १२ ॥

अश्वोऽभिधीयते बद्ध्वा धार्यते यया रशनया सेयमश्वाभिधानी ॥ १२ ॥

तूष्णीं गर्दभस्याऽऽदाय युञ्जाथाꣳ रासभं युवमिति गर्दभम् ॥ ॥ १३ ॥

भरन्तमस्मयुमित्यन्तः। मन्त्रमन्तरेणैव गर्दभस्य रशनामादाय युञ्जाथामिति मन्त्रेण गर्दभमभिदध्यात्। अत्र निकृष्टकार्ये स्थापितस्तस्माल्लोकेऽपि गर्दभोऽश्वान्निकृष्टतरः। रजकादय एव हि तमाद्रियन्ते न तु राजामात्यादयः ॥ १३ ॥

योगे योगे तव स्तरमिति तिसृभिरश्वप्रथमाः प्राञ्चो गच्छन्ति यत्र मृदं खनिष्यन्तो भवन्ति ॥ १४ ॥

अच्छेहीत्यन्तः। गच्छन्तीति बहुवचननिर्देशादध्वर्युब्रह्मयजमानाः। अश्वप्रथमाः, यत्र यस्मिन्देशे दृढा मृत्तत्र गच्छन्त्यश्वः प्रथमस्ततो गर्दभस्तत इतरे। तत्राश्वस्य गर्द-

भात्पुरतो गमनं विशदयत्यापस्तम्बः—' यदि कामयेत पापवस्यसः स्यादिति गर्दभप्रथमा गच्छेयुः ' (आप० श्रौ० १६–१–१२) इति । गर्दभोऽश्वात्पापीयानिति प्रसिद्धम् । अत उभयोः समानं गमनं मा भूदित्यश्व पुरतो नयेयुः । तथाऽश्वं पूर्वं नयन्ति, इति हि ब्राह्मणम् ॥ १४ ॥

अग्निं पुरीष्यमङ्गिरस्वदच्छेहीति येन द्वेष्येण संगच्छेत तमभिमन्त्रयेतापश्यन्निर्दिशति ॥ १५ ॥

मृत्खनं प्रति गच्छत्सु मार्गमध्ये यदि केनापि द्वेष्येण संगच्छेत तदानीमिमं मन्त्रं पठेत् । यदि द्वेष्य न पश्यति तदाऽपि त मनसा निर्दिश्य पठेत् ॥ १५ ॥

अग्निं पुरीष्यमङ्गिरस्वदच्छेम इति वा ॥ १६ ॥

वाशब्द. शाखान्तरमतप्रदर्शनार्थ. ॥ १६ ॥

सूर्यस्योदयनं प्रति वल्मीकवपामुपतिष्ठतेऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम इति ॥ १७ ॥

वल्मीकस्य योऽवयव उन्नतत्वेनाभिवृद्धः सेय वपा, तथाविधासु वपासु मध्ये या वपा सूर्योदयस्याभिमुखा तस्या अग्र किंचिदुद्धृत्य ता वपामनेन मन्त्रेणोपतिष्ठते ॥१७॥

अत्रैके समामनन्ति–(*अग्निं पुरीष्यमङ्गिरस्वद्भरामः) ॥ १८ ॥

यद्वद्गमनकाले तद्वदागमनकालेऽपि । तत्र भरिष्याम इति पाठ. । अत्र तु भराम इति विशेषः । यद्यप्यागमनस्य नायं कालः, तथाऽपि प्रसङ्गाद्बुद्धिस्थमन्त्रोऽयमाम्नातस्तं चोपरिष्टादुत्कर्षेत् । अमुं विधिमेके शाखिन. पठन्ति ॥ १८ ॥

अन्वग्निरुषसामग्रमख्यदिति वल्मीकवपायाः प्रक्रामति ॥ १९ ॥

वल्मीकवपायाः समीप गच्छति ॥ १९ ॥

आगत्य वाज्यध्वन आक्रम्य वाजिन्पृथिवीमिति द्वाभ्यां मृत्खनमश्वमाक्रमयति ॥ २० ॥

मृत्खनं दक्षिणपूर्वेण पादेनाऽऽक्रमयन्ति ॥ २० ॥

द्यौस्ते पृष्ठमित्यश्वस्य पृष्ठं संमार्ष्टि ॥ २१ ॥

(*इमं धनुश्चिह्नान्तर्गतपाठं केचिन्न पठन्ति ।)

---

१ क. °च्छेरंस्तदा° । २ क °स्योदेतोस्तामुद्धत्योप° । ३ ख °म इति ।

सर्वतः स्पृशति ॥ २१ ॥

अभितिष्ठ पृतन्यतोऽधरे सन्तु शत्रवः । इन्द्र इव वृत्रहा तिष्ठापः क्षेत्राणि संजयन्निति य द्वेष्टि तमधस्पदमश्वस्य मनसा ध्यायति ॥ २२ ॥

यं देवदत्तमिति द्वेष्टि तमधस्पदमश्वस्य ध्यायति मनसा ॥ २२ ॥

उत्क्रामोदक्रमीदिति द्वाभ्यां मृत्खनादश्वमुत्क्रमयन्ति ॥ २३ ॥

मृद्यस्मिन्प्रदेशे खन्यते स प्रदेशो मृत्खनः । तस्मादश्वमुदङ्मुखत्वेन निर्गमयेत् ॥ २३ ॥

अपो देवीरुपसृजेत्यश्वस्य पदेऽप उपसृजति ॥ २४ ॥

अश्वस्य दक्षिणपाद उदकं क्षिपति । सुपिप्पला इति मन्त्रान्तः ॥ २४ ॥

तस्मिन्हिरण्यं निधाय जिघर्म्यग्निमा त्वा जिघर्मीति मनस्वतीभ्यामेक[1]ामाहुतिं जुहोति ॥ २५ ॥

जुहोतिचोदनात्स्वाहाकारपाठः । अग्निर्देवता । भूमौ हिरण्यं निधाय तस्मिञ्जुहुयात् । चतुर्गृहीतेनाऽऽज्येनेति वैखानसः । सकृद्गृहीतेनेत्यपरे ॥ २५ ॥

अपादाय हिरण्यं परिवाजपतिरिति तिसृभिरभ्र्या मृत्खनं परिलिखति (बाह्यां वर्षीयसीम्) ॥ २६ ॥

शुचिरिति मन्त्रान्तः । हिरण्यमपादाय स्वीकृत्य परिवाजपतिरिति प्रतिमन्त्रं परिलेखनम् । ' गायत्रिया परिलिखति । त्रिष्टुभा परिलिखति । अनुष्टुभा परिलिखति ' (तै० सं० ५-१-२) इति वचनात् । बाह्या बाह्या महतीम् । पदस्य गायत्र्या परिलेखनमनुष्टुप्त्रिष्टुभ्भ्या बहिर्बहिः ॥ २६ ॥

देवस्य त्वेति द्वाभ्यां खनति ॥ २७ ॥

पुरीष्यमङ्गिरस्वत्खनामीत्यन्तः । ततः खननं द्वाभ्यामेकं कर्म द्विमन्त्रकम् ॥ २७ ॥

अपां पृष्ठमसीति पुष्करपर्णमाहरति । एतयैव विवेष्टयति । उपरिष्टात्कृष्णाजिनमुत्तरेण मृत्खनं शर्म च स्थो वर्म च स्थ इति ॥ (ख० २) ॥ द्वाभ्यां

---

[1] °मेकाहुतिं ।

प्राचीनग्रीवमुत्तरलोम ऽऽस्तृणात्युत्तरं पुष्करपर्ण-मधस्ताद्दण्डमुत्तानम् ॥ २८ ॥

अग्निमुपरिवर्तमानत्वस्य विद्यमानस्यैवार्थस्याभिधायित्वादनुरूपेणैव मन्त्रेणैतत्पुष्करपर्णमाहरति । वेष्टनमेतयैव पुनर्वेष्टयति । शर्म च स्थ इति द्वाभ्यां मृत्खनदेशस्योत्तरेण कृष्णाजिनं पुष्करपर्णं च स्तृणाति यथा भवत्युपरिष्टात्कृष्णाजिनस्य पुष्करपर्णमुत्तानं तथेत्यर्थः ॥ २८ ॥

पुरीष्योऽसि विश्वभरा इति मृदमभिमृश्य ॥२९॥

मृत्खनस्याभिमन्त्रणम ॥ २९ ॥

कृष्णाजिने पुष्करपर्णे च संभरति त्वामग्ने पुष्क-रादधीति तिसृभिर्गायत्रीभिर्ब्राह्मणस्य । उत्तरा-भिस्त्रिष्टुब्भी राजन्यस्य जगतीभिर्वैश्यस्य ॥३०॥

यद्यप्यत्र—त्वामग्न इत्यादिकास्तिस्र एव गायत्र्य समाम्नातास्तथाऽपि चतसृभिर्वा, इत्यापस्तम्बादिकल्पेषु विकल्पेनोक्ता. । चतुष्ट्वपक्षे ‘ पुरीष्योऽसि विश्वभरा इत्यनेन पूर्वोक्तेन मन्त्रेण सह संख्या पूरणीया ।

केचित्तु—त्वामग्ने पुष्करादधीति कृष्णाजिने पुष्करपर्णे च क्षिपति । चतसृभिस्तिसृभिर्वा गायत्रीभिर्ब्राह्मणस्य संभरति । यदा तिसृभिस्तदा ‘ त्वामग्ने पुष्करादधीत्यारभ्य तिसृभिः । यदा चतसृभिस्तदा पुरीष्योऽसीत्यारभ्य चतसृभिः । अथर्वा त्वा प्रथमो निरमन्थदग्ने, इत्याहु· । य एवैनमन्वपश्यत्तेनैवैनꣳ संभरति (तै० सं० ५ । १ । ४) इति लिङ्गात् । तयैव चाभिमन्त्र्य तयैव च सभरणम् । चतसृभिरुपदेशः । तृतीयां तमु त्वा पाथ्य इति द्विरावर्तयति । तथा सप्तमीं । त्रिष्टुभि. ‘ सीद होत. ’ इत्येताभिश्चतसृभिश्चतुर्थी जनिष्वा हि जेन्य इति देवमनुष्यानेवास्मै सꣳसन्नान्प्रजनयति, इति लिङ्गात् । त्रिष्टुप्चतुर्थी तयैव च मृदोऽभिमर्शनम् । जगतीभिर्वैश्यस्य—जनस्य गोपा इति तिसृभि· । असावि सोम इति चतुर्थी ॥ ३० ॥

अथ काम्य समुच्चयं विधत्ते—

यं कामयेत वसीयान्त्स्यादित्युभयीभिस्तस्य संभरेत् । गायत्रीभिश्च त्रिष्टुग्भिश्च ॥ ३१ ॥

वसीयान्धनवान्भवेदिति । उभयीभिर्गायत्रीभिस्त्रिष्टुग्भिश्च तस्य संभरणम् । तत्र गायत्रीभिस्तेजःप्राप्तिस्त्रिष्टुग्भिरिन्द्रियप्राप्ति ॥ ३१ ॥

जनिष्वा हि जेन्य इति संभृतामभिमन्त्रयते ॥ ३२ ॥

संभृताया मृदोऽभिमर्शनं मृत्खनमन्यया मृदा पूर्यते यथा न लक्ष्यते तत्राऽवट इति ॥ ३२ ॥

सं ते वायुर्मातरिश्वा दधात्विति मृत्खनेऽप उपसृजति ॥ ३३ ॥

मृत्खनप्रदेशेऽपोऽवनयेत् । तुभ्यमिति मन्त्रान्तः ॥ ३३ ॥

संलोभ्य मृत्खनꣳ समुद्गृह्य कृष्णाजिनस्यान्तान्सुजातो ज्योतिषा सहेति मौञ्जेनार्कमयेण वा त्रिवृता दाम्नोपनह्यति ॥ ३४ ॥

संलोभनं विमोहनम् । कृष्णाजिनस्यान्तान्समुद्यम्य सर्वानुद्यम्य सुजात इति ' क्षौमेण मौञ्जेनार्कमयेण वा ' (आप०श्रौ० १६ । १ । २ । २९) इत्यापस्तम्बः । क्षौमेणाऽहतवाससा दाम्ना मौञ्जेन मुञ्जकृतेन, अर्कमयेण देवरूपिकाकृतेन दाम्ना बध्नाति ॥३४॥

उदु तिष्ठ स्वध्वरेति द्वाभ्यामुत्तिष्ठति ॥ ३५ ॥

विह्वयामह इत्यन्तः । सवितृलिङ्गकाभ्यामेताभ्यामृग्भ्यां बद्धमग्निं गृहीत्वोत्तिष्ठेत् । द्वितीयमन्त्रे—' देवो न सविता ' इत्युक्तत्वादेते साविड्यौ एताभ्यामुत्तिष्ठति । तथा चाऽऽहाऽऽपस्तम्ब.—सावित्रीभ्यामुत्तिष्ठति, इति ॥ ३५ ॥

सजातो गर्भो असि रोदस्योरिति हराति ॥ ३६ ॥

कनिक्रदद्धा इत्यन्त· । गर्दभसमीप हराति ॥ ३६ ॥

स्थिरो भव वीड्वङ्ग इति गर्दभस्य पृष्ठ आसादयाति ॥ ३७ ॥

पुरीषवाहन , इत्यन्त· । गर्दभस्य पृष्ठे स्थापयति मृदम् ॥ ३७ ॥

शिवो भव प्रजाभ्य इत्यासन्नमभिमन्त्रयते ॥ ३८ ॥

वनस्पतीनित्यन्त. । स्थापितमभिमन्त्रयते ॥ ३८ ॥

प्रैतु वाजी कनिक्रददिति तिसृभिरत्वरमाणा अश्वप्रथमाः प्रत्यायन्ति ॥ ३९ ॥

सत्यमित्यन्त.।अत्वरमाणाँ यथा भवन्ति तथाऽश्वप्रथमा यजमानगृहं प्रत्यागच्छन्ति। न तु गर्दभप्रथमाः ॥ ३९ ॥

अग्निं पुरीष्यमङ्गिरस्वद्भराम इति येन द्वेष्येण संगच्छेत तमभिमन्त्रयेतापश्यन्दिशति ॥ ४० ॥

व्याख्यातम् । यजमानशत्रुणाऽस्य संगमो भवति तमभिमन्त्रयते तेन मन्त्रेण । यदा न संगमस्तदा मन्त्रमुक्त्वा द्वितीयया निर्देशो देवदत्तमिति ॥ ४० ॥

उत्तरेण विहारं परिश्रित ओषधयः प्रतिगृह्णीताग्निमेत-मिति द्वाभ्यामोषधीषु पुष्पवतीषु फलवतीषूपावहरति ॥ ४१ ॥

सधस्थमाऽसददित्यन्तः । विहारस्योत्तरतोऽदूरे परिश्रिते वेष्टिते कटैरन्यैर्वा प्रदेशे । ओषधीषु व्रीहियवादिषु ग्राम्यारण्यासु पुष्पाणि यासु विद्यन्ते फलानि च तासूपावहरति स्थापयति । द्वाभ्यामुपावहरति, ओषधयः प्रतिगृह्णीताग्निमेतम् , (तै० सं०५-१-५) इति । एवमन्तो विहार. पश्चाल्लौकिकः सपद्यते प्रयोजनाभावाद्विहारस्येति न्यायः ॥ ४१ ॥

वि पाजसेति विस्रꣳसयति ॥ ४२ ॥

प्रणीतावित्यन्तः । प्रतिमुञ्चति दाम्ना बद्धम् ॥ ४२ ॥

आपो हि ष्ठा मयो भुव इति तिसृभिरप उपसृजति ॥ ४३ ॥

च न इत्यन्त । ' तिसृभिरुपसृजति ' (तै० सं० ५-१-६) इत्यत्र ब्राह्मणम् ॥ ४३ ॥

मित्रः सꣳसृज्य पृथिवीमिति द्वाभ्यां सꣳसर्जनीयैः सꣳसृजति ॥ (ख० १) ॥ अर्मकपालैर्वेण्वङ्गारैर्व्रीहितुषैः पलाशकषायैश्च शर्कराभिः पिष्टाभिः कृष्णाजिनलोमभिरजलोमभिर्यच्चान्यद्दृढार्थमुपार्धं मन्यते ॥ ४४ ॥

छन्दसाऽङ्गिरस्वदित्यन्तः । संसृजति मृदम् । द्वाभ्यां संसृजति संसर्जनीयैः संभारैर्दृढीकरणैः संसृजति, अर्मो ग्रामाभावस्थानम् । तत्र यानि कपालानि तानि शुचिभूतैः पिष्टैः संसृजति वेण्वङ्गारैश्चूर्णीकृतैर्व्रीहीणां च तुषैः पलाशकषायेण चूर्णेन शर्कराभिः पिष्टाभिः कृष्णाजिनलोमभिरजलोमभिश्च संसृजति मृदम् । यच्चान्यद्द्रव्यमुपगतं मृदमुपार्धं यद्दृढार्थं यत्समर्थं तदर्थमुपगतं भवति । यज्ञियस्य यच्चान्यत्किंचिच्चूर्णादिकैः सर्वैः संसृज्य मृदमिति । अत्र दार्ढ्यहेतुभिः कपालादिभिः संसर्गम्—' अर्मकपालैः सꣳसृजति, शर्कराभिः सꣳसृजति, अजलोमैः सꣳसृजति, कृष्णाजिनस्य लोमभिः सꣳसृजति ' (तै० सं० ५-१-६) इति ब्राह्मणव्याख्यातत्वाच्च ॥ ४४ ॥

मखस्य शिरोऽसीति पिण्डं करोति ॥ ४५ ॥

गतार्थः ॥ ४५ ॥

यज्ञस्य पदे स्थ इति कृष्णाजिनं पुष्करपर्णं चाभिमन्त्रयते ॥४६॥

अभिमृशति मृदिवाङ्गुष्ठाभ्या निगृह्णातीत्यापस्तम्ब. ॥ ४६ ॥

रुद्राः संभृत्य पृथिवीमिति च[1]स्रुभिः पिण्डान्प्रयच्छति ॥ ४७ ॥

गर्भे आ इत्यन्त. । कर्त्रे प्रयच्छति (आप० श्रौ० १६-२४) इत्यापस्तम्बः ॥४७॥

वसवस्त्वा कृण्वन्त्विवति चतुर्भिश्छन्दोभि-
र्महिष्युखां करोति बहुभार्यस्य ॥ ४८ ॥

यजमानायेत्यन्तः । महिष्यै प्रयच्छति यजमानो बहुभार्यः ॥ ४८ ॥

अध्वर्युरेकभार्यस्य ॥ ४९ ॥

अध्वर्युरे(र्येव ए)कभार्यः प्रयच्छति यजमानः ॥ ४९ ॥

एतैरेव यजुर्भिर्यजमानः क्रियमाणामभिमन्त्रयते ॥ ५० ॥

वसवस्त्वेत्यादिभिर्यजुर्भिर्यजमानोऽनुमन्त्रयते ॥ ५० ॥

त्र्युद्धिं पञ्चोद्धिं वा करोति ॥ ५१ ॥

उद्धिरूर्ध्वमवस्थितोऽवयवविशेषः । यथा भाण्डस्योपर्यन्यद्भाण्डं तस्याप्युपरि पुनरप्यन्यद्भाण्डमिति कक्ष्यात्रयं तथेयमेकैवोखा कक्ष्यात्रययुक्ता वा कार्या । एव पञ्चोद्धिं करोतीत्यर्थ. ॥ ५१ ॥

प्रादेशमात्रीमूर्ध्वप्रमाणेनारत्निमात्रीं तिर्यक्प्र
माणेन व्यायाममात्रीꣳ समन्तपरिमाणेनापरिमि-
तां वा कुर्वꣳश्चतस्रोऽश्रीः प्रतिदिशमुन्नयति ॥ ५२ ॥

प्रादेशप्रमाणा भवत्यूर्ध्वप्रमाणेनारत्निमात्री तिर्यक्प्रमाणेन व्यायाममात्री समन्ततः चतुररत्निर्व्यायामः । अपरिमिता व्यायामात्पञ्चप्रादेशाभ्यन्तरिषुमात्री वा । यथाऽऽहाऽऽपस्तम्बः—'पञ्चप्रादेशामिषुमात्रीं वा यदि पञ्च पशवो भवन्तीति वाजसनयेकम्' (१६-२-८) इति । पञ्चपशुषु वाजसनेयिमतादितरेऽपि विधयो लभ्यन्ते । पञ्चपशुष्वपि शाखान्तरस्था कुर्वन्नुखां चतस्रोऽस्या अश्रीः करोति मृदा । न त्रिकोणाम् ॥ ५२ ॥

---

१ क तिसृभिः ।

परिमण्डलां वा करोति ॥ ५३ ॥

परिमण्डला वृत्ता । यदा वृत्ता तदा गार्हपत्यपरिमाणा । बाहुभ्यां यजमानो गृह्यते ॥ ५३ ॥

अधिकारिविशेषेणाश्रिषु संख्याविशेषं विधत्ते—

नवाश्रिमभिचरतः कुर्यात् ॥ ५४ ॥

तथा च ब्राह्मणम्—' नवाश्रिमभिचरतः कुर्यात् ' (तै० सं० ५ । १ । ६) इति ॥ ५४ ॥

अदित्यै रास्नाऽसीति मध्यदेश उपबिलं वा रास्नां करोति ॥ ५५ ॥

रशनासदृशी भाण्डस्य गलगता रेखा रास्ना ॥ ५५ ॥

अश्रीणां रास्नायाश्च संधौ द्वौ चतुरः षडष्टौ वा स्तनान्करोति ॥ ५६ ॥

अश्रीणां रास्नायाश्च संधौ मेलने द्वौ यदा तदा प्राच्यामेव । यदा चतुरस्तदा प्रतिदिशमेकैकम् । यदा षट्तदा द्वयोर्द्वौ द्वौ । यदाऽष्टौ तदा चतसृष्वपि द्वौ द्वौ। चतुरस्रा (श्रा) परिमण्डला वा करोति सस्तनाम् । तदेतत्सर्वं ब्राह्मणेन समाम्नातम्—' द्विस्तनां करोति, चतुस्तनां करोति, अष्टास्तनां करोति ' (तै० सं ५ । ६ । ६) इति ॥ ५६ ॥

अदितिस्ते बिलं गृह्णात्विति बिलं करोति ॥ ५७ ॥

बिलमन्तश्छिद्रम् ॥ ५७ ॥

कृत्वाय सा महीमुखामित्युत्तरतः सिकतासु प्रतिष्ठापयति ॥ ५८ ॥

निदधाति । यत्र कृता तस्माद्देशादुत्तरतो वालुकासु प्रतिष्ठापयति ॥ ५८ ॥

तस्या एव मृदोऽषाढामिष्टकां त्र्यालिखितां तूष्णीं चतुरश्रां करोति ॥ ५९ ॥

यः करोत्युखां स एव करोत्यषाढाम् । उखामृत्तिकायाः चतुरश्रां चतुरश्रेऽग्नौ न श्येनादिषु तेषु यथा लक्षण मध्य इष्टकानां तथा लक्षण करोति, त्र्यालिखिता तु नित्या ॥ ५९ ॥

गार्हपत्येऽश्वशकृत्युपसमाधाय वसवस्त्वा धूपयन्त्विति सप्तभिश्छन्दोऽभिरुखामश्वशकैर्धूपयति ॥(ख० ४)॥ ६० ॥

---

१ क अत्रापि । २ ग ब्राह्मणे समा° । ३ ख चतुरस्रां ।

अश्वस्य शकोऽश्वशकृत् । सप्तभिर्मन्त्रैरश्वशकृतोखां धूपयति वसवस्त्वेति, एवं धूपनकर्म बहुमन्त्रम् । तथाऽन्यानि यानि बहुवाक्यानि (बहुमन्त्राणि) युच्यन्ते । अत्र वाऽऽरोहाश्वशकृद्गार्हपत्यादपनीयाग्निधूपनम् । ' गार्हपत्याद्धूपनपचने भवत. ' इति न्याय, तस्य (स्मिन्) च त्याग·, अविधानादपि त्यागः ॥ ६० ॥

अदितिस्त्वा देवीरित्यग्रेण गार्हपत्यमवटं खात्वा लोहितपचनैः संभारैरवस्तीर्य देवानां त्वां पत्नीरिति तस्मिन्नुखामवदधाति ॥ ६० ॥

पुरस्ताद्गार्हपत्यस्यावटं लोहिता यैर्भवत्युखा पक्वा ते लोहितपचनीया गोशकृदिक्षुपत्रादयस्तैरास्तीर्य भूमिम् । देवाना त्वेति तस्मिन्नवट उखा क्षिपति ॥ ६१ ॥

तूष्णीमषाढामन्ववधाय लोहितपचनीयैः संभारैः प्रच्छाद्य धिषणास्त्वा देवीरिति षड्भिर्गार्हपत्यात्पचाति ॥ ६२ ॥

तूष्णीमिति वचनादषाढा वाग्यतः स्थापयित्वा यदा त्वषाढा मन्त्रैस्तदा तूखा तूष्णीम् । सर्वं च धूपनादिसंस्कार तूष्णीमिति भाष्यकृत् । अवधानस्य तूष्णीमिति वचनादविहितसंस्कारो न क्रियत इति न्यायः । तूष्णीमेवावधानमषाढाया उखालिङ्गत्वान्मन्त्राणा [तैर्न] प्रच्छादनं, लोहितपचनीयैः, इति पुनरभिधानं मन्त्रश्च लुप्यते । अत्र षड्भिः पचति (तै० सं० ५ । १ । ७) इति दर्शनाद्गार्हपत्यादग्निमुखायां क्षिपति ॥ ६२ ॥

मित्रस्य चर्षणीधृत इति पच्यमानां मैत्रियोपचरति ॥ ६३ ॥

पच्यमानामुखां मैत्र्यर्चा प्रज्वलनादिभिरुपचरतीत्यर्थ. ॥ ६३ ॥

देवस्त्वा सवितोद्वपत्विति पक्वामुद्वपति ॥ ६४ ॥

पक्वामुखाम् । शक्त्या, इत्यन्तः ॥ ६४ ॥

अपद्यमाना पृथिव्याशा दिश आ पृणेत्युत्तरतः सिकतासु प्रतिष्ठापयति ॥ ६५ ॥

ध्रुवा त्वमित्यन्तः । भस्मन उत्तरतो देशाद्वालुकासु प्रतिष्ठापयति ॥ ६५ ॥

मित्रैतामुखां परिददाम्यभित्या एषा मा भेदीति मित्राय परिदाय वसवस्त्वा छृन्दन्त्विति चतुर्भिश्छन्दोभिरुखामजाक्षीरेणाऽऽच्छृणत्ति ॥ ६६ ॥

---

१ दर्शनादर्थाद्गा । २ ख अजक्षी° ।

पुनः परिदानं रक्षार्थम् । मित्रस्योखायाः । अत्र वाग्यतेनाषाढोद्वास्यते । तूष्णीमषाढामुद्वास्य (आप० श्रौ० १६ । २ । २३) इत्यापस्तम्बसूत्रात् । वसवस्त्वेति चतुर्भिर्मन्त्रैरजक्षीरेण सेचनमुष्णतापनयनार्थम् । अनेन दृढा च भवत्युखा जक्षीरेण सिक्ता । लोकेऽजक्षीरस्य सर्वव्याधिपरिहारहेतुत्वाद्वेदेऽपि—'आग्नेयी वा एषा । यदजा' इत्युक्तत्वात्परमत्वम् । सेचनसाधन विधत्ते—अजक्षीरेणाऽऽच्छृणत्ति परम वा (तै० स० ५ । १ । ७) इति ॥ ६६ ॥

सप्तैकविꣳशतिं चतुर्विꣳशतिं वा माषानादाय पुरुषशिरोऽच्छैति राजन्यस्य वैश्यस्य वेषुहतस्याशनिहतस्य वा । पुꣳसो माषानुपन्युप्य ॥ ६७ ॥

सप्तैकविंशतिं वा गृहीत्वा माषान्पुरुषशिरोभिमुखो गच्छति क्षत्रियस्य वा वैश्यस्य वा । इषुणा यो विद्धो म्रियते विद्युता वा हतः । अथ वा—एकविंशतिसंख्याकानि माषबीजानि स्वीकृत्य तैर्युक्तः पुरुषशीर्षं प्राङ्गु गच्छेत् । तथा च ब्राह्मणेनोक्तम्–'एकविꣳशत्या माषैः पुरुषशीर्षमच्छैति (तै० स० ५ । १ । ८) इति । माषानुपन्युप्यास्य शिरसि मध्यं कृत्वा हरति (तै० स० ५ । १ । ८) इति लिङ्गात् । ६७॥

अयं योऽसि यस्य त इदꣳ शिर इति पुरुषशिरः प्रच्छिद्यैतेन त्वमत्र शीर्षण्वानेधीति सप्तधा वितृण्णां वल्मीकवपां शिरसः स्थाने प्रतिनिदधाति ॥ ६८ ॥

अयं योऽसीति च्छेदनं पुरुषशिरसः । एतेन त्वमत्र शीर्षण्वानेधीति सप्तच्छिद्रां । वल्मीकवपां शिरःस्थाने निदधाति ॥ ६८ ॥

योऽस्य कौष्ठ्य जगतः पार्थिवस्यैक इद्वशी । यमं भङ्ग्यश्रवो गाय यो राजाऽनपरोध्यः । यमं गाय भङ्ग्यश्रवो यो राजाऽनपरोध्यः । येनाऽऽपो नद्यो धन्वानि येन द्यौः पृथिवी दृढा । हिरण्यकक्ष्यान्सुधुराद्धिरण्याक्षानयः शफान् । अश्वाननश्यतो दानं यमो राजाऽभितिष्ठतीति तिसृभिर्यमगाथाभिः परिगायति ॥ ६९ ॥

यमो गीयते यास्वृक्षु ता यमगाथाः । योऽस्य कौष्ठ्येत्याद्या आरण्यककाण्डे पितृमेधप्रपाठके समाम्नाताः । अत्रापेक्षितानां यमगाथानां संख्यां विधत्ते—तिसृभिः परिगायति (तै० सं० ५ । १ । ८) इति । शिरः प्रदक्षिणं कुर्वन् । यमगाथाभिः परिगायति वदतीत्यर्थः ॥ ६९ ॥

३

आहरन्त्यतीत्येके ॥ ७० ॥

यमगाथा जपति वा प्रस्थित.। यस्तु ब्राह्मणो याजनाध्यापनप्रतिग्रहान् परित्यज्य गानेनैव जीविका संपादयति तादृशाय ब्राह्मणाय शास्त्रीय देयं किमपि न दद्यात्। हि यस्माद्गाथा गानविद्यैव तद्द्रव्यममेध्य कृत्वा वृङ्क्ते देवपितृकार्येभ्यो वर्जयति तस्मात्तादृशाय न देयम्। अत्र प्रसङ्गात्पुरुषार्थ कश्चिन्निषेध दर्शयति—'तस्माद्गायते न देयं गाथा हि तद्वृङ्क्ते (तै० सं० ५ । १ । ८) इति ॥ ७० ॥

इदमस्माकं भुजे भोगाय भूयादिति पुरुषशिर आदत्ते ॥ ७१ ॥

आदान पुरुषशिरस. ॥ ७१ ॥

उदेह्यग्ने अधि मातुः पृथिव्या इत्याहरति ॥ ७२ ॥

पुरुषशिर इत्यनुवर्तते ॥ ७२ ॥

परि त्रिविष्टयध्वर यात्यग्नी रथीरिव । आ देवेषु प्र यो दधत् । परि वाजपतिः कविरित्येषा । परि प्रागाद्देवो अग्नी रक्षोहामीव चातनः । सेधन्विश्वा अपाद्विषो दहन्रक्षांसि विश्वहेति तिसृभिः पर्यग्नि करोति। मृदा प्रलिप्य निदधाति ॥ (ख०५) ॥ ७३ ॥

इति सत्यापाढहिरण्यकेशिसूत्र एकादशप्रश्ने प्रथमः पटलः ॥ १ ॥

आहृतं शिरो लौकिकेनाग्निना परि त्रिविष्टयध्वरमिति तिसृभिः पर्यग्निकरणं सकृत्। त्रिरिति भाष्यकृत्। गार्हपत्याग्निना वेति। लौकिकेनोपायेन यथा क्रिमयो न जायन्ते तथा शिरः कृष्णमृदा प्रलिप्य स्थापयेत्। न च शवस्पर्शदोष, प्रत्यक्षविधानात्। केचित्तु सचैलं स्नान कुर्वन्तीति ॥ ७३ ॥

इति हिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामेकादशप्रश्ने प्रथमः पटलः ॥ १ ॥

अथैकादशप्रश्ने द्वितीय पटल ।

अग्निभ्यः कामाय पशूनालभते। अश्वमृषभं वृष्णिवस्तं प्राजापत्यमजं तूपरं मुष्करा भवन्ति ॥ १ ॥

काम्यन्त इति कामाः पुत्रपश्वादय., तद्धेतवोऽग्नयः । अग्नयः कामा वा एक

इति वचनेन [कामो] गुणः । तानमावास्याया पौर्णमास्यां वा पर्वसंनिधौ देवनक्षत्रे वाऽऽलभेत । अश्वादिपञ्चपशुशीर्षाण्युपदधाति (तै० सं० २९ । २ । ९) इत्यादि ब्राह्मणे विहितम् । तत्रै वाग्निप्रकरणेऽपि—प्रजापतिरग्निमसृजत (तै० सं० ५ । ५ । १०) इति पञ्चपशुशीर्षोपधानं द्रष्टव्यम् । मुष्करा अण्डसहिता पशव. । प्राजापत्यं च तूपरं शृङ्गरहितं पूर्वमुपाकरोति । तेभ्य पश्चादश्वर्षभवृष्णिबस्तानग्निभ्य कामायोपाकरोति । वाजसनेयिनां तु पुरुष एव पशुभिर्विकल्पेन यदा तदा छिद्येत पुरुषशिर । अत्र पश्वर्थवेदिकरणं तु चतुरथाक्षा पञ्चोपरा(?) रज्जु , तस्यास्तृतीयेन भागेन वेदिमानं विद्यते । एकादशिनीविकारत्वात् । केचित्तु सौमिकीमेव कुर्वन्ति । एकादशिनीप्रसङ्गे नोपयुक्तेति पृथक्सोमप्रयोगान्निरूढसामान्यान्निरूढविकारमपि । एकादशिनीधर्माश्च वैशेषिका. संभवन्ति । अग्नीषोमीयः पशुर्मूलप्रकृतिर्दर्शश्च ।

अत्र पशुकर्म—पशुना यक्ष्य इत्युक्त्वा षड्ढोता । केचित्तु न कुर्वन्ति षड्ढोतारम्, अङ्गभूतत्वादिति । तैर्यक्ष्यमाणो न भवति । सोमेन यक्ष्यमाण इति तेषु विद्युदपि न कर्तव्यः । यक्ष्यमाणो वेष्ट्विति सोऽप्युक्त । यद्यपि तैर्यक्ष्यमाणो न भवति । निरूढप्रकृतित्वात्तु षड्ढोता क्रियते विद्युच्च । उदवसानीयादिष्विह न क्रियते । सोमार्थमपामुपस्पर्शनं कृतं सोमे न तावत्क्रियते । तदेव प्रसङ्गेनार्थं साधयति । परित्यज्याग्निमन्यं प्रणीय पथिष्टिर्व्रतोपायनं शाखाहरण यूपाहुत्यादि एकादशिनीवत् । यूपाना छेदनं पञ्चानाम् । वेद कृत्वा वेद्युत्तरवेदी, अग्निप्रणयनादि पशुवत् । प्रजापतये त्वा जुष्टमुपाकरोमि, इत्युपाकरण प्राजापत्यस्य । अग्निभ्य कामाय त्वा जुष्टमुपाकरोमीतीतरेषाम्—अश्वस्य बलीवर्दस्य वृष्णे, मेषस्य बस्तस्येति । तथा नियोजनम्—प्रजापतये त्वा जुष्टं नियुनज्मि । अग्निभ्यः कामाय त्वा जुष्ट नियुनज्मि, इति । तथा प्रोक्षणादीनि॥ १॥

तत्रैतासा सामिधेनीनां प्राकृतीभिः सामिधेनीभि समुच्चयमभ्युपेत्य सङ्ख्याविशिष्टा सामिधेनीर्विधत्ते—

एकविंशतिं चतुर्विंशतिं वा सामिधेनी परा चीरन्वाहैकादश प्राकृतीरनूच्य समास्त्वाऽग्न ऋतवो वर्धयन्त्विति दशाऽऽग्निकीरन्वाहोपेमसृक्षि वाजयुर्वचस्यां च नो दधीत नाद्यो गिरो मे । अपांनपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि । अपांनपादाह्यस्थादुपस्थं जिह्मानामूर्ध्वः स्वयशा उपस्थे । उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन्निति तिस्रोऽप्सुमतीर्यदि चतुर्विंशतिर्भवन्ति ॥ २ ॥ अमुत्र भूयादध

यद्यमस्येत्यामयाविनः कुर्यात् ॥ ३ ॥ बृहस्पते सवितर्बोधयैनमित्यनामयाविनः ॥ ४ ॥ राये अग्ने महे त्वा दानाय समिधीमहि । ईडिष्वा हि मही(हे)वृषन्द्यावा होत्राय पृथिवीम् । उद्वयं तमसस्परीति ज्योतिष्मत्या परिदधाति ॥ ५ ॥

एकविंशतिं चतुर्विंशतिं वा सामिधेनी. पराचीरितिवचनात्प्रथमोत्तमयोः प्र वो वाजा (तै० ब्रा० ३-५-२) इत्येकादशोक्त्वा, आजुहोतेत्येकादशिनीतरेषां गोत्राणा, त्व वरुण इति वसिष्ठराजन्यानामेकादशिनी । समास्त्वाऽग्ने (तै० सं० ४ १- ७) इत्यष्टावुक्त्वा ' बृहस्पते सवितर्बोधयैनमित्यनामयाविनो नवमी । अमुत्र भूयादित्यामयाविनो नवमी (वा) । राये अग्न इति विंशी, उद्वयं तमसस्परीत्येकविंशी परिधानीया । यदा चतुर्विंशतिस्तदैकादश प्राकृतीरुक्त्वाऽऽग्निकीश्च नव पूर्ववदुक्त्वा— 'उपेमसृक्षि' इति तिस्रोऽप्सुमतीरुक्त्वा—उद्वयं तमसस्परीति ज्योतिष्मती परिधानीया । यत्तु—भाष्यकारेणोक्तम्—एकादश प्राकृतीः समास्त्वाऽग्न इति दशाऽऽग्निकीः । चतुर्विंशतिपक्षे तु तत्र शाखान्तरोक्ता उपेमसृक्षि वाजयुरित्याद्यास्तिस्रो धाय्याः प्रक्षिप्य चतुर्विंशतिसंख्या पूरणीया, इति । पराचीरनावृताः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

हिरण्यगर्भः समवर्तताग्र इति स्रुच्यमाघारयति ॥ ६ ॥

आघारस्य प्रत्याम्नायो हिरण्यगर्भ इति ॥ ६ ॥

ऊर्ध्वा अस्य समिधो भवन्तीति प्रयाजानामाप्रियो भवन्ति ॥ ७ ॥

यद्यप्येकादशैव प्रयाजास्तथाऽपि द्वितीयतृतीययोर्मन्त्रयोः पुरुषभेदेन व्यवस्थितत्वान्मन्त्राणा द्वादशसंख्या न विरुध्यते । सा च व्यवस्था सूत्रकारेण दर्शिता—' नराशंसो द्वितीयः प्रयाजो वसिष्ठशुनकाना तनूनपादितरेषा गोत्राणाम् ' इति ॥ ७ ॥

आग्नेयीस्त्रिष्टुभ आग्नेयानां याज्यानुवाक्या भवन्ति ॥ ८ ॥

आग्नेयीस्त्रिष्टुभः संभरणे सीद होतरिति तिस्रो भुवो यज्ञस्येति च तिस्रो याज्ञसेन्याश्चित्याः ॥ ८ ॥

यः प्राणत इति प्राजापत्यस्य ॥ ९ ॥

य. पशुः प्राजापत्यस्तस्यैते याज्यानुवाक्ये इत्यर्थः । तत्र वपायां द्वे ऋचौ पुरोडाशे द्वे ऋचौ हविषि द्वे ऋचाविति षडृचो याज्यानुवाक्याः प्रजापतये छागस्य वपाया इति । अग्निभ्य. कामायाश्वस्यर्षभस्य वृष्णेर्बस्तस्य च वपानां मेदसामिति प्रैषः ।

जातवेदश्च(श्चे)न्द्र वपाभिर्गच्छ देवानिति होमः । उक्ता ऊहा एकवचनान्ता अपि बहूनामग्नीनां साधयन्ति निगमा । आग्नेयीस्त्रिष्टुभ इति वचनात् ॥ ९ ॥

वैश्वानरः प्राजापत्यो वा द्वादशकपालः पशुपुरोडाशो भवति ॥ १० ॥ सिद्धꣳ संतिष्ठते ॥११॥

यत्प्राजापत्यं वायोश्छिद्यते । यद्वायव्यः पशुर्भवति तेन वायोर्न प्रच्यवते । यत्प्राजापत्यः पुरोडाशस्तेन प्रजापतेर्न प्रच्यवते । यस्तु द्वादशकपालः पुरोडाशः क्रियते, तेन शाखान्तरविहिता देवता वैश्वानरस्तस्या अपि न च्यवते वैश्वानरो विकल्पेन लक्ष्यते ॥ १० ॥ ११ ॥

अपि वाऽऽग्नेयान्पर्यग्निकृतानुत्सृज्य तेषाꣳ शिराꣳसि प्रच्छिद्य मृदा प्रलिप्य निदधाति ॥ १२ ॥

अपि वेति शाखान्तरपक्षप्रदर्शनार्थम् । अत्रेदं चिन्तनीयम्—किमाग्नेयाः पशव एव नाऽऽलभ्याः, किंवा तान्पशूनुपाकृत्य पर्यग्निकरणादूर्ध्वमुत्सृजेत्, आहोस्वित्समाप्तिपर्यन्तमनुतिष्ठेदिति । नाऽऽद्य.—पशुप्राप्त्यभावप्रसङ्गात् । न द्वितीयः, मध्ये परित्यागेन यज्ञभ्रंशप्रसङ्गात् । न तृतीयः—अत्रैवाश्ववृष्णिबस्तशिरसा गतसारत्वेन भविष्यन्त्यां चित्यामनुपधेयत्वप्रसङ्गात् । एतद्दोषत्रयपरिहारायेत्थं कर्तव्यम्—आलम्भेनोत्सर्गेण च प्रथमतृतीयदोषौ न भविष्यतः । प्राजापत्येन तूपरेण समापनाद्यज्ञभ्रंशरूपो मध्यमदोषोऽपि न भविष्यति । अपि वा मरणोत्तरकाल सज्ञप्ताना संज्ञप्तहोमं हुत्वा शिरांसि छित्त्वा मृदा प्रलिप्य स्थापयति ॥ १२ ॥

अपः कबन्धान्यभ्यवहरति ॥ १३ ॥

उदकेषु कबन्धान्निक्षिपति ॥ १३ ॥

प्राजापत्येन सꣳस्थापयति ॥ १४ ॥

प्राजापत्येन संस्थाप्य तस्या एव च निगमाः, नाग्नीनाम् ॥ १४ ॥

अपि वैतेषाꣳ सर्वेषाꣳ स्थाने वायवे नियुत्वते श्वेतमजं तूपरमालभेत ॥ १५ ॥

नियुत्संज्ञका अश्वविशेषा यस्य वायोः सन्ति सोऽयं नियुत्वान् । तस्मै श्वेतं छागं तूपरं शृङ्गरहितमालभेत । अपि वा पञ्चपशूनां स्थाने वायुर्नियुत्वान् ॥ १५ ॥

तस्य प्राजापत्येन कल्पो व्याख्यातः ॥ १६ ॥

तस्य निरूढपशुबन्धवद्विधिः, विद्युद्वृष्टिवर्जं समानविधानात्पञ्चपशुभिः । आप्रिय आधारश्च पञ्चपशुवत् ॥ १६ ॥

वायुमती श्वेतवती वपाया याज्यानुवाक्ये भवतः ॥ १७ ॥

इदं याजुष हौत्रम् । पीवोऽन्नाꣳ रयि वृध इत्यृचौ वायुमत्यौ श्वेतवत्यौ च, ते वायवे समनस इति वायुशब्दसद्भावाच्छ्वेतः सिषक्तीति श्वेतशब्दसद्भावाच्च । वायुर्नियुत्वान्ययोर्देवता ते वायुमती नियुत्वती दैवतस्य याज्यानुवाक्ये भवत इत्यर्थः ॥१७॥

वायुमती नियुत्वती पशोर्दैवतस्य वैश्वानरः प्राजापत्यो वा द्वादशकपालः पुरोडाशो भवति ॥१८॥
सिद्धꣳ संतिष्ठते ॥ १९ ॥

गतार्थ· । अत्र, वायव्यः कार्या· ३ प्राजापत्याः ३ (तै० सं ९ । ९ । १) इति विचारितं ब्राह्मणे । वायव्यः कर्तव्य. पशु· प्राजापत्यः पुरोडाश इति वैखानसः । यस्तु प्राजापत्यो द्वादशकपाल पुरोडाशः क्रियते तेन शाखान्तरविहिता देवता । वैश्वानरस्त्वाग्निगुणकेनाभिहितम्(त) । तस्याग्नये वैश्वानराय द्वादशकपालं पशुपुरोडाशं निर्वपति (आप० श्रौ० १६ । २ । १२) । इति अन्यदेवता अपि पशुपुरोडाशदेवता: पशुदेवता वर्धयन्ति । तस्मादवीवृधन्त पुरोडाशेनेत्यस्या निवृत्तिः । यथा त्वस्माक पाठ—उवीवृधन्त ग्रहैरिति । तेन ज्ञायते ग्रहास्त[एव] देवता अतो ग्रहदेवता अभिवर्धयन्ति पशुदेवता. । अत एव पठितम्— 'इतरथा तु अवीवृधन्त ग्रहै पुरोडाशै' इत्येवमवक्ष्यच्छ्रुतिः । य· कश्चानाम्नावाग्निगुणके क्रतौ पशुरालभ्यते । अग्नीषोमीयसवनीयानूबन्ध्यासु वैश्वानर एवास्य द्वादशकपालः पुरोडाशः क्रियते । अग्निर्दे(गुणकदे)वता वैश्वानर इहापि । भाष्यकारस्तु—वचनादेवाग्निर्वैश्वानरोऽन्यत्र वैश्वानर एवेति व्याचष्टे । सिद्ध कृत्स्न सतिष्ठते समाप्यते ॥ १८ ॥ १९ ॥

मृदा प्रलिप्य वायव्यस्य शिरो निदधाति ॥ (ख०६) ॥ २० ॥

इति सत्याषाढहिरण्यकेशिसूत्र एकादशप्रश्ने द्वितीयः पटलः ॥२॥

तस्य शिरश्छित्त्वाऽभिमर्शने कृते मृदा च प्रलिप्य वाव्ययशिरः स्थाप्यते, तेनेष्ट्वा वायव्येन पशुना, पञ्च पशुभिर्वा, समानविधानत्वात् । सवत्सरं मॉसपरिवर्जनं स्त्रियाः परिगमनवर्जमुपरिशयनवर्जन च । यदाऽप्यर्वाक्संवत्सरादिज्या तदाऽपि सवत्सर वायव्यव्रतानि बाध्यन्त इति भाष्यकृत् । साग्निकधर्मव्रतैश्च सर्वेषा समुच्चय

---

१ ग °मुच्छ्रय ।

इति न्यायः । अथ वा मांसाशनमुपरिशय्यां च कुर्यात् । स्त्रियं तु नोपगच्छेत् । एवं संवत्सरमिति वाजसनेयकम् । इति वायव्यपशुः ॥ ६ ॥

इति हिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलिताया प्रयोगचन्द्रिकाया- मेकादशप्रश्ने द्वितीयः पटलः ।

अथैकादशप्रश्ने तृतीय पटल ।

यत्प्राग्दीक्षणीयायास्तत्कृत्वा द्विहविषं त्रिहविषं वा दीक्षणीयामिष्टिं निर्वपति । आग्नावैष्णवमेकादशकपालमाग्नावैष्णवं वा घृते चरुमादित्यं च घृते चरुं वैश्वानरं द्वादशकपालं पुरस्तात्तृतीयमसंवत्सरभृतः ॥ १ ॥ दीक्षाहुतिकाल आकूत्यै प्रयुजेऽग्नये स्वाहेति पञ्चाऽऽध्वरिकीर्हुत्वाऽऽकूतिमग्निमिति षडाग्निकीर्जुहोति । विश्वेदेवस्य नेतुरिति सप्तमीम् ॥ २ ॥

यत्पूर्वं दीक्षणीयायाः कर्म तत्कृत्वा द्रव्यनिर्देशः संभारयजूंषि अग्निपरित्यागः सोमपरिवे(पे)षणं सप्तहोता परित्यज्याग्निं क्रत्वर्थमग्निं प्रणीय त्रिहविष्क आग्नावैष्णव आदित्यस्तृतीयो वैश्वानर इति । असंवत्सरभृतो यजमानस्याऽऽग्नावैष्णवादपि पुरस्ताद्वैश्वानरः । आदित्यस्य पुरस्तादिति भाष्यकारोक्तिस्तस्याऽऽनन्तर्यात् । अग्निस्तु वैश्वानरगुणकः, वाक्यशेषान्मन्त्रलिङ्गाच्च । आग्नावैष्णव घृते चरुमिति घृतमग्नेः—' घृतमस्य योनिर्घृते श्रित. ' इत्यादिमन्त्रवर्णात् । तण्डुलास्तु विष्णोः प्रियाः । ' येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय' इति श्रुते. । तस्मादुभयप्रियत्वाद्घृतयुक्तश्चरुः कार्य. । अदितिर्देवता यस्य चरोः सोऽयमादित्यः । आग्नावैष्णव हविः प्रथम कृत्वा द्वितीयहविष्ट्वेनायमादित्यश्चरु. कार्यः । उख्यस्याग्नेः संवत्सरधारणं ब्राह्मणे विदधाति—यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते (तै० सं० ५-५-१) इति । तेन च धारणेन विनाऽग्निचयनं परिपक्वगर्भपातेन समानम् । अतो यजमानो म्रियेत । तस्मात्संवत्सरं धारयितुमशक्तः पुमान्संवत्सरात्प्रागेव तिस्रः षड्वा दश वा रात्रीर्दीक्षाश्चिकीर्षुर्वैश्वानरं द्वादशकपालं निर्वपेत्, तस्य च वैश्वानरस्याग्नेः संवत्सररूपत्वात् । यथा लोके संवत्सरेण पूर्णो गर्भः काले सुखेन जायत एवमप्यनयेष्ट्या संवत्सरं प्राप्य काले प्राप्ते चितवान्भवति । ततो न म्रियते । विहितानां हविषां त्रित्वं प्रशंसति—' त्रीण्येतानि हवींषि भवन्ति ' (तै० सं० ५-५- ३) इति । अत्र याजुषहौत्रसत्त्वे याजुषोक्तरीत्या सप्तदश

सामिधेन्यः । अग्निरग्रे प्रथमो देवतानाम्, अग्निश्च विष्णो तप उत्तमं मह इत्यग्नाविष्ण्वोर्याज्यानुवाक्ये । अदितिर्न उरुष्यतु महीमू षु मातरम्, इत्यदितेः । वैश्वानरो न ऊत्या पृष्टो दिवि, इति वैश्वानरस्य । त्रिहविरपि दीक्षणीया आज्येडान्ता । त्रिधाकरणमादित्यवैश्वानरयोरिति न्यायः । भाष्यकारस्तु—आज्येडान्ते ब्रह्मभागं प्राश्योपस्थानं कृत्वा ब्रह्मा निष्क्रामति, इति व्याचष्टे । प्राग्वंशकरणं वपनं चोत्तरेण बहिरित्येवमादि प्राग्दीक्षाहुतिभ्यः । आहवनीयमुपोपविशति, इत्येवमन्तं कृत्वा दीक्षाहुतयः । वैकल्पिका विधयः सर्वे लभ्यन्त इहापि । अध्वरो ज्योतिष्टोम. । अध्वरे भवा आध्वरिक्यस्ताः पञ्च—आकूत्यै प्रयुजेऽग्नये स्वाहेति स्रुवेण चतस्रः स्रुचा पञ्चमी । आकूतिमग्निमिति षडाग्निकीर्दीक्षाहुतीर्ध्रुवा अत एव सह पूर्णाहुत्या हुत्वाऽभिघारणम् । भाष्ये तु मन्त्रेणाऽऽप्यायनमिति । विश्वेदेवस्य नेतुरिति सप्तमी पूर्णाहुतिः । सप्तमीतिवचनाद्यजमानोऽनुमन्त्रयते वातं प्राणमिति ।

ननु—अग्नौ प्रकृतितो दीक्षाहुतय. षट्प्राप्तास्तासां च षण्मन्त्राः प्रकृतित एव प्राप्ताः—आकूत्यै प्रयुजेऽग्नये स्वाहा (तै० सं० (१–२–२) इत्यादयः । अग्नावपरे षण्मन्त्राः—'आकूतिमग्निं प्रयुज९ स्वाहा' इत्यादयः । ते च दीक्षार्थतया विनियुक्ताः । षड्भिर्दीक्षयति (तै० स० ५–३–९) इति । दीक्षाहुतीना चाभ्यासः श्रूयते—'द्वादश जुहोति' इति । तत्र संशयः—किं वैकृतैर्मन्त्रैः प्राकृता बाध्यन्ते समुच्चीयन्ते वेति ।

तत्र प्रत्यक्षपाठेन प्रत्यक्षवचनेन च ।
वैकृताः प्राकृतान्मन्त्रान्बाधेरन्नेककार्यतः ॥

यद्यपि 'द्वादश जुहोति' इति वचनाद्धोमानामभ्यासस्तथाऽपि वैकृतानामेव प्रत्यक्षवचनविहिताना चोदकेन प्राप्तप्राकृतमन्त्रबाधेन होमाङ्गत्वात्तैरेवाभ्यस्तैर्द्वादशापि होतव्या इति प्राप्ते ब्रूमः—

न प्रत्यक्षेण वाक्येन होमार्थं वैकृताः श्रुताः ।
दीक्षार्थताबलात्तेषा होमाङ्गत्वं प्रकल्प्यते ॥
सकृत्प्रयोगमात्राच्च तादर्थ्यमुपपद्यते ।
वैकृतैः प्राकृतास्तस्मात्समुच्चेया न बाधनम् ॥

'षड्भिर्दीक्षयति' इति दीक्षार्थता श्रुता । सा च स्वाहाकारलिङ्गानां होमद्वारेणेति दीक्षार्थत्वसिद्धये होमाङ्गता कल्प्यते । सकृत्प्रयुक्तैरेव च षट्सु होमेषु दीक्षार्थतासिद्धेर्नाभ्यासे प्राकृतबाधे वा प्रमाणमस्ति तेनाभ्यासवशेन होमाना द्वादशत्वान्मन्त्राणामपि प्राकृतवैकृतानां समुच्चयः ॥ १ ॥ २ ॥

यत्रा ऽऽमुष्टिकरणात्तत्कृत्वा शणकुलायेन मुञ्ज कुलायेन वोखामुपस्तीर्य मा सु भित्था मा सु रिष इति द्वाभ्यामाहवनीयाङ्गारेषूखां प्रवृणक्ति ॥ ३ ॥

मुष्टेः क्रिया मुष्टिकरणं पूर्वं च—मुष्टी कृत्वा (स० सू० १ । २ । ६) इति मुष्टिकरणं तत्कृत्वा यत्राध्वर्युरौद्ग्रहणानि जुहोति इत्येवमादि संभारयजूꣳषि चैनमध्वर्युं वाचयति (स० श्रौ० ७ । १ । ३) इत्यन्तम् । शण. पक्षिविशेष., तस्य कुलायो नीडमित्यर्थः । मुञ्जा. शरखण्डास्तैः प्रच्छाद्याभ्यन्तरमुखाया मा सु भित्था मा सु रिष इति द्वाभ्यामाहवनीयेऽधिश्रयत्युखा बाह्याम् । अग्मिन्निति मन्त्रान्त. ॥ ३ ॥

मित्रैतामुखां तपेत्यङ्गारैः परितपति ॥ ४ ॥

सर्वत इन्धनं प्रदक्षिणमङ्गारैः ॥ ४ ॥

दृव्रन्न इति तस्यां क्रमुकमुल्लिखितं घृतेनाङ्क्त्वाऽवदधाति ॥ ५ ॥

तस्यामुखाया क्रमुकमल्पं काष्ठशकलम् । उल्लिखितं क्रमुकं घृतेन सेचयित्वा क्षिपति । चूर्णरूपं क्रमुकमुखाया क्षिपतीति वैखानसेनोक्तम् ॥ ५ ॥

मुञ्जाꣳश्च ॥ ६ ॥

मुञ्जैः सहावधातीत्यर्थः ॥ ६ ॥

यस्तु गतश्रीः सन्पुनर्भूतिं कामयेत तस्य मथिताग्निमपोह्य पूर्ववत्प्रवृञ्जनमपि विधत्ते—

यो भूतिकामः स्याद्य उखायै संभवेत्स एव तस्य स्यान्मथित्वा गतश्रियोऽवदध्यात् ॥ ७ ॥

आहवनीये प्रतप्तायामुखायां यो-ग्नि. संभवेत्स एव तस्य भूतिकामस्य गतश्रिय. कार्यो न तु मथितः । एष संभवत्येष वै स्वयंभूर्नाम भवत्येव (तै० स० ५ । १ । ९) इति । अत्र उखायामेष संभवति तस्मान्मथनापेक्षामन्तरेण स्वयमेवोत्पन्नत्वादेष स्वयंभूरित्युच्यते । एवं सति यजमानो भवत्येव भूतिं प्राप्नोत्येव ॥ ७ ॥

यजमानद्वेषिणोऽध्वर्योः प्रकारान्तरं विधत्ते —

यं कामयेत भ्रातृव्यमस्मै जनयेयमित्यन्यत-स्तस्याऽऽहृत्यावदध्यात् ॥ ८ ॥

४

यमुद्दिश्य शत्रुमस्मै जनयेयमिति कामयेता वर्युस्तस्यान्यतो गृहान्तरादिप्रदेशादग्निमानीयोखायां प्रक्षिपेत् । तथा सति विलम्बमन्तरेणैव भ्रातृव्यं जनयति ॥ ८ ॥

अथ कामनाविशेषेणान्यमग्निं विधत्ते —

अम्बरीषादन्नकामस्य ॥ ९ ॥

घृतादिना शाकादिभर्जनार्थं यल्लौकिकं लोहादिपात्रं तदम्बरीषं तस्मिन्प्रतप्ते घृतप्रक्षेपेण प्रौढा ज्वालोत्पद्यते । ततोऽग्निमाहृत्योखायामवदध्यात् । लोके हि तस्मिन्नम्बरीषे शाकादिकमन्नं धार्यते । अतः काम्यमानेनान्नेनैतस्याग्नेः समानयोनित्वाद्यजमानोऽन्नं प्राप्नोत्येव ॥ ९ ॥

प्रदाव्यादाहरेद्यं कामयेत शूरो मे राष्ट्र आजायेतेति ॥ १० ॥

प्रदाव्यो वनदाहः । तस्मादाहरेदुख्यम् । मम राष्ट्रे शूरो धनंजयसदृशः, आजायेतेति तस्य प्रदाव्यादाहरणमुख्यस्य । अध्वर्युकाम इति भाष्यकृत् ॥ १० ॥

वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्य ॥ ११ ॥

तस्याऽऽहृत्यावदध्यादित्यनुवर्तते । वृक्षाग्राज्ज्वलत आहृत्योख्यं ब्रह्मवर्चसकामस्य यजमानस्य ॥ ११ ॥

भर्जनादन्नकामस्य ॥ १२ ॥

अत्रापि तस्याऽऽहृत्यावदध्यादित्यनुकर्षः । भर्जनं कम्बुः स यत्र त्यक्त्वाऽर्थाद्धाना भर्ज्यन्ते तत आहृत्यावदध्यादित्यर्थः ॥ १२ ॥

काम्यमग्निं कुर्वाणो नाऽऽहवनीयेऽनुप्रवृञ्ज्यात् ॥ १३ ॥

नाऽऽहवनीये प्रवृञ्ज्यात् काम्यमग्निं कुर्वन्यजमानोऽपि ॥ १३ ॥

जात उख्येऽनुगमयत्याहवनीयम् ॥ १४ ॥

आहवनीये प्रवृञ्जनपक्ष उखायां जात उख्येऽनुगमयत्याहवनीयम् । १४ ॥

परस्या अधि संवत इत्यौदुम्बरीं समिधमादधाति । परमस्याः परावत इति वैकङ्कतीम् । तां सवितुर्वरेण्यस्य चित्रामिति शमीमयीम् ॥ १५ ॥ शमीमयीं पूर्वामेके समामनन्ति । वैकङ्कतीमुत्तराम् ॥ १६ ॥

समिद्रूप्ये लिप्यते ॥ १५ ॥ १६ ॥

सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जात-
मुख्यमुपतिष्ठते ॥ १७ ॥

आसद इत्यन्तः । अत्र तिसृभिरन्त उपस्थानं बलवतो जातस्य ॥ १७ ॥

यदग्ने यानि कानि चेति पञ्चभिरपरशुवृक्णमौदु-
म्बरमिध्ममभ्यादधाति ॥ १८ ॥

दधाम्यास्य इत्यन्त । अपरशुवृक्ण परशुच्छेदरहित काष्ठ यदग्न इत्यादिमन्त्रैः समिधमादध्यात् । अथवा—पञ्चभिरन्ते सकृदेकमुदुम्बरस्यानग्ववमपरशुवृक्ण वाम्यादिभि-रच्छिन्नं हस्तेनैव भग्नमुख्य इध्मं क्षिपति । १८ ॥

तैल्वकमभिचरतः कुर्याद्घाहुका हैनं समारस्तेना
भवन्ति (इति) ॥ १९ ॥

तैल्वकं तिलकस्येध्मम् । बहुगालव तिलक इति केचित् ॥ १९ ॥

दध्रुाभ्यां मलिम्लूनित्याश्वत्थी समिधमादधाति ।
ये जनेषु मलिम्लव इति वैकङ्कतीम् ॥ यो अस्म-
भ्यमरातीयादिति शमीमयीम् । ता आदधद्यं द्वेष्टि
तस्य वधं मनसा ध्यायति ॥ २० ॥ २१ ॥

सर्वत्र सामिधमादधातीत्यन्वय. । ता समिध आधानकाले य यजमानमुद्दिश्य द्वेष करोति तस्य वधमध्वर्युर्मनसा ध्यायतीत्यर्थ ॥ २० ॥ २१ ॥

सꣳशितं मे ब्रह्मोदेषां बाहू अग्निर्गमित्युत्तमे
औदुम्बर्यौ समिधावादधाति ॥ २२ ॥

अहमित्यन्तः । औदुम्बर्यौ द्वे समिधौ तूष्णीमादध्यादिति शेष ॥ २२ ॥

अथ यजमानं वाचयति ॥ (ख० ७) ॥ २३ ॥

उतमे राक्षोघ्नसूक्तस्यान्तिमे ऋचौ ' सꣳशित मे ' इति यजमान वाचयेत् ॥२३॥

ब्रह्म क्षत्रꣳसयुजा नद्यथ ते ब्रह्मा ह क्षत्रं जिन्वाति
क्षत्रियस्य क्षत्रं ब्रह्म जिन्वाति ब्राह्मणस्य यत्स
ध्रीची कृण्वतो वीर्याणीति जपति ॥ २४ ॥

स्पष्टम् ॥ २४ ॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनौ भरि-
ष्यत्युखा । ता विश्वैर्देवैर्ऋतुभिः संविदानः प्रजा-

पतिर्विश्वकर्मा युनक्त्विति मौञ्जे शिक्ये षडुद्यामे द्वादशोद्यामे वोखामवदधाति ॥ २५ ॥

मौञ्जे शिक्ये मुञ्जकृते षडुद्यामः शिक्यपाद, ते यस्य षट् द्वादश वा तत्रोखां निदधाति । न यथा दह्यते शिक्यं तथोपायं कुर्यात् ॥ २५ ॥

अग्ने युक्ष्वा हि ये तवेति वैताभ्यामेकविंशतिनिर्बाधो रुक्मः सूत्रोतस्तमन्तर्वेद्यासीनो दृशानो रुक्म इति बहिष्टन्निर्बाधं यजमानो विपर्यस्य प्रतिमुञ्चतेऽधस्तान्निर्बाधꣳ सादयति ॥ २६ ॥

सुवर्णफलके निम्नोन्नतभावमापद्य स्पर्शकारिणं पुरुषं निःशेषेण बाधन्त इति निर्बाधाः स्फोटकसदृशा अवयवविशेषाः । त चैकविंशतिसंख्याका यस्मिन्रुक्मे सोऽयमेकविंशतिनिर्बाधः । तादृशं रुक्मं कुर्यात् । सूत्र उतः सूत्रोतः सूत्रे लम्बितः । दृशानो रुक्म इत्यनेन मन्त्रेणोपरिष्टाद्यजमानोऽन्त स्फोटकं लङ्घयित्वा रुक्मं पश्चाद्बहिः स्फोटकान्कुरुते ॥ २६ ॥

नक्तोषासेति कृष्णाजिनं प्रतिमुञ्चते ॥ २७ ॥

नक्तोषासेति कृष्णाजिनमुपरि करोति बाह्वो. ॥ २७ ॥

विश्वा रूपाणीति शिक्यपाशान् ॥ २८ ॥

प्रतिमुञ्चन इत्यनुवर्तते । शिक्यस्य य. पाशस्तं ग्रीवाया प्रतिमुञ्चते ॥ २८ ॥

अपि वा शिक्यं प्रतिमुच्य कृष्णाजिनं प्रतिमुञ्चते ॥ २९ ॥

अपि वा यथासमाम्नायपाठेन पठितस्तथेत्यर्थः ॥ २९ ॥

सुपर्णोऽसि गरुत्मानित्युख्यमवेक्षते ॥ ३० ॥

अचलितस्यैवावेक्षणमुख्यस्य ॥ ३० ॥

सुपर्णोऽसि गरुत्मान्दिवं गच्छेत्युद्यच्छते ॥ ३१ ॥

स्पष्टोऽर्थ. ॥ ३१ ॥

ऊर्ध्वं नाभेर्धारयमाणो विष्णोः क्रमोऽसीति चतुरो विष्णुक्रमान्(प्राचः) क्रामति ॥ ३२ ॥

नाभेरुपरि धारयमाण उख्य, विष्णो· क्रमोऽसीति चतुरो विष्णुक्रमान्प्राचीं दिशं क्रामति प्राङ्मुखश्च । यं द्विष्म इत्येवमन्ता विष्णुक्रममन्त्राः ॥ ३२ ॥

अक्रन्ददग्निरित्युख्यमभिमन्त्रयते ॥ ३३ ॥

अक्रन्ददित्येतयर्चा तमग्निमभिमन्त्रयते ॥ ३३ ॥

अग्नेऽभ्यावर्तिन्निति चतसृभिः प्रदक्षिणमावर्तते ॥ ३४ ॥

विश्वतस्परीत्यन्तः । चतसृभि. प्रदक्षिणमावर्तते सहाऽग्निनेति शेष· । आवृत्तौ प्रादक्षिण्यं विधत्ते—' दक्षिणा पर्यावर्तते ' (तै० सं० ५ । २ । १) इति । दक्षिणा प्रादक्षिण्येन, दक्षिणभागमवस्थाप्य वामभागस्य परिभ्रमणं प्रादक्षिण्यम् । पुरुषस्य दाक्षिणभागे सामर्थ्यातिशयसद्भावात्तदेवानुसृत्याऽऽवृत्तिः कृता भवति ॥ ३४ ॥

आ त्वाऽहार्षमित्याहृत्योपतिष्ठते यं कामयेत राष्ट्रꣳ स्यादिति तं मनसा ध्यायेद्विशस्त्वा सर्वा वाञ्छन्त्विति ॥ ३५ ॥

अस्य मन्त्रस्य प्रथमपादे वह्नेराहरणं प्रसिद्धमेव प्रतीयत इति दर्शयति—आ त्वाऽहार्षमित्याहाऽऽह्येवꣳ हरति (तै० सं० ५ । २ । १) इति । द्वितीयपादेऽन्वयव्यतिरेकाभ्यां प्रतिष्ठा सिध्यतीत्याह—' ध्रुवस्तिष्ठाविचाचलिरित्याह प्रतिष्ठित्यै ' (तै० सं० ५ । २ । १) इति । तृतीयपादे प्रजासमृद्धिं चतुर्थपादे राज्यस्थैर्यं च क्रमेण दर्शयति—' विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैनꣳ समर्धयत्यस्मिन्राष्ट्रमधि श्रयेत्याह राष्ट्रमेवास्मिन्ध्रुवमकः ' (तै० सं० ५ । २ । १) इति । विशा प्रजया । एनं यजमानम् । अस्मिन्यजमाने । अकः करोति । चतुर्थपादपाठकाले यजमानविषयं काम्यं मनसा ध्यानं विधत्ते—'यं कामयेत राष्ट्रꣳ स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवति ' (तै० सं० ५ । २ । १) इति । यं यजमानमुद्दिश्य राज्यमस्त्विति कामयेताध्वर्युस्तं चतुर्थपादोच्चारणकाले ध्यायेत् ।

केचित्तु व्याचक्षते—तूष्णीमाहृत्याऽऽसन्दीसमीपम्, आ त्वाऽहार्षमित्युपतिष्ठते । अग्ने बृहन्नुषसामूर्ध्वो अस्थादिति च । भाष्ये तु व्याचष्टे—आहरणार्थः पूर्व आ त्वाऽहार्षमिति । द्वितीयेनाग्नेरुपस्थानम् । तूष्णीमाहृत्य द्वाभ्यामुपस्थानमित्येवं वैखानससूत्रनिबन्धनात् । यं कामयेत राष्ट्राधिपतिः स्यादिति तस्य ध्यानम् । इदꣳ राष्ट्रमधिश्रय देवदत्त, इति ॥ ३५ ॥

उदुत्तमामिति शिक्यपाशमुन्मुञ्चते ॥ ३६ ॥

शिक्यपाशमवनयति ग्रीवायाः ॥ ३६ ॥

अग्ने बृहन्नुषसामूर्ध्वो अस्थादित्युन्मुच्योपतिष्ठते ॥ ३७ ॥

गतार्थः ॥ ३७ ॥

---

१ ख. 'पाशान्मु' ।

औदुम्बर्यासन्द्यरत्निमात्रशीर्ण्याऽनूच्या प्रादेशमात्रपादा मौञ्जविवाना फलकास्तीर्णा वा मृदा प्रदिग्धा सीद त्वं मातुरस्या उपस्थ इति तस्यां चतसृभिरुख्यं सादयति ॥ ३८ ॥

औदुम्बर्या आसन्द्या प्रकृतत्वात्सैव तस्यामिति परामृश्यते । बृहदित्यन्तः । सीद त्वं मातुरित्यादिभिश्चतसृभिरौदुम्बर्यामुख्याग्निं स्थापयेत् । अथ वा—उदुम्बरेण कृता औदुम्बरी । आसीदत्यस्यामित्यासन्दी । अरत्निमात्रशीर्षण्याऽनूच्या यस्याः पादा प्रादेशमात्राश्च । यस्या मौञ्जैः शुल्बैर्विवानं कृतम् । फलकैरास्तीर्णा वा । न मुञ्जविवाना, मृदा च प्रलिप्ता, उभयं यथा न दह्यते तथेत्यर्थः । सीद त्वं मातुरस्या उपस्थ इति चतसृभिस्तस्या सादयत्युख्यम् ॥ ३८ ॥

शर्करायां वा ॥ ३९ ॥

तिसृभिः सादयति (आप० श्रौ० १६ । ४ । १७) इत्यापस्तम्बः । शर्करायां वा सादयति ॥ ३९ ॥

हꣳसवत्योपतिष्ठत इत्येके समामनन्ति ॥ (ख० ८) ॥ ४० ॥

इति सत्याषाढहिरण्यकेशिसूत्र एकादशप्रश्ने तृतीयः पटलः ।

अत्रैके शाखिनः हꣳसः शुचिषत्, इति हंसवत्योपस्थानमामनन्ति ॥ ४० ॥

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामेकादशप्रश्ने तृतीयः पटलः ॥ ३ ॥

अथैकादशप्रश्ने चतुर्थः पटलः ।

मुष्टिकरणप्रभृतीनि कर्माणि प्रतिपद्यते[१] ॥ १ ॥

मुष्टिकरणप्रभृति सौमिकानि कर्माणि कर्तुं प्रतिपद्यते । प्रथमस्य दीक्षादिवसस्य कर्मानुपूर्व्यम् । संभारयजुषां वाचनं कृत्वा शणकुलायेन मुञ्जकुलायेन चोखां प्रच्छाद्यान्यमग्निं करोति (स० श्रौ० ११।३।३) ॥ १ ॥

येन देवा ज्योतिषोर्ध्वा उदायन्निति प्रादेशमात्रैः काष्ठैरुख्यमुपसमिन्धे ॥ २ ॥

येन देवा इति प्रादेशमात्रैः काष्ठैरुख्येन्धनं, यजमानेनैव प्रकृतत्वात् । अध्वर्युरिति भाष्यकृत् ॥ २ ॥

१ अध्वर्युणैवेति क्वचित्पुस्तकान्तरे पाठान्तरम् ।

सदा ज्वलति ॥ ३ ॥

सदा नित्यो ज्वलति(११ । ३ । १९) इत्यापस्तम्बोक्तेः । व्रतकाल एव ज्वलति (वै० श्रौ० ३१ । १०) इति वैखानसः ॥ ३ ॥

अन्नपतेऽन्नस्य नो देहीति व्रतयिष्यन्नौदुम्बरी समिधं व्रते समज्योख्येऽभ्यादधाति ॥ ४ ॥

यदा व्रतं ग्रहीष्यंस्तदौदुम्बरीं समिधं व्रतार्थे क्षीरद्रव्ये समज्याङ्क्त्वा समिधं प्रक्षिपति यजमानः । व्रत इति सप्तमीनिर्देशान्मध्यंदिने मध्यरात्रे वा गृहीतो व्रते यजमानेन । चतुष्पद इत्यन्तः ॥ ४ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण च्छन्दसा रात्रिमिष्टकामुपदधे तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेति सायमुख्यमुपतिष्ठते ॥ ५ ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण च्छन्दसाऽहरिष्टकामुपदधे तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेति प्रातः ॥ ६ ॥

उख्यमुपतिष्ठत इत्यर्थः ॥ ५ ॥ ६ ॥

श्वोभूते दिवस्परि प्रथमं जज्ञे अग्निरित्येकादशभिर्वात्सप्रेणोपतिष्ठते ॥ ७ ॥

द्वितीयेऽहनि ' वात्सप्रेणोपतिष्ठते ' (तै० सं० ५–२–१) इति । वत्सप्रीनामकेन महर्षिणाऽधीतं दिवस्परीत्यादिकं सूक्तं वात्सप्रं, तेनाग्निमुपतिष्ठेत ॥ ७ ॥

एवꣳ सदाऽऽक्रयणात् ॥ ८ ॥

एवमुक्तप्रकारेण यावत्क्रय इति ॥ ८ ॥

पूर्वेद्युर्विष्णुक्रमान्क्रामति । उत्तरेद्युरुपतिष्ठते वात्सप्रेणेति ॥ ९ ॥

पूर्वेद्युः पूर्वस्मिन्नहनि विष्णुक्रमान्क्रामति । उत्तरेद्युरुपतिष्ठते वात्सप्रेणेति । विष्णुक्रमा वात्सप्रं च प्रथमेऽहनीति प्राप्त उच्यते—पूर्वेद्युः प्रक्रामति उत्तरेद्युरुपतिष्ठते (तै० सं० ५–२–२) इति । केचित्तु—प्रथमेऽहन्युभयं कुर्वन्ति विष्णुक्रमान्वात्सप्रं चेति । द्वितीयादिष्वहःसु द्वितीये विष्णुक्रमांस्तृतीये वात्सप्रमिति कुर्वन्ति व्यत्यासं ' सदा यावत्क्रयः ' इति । यदहस्तु सोमक्रयस्तदहरुभयं क्रियते विष्णुक्रमाः प्रथमं पश्चाद्वात्सप्रमिति ॥ ९ ॥

---

१ घ. व्रतेऽपीति पाठः ।

यदहरग्निं चेष्यमाणः स्यात्तदहरुभयꣳ समस्येत् ।
प्रचक्रामेदुपतिष्ठेत ॥ १० ॥

यस्मिन्नहनि चेष्यमाणः स्यात्तस्मिन्दिने विष्णुक्रम उपस्थानं तयोः समस्येत् ॥ १०॥

यद्युख्ये भ्रियमाणेऽयं देवः प्रजा अभिमन्येत
भिषङ्नो अग्न आवह। स्वꣳ रूपं कृष्णवर्त्मनो
असि होता न ईड्यः । त्वं नो अग्ने भिषग्भव
देवेषु हव्यवाहनः । देवेभ्यो हव्यवाडसि ।
भिषजस्त्वा हवामहे भिषजः समिधीमहि ।
भिषग्देवेषु नो भवेत्येताभिस्तिसृभिस्तिस्रः
समिध आदध्यात् ॥ ११ ॥

यद्युख्ये भ्रियमाणे उखास्थ आहवनीये । अयं देव (इति) अग्निरुद्रः प्रजा अभिमन्येत हिंस्यादुपसर्गेणाऽऽग्नेयीभिर्भिषग्वतीभिस्तिसृभि. (आप० श्रौ० १६-४-२८) इति तिस्रः समिध. प्रतिमन्त्रमादध्यात् ॥ ११ ॥

यद्युख्ये भ्रियमाणे कामयेत वर्षेदिति सूर्यो अपो
विगाहते रश्मिभिर्वाजसा तमः । बोधा स्तोत्रे
वयो वृधः ॥ परि यो रश्मिना दिवोन्तान्ममे
पृथिव्याः । उभे आपप्र रोदसी महित्वा ॥ बर्हि-
ष्ठेभिर्विहरन्यासि तन्तुमवव्ययन्नसितं देव वस्त्रः ।
दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो
अप्स्वन्तरित्येताभिस्तिसृभिस्तिस्रः समिध आद-
ध्यात् ॥ १२ ॥

यद्युख्ये भ्रियमाणे धार्यमाणे किंचिद्यजमानस्य नश्येत् । यदि कामयेत वर्ष्येः पर्जन्यः, इति । याः सौर्यः सूर्यदेवत्याः । रश्मिशब्दो यासु विद्यते ता रश्मिवत्यः । ताभिः प्रतिमन्त्रं तिस्रः समिध आदध्यात् ॥ १२ ॥

यद्युख्ये भ्रियमाणे कामयेत न वर्षेदित्यदृश्रमस्य
केतवो वि रश्मयो जनाꣳ अनु । भ्राजन्तो
अग्नयो यथा ॥ तरणिर्विश्वदर्शत इत्येषा ॥ दिवो
रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता आयन्नर्थानि कृण्वन्नपा-
ꣳसीत्येताभिस्तिस्रः समिध आदध्यात् ॥ १३ ॥

---

१ ग. °न्न्याग्निं । २ क. °त न व° ।

यदि कामयेत न वर्षेत्पर्जन्य इति । अतिवृष्ट्या । याः सूर्यदेवत्याः सौर्यः । भ्राजः शब्दो यासु विद्यते ता भ्राजस्वत्य स्ताभिस्तिसृभिस्तिस्रः समिधः प्रतिमन्त्रमादध्यात् । 'अदृश्रमस्य केतवः' इति च ॥ १३ ॥

यद्युख्ये म्रियमाणे किंचिन्नश्येदग्नेऽभ्यावर्तिन्निति चतसृभिरुपतिष्ठते । विन्दत्येवैतदिति विज्ञायते ॥ (ख० ९) १४ ॥

इति सत्याषाढहिरण्यकेशिसूत्र एकादशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

यद्युख्ये म्रियमाणे धार्यमाणे किंचिद्यजमानस्य नश्येत् । अग्नेऽभ्यावर्तिन्निति चतसृभिरुपतिष्ठते यजमान उख्यम् । लभते तन्नष्टमिति श्रुतेः । हिरण्यनाशेऽप्येतदेव । उख्ये म्रियमाण इति कालविधानात् ॥ १४ ॥

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकाया-मेकादशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

अथैकादशप्रश्ने पञ्चम पटल ।

उदु त्वा विश्वेदेवा इत्युख्यमुद्यच्छते ॥ १ ॥

यस्मिन्नहनि दीक्षासु वर्तमानासु प्रयायाद्देवयजनसमीपम् । तत्र स्पष्टमेवोक्तमापस्तम्बेन—यदहः प्रयायात् (आप० श्रौ० १६ । ४ । ३९) इति । इह गृहे दीक्षा नित्या सूत्रान्तरे प्रयाणविधानान्मन्त्रलिङ्गाच्च । उख्यमुद्यच्छति उद्गृह्णाति ॥ १ ॥

सीद त्वं मातुरस्या उपस्थ इति चतसृभिर्द्वीषे शकट आसादयति ॥ २ ॥

शकटे प्रउग उख्यमासादयति (१६ । ४ । ३६) इत्यापस्तम्बः । द्वे ईषे यस्य तदिदं द्वीषं तस्मिन्द्वीषे शकटे । न रथेन प्रयाति, रथस्य प्रत्याम्नायः शकटम् । प्रउगं मुख तस्मिन्नुख्यः साद्यते, तिसृभिर्वा साद्यते । हस्मवत्योपस्थानम् । इहापि प्रयाणं याजमानम् ॥ २ ॥

तूष्णीमितरावग्नी आसाद्य प्रेदग्ने ज्योतिष्मानिति प्रयाति ॥ ३ ॥

समोप्याग्नी पात्रयोर्गार्हपत्यदक्षिणाग्नी पश्चादुद्धृत्वा सादयति शकटे सभ्यावसथ्ययोः पृथगरण्योरग्नी समारोप्य रथेन प्रयाति इति प्रकृतावग्निहोत्रदर्शि-

---

१ ख न लभ्यते।

पूर्णमासयोरेव सभ्यावसथ्यौ, नान्यत्रेति भाष्यकृत् । तूष्णीमितराविति द्वयोरेकाग्न्योः समारोपणविधानात् । भद्रादभिश्रेय इत्यस्य प्रेदग्ने ज्योतिष्मान्याहीति प्रत्याम्नायः ॥ ३ ॥

अक्रन्ददग्निरित्यक्षशब्दमभिमन्त्रयते ॥ ४ ॥

यदि शब्दो जायतेऽक्षस्य ततोऽनुमन्त्रणम् । नद्युत्तारः प्रकृतिवत् ॥ ४ ॥

अध्यवसायौदुम्बरीꣳ समिधं घृतानुषिक्तामतिथि-वत्योरुख्येऽभ्यादधाति समिधाऽग्निं दुवस्यतेति गायत्र्या ब्राह्मणस्य । प्र प्रायमग्निरिति त्रिष्टुभा राजन्यस्य । जगत्या वैश्यस्य ॥ ५ ॥

प्रयाणमन्त्रस्तु याजमानोऽपि । अग्निमधिकृत्य यजमानो ब्रूते—प्रेदग्ने ज्योतिष्मान्याहीति लिङ्गात् । तथा च प्रकृतावपि—'बृहस्पतिः पुर एता ते अस्तु' (तै० सं० १ । २ । ४) इति लिङ्गात् । प्राप्य देवयजनमेदमगन्म, इत्याग्निभिः सह प्रविशति देवयजनम् । अत्रापि गार्हपत्यदक्षिणाग्न्योः स्वस्वायतने निधाय गार्हपत्यमग्र उख्यं प्रतिष्ठाप्य न वेष्टयत्यात्मानम् । यद्वा—पश्चात् समिधाऽग्निं दुवस्यत इत्यवसिते प्रयाणे समाप्त इत्यर्थः । मूलादारभ्याग्रात्सिक्ताऽनुषिक्ता तामादधाति यजमान एव प्रयाणव्रतनेन्धनघृतानुषिक्ताधानानामेककर्तृकत्वात् । एवं त्रिष्टुभा क्षत्रियस्य घृतानुषिक्ताधानं प्र प्रायमग्निरिति । जगत्या वैश्यस्येति जनस्य गोपा इति ॥ ५ ॥

इन्धने व्रतनेऽध्यवसाने च सर्वासु संनिपातितासु घृतानुषिक्तां प्रथमामादधाति ॥ ६ ॥

यदा त्विन्धनस्य—येन देवा ज्योतिषोर्ध्वा उदायन्निति क्षेपणानि काष्ठानि भवन्त्युख्ये । मध्यंदिनव्रतकालप्राप्तं चेद्देवयजनमिति वैखानसः । यदा त्रयाणामेषा संनिपातस्तदा घृतानुषिक्ता पूर्वामादधाति यजमानस्तत इन्धनं व्रतनमध्यवसानमिति । कालस्यानपायात् ॥ ६ ॥

यद्युखां भस्माभिसꣳसीदेदुख्यमादायोदकान्तं गत्वेमꣳ सुयोनिꣳ सुव्रतꣳ हिरण्मयꣳ सहस्रभृष्टिं महिषावरोह । उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमाविशस्व । इडꣳ स्तनं मधुमन्तं धयापां (प्रप्यातमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमाविशस्व) इति द्वाभ्यामुख्यमुपावहरति ॥ ७ ॥

यद्युखायां भस्माभिनिषीदेदित्येवमाद्यध्वर्युव्यतिरिक्त', यदि भस्म भवति, उखामुख्यमादाय सह शिक्येनोदकसमीपं गत्वा—' इमꣳ सुयोनिं ' इति द्वाभ्यामग्निमुद्धृत्योखाया अपनीय शिक्यादुखाम् ॥ ७ ॥

आपो देवीः प्रतिगृभ्णीत भस्मैतादिति तिसृभिरप्सु भस्म प्रवेशयति ॥ ८ ॥

अप्सु क्षिपति । अपामसीत्यन्तः ॥ ८ ॥

भस्मनः प्रत्यादाय प्रसद्य भस्मना योनिमिति द्वाभ्यामुखायां प्रत्यवदधाति ॥ ९ ॥

उखायां भस्मन एकदेशमादाय पीडयित्वा द्वाभ्यामृग्भ्यामुखायामग्निं भस्म च प्रत्यवदधाति ॥ ९ ॥

पुनरूर्जा सह रय्येति द्वाभ्यां प्रत्येति ॥ १० ॥

' विश्वतस्परीत्यन्तः । देवयजनं प्रति निवर्तते ॥ १० ॥

पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतामित्युपसमिन्धे ॥ ११ ॥

अध्वर्युरिति वैखानसः । पुनरुख्यमुपसमिन्ध इत्यापस्तम्बबोधायनौ ॥ ११ ॥

बोधा स बोधीति ॥ (ख० १०) ॥ बोधवतीभ्यामुपतिष्ठते ॥ १२ ॥

बोधेति मन्त्रेण स बोधीति मन्त्रेण चैतमग्निं बोधयत्येव । आहवनीस्य दक्षिणभागो यजमानस्योपस्थानदेशः । अतोऽत्रापि दक्षिणदेश एव स्थित्वोपतिष्ठते ॥ १२ ॥

नित्यमप्सु भस्मप्रवेशनं कृत्वा दीक्षितस्य कृतास्विष्टकासु अकृतास्विष्टकानाꣳ सꣳसर्गार्थं भवति ॥ १३ ॥

अधिके भस्मनि जाते अप्सु भस्मप्रवेशनं विधाय कृतास्विष्टकासु नित्यं भवति भस्मप्रवेशनमित्यर्थः । अकृतासु या इष्टकार्था मृत्तया सह संसर्गार्थं भवतीत्यर्थः ॥ १३ ॥

पुरीषे पशुकामः कुर्वीत ॥ १४ ॥

पुरीषे तु मृत्तिकायां पशुकामस्य भस्मप्रवेशनं नाप्सु । सूत्रकारो भाष्यकाराश्चात्र कुर्वन्ति पुरीषमेवेति । न तु सत्याषाढमतिः । तूष्णीकं समृन्मयं चेति काम्ययोरप्यनूहः पशुकामस्यापि ॥ १४ ॥

---

१ गृहीत ।

अप्सु यायावरः प्रवपेत् ॥ १५ ॥

यायावरः प्रयाणशीलः । यायावरोऽप्स्वेव प्रक्षिपेद्भस्मातिरिक्तम् ॥ १५ ॥

तिस्रो रात्रीर्दीक्षितः स्यात् । षड्रात्रीर्दीक्षितः स्यादिति ब्राह्मणव्याख्याताः काम्या दीक्षाकल्पा- स्तेषां याथाकामी ॥ १६ ॥

मौण्ड्यमौनादिनियमस्वीकाररूपा दीक्षा । चीयमानस्याग्नेः संबन्धिन्या दीक्षया त्रिरात्रषड्रात्रदशरात्रद्वादशरात्रत्रयोदशरात्रपञ्चदशरात्रसप्तदशरात्रचतुर्विंशतिरात्रत्रिंशद्रात्रमासचतुर्मासाष्टमासाद्वादशमासरूपास्त्रयोदश पक्षा विकल्पिताः । ता ब्राह्मणे—अग्नेर्वै दीक्षया (तै० सं० ५ । ६ । ७) इत्यनुवाके काम्या दीक्षाकल्पा यथाकामं ग्राह्याः । अत्र येन देवा इत्युख्यस्योपसमिन्धनान्तं कृत्वाऽथाङ्गुलीं न्यञ्चति स्वाहा यज्ञं मनसेत्येवमादिवाग्विसर्गमुदितेषु नक्षत्रेषु कृत्वा मध्यरात्रे व्रते गृहीते—अन्नपतेऽन्नस्य नो देहीत्यौदुम्बरी समित् । रात्रिमिष्टकामिति द्वितीया समित् । ततो हस्तप्रक्षालनादि नाभ्यभिमर्शनान्तम् । ततः सनीहारप्रस्थापनं जागरणं चैतां रात्रिम् ॥ १ ॥ तत उपोदये वाग्यमनादीनि वाग्विसर्गः, वात्सप्रेणोपस्थानं, मध्यंदिने व्रतं प्रीतगृह्य— अन्नपतेऽन्नस्य नो देहीत्याधायाहरिष्टका द्वितीया । ततो हस्तावनेजनादि नाभिदेशाभिमर्शनान्तम् । ततोऽधिवृक्षसूर्ये वाग्यमनादि रात्रिमिष्टका द्वितीया समित् । ततोऽग्ने त्वꣳ सुजागृहि, इत्याहवनीयाभिमन्त्रणं स्वप्स्यतः, प्रबुद्धस्य त्वमग्ने व्रतपा असि, विश्वे देवा अभि मामाववृत्रन्, पुनर्मन इति जपे कृते, उपोदये वाग्यमन, उदिते च विसर्गः, रुक्मप्रमोचनादि विष्णुक्रमान् हंसवत्योपस्थानान्तम् । उख्यस्योपसमिन्धनं, पुनः पुनः प्रज्वलयति प्रादेशमात्रैः काष्ठैः । मध्यंदिने व्रत कुर्वन्नहरिष्टका च कृते वात्सप्रेणोपस्थाने, एष विधिर्दीक्षासु । यस्मिन्नहनि सोमक्रयस्तस्मिन्नहनि विष्णुक्रमो वात्सप्रं च ॥ १६ ॥

दीक्षितस्येष्टकाः करोति मासप्रभृतिषु दीक्षाकल्पेषु पुरस्ताददीक्षितस्येतरेषूपरिष्टात्प्राजापत्यात्पशोः ॥ १७ ॥

दीक्षितस्य यजमानस्येष्टका करोति मासप्रभृतिषु दीक्षाविधानेषु मासादिषु पूर्वस्मिन्भागे दीक्षा । यस्य मासदीक्षा तस्य पूर्वस्मिन्पक्ष इष्टकाः करोति । सर्वाश्चतुरो मासास्तस्य पूर्वयोर्मासयोः । तथा संवत्सरे षण्मासेषु । अदीक्षितस्य तु इष्टकाः करोति त्र्यहादिषु दीक्षाकल्पेषूपरिष्टात्तु प्राजापत्याद्वायव्याद्वा पशोः ॥ १७ ॥

मृन्मयीरिष्टका अविषमाश्चतुरश्रास्तासां तिस्रो

मण्डलेष्टका ऋजुलेखा दक्षिणावृतः सव्यावृतश्च त्र्यालिखिताः ॥ १८ ॥

मृन्मयीनामिष्टकानां प्रमाणमत्र नास्ति । विशेषत आपस्तम्बसूत्रे वर्तते पादमात्र्योऽरत्निमात्र्य ऊर्वस्थिमात्र्योऽणूकमात्र्यः (आप० श्रौ० ११ । ४ । १०) इति । पादमात्र्योऽरत्निमात्र्य इति । न तु हिरण्येष्टकानामेष विधिः, तासामनियतं परिमाणम् । मृन्मयीनां तु शुल्बेषु व्याख्यातमेतद्ब्राह्मणम्—चतुर्भागीयाणूकमिति । पादमात्र्यः पादप्रमाणाः । चतुर्भागो वा पादः । अथवा पाद एव । अरत्निप्रमाणा अरत्निमात्र्यश्चतुर्विंशत्यङ्गुला वा ऊर्वोरस्थि ऊर्वस्थि । ता अपि चतुर्विंशत्यङ्गुला एव, द्वयोः श्रुत्योरेकार्थत्वात् । अणूकमत्र्योऽणूकप्रमाणाः । चतुर्भागः पुरुषस्य त्रिंशदङ्गुलयो वाऽणूकम् ऋजवो लेखा यासामिष्टकानां ता ऋजुलेखाः । प्रदक्षिणावृत एव लेखा यासां ता दक्षिणा वृतः । सव्यावृतश्च । तथा तिस्रो लेखा यासामूर्ध्वास्तास्त्र्यालिखिताः । लेखानियमो मृन्मयीनामेव ।

निर्मन्थ्येन लोहिनीः पचन्ति ॥ १९ ॥

निर्मथितेनाग्निना पच्यते यथालोहिन्यो भवन्ति तथा पाकः क्रियते, इक्षुपत्रशकृदादिभिः ॥ १९ ॥

न कृष्णां न लक्ष्मणां न भिन्नां चोपदधाति ॥ २० ॥

खण्डामिति वैखानसापस्तम्बौ । खण्डा, यस्याः किंचिच्छिन्नमेकदेशोऽपि । कृष्णा नीला एकदेशोऽपि कृष्णा अन्यवर्णा वा । न लोहिता सा लक्ष्मणा । ता एता नोपधेयाः श्रुतिप्रतिषिद्धत्वात् । खण्डादयः प्रतिनिधित्वेनापि न क्रियन्ते प्रतिषेधात् । भाष्यकारस्तु—खण्डाः प्रतिनिधित्वेनैव करोति । भुव इति प्रायश्चित्त दक्षिणाग्नौ हुत्वोपदध्यादिति॥२०॥

पुष्करपर्णं रुक्मो हिरण्मयः पुरुषः स्रुचौ सप्त स्वयमातृण्णाः शर्करा हिरण्येष्टकाः पञ्च घृतेष्टका दूर्वास्तम्बः कूर्म उलूखलं मुसलं शूर्पमश्मानः पशुशिरांसि सर्पशिरश्चामृन्मयीरिष्टकाः ॥ २१ ॥

पुष्करपर्णं पद्मपर्णम् । रुक्मो यो यजमानेन विष्णुक्रमकाले धृतः स एव । हिरण्मयश्च पुरुषः सुवर्णकृतः । स्रुचौ कार्ष्मर्यमयी औदुम्बरी च । स्वयं भिन्नाः सप्त शर्कराः । हिरण्येष्टका अपरिमिताः । पञ्च घृतेष्टका घृतपिण्डाः । दूर्वास्तम्बो हरिलिकास्तम्ब ।

---

१ ग पुस्तके वृत्तं । २ घ. पुस्तके परिमाणा । ३ ग. लप्रमाणा वा । ४ ग. कुर्यादिति ।

कूर्मः कच्छपः। उलूखलमूर्ध्वहननं मुसलं मुहुर्मुहुः स्वनति। शूर्पमैषीकं वैणवं वा। अश्मानः पाषाणाः। पशुशिरांसि पुरुषाश्वर्षभवृष्णिबस्तानाम्। मृतस्य सर्पस्य च शिरः, एता अमृन्मयीरिष्टका इष्टकात्वात्सादनं तया देवतया भवत्येव। चतुरश्रा प्रकृतिः पादमात्र्यो भवन्तीत्याम्नानादन्यथाऽपि प्रकृतिरेव तस्याप्यकाम्यत्वात्॥ २१॥

यावदग्निमाना मन्त्रा यथार्थं लोकंपृणा जानुदघ्नं साहस्रं चिन्वीत प्रथमं चिन्वानः। नाभिदघ्नं द्विषाहस्रं द्वितीयम्। आस्यदघ्नं त्रिषाहस्रं तृतीयम्। उत्तरमुत्तरं ज्यायाꣳसम्॥ २२॥

जानुदघ्नं जानुप्रमाणम्। सहस्रपरिमाणं साहस्रम्। जानुदघ्नं साहस्रं चिन्वीत। द्वितीयं चिन्वानो द्विषाहस्रं नाभिदघ्नम्। आस्यप्रमाणं त्रिषाहस्रं चिन्वीत तृतीयं चिन्वानः। अथ वा सहस्रसंख्याकानामिष्टकानां समूहः साहस्रम्। अथ वा सहस्रसंख्याकाभिरिष्टकाभिर्निष्पाद्योऽग्निः साहस्रः। यः प्राथमिकमग्निं चिन्वीत स तु साहस्रं कुर्यात्। द्वितीयवारं चिन्वानो द्विगुणम्। तृतीयवारं चिन्वानास्त्रिगुणम्। तथा प्रथमद्वितीयतृतीयचितीनामुत्तरोत्तरमौन्नत्यम्।

उत्तरमुत्तरं ज्यायांसमिति विधावभ्यासेन चतुर्थादिष्वपि संख्या च त्रिषाहस्राधिका व्याख्याता, तत्र न ज्यायाꣳसं चिन्वीत, इति भावः॥ २२॥

महान्तं बृहन्तमपरिमितं स्वर्गकामश्चिन्वीतेति वाजसनेयकम्॥ २३॥

बृहन्तं विधियुक्ताभिस्त्रिषाहस्राधिकाभिः। अपरिमितमसंख्यातम्। त्रिभ्यः साहस्रेभ्यः स्वर्गकामस्य। वाजसनेयकमिति वाजसनेयिना श्रुतिरेषा। नायं विधिर्नित्यः काम्यत्वात्। पश्चात्तु न्यूनो न लभ्यते। न ज्यायाꣳसं चित्वा कनीयाꣳसं चिन्वीतेति ब्राह्मणाच्च॥ २३॥

अपवृत्ते दीक्षापरिमाणेऽपेत वीतेति देवयजनमध्यवस्यति॥ २४॥ उद्धृत्य चितेरायतनं व्यायाममात्रम्॥ (ख० ११)॥ चतुरश्रं परिमण्डलं वाऽपेत वीतेति हरिण्या पलाशशाखया सꣳसृज्याग्नेरवोक्ष्याग्नेर्भस्मासीति सिकता निवपति॥ २५॥

अपवृत्ते परिसमाप्ते दीक्षाणां परिमाणे प्रबुध्य जपे वाग्विसर्गे कृते विष्णुक्रमवात्सप्रसोमान्वहनेषु च कृतेषु। भाष्यकारस्तु—व्रतमपि ददातीति व्याचष्टे। ततः क्रमः

काले व्रतदानमिति । अपेत वीतेति देवयजनमध्यवस्यति । अपेतेत्यध्यवसाययतीत्यस्याः श्रुतेरर्थः । गार्हपत्यमुद्धननेनाध्यवसाययतीति । भरद्वाजस्य तु अयमध्यवसानमन्त्रः, एदमगन्मेत्यस्य प्रत्याम्नाय इति । अपेत वीतेति गार्हपत्यचितेरायतन शौल्बेन चतुररत्निं मानयित्वा चतुरश्रं परिमण्डलं वाऽपेत वीतेति, उद्धननं तस्य करोति । तूष्णीं शाखया संमार्ग इति वैखानसः । प्राचीमुदीचीं वा दिशं प्रति तस्यास्त्यागः शाखायाः । अवोक्षणमधस्तात्पाणिना शं नो देवीरभिष्टय इति । अग्नेर्भस्मासीति वालुका निवपति ॥ २४ ॥ २५ ॥

संज्ञानमसि कामधरणमित्यूषान् ॥ २६ ॥

निवपतीत्यनुवर्तते । भूयादित्यन्तः । पुष्टिहेतुत्वं प्रजोत्पत्तिहेतुत्वं चोषाणां यज्ञद्वारा (तै० सं० ५ । २ । ३) द्रष्टव्यम् ॥ २६ ॥

तान्निवपन्यददश्चन्द्रमसि कृष्णं तदिहास्त्विति मनसा ध्यायति ॥ २७ ॥

निवपने लवणमृत्तिकाया यददश्चन्द्रमसीति कृष्णरूपं ध्यायेत् ॥ २७ ॥

सं या वः प्रियास्तनुव इत्यूषान्सिकताश्च सꣳसृज्यानुव्यूहति ॥ २८ ॥ चितः स्थ परिचित इत्येकविꣳशत्या शर्कराभिर्गार्हपत्यचितेरायतनं परिश्रयति ॥ २९ ॥

ऊषाणां सिकतानां च संसर्गः क्रियते चितः स्थ परिचित इत्येकविꣳशत्या शर्कराभिर्वेष्टनं गार्हपत्यचितेः ॥ २९ ॥

तिस्रस्तिस्रः सꣳहिताः करोति ॥ ३० ॥

तिस्रस्तिस्र एकीभूताः शर्करास्तासु तासु मन्त्रावृत्तिरिति न्यायात् । सीदतेति तासामभिधानात् । सकृन्मन्त्र इति भाष्यकृत् । अत्र ‘ व्रज कृणुध्वम्, इति शर्करा अभिमन्त्र्य’ (आप० श्रौ० १६–५–४) इत्यापस्तम्बः ॥ ३० ॥

अयꣳ सो अग्निरिति चतसृभिर्गार्हपत्यचितौ चतस्रः प्राचीरिष्टका उपदधाति ॥ ३१ ॥

अत्र गार्हपत्यचिताविति प्रकृतत्वाच्चतस्रो मध्येऽग्नेरुपदधाति प्रागग्राः ॥ ३१ ॥

इडामग्नेऽयं ते योनिर्ऋत्विय इति द्वे पुरस्तादूर्ध्व-

---

१ ग व्रतप्रदानमिति ।

संश्हिते चिदसि परि चिदसीति द्वे पश्चादूर्ध्व-
संश्हिते लोकं पृण छिद्रं पृणेत्यवशिष्टं त्रयोदश-
भिर्लोकंपृणाभिः प्रच्छादयति ॥ ३२ ॥

इडामग्नेऽयं ते योनिरिति पुरस्तादुपदधात्यग्नेः । समीची प्रत्यग्दीर्घे । तिरश्ची द्वितीये प्रस्तारे, उदग्दक्षिणादीर्घे एव पश्चादुपदधाति । समीची प्रथमे प्रस्तारे तिरश्ची द्वितीये प्रस्तारे ताभिर्वैते दिशो दृश्हन्, इति लिङ्गात् । प्रथमे प्रस्तारे द्वे पूर्वे दक्षिणे कोणे द्वे उत्तराधरे द्वितीये प्रस्तारे द्वे पूर्वोत्तरकोणे द्वे अपर इति भाष्यकृत् । अवशिष्टमग्निं त्रयोदशभिः प्रच्छादयति[1] ॥ ३२ ॥

द्वाभ्यां द्वाभ्यां मन्त्राभ्यामेकैकां लोकंपृणामुपदधाति ॥ ३३ ॥

उदग्वा करोति, द्वाभ्यामृग्भ्या लोकंपृणामेकैकाम् । संकर्षणकारस्य तु पूर्वयोपश्चायोत्तरयाऽभिमर्शनम् । अनुष्टुभाऽनुचरति, इति श्रुत्यन्तरं सूत्रकारेणाभिबद्धम् ॥ ३३ ॥

पूर्वयोपधाय सूददोहसाऽभिमृशति ॥ ३४ ॥

अध्वर्युरिति वैखानसः ॥ ३४ ॥

सर्वास्विष्टकासु तयादेवतमन्ततो दधाति ॥ ३५ ॥

सर्वासु याश्चितिप्रकरणे तासु तया देवतयाऽन्ततः । म काठकेष्विति भाष्यकृत् । काठकानां तु परिपाठात्तत्रापि स्यात्तयादेवतम् ॥ ३५ ॥

कृष्णोऽश्वः श्यावो वोत्तरतस्तिष्ठति ॥ ३६ ॥

स्थापयेत् ॥ ३६ ॥

तमालभ्य चात्वालात्पुरीषमाहृत्य पृष्टो दिवी-
त्यनु व्यूहति ॥ ३७ ॥

तमश्वमालभ्य स्पृष्ट्वा चात्वालस्थानात्पुरीषमाहृत्य पृष्टो दिवीति वैश्वानर्यर्चा चितौ स्थापयति म (त)न्त्रेणैव । वैश्वानर्यर्चा पुरीषमुपदधाति, इति वचनात् । केचित्तूष्णीं मृदं न्युप्य पृष्टो दिवीति प्रसारणं कुर्वन्ति । पांसुप्रक्षेपं विधत्ते–'पुरीषेणाभ्यूहति' (तै० सं० ५–२–३) इति । पांसुनाऽभ्यूहत्याच्छादयति ॥ ३७ ॥

सा चितिर्भवति ॥ ३८ ॥

सा चितिः पुरीषान्ता ॥ ३८ ॥

---

१ घ पुस्तकेऽयं पाठो दृश्यते—लोकमिष्टकानाक्रान्तमवशिष्टं देशं पूरयन्तीति लोकंपृणा । एतन्नामिका इष्टकास्त्रयोदशसंख्याका उपदध्यात् । एवं सति पूर्वोक्ताभिरष्टभिरिष्टकाभि सहैकविंशति-संपद्यन्त इति ।

पञ्चचितीकं चिन्वीत प्रथमं चिन्वानस्त्रिचितीकं द्वितीयमेकचितीकं तृतीयम् ॥ ३९ ॥

एकां चितिं कृत्वा पुरीषेणाऽऽच्छादयेत् । तस्या उपरि द्वितीयां चितिं कृत्वा तामप्याच्छादयेत् । एवं चितिपञ्चकेन पुरीषपञ्चकेन च दशसंख्यासंपत्तेः प्रशंसति ब्राह्मणे— 'पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश संपद्यन्ते' (तै० सं० ५ २-३) इति । पञ्चचितीकं चिन्वीत गार्हपत्यचितिं, अयꣳ सो अग्निरित्यारभ्य पुरीषान्ताः पञ्च चितयः। द्वितीयं चिन्वानस्त्रिचितीकम्। एकचितीकं तृतीयं चिन्वान इति ॥ ३९ ॥

एकचितीको नित्यः कल्पः ॥ (ख० १२) ॥ ४० ॥

इति सत्याषाढहिरण्यकेशिसूत्र एकादशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

अत ऊर्ध्वमेकचितीको नित्य आपस्तम्बकल्प इत्यर्थः । अत्र गार्हपत्यचितिकर्म । ॥ ४० ॥

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामेकादशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

अथैकादशप्रश्ने षष्ठः पटलः ।

समितमिति चतसृभिर्गार्हपत्यचितावुख्यं निवपति ॥ १ ॥

भवतमद्य न इत्यन्तः । गार्हपत्याचितावुख्यं निवपति स्थापयति चतसृभिः ॥ १ ॥

मातेव पुत्रमिति शिक्यादुखां निरूहति ॥ २ ॥

विमुञ्चत्वित्यन्तः । शिक्यादुखामानीयेति वैखानसः ॥ २ ॥

अत्रैवैके पूरणमामनन्ति न रिक्तामवेक्षेत ॥ ३ ॥

रिक्तामुखाम् ॥ ३ ॥

यदस्य पारे रजस इति वैश्वानर्या शिक्यमादत्ते ॥ ४ ॥

वैश्वानरशब्दो यस्यामृच्यस्ति सेयं वैश्वानरी । 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः' इति स्मृतेर्जाठराग्निरूपस्य वैश्वानरस्य स्वादुत्वकारित्वात्तदीयमन्त्रेणोपात्तं शिक्यं स्वदयत्येवैनत् (तै० सं ५–२–४) इत्यर्थवादं स्वादुकृतं भवतीत्यर्थः । नैर्ऋतीरिष्टकाः पूर्वमादाय यदस्य पारे रजस इति वैश्वानर्यर्चा शिक्यं गृह्णाति । इह तु देवताज्ञानं नियतं कर्माङ्गम्। अन्यत्र च यत्र तु देवतोच्यते छन्दो वाऽऽर्षो वा यत्र तु नोक्तं तत्र तु ज्ञानेऽभ्युदयः । अज्ञानेऽप्यवैगुण्यम् ॥ ४ ॥

नैर्ऋतीरिष्टकाः कृष्णास्तिस्रस्तुषपक्काः शिक्यꣳ रुक्मसूत्रमासन्दीं चाऽऽदाय दक्षिणापरमवान्तरदेशꣳ हृत्वा स्वकृत इरिणे प्रदरे वा नमः सु ते निर्ऋत इति पराचीरसꣳस्पृष्टा उपदधाति ॥ ५ ॥

निर्ऋतिर्देवता यासामिष्टकाना ता नैर्ऋत्य । तुषा इति यत्तदेतन्निर्ऋते राक्षसदेवताया भागधेयम् । अत एवैष्टिकप्रकरणे रक्षसा भागोऽसीति तुषोपवापमन्त्र आम्नातः । रूपं च निर्ऋतिदेवताया कृष्णम् । अतस्तदानुकूल्यायेष्टयास्तुषपक्काः कृष्णवर्णाश्च कुर्युः ।

अथवा—निर्ऋतिरिति देवता यासां भवति ता नैर्ऋत्यः कृष्णास्तुषैश्च पक्कास्तिस्रस्ता आदाय शिक्यमादत्ते । दक्षिणापरमवान्तरदेशं प्रत्यध्वर्युब्रह्मयजमाना गच्छन्ति । नमः सु ते निर्ऋत इति स्वकृत इरिणे देशे क्षारमृत्तिकादेश इत्यर्थः । प्रदरे वा स्वयमेव दीर्णे देशे । स्पष्टमन्यत् ॥ ५ ॥

(तस्येष्टकाभिः पाशमभ्युपदधाति ॥६॥ यस्यास्ते अस्याः क्रूर आसञ्जुहोमीत्येताभिस्तिसृभिः पराचीरसꣳस्पृष्टा दक्षिणापवर्गम् ॥ ७ ॥)

(दक्षिणे पाशं स्थापयति शिक्यम् । शिक्यपाशस्योपरिष्टादुपदधातीष्टकाः, यस्यास्त इति तिसृभिः पराचीरनिवर्तयन्न सस्पृष्टा दक्षिणापवर्गा. ।

अथवा—विचष्ट इति मन्त्रान्त. । स्वकृत इरिण उपदधाति प्रदरे वा, (तै० सं० ५-२-४) इति ब्राह्मणात् । स्वकृत स्वयमेव निष्पन्न न तु देशान्तरादानीय चयनस्थान इव प्रक्षिप्त, तादृश इरिण ऊषरे वा प्रदरे भूछिद्रे वा कृष्णास्तिस्र इष्टका उपदध्यात् । शिक्योपरि जालमूलभाग परित्यज्य पाशरूपमग्रभागमवलक्ष्यावस्थितो यो देशस्तं देशमिष्टकोपधानस्य । इष्टकाना संख्या विधत्ते—तिस्र उपदधाति (तै० सं० ५-२-४) इति । ' पराचीरसꣳस्पृष्टा दक्षिणापवर्गम् ' इति दर्शनात् । दक्षिणामुखः पुरुष एकामुपधाय ततो दक्षिणतो द्वितीया ततोऽपि दक्षिणतस्तृतीयामुपदध्यात् । ॥ ६ ॥ ७ ॥)

न तयादेवतं करोति ॥ ८ ।

निर्ऋतिमव यजते (५-२-४) इत्युक्तत्वान्न तयादेवतं देवलिङ्गकत्वान्मन्त्रे ॥ ८ ॥

यत्ते देवी निर्ऋतिराबबन्धेति शिक्यमविन्यस्यति ॥ ९ ॥

---

१ इद सूत्रं व्याख्यानं च ग पुस्तके वर्तते।

शिक्यजालेनैना इष्टका. प्रच्छादयति ॥ ९ ॥

अत्राऽऽसन्दीं रुक्मसूत्रं च निदधाति ॥ १० ॥

अस्मिन्काल आसन्दीं रुक्मस्य चैकविंशतिनिर्बाधस्य यत्सूत्र च दाक्षिणत इष्टकानां निदधाति शर्कराया वाऽपारमदेतु इत्येताभिरनुमन्त्रणमुपहितानामिष्टकानाम् ॥ १० ॥

यदस्य पारे रजस इति वैश्वानर्या परिषिञ्चति ॥ ११ ॥

स्वाहेत्यन्तः । तासामेव परिषिञ्चति ॥ ११ ॥

नमो भूत्या इति प्रदक्षिणमावर्तते ॥ १२ ॥

प्रदक्षिणं तासामेव ॥ १२ ॥

शं नो देवीरभिष्टय इति मार्जयन्ते । १३ ॥

अद्भिरिति शेष. ॥ १३ ॥

ऊर्जं बिभ्रद्वसुमनाः सुमेधा गृहानैमि मनसा मोदमानः सुवर्चाः । अघोरेण चक्षुषाऽहं शिवेन गृहाणां पश्यन्वय उत्तिराणीत्यप्रतीक्षं मा न्ति ॥ १४ ॥

अप्रेक्षमाणास्ता इष्टका निवर्तन्तेऽध्वर्युब्रह्मयजमाना ॥ १४ ॥

निवेशनः संगमनो वसूनामित्याहवनीयमुपातिष्ठन्ते । गार्हपत्यं वा ॥ १५ ॥

मन्त्रेणोपस्थानमाहवनीयस्य वोपस्थेयं ब्राह्मणे तु ‘ गार्हपत्यमुपतिष्ठन्ते’ (तै० सं० ५–२–४) इति द्रष्टव्यम् ॥ १५ ॥

प्रायणीयेन प्रचरिते राजान न्युप्य वेदिं कृत्वा समूलं हरितं दर्भस्तम्बं मध्येऽग्नेर्निखाय जुह्वा पञ्चगृहीत गृहीत्वा सजूरब्दो यावभिरिति समुद्गृह्णन्दर्भस्तम्बे पञ्चाऽऽहुतीर्जुहोति ॥ १६ ॥

अत्र प्रायणीयायास्तन्त्रं प्रक्रमयति (स० श्रौ० ७–२–५) इत्यारभ्य सा शंय्वन्ता कृत्स्ना वा, इत्यन्त कृत्वा राज्ञो निवपनादिसौमिक कर्म प्रतिपद्यते । उत्तरवेदिदेश उपरवाणा वा लोहितमानडुहम् (स० श्रौ० ७–१–४) इत्यादिकर्म कर्तुं प्रतिपद्यते । ततो वेदिं कल्पयित्वा मध्येऽग्नौ मूलेन सह वर्तत इति समूलं हरितं तादृशवर्णं कुशस्तम्ब प्रतिष्ठाप्य तस्मिन्पञ्चाऽऽज्याहुतीर्जुहोति । यथालिङ्गं त्यागः ॥ १६ ॥

१ घ अथ वा–अप्रतीक्षं पृष्ठतो दृष्टिमकृत्वेत्यर्थः ।

अथाग्निचयनभूमेः परिमाणं विधत्ते—

यावान्पुरुष ऊर्ध्वबाहुस्तावता वेणुनाऽग्निं विमिमीते ॥ १७ ॥

पुरुषोऽप्यूर्ध्वं प्रसारितस्य बाहोरुपरि स्थितं वस्तु स्प्रष्टुं न शक्नोति । वेणुनाऽग्निविमानं कुर्यात् । अथ वा यावान्यजमान ऊर्ध्वबाहुस्तावत्प्रमाणेन विमितमपि विध्यर्थं विमिमीते ॥ १७ ॥

त्रीन्प्राचः पुरुषांश्चतुर उदीचस्तिर्यञ्चं पुरुषमात्राणि पक्षपुच्छानि भवन्ति ॥ १८ ॥

त्रीन्प्राच पुच्छादारभ्य प्रादेशं त्यक्त्वा चतुर उदीचो दक्षिणात्पक्षादारभ्यारत्निं त्यक्त्वोत्तरपक्षे समापयति । पुरुषप्रमाणानि पक्षपुच्छानि ॥ १८ ॥

आत्मा चतुःपुरुषोऽरत्निना दक्षिणतो दक्षिणं पक्षं प्रवर्धयति ॥ १९ ॥

चत्वार पुरुषा आत्मा । अरत्निना चतुर्विंशत्यङ्गुलैर्दक्षिणतः पक्षं प्रवर्धयति दक्षिणे ॥ १९ ।

प्रादेशेन वितस्त्या वा पश्चात्पुच्छमरत्निनोत्तरत उत्तरं पक्षम् ॥ २० ॥

एवमुत्तरे, उत्तरं पक्षं प्रवर्धयति । द्वादशाङ्गुलेन पश्चात्पुच्छस्य वर्धनमग्रं (ग्रे) वितस्त्या वा । वितस्तिर्मध्यमाङ्गुलिरङ्गुष्ठश्च प्रसारिते तदाऽपि न कारणान्तरम् । पुरीषेणैव सपूरणम्, एकविधादयो विकारा एव श्रूयन्ते सूत्रान्तरे—'तदु ह वै सप्तविधमेव चिन्वीत सप्तविधो वाव प्राकृतोऽग्निस्तत ऊर्ध्वमेकोत्तरानिति वाजसनेयकम् ' (आप० श्रौ० १६–९–३१) इति सप्तविधो वाव प्राकृतोऽग्निरिति वषडस्तु तुभ्यमिति तेष्वपि एकविधपरिमाणं यस्य स एकविधः । विध इति पुरुषाख्यः । पुरुषप्रमाणः पञ्चारत्निः प्रथमाहारेऽग्निः । द्विपुरुषो द्वितीयः, एवमेव वर्धयत्येकैकस्य वृद्ध्या यावदेकशतविधाविति । सप्तविध इत्यारभ्य पक्षपुच्छानि, इति चान्तः । अरत्निः प्रादेशश्च यथाश्रुति सङ्ख्या, इष्टकानामूर्ध्वप्रमाणं च । अग्नीनामेकविधादीनां निन्दां विधाय श्रुत्यन्तरेण सप्तविध एव प्रथमश्चेतव्य इति विधीयते । सप्तविधश्च प्राकृतः प्रकृतिरित्यर्थः । तमधिकृत्य समाम्नानात् । सप्तविधादारभ्यैकोत्तरशतं यावदेकशतविध इति । केचित्तु—प्रकृतौ भवः प्राकृत इति वर्णयन्ति । वाजसनेयिनामेषा श्रुतिरधिकविधेरनित्यत्वात् । अनित्यो विधावभ्यासः । वाजसनेयिनां मतमिति भाष्यकारः ॥ २० ॥

स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः । बडित्था पर्वतानामिति द्वाभ्यां विमितमग्निमाक्रमन्ते ॥ (ख० १३) ॥ २१ ॥

द्वाभ्यामृग्भ्यामध्वर्युब्रह्मयजमाना आक्रमन्ते । विमितवचनाद्यावान्विमितस्तावन्तं सर्वमाक्रमन्त इति भाष्यकृत् ॥ २१ ॥

सं वरत्रा दध तनोति संप्रेष्यति ॥ २२ ॥

संप्रेष्यत्यध्वर्युः । अक्षितमित्यन्त. । कर्षकान्प्रति संप्रैष इति भाष्यकृत् ॥ २२ ॥

निष्कृताहावमवटमित्यवटमाहावांश्च खनति ॥ २३ ॥

काष्ठपाषाणनिर्मिताना द्रोणीनामन्त(न्त)स्थितावकाशरूपो योऽयमवटस्तमवटमाहावं द्रोण्यवा(वान्द्रोणीर्वा) खनति कर्षकः ॥ २३ ॥

उद्रिणꣳ सिञ्चे अक्षितमित्यवटादाहावेषूदकमुत्सिञ्चति ॥ २४ ॥ तेषु बलीवर्दान्पाययन्ति ॥ २५ ॥

प्रत्याहावं मन्त्रावृत्तिः, द्रव्यपृथक्त्वात् । तेष्वाहावेषु बलीवर्दान्पाययत्यध्वर्युः । भाष्यकारस्तु–कीनाशा इत्यनुषजति कीनाशा बलीवर्दा. (शा. कर्षका.) ॥ २४ ॥ २५ ॥

उद्योजनमन्तर्याममीषां खगल्यँ शफम् । अष्ट्रां तालं प्रतीनाहमुभे मण्डूक्यौ युजाविति युगलाङ्गलꣳ संप्रसारयति ॥ २६ ॥

तेषामेव वरत्राणा सधानं तेषामुद्योजनं जवन, अन्तर्याममन्तराखण्डकूटमीषा लाङ्गलदण्डः, खगल्य चुबुक. शफ वलयम्, अष्ट्रा तालं तुण्डका, प्रतीनाहं प्रतिसीरं रज्जुसमुदायं वरत्राणा चोभे मण्डूक्यौ वागुरिके, युजौ बलीवर्दौ प्रसारयति कर्षणार्थे द्वौ द्वौ । युग लाङ्गलं च युगलाङ्गलं, तत· प्रसारयति योजनार्थमित्यर्थ ॥ २६ ॥

*** (सीरा युञ्जन्तीति द्वाभ्यां सीर युनक्ति । षड्गवं द्वादशगवं चतुर्विꣳशतिगवं वा ॥) सीरा युञ्जन्तीति द्वे पूषा युनक्तु सविता युनक्तु बृहस्पतिर्वो युनक्त्वग्नेस्तेजसा सूर्यस्य वर्चसेति तिसृभिर्युनक्ति षड्गवं[1] द्वादशगवं वेत्येकेषाम् ॥ २७ ॥**

सीरा युञ्जन्तीति द्वाभ्यामृग्भ्या तिसृभिर्वा युनक्ति सीरम् । सकृन्मन्त्र· । सीरस्य योजनार्थत्वात् । यदा षड्गव तदा त्रीणि युगानि । एवमुत्तरत्रापि । नत्वेकस्मिन्युगे

* धनुश्चिह्नान्तर्गतपाठो ग० पुस्तके नास्ति ।

१ ख °व वा सरिम् ॥

बहून्युज. संप्रसारयन्तीति । केचित्तु युजाविति वचनादुद्वावपि लभ्येते कर्षणार्थमित्याहु । बलीवर्दसंख्या विधत्ते–'षड्गवेन कृषति' (५–२–५) इति । कक्ष्यात्रयरूपेणावस्थितेषु त्रिषु युगेषु बध्यमाना. षट्संख्याका गावो बलीवर्दा यस्य लाङ्गलस्य तत्षड्गवम् । पक्षान्तर विधत्ते–'यद्द्वादशगवेन' (तै० स० ५–२ ५) इत्यादि । कक्ष्याषट्कगतेषु बध्यमाना द्वादशसंख्याका गावो यस्य लाङ्गलस्य तद्द्वादशगव, तेन कृषतीत्यर्थः । एवं चतुर्विंश[त्य]न्तो विकल्पो ज्ञेयः ॥ २७ ॥

उष्टारयोर्बिल्वयोरथो आबन्धनीययोः । सर्वेषां विद्म वो नाम वाहाः कीलालपेशस इति युक्ताननुमन्त्रयते ॥ २८ ॥

युक्तानामनुमन्त्रणम्–उष्टारयोरिति कीलालपेशस इत्यन्त. ॥ २८ ॥

ब्रह्मजज्ञानमित्येषा । अनाप्ता या वः प्रथमा यस्यां कर्माणि कृण्वते । वीरान्नो अत्र मा दभन्तद्व एतत्पुरो दधे ॥ पर्यूषु प्र धन्व वाजसातये परिवृत्राणि सक्षणिः । द्विषस्तरध्यै ऋणया न ईयसे ॥ सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः । अस्य स्पशो न निमिषन्ति भूर्णय पदे पदे पाशिनः सन्ति सेतव इति ब्रह्मवर्माणि जुहोति ॥ २९ ॥

ब्रह्म जज्ञानमित्येका । पुरो दधे, इत्येवमन्ता द्वितीया । ऋणया न ईयस इत्यवेमन्ता तृतीया । सेतव इत्येवमन्ता चतुर्थी । ब्रह्मवर्माणीति होमनाम । एतैर्मन्त्रैर्यथा वर्म रक्षति तथा रक्षा क्रियत इति ब्रह्मवर्माणीत्युच्यन्ते ॥ २९ ॥

उदस्थाद्गोजिद्धनजिदश्वजिद्धिरण्यजित्सूनृतया परीवृत । एकचक्रेण सविता रथेनोर्जं भागं पृथिवीमेत्वा पृणन्निति लाङ्गलमुच्छ्रयति ॥ ३० ॥

लाङ्गलं योजनार्थमुत्क्षिपति ॥ ३० ॥

मलिम्लुचो नामासि त्रयोदशो मास इन्द्रस्य वर्मासीन्द्रस्य शर्मासीन्द्रस्य वरूथमसि तं त्वा प्रपद्ये । सा मे शर्म च वर्म च भव । गायत्रीं लोमभिः प्रविशामि । त्रिष्टुभं त्वचा प्रविशामि । जगतीं मांसेन प्रविशामि । अनुष्टुभमस्थ्ना प्रविशामि ।

पङ्क्तिं मज्ज्ञा प्रविशामि । ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नातिविध्यन्ति सूराः । तन्नस्त्रायतां तन्नो विश्वतो महदायुष्मन्तो जरामुपगच्छेम देवा इति विमितमग्निमाक्रमन्ते ॥ ३१ ॥

मलिम्लुचो नामासीत्याक्रमणमन्त्रे.—जरामुपगच्छेम देवा इत्येवमन्तेनाध्वर्युबलीवर्द-कीनाशानाम् । भाष्यकारस्तु—ब्रह्मयजमानावाक्रमत इति । केचित्तु—पूर्वहोमो ब्रह्माणि, मलिम्लुचो नामासीत्येवमादीनि वर्माणीत्याहु । जरामुपगच्छेम देवा इत्येव-मन्ता. सप्त होममन्त्रा वर्मणाम् । विमितमग्निमाक्रमन्ते तूष्णीम् ॥ ३१ ॥

लाङ्गल पवीरवमिति द्वाभ्यां कृषति ॥ ३२ ॥

धत्तमित्यन्त· । द्वाभ्या कृषत्यध्वर्यु. ॥ ३२ ॥

कीनाशा बलीवर्दानजन्ति ॥ ३३ ॥

ताडयन्ति कर्षका वैश्या इति वैखानसः ॥ ३३ ॥

पुच्छाशिरोऽधि कृषति ॥ ३४ ॥

पुच्छादारभ्य शिरस उपरिष्टात्कृषति । शिर इति पूर्वमग्नेरुपचरति ॥ ३४ ॥

प्रदक्षिणमावर्तयंस्तिस्रास्तिस्रः सीताः संहिताः कृषन्ति कामं कामदुघे धुक्ष्वेति ॥ ३५ ॥

पक्षयो पुरत.—‘ काम कामदुघे ’ इति प्रदक्षिणमावर्तयञ्जपतीति । तिस्रस्तिस्रः सीता लाङ्गलपद्धति , ता कृषन्त्य(न्ति) सभिन्ना. । प्रजाभ्य इत्यन्त. ॥ ३५ ॥

सीतां प्रत्यवेक्षते ॥ ३६ ॥ घृतेन सीतेति सीता-न्तरालान्संमृशति ॥ ३७ ॥

सम्मृशति ॥ ३६ ॥ ३७ ॥

कर्षणे प्रकारविशेषमाह—

दक्षिणस्मात्पक्षादुत्तरं पक्षमभिकृषति ॥ ३८ ॥ दक्षिणस्याः श्रोणेरुत्तरमंसमुत्तरस्याः श्रोणेर्दक्षि-णमंसमितरथा वा द्वादश संपादयति ॥ ३९ ॥

दक्षिणस्मात्पक्षादारभ्य यावदुत्तरतस्तावदेका सीता । पुनरुत्तरस्मात्पक्षादारभ्य निवृत्तिस्तस्या. पूर्वेण द्वितीया । पुनर्दक्षिणस्मादारभ्य यावदुत्तरतः । तस्याः पूर्वं, दक्षिणायै (णस्या.) श्रोणेरारभ्य यावदुत्तरोंऽस , (रासम्) इति तिस्रोऽपि सीता उत्तरायै (रस्या.) श्रोणेर्दक्षिणास तथैव, विपरीत वा । उत्तरस्याः श्रोणे. पूर्वम् । पश्चाद्दक्षिणार्धा उत्तराम कर्षति । काममिति मन्त्रस्याऽऽवृत्ति· द्रव्यपृथक्त्वात् । काम कामदुघ इति तथा पर्यावर्तते यथा विहाराभिपर्यावर्तनं भवति ।

यद्वा—पुच्छादारभ्य शिर.पर्यन्तं तिस्रः सीताः कृषेत् । तथा दक्षिणात्पक्षादारभ्योत्तरपक्षपर्यन्तं तिस्र· सीता. कृषेत् । तथा दक्षिणस्या· श्रोणेरारभ्योत्तरासपर्यन्तं तिस्रः सीताः कृषेत् । तथोत्तरस्या. श्रोणेरारभ्य दक्षिणासपर्यन्तं तिस्र. सीताः कृषेत् । एवं द्वादश सीताः संपद्यन्ते ॥ ३८ ॥ ३९ ॥

मध्ये संभिन्ना भवति ॥ ४० ॥

कर्षणकाले मध्येऽन्तराले सभिन्ना भवेद्रेखा ॥ ४०

विमुच्यध्वमघ्निया देवयाना अतारिष्म तमसस्पारमस्य । ज्योतिरापाम सुवरगन्मेति दक्षिणेऽꣳसे बलीवर्दान्विमुच्योत्तरे वा प्राच उदीचो वोत्सृजति ॥ ४१ ॥

विमुच्यध्वमिति बलीवर्दविमोको दक्षिणेंऽसे । उत्तरेंऽसे वेति । यदि विपरीतम् ॥ ४१ ॥

तानध्वर्यवे ददाति ॥ ४२ ॥

तान्विमुक्तानुदीचः प्राचो वा नीत्वाऽथ यजमानोऽध्वर्यवे ददाति । स प्रतिगृह्णाति रुद्राय गामित्यनूहेन ॥ ४२ ॥

पञ्चदशोदचमसान्निनयति ॥ ४३ ॥

पञ्चदशोदकपात्राणि निनयतीत्यापस्तम्बः ॥ ४३ ॥

द्वादशानुसीतं त्रीनकृष्टे ॥ ४४ ॥

उदकपात्राणि कृष्टेषु निनयत्यध्वर्युः, इति वैखानसः । उदकवन्ति पात्राण्युदकपात्राणि तानि द्वादश कृष्टे । एकैकं सर्वासु सीतासु । त्रीण्यकृष्टे प्रदेशे ॥ ४४ ॥

या जाता ओषधय इति चतुर्दशभिरोषधीर्वपति ।
सप्त ग्राम्या ओषधयः सप्ताऽऽरण्याः ॥ ४५ ॥

अरिष्टतातय इत्यन्तः । तिलमाषव्रीहियवा. प्रियङ्ग्वणवो गोधूमाश्चेति सप्त ग्राम्या ओषधय. । वेणुश्यामाकनीवारजर्तिला गवीधुका मर्कटका गार्मुताश्चेति सप्ताऽऽरण्या ओषधयः । सर्वत्र या जाता ओषधयः, इति ओषधेरोषधेरेकैको मन्त्रो वपनार्थः । ओषधीर्वपति (तै० स०५–२–५) इति विधिदर्शनाच्च ॥ ४५ ॥

कृष्टे ग्राम्या वपत्यनुसीतमकृष्ट आरण्याः ॥ ४६ ॥

यदुक्तमापस्तम्बेन—‘ सप्त ग्राम्या कृष्टे सप्ताऽऽरण्या अकृष्टे ’ (१६–१–१५) इति । तत्र ग्राम्याणा देशविशेष विधत्ते—‘ कृष्टे वपति ’ (तै० स० ५–२–५) इति । कृष्टे देशे वपति ग्राम्याः । एवमकृष्टे सप्ताऽऽण्याः । शेषमन्त्रा विकल्पाः ॥४६॥

या ओषधीनां नाधिगच्छेत्तस्याः स्थाने यवान्मधुमिश्रान्वपेत् ॥ ४७ ॥

या ओषधीना न लभ्यते ग्राम्याणामारण्याना वा तस्या स्थाने यवान्मधुमिश्रान्वपेत् ॥ ४७ ॥

मनसा ध्यायेदुप्ता मेऽसीति वा ॥ ४८ ॥

उप्ता मेऽसीति व्रीहितिलादिर्या न लभ्यते तस्या नाम मनसा ध्यायेत् ॥ ४८ ॥

अधिगतायां यः प्रथम इध्म आगच्छति तस्मिन्नुपनह्यति ॥ ४९ ॥

अधिगताया लब्धाया वपनक्रियाया परिसमाप्ताया य. प्रथम इध्म आगच्छेदौपमदस्तस्मिन्निध्म एता बध्नाति । क्षिपति चेध्मेन सह ॥ ४९ ॥

(ये[1] वनस्पतीनां फलग्रहयस्तानिध्म उपसनह्य प्रोक्षेत् ॥ ५० ॥

ये वनस्पतीना फलग्रहयः फलान्येषा केवलानि ते वनस्पतयो वटोदुम्बरादय. । तेषामपि ये प्रसूतफला इष्यन्ते तानिध्मे बध्नाति । औपासिक्ते प्रथमे प्रोक्षेदिती ध्मस्काराणा प्रदर्शनार्थम् । क्षेपश्च सहेध्मेन) ॥ ५० ॥

यत्प्रागातिथ्यायास्तत्कृत्वा मा नो हिꣳसी ज्जनितेति चतसृभिर्दिग्भ्यो लोष्टान्समस्यति ॥ ५१ ॥
येऽन्तर्वेद्या बहिर्वेधमापन्ना भवन्ति ॥ ५२ ॥

कर्षणे ये लोष्टाः परिमितक्षेत्राद्बहि पतन्ति तान्पुनरन्त. पातयेदित्यर्थ. । आ दिम निराममीवामित्यन्तः । यद्वा—कर्षणावसरे ये लोष्टा वेणुना विमिताद्ग्निक्षेत्राद्बहिर्दिक्षु पतितास्ताभ्यो दिग्भ्यस्ताँल्लोष्टानानीय क्षेत्रे सयोजयेत् । भाष्ये तु चतसृभि. प्रतिमन्त्रमेकैकस्या दिशि लोष्टानामाहरणमिति ॥ ५१ ॥ ५२ ॥

चतुर्थमन्त्रे कंचिद्विशेष विधत्ते—

इषमूर्जमहमित आदद इति यस्यामस्य दिशि द्वेष्यः स्यात्तस्यै दिशो लोष्टमाहरेत् ॥ ५३ ॥

अयमग्निचितं पुरुषं द्विष्यात्स पुरुषो यस्या दिश्यवतिष्ठेत तस्या दिशि लोष्टमिषमूर्जमिति मन्त्रेणाऽऽहरेत् ॥ ५३ ॥

---

[1] धनुश्चिह्नान्तर्गतग्रन्थ , घ. पुस्तके वर्तते ।

तथोपक्रमेत यथा तस्यां दिश्यपवर्गः स्यादुत्तरवेदिमुपवपति । यावानग्निर्व्याघारणान्तं कृत्वा ॥ ५४ ॥

प्राकृतेन प्रकारेणोत्तरवेदिं कुर्यात् । तस्यामुत्तरवेद्यां पश्चादग्निश्चीयते । स्पष्टमन्यत् ॥ ५४ ॥

अग्ने तव श्रवो वय इति षड्भिः सिकता निवपति ॥ ५५ ॥

रयिमित्यन्तः । षड्भिर्वालुका निवपति क्षिपति । एतान्मन्त्रान्विनियुङ्क्ते–' अग्ने तव श्रवो वय इति सिकता निवपति ' (तै० सं० ५–२–६) इत्यादि ॥ ५५ ॥

चितः स्थ परिचित इत्यपरिमिताभिः शर्कराभिराहवनीयचितेरायतनं परिश्रयति यथागार्हपत्यचितेः ॥ ५६ ॥

चितः स्थ परि चित इति अपरिमिताभिरसंख्याभिराहवनीयचितेर्वेष्टनम् । यथैव गार्हपत्यस्य तिस्रस्तिस्रः संहिता । न तु व्रजमित्यभिमन्त्रणम् । अथ वा सीदतेत्यन्तः । शरैः क्रियन्ते निष्पाद्यन्त इति व्युत्पत्त्या शर्करा इति नाम संपन्नम् ॥ ५६ ॥

शर्करासु काम्या संख्यामाह—

त्रिसप्ताभिः पशुकामस्य ॥ ५७ ॥

परिमिनुयादिति शेषः । त्रीणि सप्तकानि यासां शर्कराणा तास्त्रिसप्ताः । ताभिरेकविंशतिसंख्याकाभिरित्यर्थः । परिमिनुयात्परिमित्य स्थापयेत् ॥ ५७ ॥

अथान्यां काम्या संख्यामाह—

त्रिणवाभिर्भ्रातृव्यवतः ॥ ५८ ॥

परिमिनुयादित्यनुवर्तते । त्रीणि नवकानि यासां तास्त्रिणवाः सप्तविंशातिसंख्याका इत्यर्थः ॥ ५८ ॥

पक्षान्तरमाह—

अपरिमिताभिः परिमिनुयात् ॥ ५९ ॥

अपरिमितं यो धनं कामयेत सोऽपरिमितकाम । यो वा सर्वान्कामान्प्राप्तुमिच्छति सोऽपरिमितकाम इति केचित् ॥ ५९ ॥

आ प्यायस्व सं त इति सौमीभ्या९ँ सिकता व्यूहति ॥ ६० ॥

धिष्ण्वेत्यन्तः । सोमो देवता यस्यामृचि प्रतीयते सेयमृक्सौमी । विश्वतः सोमेत्या-द्यायामृच्यसौ प्रतीयते । अमृताय सोमेत्युत्तरस्यामृचि प्रतीयते । तया सौम्या पूर्वं न्युप्ताः सिकता विविधं प्रसारयेत् ॥ ६० ॥

अपिवा गायत्रिया ब्राह्मणस्य व्यूहेत्त्रिष्टुभा
राजन्यस्यासावि सोमो अरुषो वृषा हरी राजेव
दस्मो अभि गा अचिक्रदत् । पुनानो वारं पर्ये-
त्यव्ययं श्येनो न योनिं घृतवन्तमासदमिति
जगत्या वैश्यस्य ॥ ६१ ॥

अपिवेति पूर्वोक्तपक्षाद्विकल्पः । आ प्यायस्व समेतु त इति प्रसारयेद्वालुकाः । सं ते पया९ँसि, इत्युत्तरा त्रिष्टुप्क्षत्रियस्य व्यूहनार्था । असावि सोम इति जगत्या वैश्यस्य व्यूहनम् ॥ ६१ ॥

अथान्वयव्यतिरेकाभ्यां परिश्रयणं दृढी करोति—

यं कामयेतापशुः स्यादित्यपरिमित्य तस्य शर्कराः
सिकता व्यूहेत् । यं कामयेत पशुमान्त्स्यादिति
परिमित्य तस्य शर्कराः सिकता व्यूहेत् ॥
(ख० १५) ॥ ६२ ॥

इति सत्याषाढहिरण्यकेशिसूत्र एकादशप्रश्ने षष्ठः पटलः ॥ ६ ॥

पूर्वं न्युप्तायाः सिकताया व्यूहन विधास्यति । यजमानस्य पशुराहित्यं कामयमा-नोऽध्वर्युः परितः शर्करास्थापनमकृत्वैव सिकताप्रसारण कुर्यात् । तथा सति परिश्रयणा-भावादपरिगृहीत एव स्थाने यजमानस्य रेतो विविधं यथा गच्छति तथा विनाशयति । ततोऽयमपशुरेव भवति सोऽयं व्यतिरेकः । एतस्माद्विपरीतोऽन्वयः । तस्मात्पशुलाभाय शर्करापरिश्रयणपूर्वकमेव सिकताव्यूहनं कर्तव्यमिति तात्पर्यार्थः ॥ ६२ ॥

इति हिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रि-कायामेकादशप्रश्ने षष्ठः पटलः ॥

अथैकादशप्रश्ने सप्तम पटल ।

आतिथ्याप्रभृतीनि कर्माणि प्रतिपद्यते ॥ १ ॥

अत्राऽऽतिथ्यायामन्तरं प्रक्रमयति (स० श्रौ० ७-३-१०) इत्यारभ्य ध्रुवायाः शेषं करोति, इडान्ताऽऽतिथ्या (७-३-११) इत्यन्तानि नैमित्तिककर्माणि ॥ १ ॥

प्रथमाभ्यां पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्याग्रेण प्राग्वंशं रोहिते चर्मण्यानडुहे प्राचीनग्रीव उत्तरलोम्नि प्रथमायाश्चितेरिष्टकाः सꣳसादयति ॥२॥

पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य सुब्रह्मण्यान्तामुपसदं कृत्वा, यदि पश्चादुपसत् । अग्रेण प्राग्वंशमदूरेण प्राग्वंशस्य लोहित आनडुहे शाकटवाहिनश्चर्मणि, प्राचीना यस्य ग्रीवा तत्प्राचीनग्रीवम् । उत्तराणि लोमानि यस्य तदुत्तरलोम । तस्मिञ्छकटस्योपरि स्थापिते प्रथमायाश्चितेर्यावत्य इष्टकास्ता एकीकृत्य सादयति ॥ २ ॥

अपि वा तिस्रः स्वयमातृण्णाः सर्वाश्च विश्वज्योतिषः ॥ ३ ॥

अथवा तिस्रः स्वयमातृण्णास्तिस्रश्च विश्वज्योतिषः सादयतीत्यर्थः ॥ ३ ॥

दर्भाग्रमुष्टिनाऽऽज्येनावोक्ष्य ताः समुद्यम्य चित्याग्निभ्यः प्रणीयमानेभ्योऽनुब्रूहीति संप्रेष्यति । प्रणीयमानेभ्योऽनुब्रूहीति वा ॥ ४ ॥

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे, इति या एतैर्मन्त्रैरुपधीयन्ते ताः । दर्भाग्रमुष्टिर्नाम प्रभृतमुष्टिस्तेन दर्भाग्रमुष्टिना । आज्येन विविधमवोक्ष्य सर्वेषु देशेषु समुद्यम्येति पाक्षिकः । यदा तिस्रः स्वयमातृण्णास्तिस्रश्च विश्वज्योतिषस्तदा प्रथमचितेरिष्टकानामशक्यत्वादवोक्षणम् । चित्याग्नय इष्टकाश्चित्यर्थास्तेभ्य आनीयमानेभ्योऽनुब्रूहीति प्रैषार्थः । प्रणीयमानेभ्योऽनुब्रूहीति वा विकल्पश्रुतिरुद्गृह्यते ॥ ४ ॥

त्रिरनूक्तायामश्वप्रथमाः प्राञ्चो गच्छन्ति ॥ ५ ॥

प्रथमाया त्रिरनूक्तायामश्वं पुरस्कृत्य गच्छन्त्यध्वर्युब्रह्मयजमानाः ॥ ५ ॥

उत्तरवेदिं प्राप्य प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्युत्तरवेदिमभिमृश्य मयि गृह्णामि यो नो अग्निरिति द्वाभ्यामात्मन्नग्निं गृहीत्वा यास्ते अग्ने समिधो यानि धामेति स्वयंचित्याऽभिमृशति ॥ ६ ॥

अभिमृशत्युत्तरवेदिम् ॥ ६ ॥

इष्टकाभिरग्निं चिनोत्यध्वर्युर्यजमानो ब्रह्मा वा स्वयमग्निं चिन्वन्नाऽऽत्मन्नग्निं गृह्णीते न स्वयं-चित्याऽभिमृशति ॥ ७ ॥

इष्टकाभिरग्निं चिनोत्यध्वर्युर्यजमानो वेत्यापस्तम्ब । यान्युखासंभरणप्रभृत्यादीनि चित्यङ्गानि कर्माणि तान्यध्वर्युरेव करोति । अत इष्टकाभिरित्युच्यते । इष्टकाप्रणयनादिक कर्म कथं स्यादितिचेत्- स्वयं चिन्वानो यजमानो नाग्निं गृह्णात्यात्मन्नाग्निम् । नाप्यभिमृशति स्वयंचितिम् । नाध्वर्युरात्मनोऽन्तरेतीति । यदध्वर्युरात्मन्नग्निमगृहीत्वाऽग्निं चिनुयात्, इत्यध्वर्युवचनात् ।

ननु—इष्टकाभि (१४-१-१) अग्निचयनसाधनीभूता इष्टका धातुमय्यो मृन्मय्यो वाऽनियमेनोपादेया । इष्टकाशब्दस्य घटादिपदवज्जातिवचनत्वे वा वेदिपदवदाकृतिवचनत्वे वोभयत्रापि प्रयोगदर्शनात् । प्रवृत्तिनिमित्तस्य धातुमयीष्वप्यविशिष्टत्वादिति प्राप्ते-यन्मृचाऽऽपश्चाग्नेरना(न्ना)द्यमथ कस्मान्मृदा चाद्भिश्चाग्निश्चीयते (तै० स० ५-६-४) इति वाक्यशेषान्निर्मन्थ्येनेष्टका पचन्ति, इति विहितपाकस्यादृष्टार्थत्वापत्तेश्च मृन्मय्य एव । यत्तु मूल इष्टकाशब्दस्य जातिवचनत्व निरस्याऽऽकृतिवचनत्वं तदर्थसंशयान्तरं प्रदर्श्य साधित, तन्नातीवोपयुक्तमयुक्तं चेत्युपेक्षितम् ॥ ७ ॥

दक्षिणावृतो दक्षिणत उपदधात्युत्तरतः सव्यावृत ऋजुलेखाः पश्चात्पुरस्ताच्च भवन्ति ॥ ८ ॥ त्र्यालिखिता मध्ये प्राचीरुपदधाति ॥ ९ ॥ प्रतीचीरुपदधातीति गणेषु रीतिवादः । प्राचीमुपदधाति प्रतीचीमुपदधातीति कर्तुर्मुखवादः पुरस्तादन्याः प्रतीचीरुपदधाति । पश्चादन्याः प्राचीरपवर्गवादा वचनात्पक्षपुच्छेषु श्रोण्योरंसयोरित्युपदधाति ॥ १० ॥

प्राचीरुपदधाति प्रतीचीरुपदधातीति यत्र गणेषु श्रूयते पुरस्तादन्या प्रतीचीरुपदधातीति तत्र रीतिवाद । प्राचीरुपदधाति प्रतीचीरुपदधातीति यत्र श्रूयते तत्र मुखाभावादिष्टकोपधानकर्तुर्मुखवाद. । ' पश्चात्प्राचीमुत्तमामुपदधातीति पञ्चचोडायाम् ।

ननु—गणेषु (जै० सू० १४-१-१९) प्राचीरुपदधाति प्रतीचीरुपदधाति, इत्यादौ यत्रेष्टकागणानुवादेन प्राङ्मुखत्वादिक विधीयते तत्र चतुरश्रेष्टकासु मुखाभावात् प्राङ्मुखकर्तृपधेयत्वेनैवेष्टकाना प्राङ्मुखत्वाद्युपचार इति प्राप्ते—एकैकस्या इष्टकाया मुखाद्यसंभवेऽपि बहूनामिष्टकानामुपधाने प्राक्संस्थत्वादेरनियमेन प्राप्तौ प्रागपवर्गा एवेत्यादि-

नियमार्थो विधयः । अत एव प्रतीचोऽनूयाजान्यजति, इत्यस्य वाक्यशेषे प्राञ्चमुत्तमं संस्थापयत्युत्तमेनेत एव नु संभिनत्ति, इत्यत्र प्रत्यगपवर्गत्वे प्राप्ते—प्राक्संस्था आहुतीर्विधाय चरमयेतरयोरनुसंभेदेनैव प्रत्यक्त्वमुपपद्यते ।

ननु—पश्चात्प्राचीमुत्तमामुपदधाति तस्मात्पश्चात्प्राची पत्न्यन्वास्ते (१४-१-२०) इत्यत्राप्युक्तन्यायेन रीतिवादे प्राप्ते—गणेषु तथा संभवेऽप्येकस्या तदयोगाद्वाक्यशेषे कर्तृगतत्वेनैव विवरणाच्च कर्तुरेवायं मुखवाद. पुरस्तात्प्रत्यञ्चमिति कर्तुर्मुखवादः । पुरस्तात् प्रत्यञ्चमिति तु कर्ममुखवादः ॥

ननु—पुरस्तादन्या. प्रतीचीरुपदधाति पश्चादन्याः प्राचीः, इत्यत्रापि कर्तुर्मुखवादः । पश्चात्प्राचीरिति पदस्य पूर्वाधिकरणे निर्णीतार्थकत्वात्संनिधानाच्चेति प्राप्ते—बहुत्वादिष्टकानामपवर्गनियमार्थावेव विधी । तस्मात्प्राचीनानि प्रतीचीनानि च नक्षत्राण्यावर्तन्त इति नक्षत्रमण्डलेष्टकाविन्यासस्तुतिदर्शनात् ॥ ८ ॥ ९ ॥ १० ॥

श्वेतोऽश्वो दक्षिणतस्तिष्ठति ॥ ११ ॥

दक्षिणतोऽग्नेः ॥ ११ ॥

तमालभ्येष्टका उपदधाति ॥ १२ ॥

यत्र श्वेतोऽश्वस्तिष्ठति तमालभ्य स्पृष्ट्वेष्टकामुपदधाति । उत्तरतस्तु कृष्णस्तमालभ्य पुरीषमुपदधाति, इत्येषा श्रुतिर्बद्धा सूत्रकारेण । अश्वावभितस्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिणतस्तावालभ्येष्टका उपदध्यादित्येतदपि लभ्यते ॥ १२ ॥

इन्द्रं विश्वा अवीवृधन्नित्यैन्द्रियर्चाऽऽक्रमणं प्रतीष्टका-मुपदध्यात् ॥१६॥ उत्तरतः पश्चादुपचारो वाऽग्नेः॥१३॥

इन्द्रं विश्वा अवीवृधन्निति पुच्छसंधेरुत्तरेणाऽऽरोहणं करिष्यामीति तत्रेष्टकामुपदधाति । अन्तर्विधप्रदेशे विधाः पुरुषा अग्नेरभ्यन्तर इत्युक्तं भवति । यत्राऽऽक्रमत्यारोहणे तत्रेष्टकामुपदधाति । उत्तरे वा पक्ष आक्रमणं प्रतीष्टकामुपदध्यादिति । यद्युत्तरत उपचारोऽथवा पश्चात्पुच्छे वाऽऽक्रमणं प्रतीष्टकामुपदधाति । यदि पश्चादुपचारश्चिन्वन्नधिक्रामति, इति वचनात् । प्रथमायां चित्यामेव । केचित्तु—चितौ चितावाक्रमणं प्रतीष्टकामुपदधाति, इति । तन्न, एवमुपधानं सूत्रेऽपि नास्ति ॥ १३ ॥

वाङ्म आसन्नसोः प्राण इत्यग्निमभिक्रामन्सर्वेष्वा-क्रमणेषु जपति ॥ १४ ॥

हिङ्कमीरित्यन्तः । वाङ्म आसन्निति पञ्चस्वपि चितिष्वारोहणं जपति । प्रत्यवरोहणं चेति पुरीषमुपधाय श्रुत्यन्तरादयं विधिरिति गम्यते । अस्माकं तु सकृदेव 'चिन्व-

न्नाधिक्रामति' इति वचनात् । तत्त्वा यामि इति होमं हुत्वा वाङ्म आसन्निति जपत्या-रोहन् । भाष्यकारस्तु—हुत्वाऽऽरोहणं जपति, इति अस्मिन्क्रमे शाखान्तर आम्नातो य. क्रम इति जपति सङ्कल्प पञ्चम्याम् । पुरीषमुपधाय प्रत्यवरोहणं जपति, इत्येतदपि श्रुत्यन्तरम् ॥ १४ ॥

तत्त्वा यामि ब्रह्मणा वन्दमान इति वारु-
ण्यर्चा शालामुखीये जुहोति ॥ १५ ॥

प्रमोषी स्वाहा । वरुणो देवता । शालामुखीये होमः । चयनाङ्ग शालामुखीयग्रहणं चित्ये मा भूद्धोम इति ॥ १५ ॥

अभ्यस्थाद्विश्वाः पृतना अरातीरिति प्राञ्चमश्वं
दक्षिणेन पादेन दर्भस्तम्बमाक्रमयति ॥ १६ ॥

इदानीं वाङ्म आसन्निति जपत्यारोहन् सहाश्वेन । प्राञ्चं प्राङ्मुखम् । 'अभ्य-स्थाद्विश्वा.' इति दक्षिणेन पादेन दर्भस्तम्बमाक्रमयति ॥ १६ ॥

यदक्रन्दः प्रथमं जायमान इति प्रदक्षिणमश्वं पर्याणयति ॥ १७ ॥

प्रदक्षिणमश्वं परिवर्तयित्वा यदक्रन्द इति पुनरेवाऽऽक्रमयति दर्भस्तम्बम् ॥ १७ ॥

दक्षिणतो धार्यमाणेऽपां पृष्ठमसीति दर्भस्तम्बे
पुष्करपर्णमधस्ताद्दण्डमुत्तानमुपदधाति ॥ १८ ॥

अपां पृष्ठमसीत्यश्वस्य पदे दर्भस्तम्बे पुष्करपर्णमधस्ताद्दण्डमुपदधात्युत्तानम् ॥ १८ ॥

तपो योनिरसि विश्वाभिस्त्वा धीभिरच्छिद्रꣳ
प्रजासवनस्यायारु(उ)पदधाम्यमृतं योनिर्ब्रह्म
योनिः क्षत्रं योनिः पृथिवी योनिरन्तरिक्षं
द्यौर्योनिर्दिशो योनिरिति वा ॥ १९ ॥

अनेन मन्त्रेण वा भाष्य पद्मपत्रोपधानम् ॥ १९ ॥

ब्रह्म जज्ञानमिति पुष्करपर्णे रुक्ममधस्तान्निर्बा-
धमुपदधाति ॥ २० ॥

वि व इत्यन्तः । ब्रह्म जज्ञानमिति पुष्करपर्णेऽधःस्फोटकं रुक्ममुपदधाति । यो विष्णुक्रमणकाले भृतः स इति । यथाऽस्य च्छिद्रमुत्तरतो भवति तथोपदधाति रुक्ममा-दित्यस्वरूपम् । तमिमं मन्त्रं ब्राह्मणे विनियुङ्क्ते—'ब्रह्म जज्ञानमिति रुक्ममुपदधाति' (तै० सं० ५-२-७) इत्यादि ॥ २० ॥

हिरण्यगर्भः समवर्तताग्र इति हिरण्मयं पुरुषं प्राञ्चमुत्तानं दक्षिणतो रुक्मस्य द्रप्सश्चस्कन्देत्यभिमृश्य पुरुषसाम्नाऽभिगीयते ॥ २१ ॥

हिरण्यगर्भ इति तस्मिन्रुक्मे हिरण्मयं सुवर्णमयं पुरुषं प्राचीनं प्राक्शिरसमुत्तानं दक्षिणतश्छिद्रस्योपदधाति, तद्विमुच्यमाना (?) द्वार प्राङ्मुख. कर्ता उपदधाति हिरण्मयः पुरुष आदित्यान्त. पुरुषस्य रूप तमुपदधाति । पुरुष साम गायेति साम । यदि तन्नेच्छत्युद्गाता पुरुषसामगान कर्तुम्। अध्वर्युरेव भूर्भुव. सुवरिति साम गायति यजमानोऽपि। चयनं करिष्यन्द्रप्सश्चस्कन्देति पुरुषस्याभिमर्शन करोति ॥ २१ ॥

नमो अस्तु सर्पेभ्य इति तिसृभिः सर्पनामभिरुपतिष्ठते ॥ २२ ॥

सर्पेभ्यो नम इत्यन्त. । तिसृभिरुपस्थानं पुरुषस्य करोति ॥ २२ ॥

कृणुष्व पाज इति पञ्चभिरक्ष्णया पुरुष व्याघारयति यथोत्तरवेदिम् ॥ २३ ॥

शत्रूनित्यन्त. । पुरुषस्य व्याघारण तदुत्तरवेदिवत् ॥ २३ ॥

घृतस्य दध्नश्च पूर्णे स्रुचावभितः पुरुषमुपदधाति अग्नेस्त्वा तेजसा सादयामीति ॥ २४ ॥
घृतस्य पूर्णां दक्षिणां काष्मर्यमयीमिन्द्रस्य त्वौजसा सादयामीति दध्नः पूर्णामुत्तरामौदुम्बरीं ते उपधाय मूर्धन्वतीभ्यामुपतिष्ठते ॥ २५ ॥

अत्र—'स्रुचावुप दधाति' (तै० स० ५-२-७) इति विधिदर्शनात् । तयोः स्रुचोर्विशेषण दर्शयति—घृतस्य पूर्णां दक्षिणा काष्मर्यमयी दध्न. पूर्णामुत्तरामौदुम्बरीमिति । श्रीपर्णाख्यो वृक्षविशेष. काष्मर्यस्तेन निर्मिता काचित्स्रुक्काष्मर्यमयी, सा चाऽऽज्येन पूर्णा । उदुम्बरेण निर्मिता काचित्, सा च दध्ना पूर्णा । एतद्गुणविशिष्टयोः स्रुचोरुपधानस्य विधानान्न वाक्यभेद शङ्कनीय. । इष्टकान्तरोपधानवत्समन्त्रत्वस्य शङ्का लौकिकवाक्य वा निवारयितुमाह ब्राह्मणे—'तूष्णीमुपदधाति' (तै० सं० ५-२-७) इति । यस्मादाम्नातो मन्त्रो नास्ति तस्माद्यजुषा मन्त्रेणैते उपधातुं नार्हति । तयोर्दिग्विशेषं विधत्ते दक्षिणा काष्मर्यमयीमुत्तरामौदुम्बरी तस्मादस्या असावुत्तरा (तै० स० ५-२-७) इति । यस्माद्द्युलोकरूपौदुम्बरी स्रुगुत्तरस्यां दिश्युपाहिता तस्माल्लोकेऽप्यसौ द्यौरस्या. पृथिव्या उत्तरोऽभाविनी । स च दिग्विशेष

आपस्तम्बेन स्पष्टमभिहितः—आज्यस्य पूर्णा कार्ष्मर्यमयी दक्षिणेन पुरुषं दध्न. पूर्णा-मौदुम्बरीमुत्तरेण पुरुषम् (आप० श्रौ० १६-७-९) इति । अग्निर्मूर्धेति कार्ष्मर्यमय्या उपस्थान भुवो यज्ञस्येत्यौदुम्बर्या· ॥ २४ ॥ २५ ॥

अपि वा तूष्णीमुपधाय मूर्धन्वतीभ्यामुपतिष्ठते । मूर्धन्वतीभ्यामुपधाय यजुर्भ्यामुपतिष्ठत इत्येके· षाम् ॥ २६ ॥

अथवा तूष्णीं तयोरुपधानम् । मूर्धन्वतीभ्यामुपस्थानमित्येक पक्ष । अग्निर्मूर्धा, भुवो यज्ञस्येति द्वाभ्यां कार्ष्मर्यमयीमौदुम्बरीं चोपधायाऽग्नेस्त्वा, इन्द्रस्य त्वा, इति यजुर्भ्यामुपस्थानमित्यपर· पक्षः । अथवा तूष्णीमुपधान ऋग्भ्यामुपधाने वा यजुर्भ्यामुपतिष्ठत इत्येके शाखिनः परिपठन्ति ॥ २६ ॥

पाशुकस्योत्तरवेदिवद्रुक्मस्योपरि व्याघारणमाह—

रुक्मं व्याघारयति । यथापुरुषम् ॥ (ख० १७) ॥ २७ ॥

पुरुषवद्रुक्म व्याघारयेत् ॥ २७ ॥

ध्रुवाऽसि धरुणेति स्वयमातृण्णामभिमृश्याश्वेनावघ्राप्य प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यचस्वतीमिति मध्येऽग्नेरविदुषा ब्राह्मणेन सहोप दधाति । भूरिति चैतया व्याहृत्या ॥ २८ ॥

ध्रुवाऽसीति स्वयमातृण्णामालभतेऽश्वेनावघ्राप्याऽऽरूढेनाग्निमविद्वानपि मन्त्रा नध्याप्य सह तेनोपधान, प्रजापतिस्त्वा सादयतु पृथिव्या. पृष्ठ इत्यारभ्य मीदित्युक्त्वा भूरित्युपधीयते ।

यद्वा स्वयमातृण्णा तु यद्यपि पुरुषैरानिर्मिता तथाऽपि तस्या इष्टकात्वं मुख्यमित्य-भिप्रेत्य मुख्यास्विष्टकास्वस्याः प्राथम्यमुच्यते—प्रथमेष्टकोपधीयमाना, (९-२-८) इत्यादि ब्राह्मणे । अत्राविदुषो ब्राह्मणस्य हस्ते मन्त्रसंस्कृता स्वयमातृण्णा दद्यात् । ततः स ब्राह्मणोऽध्वर्युश्च मिलित्वा तामुपदध्यातामित्यर्थ. ॥ २८ ॥

चितिं जुहोमीति स्वयमातृण्णायाः हुत्वाऽनुप्राणिति ॥ २९ ॥

हविः स्वाहा । विश्वकर्मा देवता । चितिं जुहोमीति हुत्वाऽऽज्यमुपरि तस्या प्राणन करोति नासिकावातम् ॥ २९ ॥

अविद्वान्ब्राह्मणो वरं ददाति । एकं द्वौ त्रीन्वा ॥ ३० ॥

य स्वयमविद्वान्सन्निष्टकामुपदधाति स्वयमातृण्णा स एष आर्तिमाप्नु समर्थो भवति ।

अतस्तत्परिहारायाध्वर्यवे वरदानं कुर्यात् । वरशब्देन श्रेष्ठत्वाद्गौरुच्यते । त्रीन्द्वावेकमिति पक्षा विकल्पिताः ॥ ३० ॥

तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ पृथिव्यै मा पाहीति हिरण्येष्टकाम् । पृथिव्युदपुरमन्नेन विष्टा मनुष्यास्ते गोप्तार इति मण्डलेष्टकाम् । भूरसि भुवनस्य रेत इष्टकाः स्वर्गो लोको मनसा त्वाऽन्वारोहामि सुवरसि सुवनस्य रेत इष्टकाः स्वर्गो लोको मनसा त्वाऽन्वारोहामीत्यन्वारोहे द्वे उपदधाति ॥ ३१ ॥

तेजोऽसि तेजो मे यच्छेति हिरण्येष्टकामुपदधाति । अनियतदेशाद्द्रव्येष्टकानामप्युपरि मृन्मय्य उपधीयन्ते द्रव्येष्टकाश्चावटे । मृन्मयीनामेव सङ्ख्यापूरणं स्यादापस्तम्बे । तदाहैष द्विशत. प्रस्तार इति । यत्प्राचीनमैष्टकाद्यजु. क्रियत इति लिङ्गाच्च । पृथिव्युदपुरमन्नेनेति मण्डलेष्टकाम् । मन्त्रेणैवास्य मण्डलेष्टकात्वम् । बौधायनीयस्य तु मण्डल मण्डलेष्टकायामालिख्यते । ऋषभमृषभेष्टकायामिषुं विकर्ण्यामिति । आपस्तम्बस्य तु अनिमित्तानीष्टकानामधेयानीति पक्ष· । यथाऽऽत्मेष्टकामिति । भूरसीत्यन्वारोहे द्वे आक्रमणं प्रतीष्टकायाः समीप उपधीयेते ॥ ११ ॥

काण्डात्काण्डात्प्ररोहन्तीति द्वाभ्यां दूर्वास्तम्बं सलोष्टमप्रच्छिन्नाग्रं यथाऽस्य स्वयमातृण्णामग्रं प्राप्नुयात् ॥ ३२ ॥

दूर्वास्तम्बमूल तत्सह लोष्टेन हरितमप्रच्छिन्नाग्र—काण्डात्काण्डात्—इति द्वाभ्यामृग्भ्यामुपहितस्य यथा स्वयमातृण्णामग्र प्राप्नोति तथोपदधाति ॥ ३२ ॥

हिरण्यशकलौ प्रबाहुगिष्टकायामध्यूह्य यास्ते अग्ने सूर्ये रुच इति द्वाभ्यां वामभृतम् ॥ ३३ ॥

प्रबाहुक् समम् । इष्टकाया तुल्यदेशे हिरण्यशकलौ स्थापयित्वा यास्त अग्ने सूर्ये रुच इति द्वाभ्या वामभृत स्था.यति ।' ३३ ।

विराड्ज्योतिरधारयदिति तिस्रो रेतःसिचः ॥ ३४ ॥

रेत.सिचस्तिस्र उपदध्यादिति शेष । त्रिभिर्मन्त्रैरिति वैखानसः ॥ ३४ ॥

द्वे एके समामनन्ति ॥ ३५ ॥

एके शाखिनः समामनन्ति, आद्वितो द्वे ॥ ३५ ॥

ताः प्रथमायां चित्यां यून उपदध्यात् । मध्यमायां विवयसः । प्रथमायामुत्तमायां च स्थविरस्य ॥ ३६ ॥

तासां तु विधिः—प्रथमायां द्वे चित्यां तरुणस्य तस्य तृतीया नास्ति । मध्यमायां चित्यां मध्यमवयसस्तिस्रोऽपि प्रथमाया चित्यामेकां पञ्चम्यामेका स्वराडिति स्थविरस्य । रेत एवास्य सिक्तमाभ्यामुभयतः परिगृह्णाति, इति द्यावापृथिवीसंस्तवात् । एकतरां त्वापस्तम्बेनोक्ताम्—अन्यतरामुपदध्याद्द्वेष्यस्य । यजुषेमा चामूं चोपदधाति । मनसा मध्यमाम्, (आप० श्रौ० १६-७-२०) इति । द्वेष्यस्योपदधातीति प्रतिषेधार्थम । यजुषा पृथिवी च द्या चोपदधाति । उपांशु प्रथमतृतीययोर्विधिः । तयोः पृथिवीद्युलोकसंस्तवात् । मध्यमा द्वितीया, ता मनसोपदधाति—सम्राड् ज्योतिरिति यजुषैव ॥ ३६ ॥

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीमिति विश्वज्योतिषम् । अग्नेर्यान्यसि देवानामग्नेर्यान्यसीति द्वे संयान्यौ । मधुश्च माधवश्चेति द्वे ऋतव्ये । समानतया देवते भवतः ॥ ३७ ॥

विश्वज्योतिः—बृहस्पतिस्त्वा सादयत्विति या प्रणीता । अग्नेर्यान्यसीति सयान्यौ, मधुश्च माधवश्चेति द्वे ऋतव्ये, समानतया देवते ॥ ३७ ॥

सर्वास्वृतव्यास्ववकामुपदधाति ॥ ३८ ॥

सर्वासु ऋतव्यासु, उपधाय द्वे पश्चादवका तयोरुपर्युपदधाति । अवकासु सादयतीत्येके (आप० श्रौ०-१६-७-२२) इत्यापस्तम्ब. ॥ ३८ ॥

घर्मेष्टकामुपदधाति । तस्याः प्रवर्ग्ये मन्त्र आम्नातः ॥ ३९ ॥

घर्मेष्टका तूपधेयोदस्य शुष्माद्भानुरिति प्रवर्ग्यपरिपठितो मन्त्रः ॥ ३९ ॥

अषाढाऽसीत्युपरिष्टाल्लक्ष्माणमषाढां द्वेष्यस्याधस्ताल्लक्ष्माणं यास्ते अग्न आर्द्रा योनयो याः कुलायिनीः । ये ते अग्न इन्दवो या उ नाभयः । यास्ते अग्ने तनुव ऊर्जो नाम ताभिस्त्वमुभयीभिः संविदानः । इह प्रजानां तन्वा निषीदेति कुलायिनीम् ॥ ४० ॥

उखया सह कृता द्वाभ्यामुपदधात्यषाढाम् । अषाढाऽसीति मध्येऽङ्गुल्यालिखिता मध्य इति । यथा त्र्यालिखितोपरिष्टाद्भवति तथोपदधाति । तथा चोक्तं ब्राह्मणे—यं

कामयेत वसीयान्भवेदिति । उपरिष्टाद्व्यालिखिता यथा भवति तथोपदधाति । यं कामयेत पापीयान्भवेदित्यधस्तात्तस्योपधेयेति व्यालिखिता प्रतिषेधार्थम् । कुलायिनी—याम्ते अग्न आर्द्रा योनयो या इति च प्रवर्ग्यपरिपठितौ मन्त्रौ ॥ ४० ॥

मधु वाता ऋतायत इति तिसृभिर्दध्ना मधुमिश्रेण कूर्ममभ्यनक्ति ॥ (ख० १८) ॥ ४१ ॥

भवन्तु न इत्यन्तः । तिसृभिरभ्यङ्गो दध्ना मधुमिश्रेण कूर्मस्य ॥ ४१ ॥

अपां गम्भीरं गच्छ मा त्वा सूर्यः परीताप्सीन्मो अग्निर्वैश्वानरः । अघोरः प्रजा अभि विपश्यानु त्वा दिव्या वृष्टिः सचताम् ॥ सꣳसर्प त्रीन्समुद्रान्त्स्वसलिलाग्र्याँल्लोकानपांपतिर्वृषभ इष्टकानाम् । तत्र गच्छ यत्र पूर्वे परेताः पुरीषं वसानः स्वां योनिं यथायथमित्यभिमन्त्र्य मही द्यौः पृथिवी च नश्चतस्र आशा इति द्वाभ्यां पुरस्तात्प्रत्यञ्चं जीवन्तं प्राङ्मुख उपदधाति ॥ अवकाभिः परीतꣳत्य(रितत्य) जालेनावच्छाद्य शङ्कुभिः परिणिहन्ति ॥ ४२ ॥

अपा गम्भीरं गच्छेत्युपहितस्याभिमन्त्रणं विधाय मही द्यौश्चतस्र आशा इति द्वाभ्यामृग्भ्यामुपदधाति कूर्म पुरस्तात्स्वयमातृण्णाया. प्रत्यङ्मुखं जीवन्तं प्राङ्मुखः कर्ता । आपस्तम्बसूत्रे चतस्र आशा इति वेति विकल्पेनोपदधाति, अवकाभिर्वेष्टितं परिगतेन जालेन प्रच्छाद्यते शङ्कुभिश्च निहन्यते यथोपहितो न चलति । उपधेयस्य कूर्मस्य जीवनोपेतत्वगुण ब्राह्मणे विधत्ते–श्मशानं वा एतत्क्रियते (तै० सं० ५–२–८) इत्यादि मृताना पशूनामश्ववृषभवृष्णिबस्ताना शिराम्युपधेयानी युपरिष्टाद्वक्ष्यति । तदेतत्स्थान श्मशानमेव कृत भवति । जीवत्कूर्मोपधानेनायं यजमानोऽश्मशानचिद्भवति। किंच यः कूर्मोऽस्ति स एव वास्तव्यो निवासयोग्य. कूर्मपृष्ठे भूमेरवस्थितत्वात् । ततोऽपि कूर्मोपधानमित्यर्थ ॥ ४२ ॥

यच्चिद्धि त्वं गृहे गृह उलूखलक युज्यसे । इह द्युमत्तम वद जयतामिव दुन्दुभिरिति दक्षिणस्याꣳ श्रोण्यामुलूखलं मुसलं प्रयुनक्ति ॥ ४३ ॥

दक्षिणस्यां श्रोण्यामासादयन्युलूखल मुसलं मन्त्रेण द्रव्यपृथक्त्वादावृत्तिः ॥ ४३ ॥

औदुम्बरं प्रादेशमात्रं चतुःस्रक्त्युलूखलमपरिमितं मुसलं भवति ॥ ४४ ॥

उदुम्बरस्यावयव औदुम्बरस्तं प्रादेशमात्रप्रमाणमुलूखलमपरिमित मुसलं तदौदुम्बरम् । उलूखलस्य प्रकृतिद्रव्य विधत्ते—औदुम्बर भवति (तै० सं० ५-२-८) इत्यादि ॥ ४४ ॥

उत स्म ते वनस्पते वातो विवात्यग्रमित् । अथो इन्द्राय पातवे सुनु सोममुलूखलेति सर्वौषधस्य पूरयित्वाऽवहन्ति ॥ ४५ ॥

सप्त ग्राम्या. सप्ताऽऽरण्या ओषधयस्ताभि. पूरयित्वा तूष्णीमुत स्म त इति मन्त्रेणावहननम् । सुनु सोममुलूखलेति मन्त्रलिङ्गात् ॥ ४५ ॥

देशविशेषमाह—

तद्विष्णोः परमं पदमिति मध्येऽग्नेरुलूखलं मुसलमुपदधाति विष्णोः कर्माणि पश्यतेति वा मुसलम् ॥४६॥

मध्यत उपदधाति (तै० सं० ५-२-८) इत्यादिब्राह्मणम् । अग्नेर्मध्य उपदधात्युलूखलं मुसल द्रव्यपृथक्त्वादभ्यावर्तते, इति न्यायादेकमन्त्रपक्षेऽपि । मन्त्रद्वयपक्षे तु तद्विष्णोरित्युलूखल, विष्णो· कर्माणीति मुसल चोपदध्यात् ॥ ४६ ॥

दिवो वा विष्णविति शूर्पम् ॥ ४७ ॥

दिवो वा विष्णवित्याशीःपदयर्चा शूर्पं, सन्यादित्येवमन्तया ॥ ४७ ॥

उपधेयाया उखायाः सिकतापूरणं चाऽऽह—

सिकताभिरुखां पूरयति ॥ ४८ ॥

स्पष्टोऽर्थः ॥ ४८ ॥

दध्ना मधुना घृतेन वा ॥ ४९ ॥

पूरयतीत्यनुवर्तते । स्यूता देवेभिरित्युखां पूरयति घृतेन मधुना सिकताभिर्वा सर्वैर्वा । घृतेन ससृज्य पूरयति न रिक्ताया अवेक्षणप्रतिषेधो बहिरपि शुग्वि(विशु)द्धा भवति, इत्यापस्तम्बेनोक्तत्वात् । पूरणोत्तरकाल पय आनयत्यस्याः संनिवापे तु कृते पूरणमेके परिपठन्ति । अत· क्रमः ॥ ४९ ॥

अन्वयव्यतिरेकाभ्या पूरणं प्रशसति—

यं कामयेत क्षोधुकः स्यादित्यूनां तस्योपदध्यात् । यं कामयेतानुपदस्यदन्नमद्यादिति पूर्णां तस्योपदध्यात् ॥ ५० ॥

सिकताभिः पूरिताया ईषन्न्यूनाया उखाया उपधाने सति क्षोधुकोऽन्नरहितः क्षुधाशीलो भवति । सोऽय व्यतिरेक. । सिकतापूर्णाया उपधाने त्वनुपदस्यदेवाक्षीयमाणमेवान्नमत्ति । सोऽयमन्वयः ॥ ५० ॥

रयूता देवेभिरमृतेनाऽऽगा उखाँ स्वसारमधिवेदिमस्थात् । सत्यं पूर्वैर्ऋषिभिश्चाकु(क्लृ)पानो(णो)ऽग्निः प्रविद्वानिह तत्करोत्वित्युखामादाय ध्रुवाऽसि पृथिवीति च ॥ पृथिवी पृथिव्याः सीद माता मातरि माता स्योना स्योनायां क्रतुर्देवानां महिमानमीमहेऽग्निः सधस्थे सदनेषु सुक्रतुः । वैश्वानरं ब्रह्मणा विश्वव्यचसः सो(स्तो)मस्य धामं नि मन्नि)हितं पुरीष्यम् । समिद्धमग्निः समिधा समिध्यसेऽग्निः सधस्थे सदनेष्वच्युतम् ॥ वैश्वानरं ब्रह्मणा विश्वव्यचसः स्तोमस्य धाम नि (न्नि)दधे पुरीष्यम् । न्ययुर्मात्रया कवयो वयोधसोऽग्निः सधस्थे सदनेष्वाहुतम् ॥ वैश्वानरं ब्रह्मणा विश्वव्यचसः स्तोमस्य धाम प(न्प)वधानमात्द्दतम् ॥ ध्रुवाऽसि पृथिवी तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेति मध्येऽग्नेरुखामुपदधाति । ५१ ॥

उपदधाति स्थापयति ॥ ५१ ॥

उपरिष्टादुलूखलस्येत्येकेषाम् ॥ ५२ ॥

पृथिवी पृथिव्याः सीदेति वोलूखलस्योपर्युखामुपदधाति वाजसनेयिब्राह्मणम् ॥ ५२ ॥

अग्ने युक्ष्वा हि ये तवेति युक्तवतीभ्याम् ॥ (ख० १९) ॥
उखायामेकाहुतिं जुहोति ॥ ५३ ॥

उपाहितायामुखाया होम । अग्निर्देवता ॥ ५३ ॥

पुरुषशिरसः प्राणेषु हिरण्यशल्कान्प्रत्यस्यति । ऋचे त्वेति दक्षिणेऽक्षिकटे । रुचे त्वेत्युत्तरे भासेति दक्षिणस्यां नासिकाया ज्योतिषे त्वेत्युत्तरस्यामभूदिदं विश्वस्य भुवनस्य वाजिनमित्यास्येऽग्निर्ज्योतिषा ज्योतिष्मानिति दक्षिणे कर्णे रुक्मो वर्चसा वर्चस्वानित्युत्तरे ॥ ५४ ॥

तस्य पुरुषशीर्षस्याऽऽस्यादिच्छिद्रेषु हिरण्यशकलप्रक्षेपं वक्ति श्रुति –'प्राणेषु हिरण्यशल्कान्प्रत्यस्यति ' (तै० स० ५–२–९) इत्यादि । प्राणसंचारस्थानेष्वास्यादिषु हिरण्यशकलान्प्रक्षिपेत् । एवमापस्तम्बादिषु द्रष्टव्यम् ॥ ५४ ॥

समित्स्रवन्ति सरितो न धेना इति शृतातङ्क्येन दध्ना मधुमिश्रेण पुरुषशिरः पूरयित्वा सहस्रधा असि सहस्राय त्वेत्यादायाऽऽदित्यं गर्भं पयसा समङ्ग्धीत्युखायामुत्तानं प्राक्चुबुकमुपदधाति॥५५॥

आसामित्यन्त । अह मधव्योऽसानि (५–२–९) इति मधुररसभोगयोग्यो भवानीत्यनेनाभिप्रायेणैतत्पुरुषशिरो मधुयुक्तेन दध्ना पूरयेत् । अत्र द्विविधं दधि । तत्रैक रजतप्रक्षेपादिना स्वयमेव घनीभवति । अन्यत्तु पक्वक्षीरादातञ्चनेन निष्पद्यते । तत्र क्षीरातञ्चनाभ्या निष्पन्न यागयोग्यम् । तस्मात्तादृशेनैव पूरयेत् । सर्वेषां पशुशिरसा चाश्वादीना हिरण्यशकलप्रक्षेप पुरुषशिरोवत्पूरण तद्वदेवेति वाजसनेयिनः परिपठन्ति । सहस्रधा इति पुरुषशिरो गृहीत्वाऽऽदित्य गर्भं पयसेत्युखायामुपदधाति, यथा पुरस्ताद्धनुर्भवति प्राचीन पुरस्ताच्चुबुकमिति व्याख्यातमुत्तानम् । प्राङ्मुखः कर्ता उपदधातीत्यर्थ ॥ ५५ ॥

उदु त्यं चित्रमिति सौर्यर्चाभ्यामक्षिकट्योरभिजुहोति ॥ ५६ ॥

सौर्यर्चाभ्या होम. सूर्यो देवता । यद्वा–चित्रमिति दक्षिणेऽक्षिकटे, आ प्राद्यावा पृथिवी इति सव्ये जुहोति ॥ ५६ ॥

पशुशीर्षाण्युपदधाति ॥ ५७ ॥

पशुशिरसामुपधान करोति ॥ ५७ ॥

यं कामयेतापशुः स्यादिति विषूचीनानि तस्योपदध्यात् । यंकामयेत पशुमान्त्स्यादिति समीचीनानि तस्योपदध्यात् । यं कामयेत कनीयोऽस्यान्नः स्यादिति संतरां तस्य पशुशीर्षाण्युपदध्यात् ॥ यं कामयेत समावदस्यान्नः स्यादित्यभितरस्तस्य स्वयमातृण्णामुपदध्यात् । यं कामयेत भूयोऽस्यान्नः स्यादित्यन्तेषु तस्य व्युदुह्योपदध्यात् ॥५८॥

यं कामयेतापशुर्भवेदिति विषूचीनानि पराङ्मुखाणि । पुरुषशिरसः प्रतिषेधोऽयं न विधिः । विषूचोऽस्य पशव., सर्वेऽश्वादय. पलायन्ते, समीचीनानि अपराङ्मुखाणि । पुरुषशिरस इति विधिः प्रशस्यते । समीचो यजमानसमीपेऽश्वादयः पशव आयान्ति,

(अतः) पशुमान्भवति । यजमानसमीप एव दधाति । एवमुत्तरत्र यं कामयेताल्पमस्यान्नँ स्यादिति संतरा संगतान्तरामुखायामेव पशुशीर्षाण्युपधेयानीति प्रतिषेधार्थमुच्यते । समानवत्समानाधिक न न्यूनं सवत्सरप्रक्रान्त मध्यतस्तस्याग्नेरुपदध्यात् । चतसृष्वपि दिक्षु । यं कामयेत बह्वन्नं स्यादित्यन्तेषु तस्य चतुर्दिशमप्यग्नेर्विदुह्य मृत्तिकामपनीयोपधानं कर्तव्यम् । दिगन्तेष्वन्ततः । तस्माद्बह्वन्न स्यात्ततोऽन्न लभ्यते भूयो बह्वन्न भवति ॥ ५८॥

वातस्य ध्राजिमिति पुरस्तात्प्रतीचीनमश्वस्योपदधाति । अजस्रमिन्दुमिति पश्चात्प्राचीनमृषभस्य । वरूत्रिं त्वष्टुरिति दक्षिणत उदीचीनं वृष्णेरुत्तरतो वा दक्षिणं यो अग्निरग्नेरित्युत्तरतो दक्षिणं बस्तस्य दक्षिणतो वोदीचीनं तान्युत्सर्गैरव्यवायन्प्रदक्षिणमनु परिक्रामन्प्रतिदिशमुपतिष्ठते ॥(ख० २०)॥ इमं मा हिꣳसीर्द्विपादमिति पुरुषस्य । इमं मा हिꣳसीरेकशफमित्यश्वस्य । इमꣳ समुद्रमित्यृषभस्य । इमामूर्णायुमिति वृष्णेः । अजा ह्यग्नेरिति बस्तस्य ॥ ५९ ॥

वातस्य ध्राजिमिति पुरस्तादग्ने. प्रतीचीन प्रत्यङ्मुखः पुरुषशिरोभिमुखमश्वशिर उपदधाति । अजस्रमिन्दुमिति पश्चादग्ने. प्राङ्मुख. पुरुषशिरोभिमुखमृषभस्य शिर उपदधाति । वरूत्रिं त्वष्टुरिति दक्षिगत उदीचीन उदङ्मुखः पुरुषशिरो[भि]मुखं वृष्णेः शिर उपदधाति । यो अग्निरग्नेरित्युत्तरतोऽग्नेर्दक्षिणामुख. पुरुषशिरोभिमुखं बस्तस्य शिर उपदधाति । तान्युपतिष्ठन्ते शिरांसि, अव्यवायेनान्तरं तेषामगच्छन् । उत्सर्गैर्ग्राम्याणा पशूनाम्, आरण्यास्तु तद्रूपा मयुप्रभृतयस्तेषामश्वमेधे वक्ष्यति । इमं मा हिꣳसीर्द्विपादमिति पुरुषशिरस उपस्थाने । इम मा हिꣳसीरेकशफमित्यश्वस्य, इमꣳ समुद्रमित्यृषभस्य, इमामूर्णायुमिति वृष्णे., अजा ह्यग्न इति बस्तस्य ॥ ५९ ॥

अथ यदि वायव्यस्य शिरो भवति ॥ ६० ॥

मुख्यस्थाने सर्वैरुपधाय सर्वैरुत्सर्गैरुपतिष्ठते ॥ ६१ ॥

यदि वायव्यस्य शिरः स्यात्सर्वेषा स्थाने कृत, मुख्यस्य स्थाने पुरुषशिरसः सर्वेषामुपधानमन्त्रैरुपधाय, उखायाम्—आदित्य गर्भं वातस्य ध्राजिमजस्रमिन्दुं वरूत्रिं त्वष्टुः, यो अग्निरग्नेरित्येतै. सर्वैरुपधाय चित्र देवानामित्यस्तिकटयोर्हुत्वा सर्वेषामुत्सर्गैरुपस्थानं भवतीति भाव. ॥ ६० ॥ ६१ ॥

अपिवा तस्य तस्य स्थान उपधाय तस्य तस्यो-
त्सर्गेणोपतिष्ठते ॥ ६२ ॥

अथवा पुरुषशिरःस्थान उपधायार्धर्चाभ्या हुत्वा तस्यैवोत्सर्गेणोपस्थानम् । एव-मश्वादिहोमवर्जमुपधानं कृत्वोत्सर्गेणोपस्थान भवतीत्यर्थः ॥ ६२ ॥

नमो अस्तु सर्पेभ्य इत्येतेषामेकेनोत्तरेऽक्षे सर्प-
शिर उपदधाति । विषूचीनं पशुशिरोभिः ॥६३॥

नमो अस्तु सर्पेभ्य इत्येकया वा सर्पशिरस उपधान भवति । अत्रैकमन्त्राणि कर्माणीति न्यायात् । विषूचीनं, न पशुशिरसोऽभिमुखम् ॥ ६३ ॥

अपिवा यजुरेव वदेन्नोपदध्यात् ॥ ६४ ॥

अथवा—ऋचमेव ब्रूयात् । न चातुःस्वर्येण जपति, इत्यनूक्तत्वान्नोपदध्यात्सर्पशिरः । 'अथो खल्वपघेयमेव यदुपदधाति' (तै० सं० ५–२–९) इति पुनर्वचनात् । प्राकृतेऽग्नौ नित्यम् । एकविधादिषु गुणविकारेषु च 'यद्यजुर्वदति तेन शान्तम्' (५–२–९) इति । सूत्रकारस्य त्वेवविधेषु यदर्थवादे फलमुद्दिश्य तत्कामस्य सहविधिः । सदीप्तिः शान्तिरिति फलम् ॥ ६४ ॥

मा छन्दस्तत्पृथिव्यग्निर्देवता तेनर्षिणा तेन
ब्रह्मणा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ।
प्रमा छन्दस्तदन्तरिक्षं वातो देवता । प्रतिमा
छन्दस्तद्द्यौः सूर्यो देवता । अस्रीविश्छन्दस्त-
द्दिशः सोमो देवता । विराट्छन्दस्तद्वाक्पूषा
देवता । गायत्री छन्दस्तदजा बृहस्पतिर्देवता ।
त्रिष्टुप्छन्दस्तद्धिरण्यमिन्द्रो देवता । जगती
छन्दस्तद्गौः प्रजापतिर्देवता । अनुष्टुप्छन्दस्तद्वा-
य्वरुणो देवता । उष्णिहा छन्दस्तदायुर्मित्रो
देवता । पङ्क्तिश्छन्दस्त कृषिः पर्जन्यो देवता ।
बृहती छन्दस्तदश्वः परमेष्ठी देवता तेन-
र्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद्ध्रुवा
सीदेति द्वादशभिस्त्रिरभ्यावर्तयन्षट्त्रिंशता पुर
स्तात्प्रतीचीं पुरुषाकृतिं चितिं चिनोति ॥६५॥

मा छन्द इत्येवमादिभिर्द्वादशेष्टकास्त्रिरभ्यासमुपदधाति, प्रत्यगपवर्गम् । षट्त्रिंशदिष्टकाः प्रतीचीमिति च वैखानसे वचनात् ॥ ६५ ॥

यम् । वित्तिरसि वित्त्यै त्वा विदेयम् । शक्तिरसि शक्त्यै त्वा शकेयम् । भूतिरसि भूत्यै त्वा भूयासम् । कर्मासि कर्मणे त्वा क्रियासम् । गूर्दोऽसि गूर्दाय त्वा गूर्देभ्यस्त्वा गूर्दे सीद । क्षत्रं पाहि क्षत्रं पिन्व क्षत्रं जिन्व क्षत्रं यच्छ क्षत्रं दृꣳह क्षत्रमसि क्षत्राय त्वा क्षत्रेभ्यस्त्वा क्षत्रे सीद । विश्वेषु त्वा पार्थिवेषु सादयामि । विश्वेषु त्वाऽन्तरिक्षेषु सादयामि । विश्वेषु त्वा दिव्येषु सादयामि । विश्वेषु त्वा देवेषु सादयामि । विश्वासु त्वाऽप्सु सादयामि । विश्वासु त्वौषधीषु सादयामि । विश्वेषु त्वा वनस्पतिषु सादयामि । विश्वासु त्वा दिक्षु सादयामि । दिवि सीद । स्वर्जिदसि पृतनाजिदसि भूरिजिदस्यभिजिदसि विश्वजिदसि सर्वजिदसि सत्राजिदसि धनजिदसि भ्राडसि विभ्राडसि प्रभ्राडसि । सपत्नहनं त्वा वज्रꣳ सादयामि । अभिमातिहनं त्वा वज्रꣳ सादयामि । अरातिहनं त्वा वज्रꣳ सादयामि । यातुहनं त्वा वज्रꣳ सादयामि । पिशाचहनं त्वा वज्रꣳ सादयामि । रक्षोहणं त्वा वज्रꣳ सादयामि । शत्रुहणममित्रहणं भ्रातृव्यहणमसुरहणं त्वेन्द्रं वज्रꣳ सादयामि । उद्गदस्युदितिरस्युद्यत्यस्याक्रममाणाऽस्याक्रामन्त्यस्याक्रान्तिरसि संक्रममाणाऽसि संक्रामन्त्यसि संक्रान्तिरसि स्वर्ग्योऽसि स्वरसि । इषि सीदोर्जि सीद भगे सीद द्रविणे सीद सुभूते सीद पृथिव्या यज्ञिये सीद विष्णोः पृष्ठे सीदेडायाः पदे सीद घृतवति सीद पिन्वमाने सीद । संवत्सरे सीद परिवत्सरे सीदेदा(डा)वत्सरे सीदेदुवत्सरे सीदेद्वत्सरे सीद वत्सरे सीद । एकस्यां सीद दशसु सीद शते सीद सहस्रे सीदायुते सीद नियुते सीद प्रयुते सीदार्बुदे सीद न्यर्बुदे सीद समुद्रे सीद मध्ये सीद पद्मे सीदान्ते सीद परार्धे सीद । पिन्वमानाऽसि पिन्वमानाय त्वा पिन्वमानेभ्यस्त्वा पिन्वमाने सीद । ऋतमस्यृताय त्वर्तेभ्यस्त्वर्ते सीद । सत्यमसि सत्याय त्वा सत्येभ्यस्त्वा सत्ये सीद । संधिरसि

संधये त्वा संधिभ्यस्त्वा संधिषु सीद । सश्श्लिडसि
सश्श्लिषे त्वा सश्श्लिड्भ्यस्त्वा सश्श्लिट्सु सीद ।
संपदसि संपदे त्वा संपद्भ्यस्त्वा संपत्सु सीदेत्येताभ्या-
मनुवाकाभ्यामृषीष्टका उपदधाति ॥ ४ ॥

मृदिष्टका यथावकाशम्—अद्भ्य. संभृत इति च । ऋतसदसीति सप्त, सनिरसीति पञ्च, गूर्दे इति षट् । क्षत्रं पाहीति षट् । विश्वेषु त्वा पार्थिवेषु सादयामीति दिवि सीदेत्येवमन्ता दश । स्वर्विदसीत्येवमाद्याः प्रभ्राडसीत्येवमन्ता एकादश । सपत्नहनमित्याद्या वज्राः सप्त । उद्भृदसीत्येकादश । इषि सीदेति दश । संवत्सरे सीदेति षट् संवत्सराः । एकस्याश्च सीदेति चतुर्दश । पिन्वमानाऽसीति षट् संपदन्ताः । ये तु सादनं न प्रवदन्ति ते अनुवाकाः शाखान्तरे । ये तु सादनं प्रवदन्ति तेषामनुवाकपरिमाणं नोक्तम् । सर्वा एता ऋषीष्टका इत्युच्यन्ते । केचित्त्वाहु—अनुवाका एव ऋषीष्टका इति । प्रथमचित्यर्थास्त्वेते तस्य मन्त्राणां मध्य आम्नानात् । प्रथमस्य त्वग्ने ऋषीष्टका उपधाय लोकंपृणाः । त एव प्राणभृतो गणप्रभृतय इति । न च गणभेदो युक्तः, बौधायनमतान्मन्त्रलिङ्गाच्च यदेकधोपदध्यात् , इति । केचित्तु द्विप्रस्तारे प्रथमेऽप्यग्नौ प्राणभृदादीनामुपधानं कृत्वा, ऋषभस्य च पुरी(षान्त)षोपधानं कुर्वन्ति । पुरीषान्ता चितिरिति वचनात् । पश्चाच्च द्वितीया चितिम् । तस्मिन्नेव प्रस्तारे पुरीषान्ता कुर्यादिति । एवं तु सूत्रकाराभिप्राय. । द्विसाहस्रे द्विप्रस्ताराश्चितयो भवन्तीति न साहस्रे । केचित्तु ऋषीष्टकाः परित्यज्याधिकाविधिरानित्य इति । अयं पुरो भुव इत्येव कुर्वन्ति प्रथमे प्यग्नौ । तथाऽपि गणभेदो जायत एवातो द्वितीये तृतीये वाऽग्नौ प्राणभृदादीनामुपयोगः । प्रथमायां चित्यामेव सूत्रकारेणाऽऽम्नानात् ॥ ४ ॥

अयं पुरो भुव इति पञ्चाशतं प्राणभृतः । दश
दश प्रतिदिशमक्ष्णया दश । मध्ये बाह्यां बाह्यामुप-
धायान्तरामन्तरामुपदधाति ॥ ५ ॥

प्राणभृतः, अयं पुरो भुव इति पञ्चाशतमुपदधाति । दश दश तु प्रतिदिशमक्ष्णया वक्रमुपदधाति । दश मध्ये ता अक्ष्णया, अग्नेरभ्यन्तरमुपधाय बाह्याः पश्चादुपदधाति । यद्वा—एतैर्मन्त्रैः साध्यमुपधानमाह—प्राणभृतमुपदधाति (तै० सं० ५–२–१०) इत्यादि सामान्येन विहितं पुनर्विशेषाकारेण विधत्ते—अयं पुरो भुव इति पुरस्तादुपदधाति प्राणमेवैताभिर्दाधारायं दक्षिणा विश्वकर्मेति दक्षिणतो मन एवैताभिर्दाधारायं पश्चाद्विश्वव्यचा इति पश्चाच्चक्षुरेवैताभिर्दाधारेदमुत्तरात्सुवरित्युत्तरतः श्रोत्रमेवैताभिर्दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधार (तै० सं० ५–२–१०) इति ।

एकैकस्यां दिश्युपधेयानामिष्टकानां संख्यां विधत्ते—' दश दशोपदधाति ' (५-२-१०) इति । एकैकं मन्त्रं दशकृत्व आवर्त्य दशेष्टका उपदध्यात् । अन्नो-पधाने वक्रत्वं विधत्ते—'अक्ष्णयोपदधाति ' (५-२-१०) इत्यादि । प्रतीच्यामु-पक्रम्य प्राच्यामवमाने सत्यार्जव भवति । नैर्ऋत्यामुपक्रम्यैशान्यां समापनं वक्रत्वम् । एवमितरत्रापि । तदिदमक्ष्णयेत्यनेनोच्यते ।

ननु—' प्राणभृत उपदधाति '(१-४-१८) इत्यत्रापि पूर्ववदेव मन्त्रोपादान-मर्थवादार्थं विध्यर्थं वेति विवेक्तव्यम् । निमित्तान्तरकथनार्थं तु सूत्रान्तरम् । तत्र हि भूम्नाशब्दप्रयोगः । इह तु लिङ्गवतामल्पत्वात्तत्समवायमात्रेण शब्दप्रवृत्तिः । प्राण-भृद्गणे हि प्राणभृत्समवायोऽस्ति । प्राणभृदप्राणभृद्गणेऽपि प्राणभृत्समवायोऽस्तीत्यनेन सादृश्येन प्राणभृच्छब्दः । तदेवम्—'तत्सिद्धिजातिसारूप्यप्रशंसालिङ्गभूमभिः । षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता ' ॥ ५ ॥

प्राची दिशां वसन्त ऋतूनामिति पञ्चाशतमपान-भृतो यथा प्राणभृतोऽन्तरामन्तरामुपधाय बाह्यां बाह्यामुपदधाति ॥ ६ ॥

अपानभृतः प्राचीदिशामित्युपदधाति, यथा प्राणभृतः । प्रतिदिशमक्ष्णया च बाह्या-मुपधायाभ्यन्तरोपधीयते । यद्वा—अन्तर्देशे प्राणभृदाख्याः पूर्वोक्ता इष्टका उपधाय बहिर्देशे संयदाख्या इमा अपानभृत इष्टका उपदध्यात् ॥ ६ ॥

प्राणभृद्भ्यो विपरीतप्रकारं विधत्ते—

विषूची प्राणभृतं चापानभृतं चोपदधाति ॥ ७ ॥

यस्मात्प्राणभृतामपानभृतां चान्योन्यविपर्ययक्रमः, तस्माल्लोकेऽपि प्राणापानावन्योन्य-विपरीतस्वरूपौ । बहिर्गतिः प्राणोऽन्तर्गतिरपानः ॥ ७ ॥

आयुषः प्राणᳪ संतन्वित्येतेनानुवाकेन संयत उपदधाति ॥(ख० २३)॥८॥

आयुषः प्राणमिति द्वादश संततीरित्यापस्तम्बः, अनियतदेशाः ॥ ८ ॥

पृथिव्यसि जन्मना वशा साऽग्निं गर्भमधत्ताः(तथाः) सा मया संभव । द्यौरसि जन्मना वशा साऽऽ-दित्यं गर्भमधत्ताः(तथाः) सा मया संभव । नक्षत्रा-ण्यसि जन्मना वशा सा चन्द्रमसं गर्भमधत्ताः(तथाः) सा मया संभव । आपोऽसि जन्मना वशा सा वरुणं गर्भमधत्ताः(तथाः) सा मया संभव । ओष-धोऽसि जन्मना वशा सा सोमᳪ राजानं गर्भम-

धत्ताः(त्थाः)सा मया संभव । वयोविर्निरसि जन्मना वशा (साजरां) सा मह्यं गर्भमधत्ताः(त्थाः) सा मया संभव । विराडसि जन्मना वशा सा राजानं गर्भमधत्ताः(त्थाः)सा मया संभवेत्येते नानुवाकेन वशेष्टका उपदधाति ॥ ९ ॥

पृथिव्यसीत्यारभ्य सप्त वशाः । पञ्च वशा इत्यापस्तम्बः ॥ ९ ॥

या देव्यसीष्टक आयुर्दा उपशीवरी । सा मामुपवेशेषु जायेव पतिमित्सदा ॥ या देव्यसीष्टके प्राणदा अपानदा व्यानदाश्चक्षुर्दाः श्रोत्रदाः पृथिविदा अन्तरिक्षदा द्यौर्दाः सुव(स्व)र्दाः कुमारीदाः प्रफर्वीदा युवतिदा उपशीवरी । सा मामुपवेशेषु जायेव पतिमित्सदेत्येतेनानुवाकेनोपशीवरीरुपदधाति ॥ १० ॥

स्पष्टोऽर्थः ॥ १० ॥

अर्थेतः स्थाध्वगतोऽग्नेर्वस्तेजिष्ठेन तेजसा देवताभिर्गृह्णामि । शुक्राः स्थ वीर्यावतीरिन्द्रस्य व इन्द्रियावतो देवताभिर्गृह्णामि । अधिपत्नीः स्थ तेजस्विनीरादित्यानां वो देवानां देवताभिर्गृह्णामि । मन्द्राः स्थाभिभुवो विश्वेषां देवानां देवताभिर्गृह्णामि । क्षत्रभृतः स्थौजस्विनीर्मित्रावरुणयोर्ब्रह्मणा देवताभिर्गृह्णामि । व्रजक्षितः स्थ ऊर्ध्वश्रितो बृहस्पतेर्वो ब्रह्मणा देवताभिर्गृह्णामीति द्वादश कुम्भेष्टका अद्भिः पूरयित्वा षट्कुम्भान्षट्कुम्भीर्हिरण्यवर्णाः शुचयः पावका इत्येतेनानुवाकेन प्रतिमन्त्रं कुम्भं कुम्भीं च प्रतिदिशमनुसीतमुपदधाति । चतस्रो मध्ये ॥ ११ ॥

अर्थेत. स्थाध्वगत इति ग्रहणमपां कुम्भकुम्भ्योश्च युगपदिति भाष्यकृत् । अपामभिधायका मन्त्रा इति । अशक्तावेकैकस्य पूरणमिति न्यायाच्च । कुम्भेष्टकाना द्वे द्वे समानतया देवते । वाजसनेयिना पाठात्—शर्म च स्थ वर्म च स्थ देवस्य वः सवितुः प्रसवे मधुमतीः सादयामि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदतमिति तथा पुरस्तादग्नेरुपदधाति

यथासीतम् । कुम्भमपरतः कुम्भीं पूर्वत. । ज्योतिषे वामिति हिरण्यशल्क(ल्कौ त)योः प्रक्षिपतीत्यापस्तम्बवैखानसौ । युगपत्कुम्भकुम्भ्योश्च द्विवचनत्वान्मन्त्रस्य । एवमनेन प्रकारेण पूरणमुपधानं हिरण्यशल्कक्षेपश्चोत्तरा उत्तरैर्मन्त्रैः प्रतिदिशं तूपधीयन्ते । दक्षिणतो द्वे तथाऽपरत उत्तरतश्च कुम्भो दक्षिणतश्च कुम्भीमुत्तरतोऽनुसीत च । सर्वत्राधस्तात्पाषाणेष्वेवावस्थानं कुम्भेष्टकानाम्—यदपोऽश्मोरधस्था(स्ता)दुपदधाति (तै० स० ५-६-२) इति । एवमपरतोऽपि तथैव कुम्भोऽपरत. कुम्भीं पूर्वतः । उत्तरतः कुम्भो दक्षिणतः कुम्भी, उत्तरतश्चतस्रस्तु मध्ये ता अनुसीतं द्वे द्वे समानतया देवते, पूर्वदिग्वर्तिनीषु तिसृषु सीतासु कुम्भं कुम्भीं चेति द्वंद्वम् । एव दिगन्तरेष्वपि । तदिदमुच्यते—' द्वंद्वमन्या उपदधाति चतस्रो मध्ये धृत्यै ' (तै० सं० ५-६-२) इति । द्वादशाना मध्ये दिक्चतुष्टयेऽष्टौ गताः । अथावशिष्टाश्चतस्रो मध्ये स्थापयेत् । तच्च धृत्यै दार्ढ्याय भवति ॥ ११ ॥

दिवि श्रयस्वान्तरिक्षे यतस्वेति बार्हस्पत्यं नैवारं चरुं पयसि शृतं मध्ये कुम्भेष्टकानाम् ॥ १२ ॥

उपदधातीत्यनुवर्तते । दिवि श्रयस्वेत्युपधानं नैवारस्य, बार्हस्पत्यसंकल्पेन लौकिकेऽग्नौ (नैवारपचनं) नैवारचरुश्रपणं भवति । गार्हपत्ये पचनमिति भाष्यकृत् । केचित्तु—हिरण्यवर्णा इत्यारभ्य मातर इत्यन्ता द्वादशर्चः कुम्भकुम्भ्योरुपधाने विनियुज्यावशिष्टे द्वे तस्मा अरम्—दिवि श्रयस्वान्तरिक्ष इति च नैवारोपस्थानं कुर्यान्नैवारस्य चरोर्नोपधानमिति व्याचक्षते ॥ १२ ॥

तेजसे वां वर्चसे वां चक्षुषे वां ज्योतिषे वाम् रेतसे वां प्रजाभ्यो वामिति द्वौ द्वौ हिरण्यशकलावुपास्यति ॥ १३ ॥

तेजसे वामिति हिरण्यशकल(लौ त)योः क्षिपति । युगपत्कुम्भकुम्भ्योश्च द्विवचनत्वान्मन्त्रस्य ॥ १३ ॥

त्वामग्ने वृषभं चेकितानमित्यृषभं हिरण्यशकलं चितौ भारय चितिमचितिं चिनवदिति चितिक्लृप्त्याऽभिमृशति ॥ (ख० २४) ॥ १४ ॥

त्वामग्ने वृषभमित्यृषभोपधानमुत्क्रमेणापि प्रथमेऽग्नौ क्रियते । चित्यां चित्यामृषभमुपदधाति, इति । लोकंपृणाश्च पूरणार्थाः । लोकं पृण च्छिद्रं पृणेति लिङ्गात् । लोकंपृण ता अस्य सूददोहस इति लोकंपृणाभिश्छादयति सर्वमग्निम् । सर्वान्वर्णानिष्टकाना (करोति)कुर्यादिति श्रुतिः । न श्वेतपीतादीन्वर्णान्निदधाति । लेखा वर्णा इत्युच्यन्ते,

श्रुत्यन्तर एवं विहितत्वात् । चितौ हिरण्यं स्थापयित्वा चित्तिमचित्तिमित्यभिमृशति । चितिक्लृप्तिरित्यस्या नामधेयम् ॥ १४ ॥

यत्तेऽचितं यदु चितं ते अग्ने यदूनं यद्वाऽत्राति-
रिक्तम् । विश्वे देवा अङ्गिरसश्चिन्वन्नादित्यास्ते
चितिमापूरयन्तु ॥ यास्ते अग्ने समिधः ॥ चित्ति-
मचित्तिम् । वयमग्ने धनवन्तः स्यामालं यज्ञायोत
दक्षिणायै । ग्रावा वदेदभि सोमस्यांशुनेन्द्रं शिक्षे-
मेन्दुना सुतेन ॥ रायस्पोषं नो धेहि जातवेद ऊर्जो
भागं मधुमत्सूनृतावत् । दधाम यज्ञं सुनवाम सोमं
यज्ञेन त्वामुपशिक्षेम शक्र ॥ ईशानं त्वा शुश्रुमो
वयं धनानां धनपते गोमदग्ने । अश्वावद्भूरि-
पुष्टं हिरण्यवदन्नमध्येहि मह्यम् ॥ दुहां ते द्यौः
पृथिवी पयोऽजगरस्त्वा सोदको विसर्पतु । प्रजाप-
तिनाऽऽत्मान मामीणे रिक्तो म आत्मा । यो रुद्रो
अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना
विवेश तस्मै रुद्राय नमो अस्तु देवा इति सप्तभिः
स्वयंचित्याऽभिमृश्य लोकंपृणाभिः प्रच्छादयति ॥ १५ ॥

यत्तेऽचितमित्यारभ्यैताभिरष्टाभिरभिमृश्य लोकंपृणाभिः प्रच्छादयति सर्वमग्निम् ॥ १९ ॥

द्वाभ्यां द्वाभ्यां मन्त्राभ्यामेकैकां लोकंपृणामुपदधाति ॥ १६ ॥
पूर्वयोपधाय सूददोहसाऽभिमृशति ॥ १७ ॥

चित्तिमचित्तिमित्यभिमृश्य यत्तेऽचितमित्यारभ्यैताभिरभिमृशत्यष्टाभिः ॥ १६ ॥ १७ ॥

सर्वास्विष्टकासु तया देवतमन्ततो दधाति ॥ १८ ॥

इष्टकोपधानेषु मन्त्रान्ते तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद, इत्यन्तः ॥ १८ ॥

कृष्णोऽश्वः श्यावो वोत्तरतस्तिष्ठति । तमा-
लभ्य चात्वालात्पुरीषमाहृत्य पृष्ठो दिवीत्य-
नुव्यूहति ॥ १९ ॥ सा चितिर्भवति ॥ २० ॥

उत्तरत उत्तरतोऽग्नेस्तिष्ठति कृष्णोऽश्व उपधानादारभ्य, श्वेतो वा । तमुपस्पृश्य चात्वालात्पुरीषमाहृत्य वैश्वानर्यर्चा पुरीषमनुव्यूहति, नैवमुपदधाति । वैश्वानर्यर्चा पुरी-

षमुपदधाति, इति श्रुतिः । पुरीषान्ता श्रु(चि)तिर्भवति । प्रत्यवरोहणं वाङ्म आसन्नित्युक्त्वा ॥ १९ ॥ २० ॥

यो अप्स्वन्तराग्निर्यो वृत्रे यः पुरुषे यो अश्मनि । य आविवेश भुवनानि विश्वा तेभ्यो अग्निभ्यो हुतमस्त्वेतत् । य१ हुतादमग्निं यमु काममाहुर्यं दातारं प्रतिग्रहीतारमाहुः । यो देवानां देवतमस्त्व(स्त)पोजास्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् । पृष्टो दिवीत्येषा । यः सोमो अन्तर्यो गोष्वन्तर्वे-याꣳसि य आविवेश यो मृगेषु । य आ विवेश द्विपदो यश्चतुष्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् । येनेन्द्रस्य रथꣳ(थाः) संबभूवुर्यो वैश्वानर उत वैश्वदेव्यः ॥ धीरो यः शु(श)क्रः भ(प)रि भूरिदाभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् । उक्षान्नाय वशान्नायेति षड्भिश्चितिं चितिमुपधायाभि जुहोति ॥ २१ ॥

यो अप्स्वन्तराग्निरिति षड्भिश्चितिं चितिमुपधाय पुरीषान्तामुपरि जुहोति । सर्वत्राग्निर्देवता । चितावेव हिरण्यं निधाय तस्य जुहुयादित्येके ॥ २१ ॥

एवमेतान्यत ऊर्ध्वमृषभप्रभृतीनि सर्वेषु चित्यन्ते समानानि क्रियन्ते ॥ २२ ॥

सर्वेषु वक्ष्यमाणचित्यन्तेषु चर्षभप्रभृतीनि कर्माणि समानान्येव ॥ २२ ॥

आग्नेय्या गायत्रिया प्रथमां चितिमभिमृशेत् । त्रिष्टुभा द्वितीयाम् । जगत्या तृतीयाम् । अनुष्टुभा चतुर्थीम् । पङ्क्त्या पञ्चमीम् । सर्वासां धामच्छदृद्वितीया । अग्ने भूरीणि तव जातवेद इति धामच्छत् । अग्ने देवाꣳ इहाऽऽवह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः । अगन्म महा मनसा यविष्ठं योदीदाय समिद्धः स्वे दुरोणे । चित्रभानू रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम् । त्वामर्भस्य हविषः समानमित्त्वां महो वृणते नरो नान्यं त्वत् । मनुष्वत्त्वा निधी-

महि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान्देवायते यज । अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः । अग्नी राये स्वाभुवꣳ स प्रीतो याति वाऽऽर्यमिषꣳ स्तोतृभ्य आभरेत्येता आम्नाता भवन्ति ॥ २३ ॥

अग्ने भूरीणीति सप्तमीं जुहोतीत्यापस्तम्बः । उपस्थानं करोति चितेरिति वैखानसः । आग्नेय्या गायत्र्या प्रथमा चितिमभिमृशेत्, इति ब्राह्मणोक्तम् । अग्निर्यस्या देवता गायत्र्या प्रथमा चितिमेतया होमे कृतेऽभिमृशति । त्रिष्टुभाऽभिमृशति द्वितीयाम् । जगत्या तृतीयाम् । अनुष्टुभाऽभिमृशति चतुर्थीम् । पङ्क्त्याऽभिमृशति पञ्चमीम् । अग्ने भूरीणीति धामच्छत् । अग्ने देवाꣳ इहाऽऽवह इत्येवमाद्या आग्नेय्या गायत्र्या प्रथमा चितिमभिमृशेत् । तस्मिन्नाम्नाये शाखान्तर आम्नाता. पङ्क्त्यन्ताः ॥ २३ ॥

षडुपसदः ॥ २४ ॥

उपसदोऽग्निसंयोगेन षड्भवन्ति । सोमाङ्गमपि सत्यं चित्यसंयोगे षड्भवन्ति ॥ २४ ॥

अनुपसदमग्निं चिनोति । अन्वहमेकैका चितिर्द्व्यहमुत्तमा चिति ॥ २५ ॥

द्व्यहं द्व्यहमेकैकेनोपसन्मन्त्रेण जुहोति । अनुपसदमग्निं चिनोति द्व्यहम् । उत्तमा चितिः, (आप० श्रौ० १६–१०–२३) इत्यापस्तम्बः । उपसदमनु अनुपसदम् । उपसदि समाप्तायामग्निं चिनोति, प्रवर्ग्यः पश्चात् । उपसदो न लभ्यन्त इति भाष्यकृत् । उपसदमेवं कृत्वाऽग्निं चिनोतीति सूत्रकाराभिप्रायः । द्व्यहमुत्तमा चितिः [इति] द्वाभ्यां परिसमाप्यते ॥ २५ ॥

त्रीणि चतुस्तनानि व्रतानि भवन्ति । एवं त्रिस्तनानि द्विस्तनान्येकस्तनानि ॥ २६ ॥

व्रतानि त्रीणि चतुस्तनानि क्रयदिवसस्य रात्र्या व्रतानि भवन्ति । एवं त्रीणि त्रिस्तनानि त्रीणि द्विस्तनानि व्रतान्यग्नीषोमीयदिन एकस्तनम् ॥ २६ ॥

आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य यदक्रन्दः प्रथमं जायमान इति श्वेतमश्वं प्रदक्षिणं परिणीय वसन्ति वसन्ति ॥ (ख० २५) ॥ २७ ॥

PG

इति सत्याषाढहिरण्यकेशिसूत्र एकादशप्रश्नेऽष्टमः पटलः ॥ ८ ॥

इति सत्याषाढसूत्र एकादशप्रश्नः ॥ ११ ॥

अपराह्णे भवे आपराह्णिक्यौ ताभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य श्वेतमश्वं प्रदक्षिणीकृत्य चिते प्रागुदग्वाऽऽरभ्यते प्रदक्षिणं कृत्वा वसन्ति विरमन्ति कर्मणः । भाष्यकारस्तु मध्यरात्रे व्रतप्रदाने कृतेऽश्वपरिणयनान्तं कृत्वा वसन्तीति व्याचष्टे । केचित्तु वसत्यङ्गं परिणयनमित्याहुः । तस्मात्पञ्चम्यां चितौ न परिणयनम् । वसत्यङ्गं तु तत्परिणयनं, तत्प्रकरणत्वात्तस्मात्पञ्चम्यामपि क्रियते। अभ्यासः प्रश्नपरिसमाप्त्यर्थः ॥ २७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायामेकादशप्रश्नेऽष्टमः पटलः ॥ ८ ॥

इति हिरण्यकेशिसूत्रव्याख्यायामेकादशप्रश्नः समाप्तः ॥ ११ ॥

अथ द्वादशप्रश्ने प्रथमः पटलः ।

सर्वासु चितिषु प्रवर्ग्योपसदावादितः पौर्वाह्णिक्यावुपरिष्टादापराह्णिक्यौ प्रवर्ग्योपसच्चितिहोमोऽश्वपरिणयनं च व्याख्यातम् । श्वोभूते द्वितीयां चितिं चिनोति ॥ १ ॥

श्वोभूते श्वः प्रभाते पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य । प्रवर्ग्यश्चोपसच्च प्रवर्ग्योपसदौ ताभ्यां प्रचर्य सुब्रह्मण्यान्ते द्वितीयां चितिं चिनोति । यदि प्रथमस्याश्चितेरिष्टकाः ससादयति, इति कृतं तदा चितौ चितौ प्रणयनम् । उत्तरवेद्यभिमर्शनं तु सकृत् । अग्न्यङ्गत्वात्तथाऽऽत्मन्यग्निग्रहणं स्वयंचित्याऽभिमर्शनं शालामुखीयहोमः, अग्न्यर्थत्वात् सकृदेव । इष्टका उपधास्यञ्श्वेतमश्वमभिमृशेत्पुरीषमुपधास्यन्कृष्णम् । इति चितौ चितौ पुरीषान्ता चितिरिति चित्यङ्गत्वादश्वाभिमर्शनं, तस्याः सर्वत्राऽऽरोहणं जपतीति वचनादेतदपि चितौ चितौ । [पक्षे]यदा तु तिस्रः स्वयमातृण्णास्तिस्रश्च विश्वज्योतिष इति कृतः पक्षस्तदा न पुनः प्रणयनम् । अश्वावभितः स्थापितौ कृष्ण उत्तरतः श्वेतो दक्षिणतस्तदा श्वेतमालभ्य ॥ १ ॥

ध्रुवक्षितिर्ध्रुवयोनिरिति पञ्चाऽऽश्विनीरुप दधाति । चतस्रः प्रतिदिशमेकां मध्ये ॥ २ ॥

अश्विदेवयुक्तैर्मन्त्रैरुपधेया इष्टका आश्विन्यः । आश्विनीरुपदधाति (तै० सं० ५–३–१) इति विधेराश्विनीरिष्टका उपदध्यात् । संख्यां विधत्ते–'पञ्चोपदधाति' (५–३–१) इत्यादि । पञ्च पूर्वार्धेऽग्नेः ॥ २ ॥

सजूरृतुभिरिति पञ्चर्तव्या आश्विनीरुपदधाति ॥ ३ ॥

आश्विनीना पश्चात्—सजूर्ऋतुभिरिति पञ्चर्तव्या उपदधाति । आस्वृतव्यासु ना(अ) वकाम् । 'द्वंद्वमन्या उपदधाति चतस्रो मध्ये धृत्यै' इत्यवकामनूपदधातीत्यधिकारात् । यद्वा—एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—ऋतव्या उपदधाति (५–३–१) इत्यादि । वसन्तादीनामृतूनां स्वस्वव्यापारसामर्थ्यायैतदुपधानम् । इष्टकास्तव्यां विधत्ते—'पञ्चोपदधाति' (तै० सं० ५–३–१) इत्यादि । हेमन्तशिशिरयोः समासेनर्तूनां पञ्चत्वम् ॥ ३ ॥

अनुपरिहारꣳ सादयति प्राणं मे पाह्यपानं मे पाहीति पञ्च वायव्या ऋतव्या अनूपदधाति वायोर्यान्यसि देवानां वायो यान्यसीति द्वे संयान्ये । शुक्रश्च शुचिश्चेति द्वे ऋतव्ये ॥ समानतया देवते भवतः ॥ ४ ॥

प्राणं मे पाहीत्यृतव्याना पश्चात्पञ्च प्राणभृत । (अपस्पिन्वेति पञ्चापस्या इत्याप स्तम्बः ।) अनुपरिहृत्य चाग्निमित्येकैकया प्रतिदिशमुपदधाति, इति श्रुते । भरद्वाजस्य तु यदेकधोपदध्यादिति तस्याः श्रुतेरयमर्थस्तेन विकल्पित । संयान्यौ च द्वे वायोर्यान्यसि, इति । शुक्रश्च शुचिश्चेति द्वे ऋतव्ये अवकोपधानं च पूर्ववत् ॥ ४ ॥

अपस्पिन्वेति पञ्चापस्या वायव्या अनूपदधाति । अनुपरिहारꣳ सादयति । विष्टम्भो वय इति चतस्रः । मूर्धन्वतीः पुरस्तादुपदधाति ॥ ५ ॥

अपस्पिन्वेत्यपस्याः पञ्च, वायव्या दिशि उपधानम् । विष्टम्भो वय इति चतस्रो वयस्याः, पुरस्तादारभ्य प्रत्यगपवर्गा इति भाष्यकृत् । मूर्धन्शब्दोपेतैर्मन्त्रैरुपधेया इष्टका मूर्धन्वत्यः । यस्मात्पूर्वस्यां दिश्युपधेया मूर्धन्शब्दोपेतमन्त्रसाध्यास्तस्मात्पक्ष्याकारेण चीयमानस्याग्नेरपि मूर्धा पूर्वस्या दिशि भवतीति भाष्ये विस्तर. ॥ ५ ॥

त्र्यविर्वय इति पञ्च दक्षिणतो वयस्विनीः । पष्ठवाद्वय इति पञ्च पश्चाद्द्वेऽनुमतीर्बस्तो वय इति पञ्चोत्तरतः सिꣳहवतीः । अपि वा बस्तो वय इति दक्षिणेऽꣳस उपदधाति । वृष्णिर्वय इत्युत्तरे । व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति । सिꣳहो वय इत्युत्तरे । पुरुषो वय इति मध्ये ॥ ६ ॥

त्र्यविर्वय इति पञ्चाग्नेर्दक्षिणस्याꣳ श्रोण्याम् । उत्तरस्या–पष्ठवाद्वय इति ता. पञ्च । बस्तो वय इत्येकां दक्षिणेऽꣳसे । वृष्णिर्वय इत्युत्तरेऽꣳसे । व्याघ्रो वय इत्येकां दक्षिणे पक्षे । सिꣳहो वय इत्युत्तरे । पुरुषो वय इति मध्ये ॥ ६ ॥

ऋषभप्रभृतिव्याख्याताश्चित्यन्तः ॥ ७ ॥

त्वामग्ने वृषभामित्यृषभादि समानं चित्यन्तम् । त्रिष्टुभा द्वितीयामिति तु विशेषः । आपराह्णिकीभ्या प्रवर्ग्योपसद्भ्यां प्रचर्याश्वपरिणयनमित्येवमन्तं चित्यन्तम् ॥ ७ ॥

श्वोभूते तृतीयां चितिं चिनोति ॥ (ख० १) ॥ ८ ॥

श्व प्रभाते पौर्वाह्णिकीभ्यां प्रचर्य सुब्रह्मण्यान्तं विधाय तृतीया चितिं श्वेतमश्वमभिमृश्य वाङ्म आसन्निति चोक्त्वा ॥ ८ ॥

इन्द्राग्नी अव्यथमाना इति स्वयमातृण्णामभिमृश्याश्वेनावघ्राप्य विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीमिति मध्येऽग्नेराविदुषा ब्राह्मणेन सहोपदधाति । भुव इति चैतया व्याहृत्या ॥ ९ ॥

इन्द्राग्नी अव्यथमानामिति स्वयमातृण्णा प्रणीतामभिमृश्य । इतरथा तु तृतीयस्याश्चितेरिष्टकाप्रणयनादि । अश्वेन तां स्वयमातृण्णामवघ्राप्य चितिस्थ एव—विश्वकर्मा-त्वा सादयत्वित्येवमादि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद भुव इत्येवमन्तेन मन्त्रेणोपदधाति ॥ ९ ॥

चित्तिं जुहोमीति स्वयमातृण्णायां
हुत्वाऽनुव्यनित्यविद्वान्ब्राह्मणो वरं ददाति ॥ १० ॥

चित्तिं जुहोमीति जुह्वा स्वयमातृण्णाया च हुत्वाऽव्या(नुव्य)ननं निरुच्छ्वासेनावस्थानं वरदानं साम गायेति प्रैष. । ऊर्ध्वजानुश्चोपदधाति ॥ १० ॥

ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहीति हिरण्येष्टकाम् । अधि द्यौरन्तरिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तार इति मण्डलेष्टकाम् । अनुरेतः सिचो विवयस उपदधाति । विश्वकर्मा त्वा सादयत्वन्तारिक्षस्य पृष्ठे ज्योतिष्मतीमिति विश्वज्योतिषम् । अन्तरिक्षस्य यान्यसि देवानामन्तरिक्ष यान्यसीति द्वे संयान्यौ ॥ ११ ॥

ज्योतिरसीति हिरण्येष्टकाम् । अधि द्यौरिति मण्डलेष्टकाः । सर्वा रेतःसिचो मध्यमे (ध्ये वि) वयसः । विश्वकर्मा त्वा सादयत्विति प्रणीतानामेका विश्वज्योतिः । अन्तरिक्षस्य यान्यसीति द्वे संयान्यौ ॥ ११ ॥

नभश्च नभस्यश्चेषश्चोर्जश्चेति चतस्र ऋतव्या द्वे द्वे समानतया देवते भवतः ॥ १२ ॥

नभश्च नभस्यश्चेत्यृतव्याश्चतस्र , द्वे द्वे समानतया देवते । अवकोपधानं च, द्वे द्वे उपदधाति । केचित्तु- चतस्र उ(सृणामु)पधानं कुर्वन्ति, इति ॥ १२ ॥

राज्ञ्यसि प्राची दिगिति पञ्च दिश्याः । चतस्रः प्रतिदिशमेकां मध्ये ॥ १३ ॥

दिक्शब्दोपेतैर्मन्त्रैरुपधेया इष्टका दिश्याः । प्रतिदिशमेकां मध्ये पुरस्तादारभ्य । राज्ञ्यसि प्राची दिगिति पञ्च दिश्या उपदधाति (५ ।३।२)इति श्रुतेश्च ॥ १३ ॥

आयुर्मे पाहीति दश वैराजीः पुरस्तादुपधाय ॥ १४ ॥

पुरस्तादग्नेः । ताश्च ब्राह्मणे सूत्रान्तरे च–दश प्राणभृतः पुरस्तादुप दधाति, इत्याद्या द्रष्टव्याः । प्राणशब्दोपेतान्मन्त्रानुपधानकाले बिभ्रतीति प्राणभृतः । अत्रैव चरममन्त्रे ज्योतिःशब्द प्रशंसति–'ज्योतिष्मतीमुत्तमामुपदधाति' (तै० सं ५–३–२) इति । ज्योतिःशब्दयुक्तेन मन्त्रेणोपधातव्येष्टका ज्योतिष्मती । चरमा सैवोत्तमा भवतीति भाष्यकारोक्ते. ॥ १४ ॥

षट्त्रिंशतं बृहतीरुपदधाति । मा छन्द इति द्वादश दक्षिणतः । पृथिवी छन्द इति द्वादश पश्चात् । अग्निर्देवतेति द्वादशोत्तरतः ॥ १५ ॥

यथा बृहती छन्दसा मध्ये प्रशस्ता, एव बृहत्याख्या इष्टका अपि प्राशस्ता इति भाष्यकृत् । बृहती. षट्त्रिंशतमुपदधाति दक्षिणतोऽग्नेरारभ्य पश्चादुत्तरतश्च । ता एता इष्टका दिग्विशेषु विधत्ते–मा छन्द इति दक्षिणत उपदधाति तस्माद्दक्षिणावृतो मासाः पृथिवी छन्द इति पश्चात्प्रतिष्ठित्या अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयाजी जयति (तै० सं० ५-३–२) इति । मन्त्रपाठप्राप्तामिष्टकासंख्या विधत्ते—षट्त्रिंशत्संपद्यन्ते (तै० सं० ५–३–२) इत्यादि ॥ १५ ॥

मूर्धाऽसि राडिति सप्त वालखिल्याः पुरस्तात्प्रतीचीरुपदधाति । यन्त्री राडिति सप्त पश्चात्प्राचीः॥१६॥

सप्त वालखिल्याः पुरस्तादारभ्य प्रत्यगपवर्गाः । सप्त पश्चादारभ्य प्रागपवर्गाः । यद्वा–वालखिल्यनामकैर्मुनिभिरादौ दृष्टत्वादिष्टका अपि वालखिल्याख्याः । इष्टकागतया सप्तसंख्यया शीर्षण्यच्छिद्रसाम्य, पुरस्तादेकं सप्तकं पश्चादेकं सप्तकमिति सप्तकयोर्द्वित्वादधोदेशवर्तिच्छिद्रद्वयसाम्यम् । सप्तकद्वये मन्त्रविभागं विधत्ते–मूर्धाऽसि राडिति पुरस्तादुपदधाति, यन्त्री राडिति पश्चात् (तै० सं० ५–३–२) इति ॥ १६ ॥

पृथिव्यै स्वाहेति द्वादश भूतेष्टकाः ॥ १७ ॥

भूतेष्टका द्वादश, शाखान्तरपठिताः ॥ १७ ॥

प्राच्या त्वा दिशा सादयामीति पश्चाऽऽत्मेष्टका-
श्चतस्रः प्रदिशमेकां मध्ये ॥ (ख०२) ॥ १८ ॥

गतार्थः ॥ १८ ॥

इन्द्रो दधीचो अस्थभिरित्येतेनानुवाकेनाथर्वशिरो
दशातिष(रि)क्ता इष्टका उपदधाति ॥ १९ ॥

दशातिष(तिरि)क्ताः शिरस्युपदधाति ॥ १९ ॥

ऋषभप्रभृतिर्व्याख्यातश्चित्यन्तः ॥ २० ॥

ऋषभाद्यश्वपरिणयनान्त चित्यन्तं पूर्ववत् । विशेषस्तु तृतीयस्याश्चितेरभिमर्शनं जगत्या ॥ २० ॥

श्वोभूते चतुर्थी चितिं चिनोति ॥ २१ ॥

श्वोभूते पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां सुब्रह्मण्यन्ताभ्यां प्रचर्य चतुर्थीं चिनोति चितिम्। अश्वालम्भं कृत्वा वाङ्म आसन्निति जपः । इतरथा तु तस्याश्चितेरिष्टकाप्रणयनादि ॥ २१ ॥

आशुस्त्रिवृदग्नेर्भागोऽसीत्येताभ्यामनुवाकाभ्यां
यथाब्राह्मणमुपदधाति ॥ २२ ॥

यथा-ब्राह्मण उक्त तथोपधानं पुरस्ताद्दक्षिणत. पश्चादुत्तरतश्च। प्रथमानुवाके चत्वारः पर्यायाः। द्वितीयानुवाके त्रयः । आशुर्व्योम धरुणो भान्त. प्रतूर्तिरभिवर्तो वर्चस्तपो योनिर्गर्भा ओजः सभरणः क्रतुर्ब्रह्मस्य प्रतिष्ठा नाकः, अग्नेर्नृचक्षसा मित्रस्येन्द्रस्य वसूनामादित्यानामदित्यै देवस्य धर्त्रो यावानामृभूणां विवर्त इति । अत्र विनियोगसंग्रहकारस्त्वेवम्—

आशुरष्टादशाऽऽदध्याद्दक्षणया स्तोमसंयुताः ।
अग्नेः शिष्टा दशाऽऽदध्याद्दक्षगया स्तोमसंज्ञकाः ॥ २२ ॥

अन्तरिक्षमन्तरिक्षाय त्वेति द्वे संयान्यौ ॥ २३ ॥

यत्संयानीर्यत्सयनीरुपदधाति, इति ब्राह्मणम् ॥ २३ ॥

सहश्च सहस्यश्चेति द्वे ऋतव्ये । समानं तया
देवते भवतः ॥ २४ ॥

स्पष्टोऽर्थः ॥ २४ ॥

एकयाऽस्तुवतेति सप्तदश सृष्टीः ॥ २५ ॥

सृजतिधातुयुक्तैर्मन्त्रैरुपधेया इष्टकाः सृष्टयः। सृष्टीरुपदधातीत्यर्थः ॥ ननु—सृष्टीरुपदधाति (जै० सू० १–४–१७) इति सृष्टिशब्दो गुणविधिरुतार्थवाद इति संशयः ।

तत्राऽऽख्यातसंबन्धाद्धि व्यन्तरैकवाक्यत्वाभावादर्थवत्त्वाच्च विधिः । सृष्टिलिङ्गा मन्त्रा उपधानार्थत्वेन विधीयन्ते । नैवम् । लिङ्गप्रकरणाभ्यामेव प्राप्तत्वान्न विधिर्मन्त्राणां संभवति । तथा सति परिसंख्या स्यात् । तत्र बहुषु मन्त्रेषु प्रकरणप्राप्तेषु सृष्टिविधानादन्ये परिसंख्यायेरन् । सा च त्रिदोषा, परिसंख्यातानां च मन्त्रान्तराणामानर्थक्यं स्यात् । तस्मादुपधानमेवात्र विधेयम् । सृष्टीरिति तु लिङ्गप्राप्तमन्त्रानुवादमात्रं यथा सृष्टमेवावरुन्धे (तै० स० ५-३-४) इत्यस्यार्थवादस्योपपत्त्यर्थमिति भाष्याभिप्राय. । केचित्तु—मन्त्रविधिमेव समर्थयन्ते । न ह्येकयाऽस्तुवत (तै० स० ४-३-१०) इत्येवमादीनामुपधाने ऐकान्तिकं लिङ्गमस्ति येन प्राप्तिः स्यात् । साधारणलिङ्गत्वाद्धि ग्रहणासादनादिष्वपीष्टकानां प्राप्नुयुः, तत्रास्ति विधेरवकाश. । सत्यामप्युपधानप्राप्तौ मध्यमचितिसंबन्धार्थमपि प्रत्यक्षविधानमर्थवद्भविष्यति । वक्ष्यति हि—'मध्यमायां तु वचनाद्ब्राह्मणवत्य' इति । न चास्मिन्सूत्रे सृष्टीनां विधानमवश्यमादर्तव्यम् । गुणवृत्तिनिमित्तकथनमात्रपरत्वात् । कः पुनरत्र गुणः, भूमा । सृष्टिसमुदाये हि भूमाऽस्ति । सृष्टचसृष्टिसमुदायेऽपि । 'एकयाऽस्तुवत' (तै० स० ४-३-१०) इत्यनुवाके सृष्टिभूमाऽस्ति, इत्यनेन सादृश्येन सृष्टिशब्दः ॥ २५ ॥

इयमेव सा या प्रथमा व्यौच्छदिति पञ्चदश व्युष्टीः ॥ २६ ॥

विशेषेणोच्छति तमो विनाशयतीति व्युष्टिरुष.कालस्तद्वाचकशब्देनोपेतैर्मन्त्रैरुपधेया इष्टका व्युष्टयः । ता उपदध्यादित्यर्थः ॥ २६ ॥

अग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुपदधाति । सहसा जातानिति पश्चात् । चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतः । षोडशः स्तोम इत्युत्तरतः ॥ २७ ॥

पश्चादुपदधातीत्यनुवर्तते । एतन्मन्त्रसाध्यमुपधानं विधत्ते—'अग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुपदधाति । सहसा जातानिति पश्चात्, चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतः, षोडश. स्तोम इत्युत्तरत. ' (तै० सं० ५-३-५) इत्यादि ॥ २७ ॥

इष्टकायां पुरीषमध्यू(ध्यु)ह्य पृथिव्याः पुरीषमस्यप्सो नामेति मध्येऽग्नेः पुरीषवतीमुपदधाति ॥ २८ ॥

एतन्मन्त्रसाध्यमुपधानं विधत्ते—'पुरीषवतीं मध्य उपदधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाग्निं चिनुते ' (तै० सं० ५-३-५) इति । पुरीषमध्यू(ध्यु)ह्य तस्यो-

पर्युपधीयमानत्वात्पुरीषवती । पुरीष वा, आत्मनो गवादिशरीरस्य मध्यमुदरमध्ये वर्तमानत्वात् । अत पुरीषवत्त्वेन सात्मान शरीरसहितमेवाग्निं चिनुत इत्यर्थ ॥ २८ ॥

ऋषभप्रभृतिभ्या(र्भ्या)ख्यातश्चित्यन्तः ॥ २९ ॥

ऋषभादिश्चित्यन्त । अश्वपरिणयनान्त पूर्ववत् । अनुष्टुभाऽभिमृश्यते चतुर्थी चितिः ॥ २९ ॥

श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य पञ्चमीं चितिं चिनोति ॥३०॥

श्वोभूते श्वः प्रभाते पौर्वाह्णिकीभ्या प्रचर्य सुब्रह्मण्यान्ते पञ्चमी चिति. । श्वेतमश्वमभिमृश्य वाङ्म आसन्निति जपित्वा, इतरथा पञ्चम्याश्चितेरिष्टकाप्रणयनादि (समानम्) ॥ ३० ॥

एवश्छन्दो वरिवश्छन्द इति चत्वारिꣳशतं विराजो दश दश प्रतिदिशमक्ष्णया ॥ ३१ ॥

उत्तमाया पञ्चम्या चितौ विराडाख्या इष्टका उपदध्यादिति शेष. । विराजस्तु— ‘ उत्तमाया चित्यामुपदधाति विराजमेवोत्तमाम् ’ (तै० सं० ५-३-९) इति ब्राह्मणे द्रष्टव्य । एकैकस्या दिशीष्टकासख्या विधत्ते—‘दश दशोपदधाति ’ (५-३-९) इति । सम्यक्पङ्क्तिरूपत्वं वारयितु वक्रत्व विधत्ते—‘अक्ष्णयोपदधाति ’ (तै० स० ५-३-९) इति ॥ ३१ ॥

रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्येकत्रिꣳशतꣳ स्तोमभागाः सप्त सप्त प्रतिदिशं तिस्रो मध्ये ॥ ३२ ॥

रश्मिरित्यादय. स्तोमभागाः । एतैर्मन्त्रैरुपधेया इष्टका अपि स्तोमभागाः । उपदधाति, इति सामान्येन विहित पुनर्विशेषाकारेण प्रशंसति--‘सप्त सप्तोपदधाति सवीर्यत्वाय तिस्रो मध्ये प्रतिष्ठित्यै ’ (तै० स० ५-३-९) इति । एकैकस्या दिशि सप्तसप्तोपधानेन सवीर्यत्व दार्ढ्यं भवति । मध्ये तिसृणामुपधानेन प्रतिष्ठा स्थैर्यं भवतीत्यर्थ. ॥ ३२ ॥

राज्ञ(ज्य)सि प्राची दिगिति पञ्च नाकसदश्चतस्रः प्रतिदिशमेका (मध्ये ।) पश्चात्प्राचीमुत्तमामुपधायायं पुरो हरिकेश इति नाकसत्सु पञ्च चोडा उपदधाति । ता उपधाय वृत्तां चितिं चिनोति ॥ ३३ ॥

नाकः स्वर्गः सद्यते प्राप्यते यैर्मन्त्रैस्ते नाकसदः । तथा च मन्त्रलिङ्गम्—'नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु' (तै० सं० ४-४-२) इति । एतैर्मन्त्रैरुपधेया इष्टका अपि नाकसद । अर्थेन तु ध्यायन्द्वैष्यम्, तत्र चाऽऽपस्तम्बः सूत्रयामास—'द्वैष्यं मनसा ध्यायन्पश्चात्प्राचीमुत्तमाम्' (आप० श्रौ० १७-१-४-९) इति । पञ्चमेन कृतास्तासु पुरीषं क्षिप्त्वा तूष्णीम्, अयं पुरो हरिकेश इति पञ्च चोडास्तासामुपर्युपधाने या तु प्रतीच्या सा तु पश्चादुपधीयते । अयं पश्चाद्विश्वव्यचा, इत्युपदधाति । पञ्च चोडा द्वैष्य मनसा ध्यायति जम्भे दधामि देवदत्तमिति । यद्वा—चुड संवरण इत्यस्माद्धातोरुत्पन्नश्चोडाशब्द । नाकसदामुपरि च्छिद्रावरणार्थत्वादेता इष्टकाश्चोडा इत्युच्यन्ते । पञ्चसङ्ख्याकाश्चोडा पञ्चचोडा उपदधातीत्यर्थ. । उपधानकाले ध्यानविशेष विधत्ते—'य द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आवृश्चति ताजगार्तिमार्च्छति' (तै० सं० ५-३-७) इति । यजमानो यं पुरुषं द्विष्यात्तं द्वैष्यमध्वर्युरुपधानं कुर्वन्ध्यायेत् । तेन ध्यानेनैताभ्य एवाऽङ्गिसेनान्यादिभ्यो देवताभ्य एनं द्वैष्यमावृश्चति सर्वतो विच्छिन्नं करोति । ताजगार्तिमार्छति तदानीमेव मरणं प्राप्नोति । नाकसद मुपरि पञ्चचोडोपधान विधत्ते—उत्तरा नाकसद्भ्य उपदधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत्, (तै० स० ५-३-७) इति । गृहस्थानीया नाकसदो जायास्थानीयाः पञ्च चोडाः । तत्राय पश्चादिति तृतीयमन्त्रेणोपधेया येयमिष्टका तस्याश्चरमत्व विधत्ते—'पश्चात्प्राचीमुत्तमामुपदधाति तस्मात्पश्चात्प्राची पत्न्यन्वास्ते' (तै० स० ५-३-७) इति । यस्मात्पश्चिमाया दिशि प्राङ्मुखत्वेनोपधेयामिष्टकां चरमत्वेनोपधत्ते, तस्मात्पश्चिमायां दिश्यवस्थाय प्राङ्मुखी पत्नी गार्हपत्यमुपविशतीत्यर्थः ॥ ३३ ॥

तपश्च तपस्यश्चेति द्वे ऋतव्ये समानतया
देवते भवतः ॥ (ख० ३) ॥ ३४ ॥

भाष्यकारस्तु—वसन्तेनैवास्य पूर्वार्धमचिनुत, इति प्रथमे पूर्वार्धेऽग्नेरुपधीयते, दक्षिणे पक्षे द्वितीये—'ग्रीष्मेण दक्षिणं पक्षम्' इति । पुच्छे तृतीये—'वर्षाभिः पुच्छम्' इति पुच्छसमीपे द्वे । 'शरदोत्तरं पक्षम्' इति चोत्तरपक्षसमीपे । हेमन्तेन मध्यमिति हेमन्तशिशिरनामधेये इष्टके मध्ये इति व्याचष्टे । अत्रोपधान—अनुग्रह—अप्युक्तं (नेऽनुक्रमोऽप्युक्तः) । वैखानसेन तु यथावकाशम्, इति ॥ ३४ ॥

देवानां यान्यासि देवानां देवयान्यसीति द्वे
संयान्यौ ॥ ३५ ॥

गतार्थः ॥ ३५ ॥

प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मती-
मिति विश्वज्योतिषम् । अत्र रेतःसिचः स्थविर-
स्योपदधाति । ३६ ॥ द्यौरपराजिताऽमृतेन विष्टाऽऽ
दित्यास्ते गोप्तार इति मण्डलेष्टकाम् । सुवरसि
सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीति हिरण्ये-
ष्टकाम् ॥ ३७ ॥

अथवाऽन्य क्रमः—पञ्चचोडान्ता उपधाय देवाना यान्यसीति संयान्यौ, तपश्च तपस्यश्चेत्यृतव्ये, प्रजापतिस्त्वा सादयतु दिव· पृष्ठ इति विश्वज्योति· स्वराड्-ज्योतिरिति रेत·सिक् । सुवरसीति हिरण्येष्टका द्यौरपराजितेति मण्डलेष्टका प्रोथदश्व इति विकर्णी परमेष्ठी त्वा सादयतु दिव इति स्वयमातृण्णा, इत्यापस्तम्बसूत्रे, एष वा क्रमो भवत्युपधानस्य ॥ ३६ ॥ ३७ ॥

आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य यदक्रन्दः
प्रथम जायमान इति श्वेतमश्वं प्रदक्षिणं परिणीय
वसन्ति ॥ ३८ ॥

गतम् ॥ ३८ ॥

औदुम्बरीस्तिस्रः समिधः प्रादेशमात्रीर्घृते वासयति ॥ ३९ ॥

औदुम्बरी· समिधो घृते क्षिपति ॥ ३९ ॥

श्वोभूत उत्तमाभ्यां पौर्वाह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य
पञ्चम्याश्चितेः शेषं याज्ञसेनीं चितिं चिनोति ॥ ४० ॥

श्वोभूते श्व प्रभाते पौर्वाह्णिकीभ्या प्रचर्य पञ्चम्याश्चितेः शेषं द्र्यहमुत्तमा चितिः, इत्युक्तम् । चित्रनामकस्य कस्यचित्पुरुषस्य वंशे समुत्पन्नो यज्ञसेननामकस्तेन दृष्टा चितिर्याज्ञसेनी ता चिनोतीत्यर्थः ॥ ४० ॥

अग्निर्मूर्धेति तिस्रो गायत्रीर्मूर्धन्वतीः पुरस्तादुप-
दधाति । उत्तरतस्त्रिष्टुभस्तिस्रो दक्षिणा उत्तरा
जगतीस्तिस्रः पश्चादुत्तरा अनुष्टुभस्तिस्र उत्तरतो
बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि
च्छन्दांसि यथावकाशमुपदधाति ॥ ४१ ॥
अत्रैवातिच्छन्दसमुपदधाति । द्विपदामुत्तमामुप-
धाय ॥ ४२ ॥

अग्निर्मूर्धेति तिस्रो गायत्री· पुरस्तादुपदधात्येवमुत्तराण्यपि च्छन्दांसि त्रीणि त्रीण्युप-

दधातीत्यापस्तम्बवैखानसौ । त्रिष्टुभो दक्षिणतोऽग्नेः । जगतीः पश्चादनुष्टुभ उत्तरतः । बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरित्येतानि बृहत्यादीनि यथावकाशं त्रीणि त्रीण्येव स्युः । अधिका या अक्षरपङ्क्तिः सा विकल्पार्था । अतिच्छन्दस्तु मध्येऽग्नेः—अग्निं होतारमिति । द्विपदास्त्वन्ततः पुच्छे तासां तु नेष्यते कर्मकाले द्विपदासु नेष्यत इति च्छन्दोविचितिवचनात् ॥ ४१ ॥ ४२ ॥

आयोस्त्वा सदने सादयामीति स्वयमातृण्णामभिमृश्याश्वेनावघ्राप्य परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीमिति मध्येऽग्नेरविदुषा ब्राह्मणेन सहोपदधाति । सुवरित्येतया व्याहृत्या । चित्तिं जुहोमीति स्वयमातृण्णायाः हुत्वाऽपानिति । प्रोथदश्वो न यवसे अविष्यन्नित्युत्तरेऽंसे विकर्णीमुपदधाति । स्वयमातृण्णा च विकर्णी च नान्याभिरिष्टकाभिरभ्युपदधाति ॥ ४३ ॥ ४४ ॥

आयोस्त्वा सदने सादयामीति प्रणीता स्वयमातृण्णा अभिमृश्य श्वेतेनाश्वेन चावघ्राप्य, आरूढ एवावघ्रापणं करोतीत्येके, नीत्वाऽश्वसमीप, परमेष्ठी त्वा सादयतु दिवः पृष्ठ इत्यविदुषा ब्राह्मणेन सहोपदध्यात् । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद सुवरित्यन्तेन मन्त्रेण, चित्तिं जुहोमीति तस्या हुत्वाऽपानन्नूर्ध्वं श्वासवायुर्नीयते । वरदानं साममानप्रैषश्च, स्थिते नोपधानं ताभ्याम् । प्रोथदश्व इति विकर्णीमुत्तरेऽंस उपदधाति । ते त्विष्टके स्वयमातृण्णा विकर्णी च तयोरुपरि नान्यामिष्टकामुपदधाति ॥ ४३ ॥ ४४ ॥

अग्ने गोभिर्न आगहीत्येतेनानुवाकेन गोचितिमुपदधाति । सहस्रं पादमात्रीरिष्टकाः ॥ ४५ ॥ ता मध्यमायां चित्यां चित्यां पशुकाम उपदधाति ॥ (ख० ४) ॥ ४६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने प्रथमः पटलः ॥ १ ॥

अग्ने गोभिर्न आगहीत्यनुवाकेन प्रतिमन्त्रमुपदधाति, यावत्सहस्रमपहित(मुपधान)मिति पुनः पुनरभ्यस्यतेऽनुवाकः । पूर्णे सहस्रमधिका ऋचस्त्यज्येरन् । अयं विधिः सहस्राग्निसंख्याधिकं यथा न भवति तथेति । अन्यत्र सहस्रात्प्रथमा तामुक्त्वा, द्विसाहस्रादिषु पशुकामस्य यजमानस्य । गोचितिरित्यस्या नामधेयम् । योऽग्निश्चीयते तस्य

पादमात्री., ता. प्रथमायां मध्यमायां पञ्चम्यां वा समाप्तायां, न पुरीषमुपदध्यादित्यर्थः ।
॥ ४९ ॥ ४६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलितायां
प्रयोगचन्द्रिकाया द्वादशप्रश्ने प्रथम पटल. ॥ १ ॥

अथ द्वादशप्रश्ने द्वितीय पटल' ॥

इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्मीत्यष्टौ सयुजः ॥ १ ॥

देवताभिः सहाग्निं योजयन्तीति सयुजो मन्त्राः । तैर्मन्त्रैरुपधेया इष्टका अपि सयुज. । यत्सयुज उपदधाति (तै० स० ५–३–९) इत्यादिदर्शनात् ॥ १ ॥

अम्बा नामासीति सप्त कृत्तिकाः ॥ २ ॥

असमानेन सप्त कृत्तिकाः ॥ २ ॥

पुरो वातसनिरसीति पञ्च वृष्टिसनीरनुपरिहारं सादयति ॥ ३ ॥

वृष्टिसनिशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका वृष्टिसनय । एकामिष्टका हस्ते धृत्वा चयनक्षेत्रं प्रदक्षिणीकृत्योपदध्यात् । एव पञ्चानुपरिहार प्रतिदिशमेका च मध्ये । ‘ यदेकधोपदध्यादेकमृतु वर्षेत् ’ (तै० स० ५–३–९) इत्येकप्रयत्नोपधानं वारयितुमनुक्रमेण परितो हृत्वा हृत्वा तदुपधानं विदधाति भगवती श्रुति. ॥ ३ ॥

सलिलाय त्वा सर्णीकाय त्वेत्यष्टावादित्येष्टकाः ॥ ४ ॥

आदित्यशब्दोपेतैर्मन्त्रैरुपधेया इष्टका आदित्येष्टकाः ॥ ४ ॥

ऋचे त्वा रुचे त्वेति पञ्च घृतेष्टका अनुपरिहारं सादयति ॥ ५ ॥

घृतपिण्डा एव घृतेष्टकाः । अमृन्मयीष्विष्कासु सूत्रकारेण परिगणितत्वात् । तत्रापि पूर्ववदेकैकस्या इष्टकाया. प्रदक्षिणावृत्तिपूर्वकत्वं विधत्ते ‘अनुपरिहारं सादयत्यपरिवर्गमेवास्मिस्तेजो दधाति ’ (तै० सं० ५ ३–१०) इति ॥ ५ ॥

यशोदां त्वा यशसि सादयामीति पञ्च यशोदाः ॥ ६ ॥

असमासेनोपदध्यात् । ‘ यशोदा उपदधाति ’ (५–३–१०) इत्यादिब्राह्मणम् ॥ ६ ॥

भूयस्कृदसि वरिवस्कृदसीति पञ्च भूयस्कृतः ॥ ७ ॥

भूयो बाहुल्यं करोतीति भूयस्कृत् । ताः पञ्चोपदध्यादित्यर्थ. ॥ ७ ॥

अप्सुषदसि श्येनसदसीति पञ्चाग्निरूपाणि ॥ ८ ॥

अग्निरूपवाचिभिर्मन्त्रैरुपधेयत्वा दिष्टका अप्याग्निरूपाणीत्येवोच्यन्ते । 'अप्सुषदसि श्येनसदसीत्याहैतद्वा अग्ने रूपꣳ रूपेणैवाग्निमवरुन्धे' (तै० स० ५-३-१०) इति । अग्न्याकारवाचिना पदाना पाठेन योग्यरूपेण युक्तमग्निमेव प्राप्नोतीत्यर्थः ॥ ८ ॥

पृथिव्यास्त्वा द्रविणे सादयामीति पञ्च द्रविणोदाः ॥ ९ ॥

द्रविणोदा पञ्च । द्रविणोदाशब्दयुक्तैर्मन्त्रैरुपधेयत्वाद्द्रविणोदा इत्यासां नाम ॥९॥

प्राणं मे पाह्यपानं मे पाहीति षडायुष्याः ॥ १० ॥

आयुष्या. षट् । आयु शब्दोपेतैर्मन्त्रैरुपधेयत्वादेता इष्टका आयुष्याः ॥ १० ॥

अग्ने यत्ते परꣳ हृन्नामेत्यग्नेर्हृदयम् ॥ ११ ॥

अग्ने यत्ते परꣳ हृन्नामेत्येका । मध्य उपदध्याद्धृदयसाम्यादिति भावः ॥ ११ ॥

या वा अयावा इति सप्तर्तव्याः । १२ ॥

एतद्यावादिशब्दानामृतुसबन्धित्वात्तैरुपधेया इष्टका अप्यृतव्या इत्युच्यन्ते ॥ १२ ॥

अग्निना विश्वाषाडित्येतेनानुवाकेनेन्द्रतनूरुपदधाति ॥ १३ ॥

इन्द्रतनवो द्वाविंशति. । विश्वाषाडित्यादिशब्दा इन्द्रतनूविशेषवाचकास्तद्युक्तैर्मन्त्रै-रुपधेया इष्टका इन्द्रतनव. ॥ १३ ॥

अभीषाच्चाभिषवी चाभिवयाश्चोर्ध्ववयाश्च बृह-
द्वयाश्च सवयाश्च सहाꣳश्च सहमानश्च सहस्वाꣳश्च
सहीयाꣳश्चेत्येतेनानुवाकेनेन्द्रनामान्युपदधाति ॥१४॥

अभीषाच्चेति दशेन्द्रनामानि ॥ १४ ॥

प्रजापतिर्मनसाऽश्वोऽच्छेत इति त्रयस्त्रिꣳशतं यज्ञतनूः ॥ १५ ॥

यज्ञतनुप्रतिपादकशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका यज्ञतनव. ॥ १५ ॥

ज्योतिष्मतीं त्वा सादयामीति द्वादश ज्योतिष्मतीः ॥ १६ ॥

ज्योतिष्मतीशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका ज्योतिष्मत्य. । ते च मन्त्रा आरण्य-काण्डे समाम्नाता. ॥ १६ ॥

रोहितेषु त्वा जीमूतेषु सादयामि । अरुणेषु त्वा
जीमूतेषु सादयामि । सितेषु त्वा जीमूतेषु साद-
यामि । नीलेषु त्वा जीमूतेषु सादयामि । कृष्णेषु
त्वा जीमूतेषु सादयामीति पञ्च जीमूताः ॥ १७॥

पञ्च जीमूता असमासेन ॥ १७ ॥

कृत्तिका नक्षत्रमित्येतेनानुवाकेनासꣳस्पृष्टा
नक्षत्रेष्टका उपदधाति ॥ १८ ॥

नक्षत्रशब्दोपेतैर्मन्त्रैरुपधेया इष्टका नक्षत्रेष्टका. ॥ १८ ॥

अग्ने रुचः स्थेति सर्वास्वनुषजति ॥ १९ ॥

अग्ने रुच. स्थ प्रजापतेर्धातु सोमस्येति प्रथमायामेव । सर्वास्वनुषङ्ग[1], इति प्रत्यक्षवचनादस्मत्सूत्रे सूत्रान्तरे वा ॥ १९ ॥

पूर्णा पश्चादिति पुरस्तात्पौर्णमासीमुपधाय पूर्वां पूर्वामुपधायापरामपरामुपदधाति । आ विशाखाभ्याम् । यत्ते देवा अदधुरिति पश्चादमावास्यायामुपधायापरामपरामुपधाय पूर्वां पूर्वामुपदधात्याऽपभरणीभ्योऽन्ततः ॥ २० ॥

पूर्णा पश्चादिति पौर्णमासीं पुरस्तादग्नेरुपदधाति । कृत्तिका नक्षत्रमिति नक्षत्रेष्टकाः पुरस्तादारभ्य प्रत्यगपवर्गा असंस्पृष्टाश्च परस्परम् । पूर्वामुपधाय कृत्तिका नक्षत्रमिति ज्योतिषे त्वेत्यन्तेन । एवमपरामपरामा विशाखाभ्याम् । दक्षिणेन स्वयमातृण्णाया यथा रीतिर्भवति तथा करोति । यत्ते देवा अदधुरिति पश्चादग्नेरपरत उपधायामावास्याम् । अनूराधा नक्षत्र मित्रो देवतेत्यवशिष्टाना नक्षत्रेष्टकाना पूर्वां पूर्वामाऽपभरणीभ्य उपदधाति । सहापभरणीभिरसमासेन पूर्ववत् ।

यद्वा—अथोपधाने कंचिद्विशेष विवत्ते— ' यत्सस्पृष्टा उपदध्यादवृष्टचै लोकमपि दध्यादवर्षुक. पर्जन्य. स्यादसंस्पृष्टा उपदधाति वृष्टचा एव लोकं करोति वर्षुक. पर्जन्यो भवति ' (तै० स० ५-३-१) इति इष्टकाना परस्परं स्पर्शे सति वृष्टेः स्थानस्याऽऽच्छादितत्वात्पर्जन्यो वृष्टिरहितो भवति । असंस्पर्शे तु तच्छिद्रस्य वृष्टिस्थानत्वान्मेघो वर्षणशीलो भवति । उपधाने विशेषान्तरं विधत्ते—पुरस्तादन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्यावर्तन्ते (तै०सं०५-४-१) इति । स्वयमातृण्णाया दक्षिणभागे पूर्वां दिशमारभ्य प्रत्यगवसानाः कृत्तिकादिविशाखान्ता इष्टका उपदध्यात् । अनूराधाद्यपभरण्यन्ता इष्टकाः स्वयमातृण्णाया उत्तरभागे प्रतीची दिशमारभ्य प्रागवसाना उपदध्यात् । स्वयमातृण्णाया दक्षिणोत्तरभागस्थितयो. पङ्क्त्योर्मध्ये पश्चिमाया दिशि समरूपेणामावास्याख्यामिष्टकामुपदध्यात् । स्वयमातृण्णाया दक्षिणोत्तरभागस्थितयो. पङ्क्त्योर्मध्ये पूर्वस्या दिशि समरूपेण पौर्णमास्याख्यामिष्टकामुपदध्यात । यस्मादेवं तस्माल्लोकेऽपि नक्षत्राणि गोलकस्यापि दक्षिणे भागे पश्चिमाभिमुखानि, उत्तरभागे तु प्राङ्मुखानीत्येवमावर्तन्ते ॥ २० ॥

---

१ घ. ' सर्वास्वनुषजति ' इति ।

हिरण्यगर्भः समवर्तताग्र इत्यष्टौ सरितः ॥ २१ ॥

हिरण्यगर्भ इत्यष्टौ सरित उपदधातीत्यर्थः ॥ २१ ॥

विश्वकर्मा दिशां पतिरिति पञ्च
हिरण्येष्टकाश्चतस्रः प्रतिदिशमेकां मध्ये ॥ २२ ॥

हिरण्येष्टकाः प्रतिदिशमसमासेन ॥ २२ ॥

प्राणाय त्वा चक्षुषे त्वेति चतस्रः शर्कराः
स्वयमातृण्णाः प्रतिदिशम् । [संवत्सरस्य
प्रतिमामिति प्रतिमामत्रैवर्षभ आम्नातः] ॥ २३ ॥

प्राणाय त्वा चक्षुषे त्वा तया देवतया, व्यानाय त्वा चक्षुषे त्वा तया, अपानाय त्वा चक्षुषे त्वा तया, वाचे त्वा चक्षुषे त्वा तया, इति चतस्रः स्वयमातृण्णा उपदधाति ॥२३॥

अग्न आयाहि वीतये । अग्निं दूतं वृणीमहे ।
अग्निनाऽग्निः समिध्यते । अग्निर्वृत्राणि
जङ्घनत् । अग्ने स्तोमं मनामहे सिध्रमद्य
दिविस्पृशम् । देवस्य द्रविणस्य व इति
पञ्चाह्नां रूपाणि । [अथ व्रतमुपदधाति] ॥ २४ ॥

शाखान्तरस्थाः पठिताः पञ्चाह्नां रूपाणि । अत्र व्रतमुपदधातीति शाखान्तरोक्तम् । एवमापस्तम्बेऽपि ॥ २४ ॥

शतायुधायेति पञ्चाज्यानीः । इन्द्रस्य वज्रोऽ-
सि वार्त्रघ्न इति चतस्रो वज्रिणीः प्रतिदिशं
(अश्मन इषुहस्त उपदधाति) पञ्चैके समा-
मनन्ति यो न उपरिष्टादिति मन्त्रः संनमति ॥ २५ ॥

अज्यानिशब्दोपेतैर्मन्त्रैरुपधेया इष्टका अज्यानयस्ता एता उपदध्यात् । वज्रिणीरुप-दधाति (तै० सं० ५–७–३) इति ब्राह्मणे विधिर्द्रष्टव्यः । वज्रिणीरश्मनस्ताः प्रतिदि-शमुपधीयन्ते । असमासेन यो न उपरिष्टादिति । इषुहस्तेन पञ्चमीति शाखान्तरस्था । उपरिष्टाद्घायुरभिदासतीति ॥ २५ ॥

अग्ने यशस्विन्यशसे समर्पयेति चतस्रो राष्ट्र-
भृतः । गायत्रीं पुरस्तादुपदधाति त्रिष्टुभं दक्षि-
णतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्ये ।

१ धनुश्चिह्नान्तर्गतग्रन्थः सूत्रपाठे नास्ति ।

गायत्री दक्षिणत उपदधाति । एवमनुपूर्वाः सर्वाः । सर्वत्राग्निर्मूर्धा । भुवो । जनस्य गोपाः । त्वां चित्रश्रवस्तम । अग्ने तमद्याश्वमित्येता आम्नाता भवन्ति ॥ (ख० ६) ॥ २६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने द्वितीयः पटलः ॥ २ ॥

अग्ने यशस्विन्निति राष्ट्रभृत. पुरस्तादग्नेश्चतस्र । हिरण्येष्टकाभिः सर्वतोमुखमुपदधाति, इत्यापस्तम्बः । उपधानम्—' यो वा अग्निं सर्वतोमुख चिनुते ' (तै० सं० ५–७–४) इत्युक्तं ब्राह्मणे । गायत्रीमग्निर्मूर्धेति पुरस्तादुपदधाति । त्रिष्टुभं दक्षिण· तोऽग्नेर्भुवो यज्ञस्येति । जगती पश्चाज्जनस्य गोपाः । अनुष्टुभमुत्तरतस्त्वा चित्रश्रवस्त-मेति । पङ्क्तिं मध्ये, अग्ने तमद्याश्वमिति । एष सर्वतोमुखोऽग्निर्हिरण्येष्टकाभिश्ची-यते ॥ २६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयो-गचन्द्रिकायां द्वादशप्रश्ने द्वितीय. पटल. ।

अथ द्वादशप्रश्ने तृतीय पटल ।

सहस्रस्य प्रमा असीति सहस्रेण हिरण्य-शल्कैः प्रदक्षिणमनुपरिक्रामन्प्रतिदिशमग्निं प्रोक्षति द्वाभ्यां द्वाभ्यां शताभ्याम् । मध्य उत्तमाभ्यां प्राङ्मुखः ॥ १ ॥

सहस्रस्य प्रमा असीत्येतैर्मन्त्रैर्हिरण्यशल्कैरुर्वेस्थितो न दक्ष शताभ्यां द्वाभ्यामेकै-कस्यां दिशि प्रोक्षति, आज्यप्रोक्षणवत् । सहस्रस्येति वचन द्विसाहस्रादिष्वप्यनूहः । सहस्रादीनामपरिमितवाचित्वात् ॥ १ ॥

इमा मे अग्न इष्टका धेनव. सन्त्वित्येताष्टका धेनूः कुरुते ॥ २ ॥

अनेन मन्त्रेण श्रोण्यन्ते तिष्ठन्नुत्तरा धेनूर्धेनुर्म्याम्नाया एवेष्टका कुरुते । यजमानो धेनूः करोतीति वैखानसभरद्वाजौ ॥ २ ॥

ऐडिक्या चित्याऽभिमृशत्यारण्येऽनुवाक्या भवन्ति ॥ ३ ॥

ऐडिकी चिति·—अग्निरसि वैश्वानरोऽसीत्यनुवाक । तेनाभिमृशत्यध्वर्युरग्निम् ।

तथाऽन्वाऽऽरब्धाऽऽपस्तम्बः—'ऐडिक्याऽध्वर्युरग्निमभिमृश्य' इति । तेन धेनुकरणं याजमानं पुनरध्वर्युग्रहणमभिमर्शनार्थमिति ॥ ३ ॥

शतरुद्रीयं जुहोति जर्तिलयवाग्वा वा गवीधुकयवाग्वा वा गवीधुकसक्तुभिर्जर्तिलैः सर्पिषा मृगक्षीरेणाजक्षीरेण वाऽर्कपर्णेनोध्र्वस्तिष्ठन्नुत्तरार्ध्यायामिष्टकायां नमस्ते रुद्र मन्यव इत्येताननुवाकांस्त्रेधं प्रतिविभज्य प्रथमेनानुवाकेनाशीत्या च जानुदघ्नेऽशीत्यैव नाभिदघ्नेऽशीत्या यच्च प्रागवतानेभ्यस्तेनाऽऽस्यदघ्ने सहस्राणि सहस्रश इत्यसंख्याता दशावतानान् प्रत्यवरोहाञ्जुहोति ॥ ४ ॥ नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने नमो रुद्रेभ्यो येऽन्तरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने ॥ ५ ॥ असंचरेऽर्कपर्णमुदस्यति ॥६ ॥

शतरुद्रीयमिति कर्मनामधेयम् । रुद्रा बहवो यत्रेज्यन्त इति । जर्तिला आरण्यतिलाः । तेषां यवाग्वा । कसकैः(कुशयवैः)र्गवीधुकैर्वाऽऽरण्यतिलैरेव वा गवीधुकसक्तुभिरेव वा कुस (श) य [व]सर्पिषेति वैखानसः । तच्च जीर्णं घृतमित्येके । अजक्षीरेणाऽऽरण्यानां होममुदङ्मुख उत्तरार्ध्यायामुत्तरस्य पक्षस्योत्तरापरकोणस्तस्मिञ्जुहोति विकर्ण्यां वा । उत्तरेऽंसेऽग्नेः स्वयमातृण्णायां वा तृतीयायां यथाऽग्निर्नाऽऽक्रम्यते तथा बध्यते, न प्रचारः । अनुपरिचारोऽप्रदक्षिणं संततधारया जुहोतीति वैखानसः । अपरिवर्गमेवैनं शमयतीति लिङ्गात् । वाजसनेयिनामपि संतता होतव्येति स्पष्टवचनान्न मन्त्रान्तेन होमः ।

नमस्ते रुद्र मन्यव इति विभागः पदैस्त्रेधा येषामनुवाकानां तेषां सहस्रयोजन इत्येवमन्तास्तिस्र आहुतयः । जानुदघ्नेन नाभिदघ्नेनाऽऽस्यदघ्नेन चोत्तराभिस्तिस्रो नमो रुद्रेभ्यो ये पृथिव्यामित्यादि । आस्यदघ्ने नाभिदघ्ने जानुदघ्ने चैव हुत्वाऽसमासेन या उत्तमास्ता यजमानं वाचयति, इति । एता एव यजमानो वाच्यते । एष विधिस्तैत्तिरीयाणाम् । अथवा प्रथमान्नमस्त इत्यारभ्य जानुदघ्ने नमस्तक्षभ्य' स्वाहेति जुहोति । सर्वत्र रुद्रा देवताः । रथकारेभ्यश्च व इत्युपक्रम्य नाभिदघ्ने नम स्वायुधाय च स्वाहेति जुहोति । भाष्यकारस्तु नमः स्वायुधाय च स्वाहेति हुत्वा सुधन्वन इत्युत्तरत्राऽऽरम्भ इति । सुधन्वने चेत्यारभ्याऽऽस्यदघ्ने शेषमन्त्रगणेन प्रागवतानेभ्यः पूर्वमवतानेभ्यस्तासामीशान इत्यास्यदघ्ने हुत्वा सहस्राणि सहस्रश इत्यसमासेन दशावतानां हूयन्ते । केचित्तु—एकादशाव-

तानान्ये धनानीति पठन्ति । विकल्पार्थेऽन्वारोह । नमो रुद्रेभ्यो ये पृथिव्यामित्यसमासेन जानुदघ्ने नमो रुद्रेभ्यो येऽन्तरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये दिवि, इत्यास्यदघ्ने । एतानेव यजमानं वाचयत्यन्वारोहान् । एतानेव विपरीतान्—नमो रुद्रेभ्यो ये दिवि, इत्यास्यदघ्ने, नमो रुद्रेभ्यो येऽन्तरिक्ष इति नाभिदघ्ने, नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने, त वो जम्भे दधामीत्येवमन्नम् ॥

यद्वा—शतरुद्रीयं जुहोति (तै० सं० ५-४-३) इति । शतमित्यपरिमितत्वं लक्ष्यते । अपरिमिता रुद्रा यस्मिन्नध्याये प्रतिपाद्यन्ते सोऽध्यायः शतरुद्रीयः । जर्तिला आरण्यातिला । गवीधुका आरण्यगोधूमाः । अथवाऽजक्षीरेण जुहुयात् । अर्चनीयेन पूज्येन प्रवर्ग्यघृतेन तथाविधेनाजारोमसघातेन चोत्पन्नत्वादस्य स्थावरस्यार्कनाम संपन्नम् । तेनार्कपर्णेन जुहुयात् । तत्र त्रेधा विभाग एव करणीय —नमस्ते रुद्रेत्यारभ्य सभापतिभ्यश्च वो नम इत्यन्तः प्रथमो भागः । नमो अश्वेभ्य इत्यारभ्यावार्याय चेत्यन्तो द्वितीयो भागः । नमः प्रतरणाय चेत्यारभ्य य एतावन्तश्चेत्यृचा सहितस्तृतीयो भागः । त्रिष्वप्याहुतिषु क्रमेण जानुदघ्नादिदेशेषु स्रुग्धारण हस्ताभिनयेन व्याख्यातम् । नमो रुद्रेभ्य इत्यादयस्ता अध्वर्युर्यजमान वाचयेत् । यत्र पशवो न संचरन्ति तत्रार्कपर्णत्यागः ॥ ४ ॥ ५ ॥ ६ ॥

अर्कपर्णस्य परित्यागदेशमाह—

यं द्विष्यात्तस्य संचरे पशूनां न्यस्येद्यः प्रथमः पशुरभितिष्ठति स आर्तिमार्छति ॥ (ख० ७) ॥

शतरुद्रीयस्य ब्राह्मणम् ॥ ७ ॥

यं पुरुषं यजमानो द्विष्यात्तस्य पशूना सचरप्रदेशे तदर्कपर्णं परित्यजेत् । तत्त्यक्तं पर्णं यः पशुः प्रथम इतरेभ्यः पशुभ्यः पूर्वः सन्नभिक्रम्य तिष्ठति स म्रियेत । इदं शतरुद्रीयस्य ब्राह्मणमित्यर्थः ॥ ७ ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीष्विति रौद्रं गावीधुकं चरुं पयसि शृतं यस्यामिष्टकायाॱ शतरुद्रीयं जुहोति तस्यां निदधाति ॥ ८ ॥ तिसृधन्वमयाचितं ब्राह्मणाय दद्यात् ॥ ९ ॥ वसवस्त्वा रुद्रैः पुरस्तात्पान्त्विति प्रदक्षिणमनुपरिक्रामन्प्रतिदिशमाज्येनाग्निं प्रोक्षति ॥ मध्य उत्तमेन प्राङ्मुखो यत्ते रुद्र पुरो धनुरिति प्रदक्षिणमनुपरिक्रामन्प्रतिदिशं नमस्कारैरुपतिष्ठते मध्य उत्तमेन प्राङ्मुखः ॥ १० ॥

यो रुद्रो अग्नाविति रौद्रं रुद्रदैवत्यम् । एतेन यजुषोत्तरापरस्या स्रक्त्यां इ(ये)ष्टका सैवोपद(सर्वोप)धानस्यान्ते क्रियते चरमायामिष्टकाया निदध्यादिति तस्यां प्रतिष्ठाप्यो गावीधुकश्चरुः । अन्यस्या वा यस्या शतरुद्रीयं जुहोति । पाषाणा निखन्यन्ते वाजसनेयिनाम् । जानुदघ्ने उपधाय, तैत्तिरीयाणामप्युपधान चित्यादि क्रियते, अपामुपस्पर्शने कृते । तिसृभिरिषुभिर्धनुर्ददाति यजमानोऽध्वर्यवे, अयाचित न कर्मकृतमिति । यत्ते रुद्र पुरो धनुरिति यजमानस्यैवोपस्थानम् ॥ ८ ॥ ९ ॥ १० ॥

उदकुम्भमादायाश्मानमवधायाश्मन्नूर्जमिति त्रिः प्रदक्षिणमग्निं परिषिञ्चन्पर्येति ॥ ११ ॥

अध्वर्युर्गृहीत्वोदकुम्भमश्मन्नूर्जमिति त्रि. प्रदक्षिण परिषिञ्चन्गच्छति ॥ ११ ॥

निधाय कुम्भं त्रिरपरिषिञ्चन्प्रतिपर्येति । यद्यभिचरेदिदमहममुष्याऽऽमुष्यायणस्य प्राणं प्रक्षिणोमीति दक्षिणस्याꣳ श्रोण्यां कुम्भं प्रक्षिणोति । द्वेष्यस्य नाम गृह्णाति ॥ १२ ॥

निधाय कुम्भं स्थापयित्वा घटम् । अश्मन्स्ते क्षुदमुमिति नामग्रहणं शत्रोः । देवदत्तं ते शुगृच्छतु यं द्विष्म इति त्रिरेव पुनर्निवर्तते । त्रि. परिषिञ्चन्पर्येति (तै० सं० ५-४-४) इति वचनात् । केचित्तु-कुम्भ पुनर्गृह्णन्ति यद्यभिचरेद्यजमान. प्रतिनिवृत्त्याध्वर्युरिदमहं देवदत्तस्य भार्गवस्याऽऽयु. प्रक्षिणोमीत्यनेन मन्त्रेण दक्षिणस्यां स्रक्त्यामाग्नेयकोण उत्तरे वा कुम्भं भिन्द्यादित्यर्थः ॥ १२ ॥

पृष्ठैरुपतिष्ठते । गायत्रेण पुरस्तात् । बृहद्रथंतराभ्यां पक्षौ । ऋतुस्था यज्ञायज्ञीयेन पुच्छम् । दक्षिणस्याꣳ श्रोण्यां वारवन्तीयं गायत्युत्तरस्यां वामदेव्यमपि पक्षं प्रति प्रजापतेः साम ऋचं गायति ॥ १३ ॥

ता पृष्ठैरुपतिष्ठतेऽध्वर्यु· सामादिभिः । तान्यध्वर्युर्गायेदिति वाजसनेयिनः श्रुतेः । छन्दोगाना वा तेषा विधानात् । गायत्रेण साम्ना पुरस्तादुपतिष्ठते रथंतरेण दक्षिणं पक्षं बृहतोत्तरम्, अल्पाच्तरम् (पा० सू० २-२-३४) इति बृहतः पूर्वनिपातः । ऋतुस्था यज्ञायज्ञीयं साम तेन पुच्छ, दक्षिणा या श्रोणी तस्या वारवन्तीयेनोपस्थानम् । केचिदुत्तरस्या योऽग्निस्तमुपतिष्ठत इति वर्णयन्ति । वामदेव्यस्य स्थाने तैत्तिरीयकश्रुत्यैत-

१ क ख सामानृच ।

मपि दक्षिणस्याऽऽत्मनश्च या परा स्रक्ति प्रजापते साम्ना तत्रोपस्थान प्रजापतेर्हृद· यम् ॥ १३ ॥

इष्टो यज्ञो भृगुभिराशीर्दा वसुभिरतस्य त इष्टस्य वीतस्य द्रविणेऽह भक्षायेति स्तुतशस्त्रयोर्दोहे यज· मानं वाचयति ॥ १४ ॥

स्पष्टोऽर्थः ॥ १४ ॥

पिता मातरिश्वेति संचितोक्थ्येन होताऽ_शꣳसति । होतर्यकामयमानेऽध्वर्युः ॥ १५ ॥

स्तुतशस्त्रयोर्दोहे यजमानं वाचयतीत्यनुकर्ष· । तस्मिन्स्तुते स्तुतस्य स्तुतमसीति यजमानो वाच्यतेऽध्वर्युणा, पिता मातरिश्वेति संचितस्याग्नेर्यच्छस्त्रं तेन होताऽग्ने· पश्चात्स्थित· (सन्) शंसति । अकामयमानेऽनिच्छति होतरि शसन कर्तुमध्वर्युरेव शसति । पिता मातरिश्वेत्यारभ्य पादानुतक्षुरिति विरम्य बृहस्पतिरुक्था मदानि × शꣳसिषदित्येतामेव त्रि. । पराचाऽनुशंसतीति वचनात् । अथवा बह्वृचानामेका अङ्गिरश्मि(म्मि)जन्मना, इत्यनूच्यत इति सकृदेव प्रयोग इति भाष्यकृत् । इदानी शस्त्रस्य शस्त्रमसीति वाच· यति यजमानम् ॥ १५ ॥

अत्र धेनूः करणमेके समामनन्ति ॥ (ख० ८) ॥ १६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने तृतीयः पटलः ॥

स्पष्टोऽर्थ· ॥ १६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकाया द्वादशप्रश्ने तृतीय पटल: ॥

अथ द्वादशप्रश्ने चतुर्थ पटल

अवकां मण्डूकं वेतसशाखां च दीर्घवꣳशे प्रबध्य समुद्रस्य त्वाऽवाकयाग्ने परिव्ययमसीति सप्तभिर· ष्टाभिर्वाऽग्निं विकर्षति ॥ १ ॥

अवका शैवालं वेतसस्य वञ्जुलस्य शाखा मण्डूकं च दीर्घेऽपरिमिते वशे बद्ध्वा पुरुषमण्डूकेन विकर्षति दीर्घवशे बद्ध्वेति वैखानस· ॥ समुद्रस्य त्वेति सप्तभिरष्टाभिर्वा ऋग्भिरग्निं विकर्षति विलिखति । अथवा—योऽयं वेतस सोऽयमपा पुष्पस्थानीयोऽप्सु

× °सिषोनि' ।

जायमानत्वात् । याश्चावका. शैवालाभिधाग्ता अपां शर. सार दध्नो मण्डमिव । तस्मादेताभ्यामग्निं विकर्षेत् । पूर्वोक्तद्रव्यद्वयेन सह मण्डूकस्यापि विकर्षणसाधनत्वं विधत्ते—'यो वा अग्निं चित प्रथम. पशुरधिक्रामतीश्वरो वै त८शुचा प्रदहो मण्डूकेन विकर्षत्येष वै पशूनामनुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नाऽऽरण्येषु तमेव शुचाऽर्पयति' (तै० स० ५-४-४) इति । गोमहिषाजादीनां मध्ये यः पशुरिममिष्टकाभिश्चितमग्निं प्रथममधिरुह्य पादेनाऽऽक्रामति तं पशुं संतापेन प्रदग्धुमयमग्निः प्रभुर्भवति । तस्मात्पश्वन्तरेण विकर्षणं न कुर्यात्किंतु मण्डूकेन कुर्यात् । मण्डूकश्च यागयोग्येषु ग्राम्येष्वारण्येषु च पशुष्वनन्तर्भावाल्लोकेऽपि गोमहिषादिवदुपयोगादर्शनाच्च केनाप्युपजीव्यो न भवति । अतस्तेन विकर्षणे तमेव मण्डूकं संतापेन योजयति ॥ १ ॥

अनुगमयित्वा मण्डूकस्य प्राणान्संल्लोभ्य सर्वान्त्समुद्धृत्योत्करे न्यस्यति ॥ २ ॥ यं द्विष्यात्तमुपस्पर्शयेत् ॥ ३ ॥

विकर्षन्नेवानु गमयित्वा मण्डूकस्य प्राणान् प्राणस्थानानि नासिकाद्यादीनि सर्वाणि सल्लोभ्य यथा न ज्ञायन्तेऽङ्गानीयं नासिका इमे अक्षिणीति तथा कृष्यते । उत्करे शेषमुदस्यति । यं द्विष्याद्यजमानस्तमेतैरवकादिभि स्पृशेत् ॥ २ ॥ ३ ॥

स्वयं कृण्वानः सुगम [प्र]यात्रं तिग्मशृङ्गो वृषभः शोशुचानः । प्रत्न८ सधस्थमनु पश्यमाना आ तन्तुमग्निर्दिव्यं ततान ॥ त्वं न तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः । त्वयाऽग्ने पृष्ठं वयमारुहेमाथा देवैः (वः)सधमादं मदेम । अतिसर्गं ददतो मानवायजुं पन्थानमनुपश्यमानाः । अजुपन्त मरुतो यज्ञमेतं वृष्टिर्देवानाममृत८ स्व(सुव)र्विदम् । आ वर्तमानो भुवनस्य मध्ये प्रजा विकुर्वञ्ज .यान्विरूपाः । संवत्सरः परमेष्ठी धृतव्रतो यज्ञं नः पान्तु रजसः परस्तात् । प्रजां ददातु परिवत्सरो नो धाता ददातु सुमनस्य मानः । बह्वीः साकं बहुधा विश्वरूपा एकव्रता मामभि संविशन्त्विति पञ्चान्वारोहाञ्जुहोति । (ख०९)॥ ४॥

जुह्वा पञ्चगृहीतं गृहीत्वा स्वयं कृण्वान इत्यादिचित्येऽग्नावन्वारोहनामकं होमं कुर्यात् । सर्वत्राग्निर्देवता ॥ ४ ॥

पृथिवीमाक्रमिषं प्राणो मा मा हासीदिति
कृष्णाजिनस्योपानहावुपमुञ्चतेऽन्यतरां वा ॥ ५ ॥

कार्ष्णी (र्ष्ण्यौ) कृष्णमृगस्य चर्मणा कृतावुपानहौ लङ्घयति । एका वा ॥ ५ ॥

अपामिदं न्ययनं नमस्ते हरसे शोचिष इति
द्वाभ्यामाग्निमधिक्रामति ॥ ६ ॥

द्वाभ्यामृग्भ्यामग्निमधिरोहति चितिमध्वर्युः ॥ ६ ॥

जुह्वां पञ्चगृहीतं गृहीत्वा नृषदे वडिति पञ्चभि-
रक्ष्णयाऽग्निं व्याघारयति । यथोत्तरवेदिम् । ७ ॥

सुवर्विदे वडित्यन्तः । पञ्चभिर्मन्त्रैरग्नि (ग्नौ)व्याघारणं स्वयमातृण्णायां वेत्यापस्तम्ब-बौधायनौ । उत्तरवेदिवत् । अक्ष्णया विधान ब्राह्मणे—'नृषदे वडिति व्याघारयति' इत्यारभ्य—'अक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्रहरन्ति प्रतिष्ठित्यै' (तै० सं० ५-४-५)इति ॥ ७ ॥

ये देवा देवानामिति द्वाभ्यां दध्ना मधुमिश्रेण दर्भ-
मुष्टिनाऽग्निमनु परिचारमवोक्षति ॥ ८ ॥

स्वुरित्यन्तः । द्वाभ्यामृग्भ्यामनु परिचारं गत्वा प्रदेशमग्नौ व्यवोक्षण करोति, दध्ना मधुमिश्रेण दर्भाणा च महता मुष्ट्या गृहीत्वाऽग्नि विविधमवोक्षति । गुरुः स्थूलो दर्भमुष्टिर्मुष्टिरिति भाष्यकृत् ॥ ८ ॥

कूर्मपृषन्तं कृत्वा प्राणदा अपानदा इति प्रत्यवरोहति ॥ ९ ॥

यथा कूर्मपृष्ठं भवति नानाबिन्दुचित्रित तथा पृष्ठमध्ये कृत्वा । (ए)कस्य मन्त्रः प्राणदा अपानदा इति । तूष्णीं यजमान प्रत्यवरोहति ॥ ९ ॥

जुह्वां पञ्चगृहीतं गृहीत्वाऽग्निस्तिग्मेन शोचिषा
सैनाऽनीकेनेति संहिताभ्यामग्नयेऽनीकवत
एकामाहुतिं जुहोति ॥ १० ॥

अग्निस्तिग्मेनेति द्वाभ्यामेकाहुति, अग्निरनीकवान्देवताज्ञानं कर्माङ्गम् ॥ १० ॥

षोडशगृहीतेन स्रुचं पूरयित्वा य इमा विश्वा
भुवनानि जुह्वदिति सूक्ताभ्यां नाना वैश्वकर्मणा-
नि जुहोति । सर्वाभिर्वा ॥ ११ ॥

षोडशगृहीतेनाऽऽज्येन जुहूं सपूर्य विश्वकर्मा सर्वकर्मा येषा देवता वैश्वकर्मणानि, तानि जुहोति । य इमा विश्वा भुवनानीत्यारभ्य, अपा गर्भं व्यदधात्पुरुत्रा स्वाहेत्येका-

हुतिः । चक्षुषः पितेत्यारभ्य, अयमुग्रो विहव्यो यथाऽसत्स्वाहेति द्वितीयेन सूक्तेन नानासूक्ताभ्यां सूक्तेन सूक्तेनाऽऽहुतिद्वयमित्यर्थः ॥ ११ ॥

अत्रेदं चिन्त्यते— किमयं वैश्वकर्मणहोमः प्रतिमन्त्रं पृथक्कार्यः किंवा सूक्तद्वयं सहोच्चार्य सकृदनुष्ठेय आहोस्विदेकैकं सूक्तमुच्चार्यानुष्ठेय इति । तत्राऽऽद्यं पक्षद्वयं शाखान्तरगतत्वेनाङ्गीकरोति—

यं कामयेत चिरं पाप्मनो निर्मुच्येतेत्येकैकं तस्य जुहुयात् । यं कामयेत ताजक्पाप्मनो निर्मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात् ॥ १२ ॥

एकैकमन्त्रहोमेन शनैः शनैः पापनिर्मोको भवति । सर्वसूक्तहोमेन तु तदानीमेव पापनिर्मोकः । पृथक्सूक्तद्वयेऽपि सामर्थ्यं पृथक्संपादितं भवति । अपि च सूक्तद्वित्वं यजमानस्य प्रतिष्ठायै संपद्यते । तस्मादयमेव पक्षः श्रेयानित्यर्थः ॥ १२ ॥

समुद्राय वयुनाय सिन्धूनां पतये नम इति यद्येनमुदकेऽभिविन्देदञ्जलिनोदकमादायाप्सु जुहुयात् । अयज्ञसंयुक्तः कल्पः ॥ (ख० १०) ॥ १३ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

यद्येनं पुरुषमुदके वर्तमानस्य विन्देत भीर्भीतिर्जायेतेत्यर्थः । शुचिभूतोदकाञ्जलिमादाय—समुद्राय वयुनायेति तास्वेवाप्सु जुहुयात्, यासु भयमुत्पन्नम् । यथालिङ्गं त्यागः ॥ १३ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां द्वादशप्रश्ने चतुर्थः पटलः ॥ ४ ॥

अथ द्वादशप्रश्ने पञ्चमः पटलः ।

उत्तमाभ्यामापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्योदेनमुत्तरां नयेति तिसृभिर्घृतोषितास्तिस्रः समिध आहवनीयेऽभ्यादधाति ॥ १ ॥

आदधाति प्रक्षिपति । अन्यत्स्पष्टम् ॥ १ ॥

उदु त्वा विश्वे देवा इत्यग्निमुद्यच्छते ॥ २ ॥

इध्मं प्रणयनीयं क्षिप्त्वा सिकताभिर्धोपयम्य, अग्नये प्रणीयमानायेति संप्रेषः । उदु त्वा विश्वे देवा इत्यग्नेरुद्यमनं कृत्वोद्यतहोमः ॥ २ ॥

पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरिति षड्भिर्हरति ॥ ३ ॥

जुषन्तामित्यन्त । प्रथमाया त्रिरनूक्ताया पञ्च दिशो दैवीरिति हरत्याग्नीध्रादिति शेषः । यदाऽपि षड्भिस्तदाऽपि पञ्चम्यावृत्ति. । ' षड्भिर्हरति षड्वा ऋतव ऋतुभिरेवैनꣳ हरति ' (तै० स० ५-४-६) इति ब्राह्मणम् ॥ ३ ॥

आशुः शिशान इति दक्षिणतो ब्रह्मा दशर्चेनाप्रतिरथेनान्वेति । मैत्रावरुणो ब्राह्मणाच्छꣳसी वा॥४॥

आशुः शिशान इति दशर्चेन दक्षिणतोऽग्ने स्थितो ब्रह्माऽनुगच्छति, मैत्रावरुणो वा ' यदाऽप्रतिरथं द्वितीयो होता ' (तै० सं० ५-४-६) इति ब्राह्मणाद्ब्रह्मगणस्य द्वितीयो होता ब्राह्मणाच्छंसी । प्रतिप्रस्थाता वेत्यापस्तम्बः ॥ ४ ॥

विमान एष दिवो मध्य आस्त इति द्वाभ्यामाग्नीध्रेऽश्मानं निदधाति ॥ ५ ॥

आग्नीध्रो यस्मिन्प्रदेशे भविष्यति(भवेत्)स आग्नीध्र इति तस्मिन्प्रदेशे विमान एष दिव इति द्वाभ्यामश्मानं निदधाति, उपधानार्थं शुभ्रप्रस्तरम् । मध्ये दिवो निहितः पृश्निरश्मेति लिङ्गात् । मध्य उपधानकाले उपधीयते ॥ ५ ॥

इन्द्रं विश्वा अवीवृधन्निति चतसृभिरा पुच्छादेति ॥ ६ ॥

आग्नीध्र निर्गत्य पुच्छपर्यन्तमेतैर्मन्त्रैर्गच्छेत् । द्वितीया त्वनवसाना ॥ ६ ॥

प्राचीमनु प्रदिशमिति पञ्चभिरग्निमाक्रमन्ते ॥ ७ ॥

स्वस्तीत्यन्तः । पञ्चभिरग्निमधिरोहत्यध्वर्यु. ॥ ७ ॥

कृष्णायै श्वेतवत्सायै[1] पयसा दध्ना वौदुम्बरीꣳ स्रुचं पूरयित्वा नक्तोषासा, अग्ने सहस्राक्षेति सꣳहिताभ्याꣳ स्वयमातृण्णायामेकाहुतिं जुहोति ॥ ८ ॥

अधिरुह्य नक्तोषासाऽग्ने सहस्राक्षेति द्वाभ्यामृग्भ्या संहिताभ्या देवा अग्निं धारयन्द्रविणोदा अग्ने सहस्राक्षेत्येव सहिताभ्याम् । अन्ये त्वाहु.—अवसानं क्रियते नोच्छ्वस्यते, मध्य ऋचो । दध्न. पूर्णामौदुम्बरीमेताभ्यामृग्भ्या हूयते स्वयमातृण्णायाम् । अग्निर्देवता । एतन्मन्त्रसाध्य होमं ब्राह्मणे—' दध्न. पूर्णामौदुम्बरीꣳ स्वयमातृण्णायां जुहोति ' (तै० स० ५-४-७) इति विदधाति । जुहूसदृशी काचित्स्रुगौदुम्बरी ॥ ८ ॥

ऊर्णावन्तं प्रथमः सीद योनिमित्युच्यमाने सुपर्णोऽसि

---

[1] घ श्वेतवर्णोऽश्मा उप० ।

गरुत्मान्पृथिव्याꣳ सीदेति तिसृभिः स्वयमातृण्णायामग्निं प्रतिष्ठापयति द्वाभ्यां वा ॥ ९ ॥

ऊर्णावन्तं प्रथमः सीद योनिमिति होतु शब्दं श्रुत्वा पाशुकाः संभरा पारिध्याद्‌पोऽनवतीर्ण एव विश्वायुरसीति । यदेतान्त्संभरान्त्संभरति, इति श्रुते । अग्नेरधस्तात् क्रियते, अन्यस्मै प्रदायाग्निम । उत्तरवेदिविकारत्वाग्ने । अग्नेर्भस्मासीति संभरा गुग्गुलसुगन्धितेजनोण।. स्रुकाः—सुपर्णोऽसि गरुत्मानिति तिसृभि· स्वयमातृण्णाया सभा(भ)·रवत्या प्रतिष्ठापनमग्ने. सुपर्णोऽसि गरुत्मान् भासाऽन्तरिक्षमा पृण (इति द्वे ऋचौ वा), आजुह्वान इति व.गेवस्तानवती, अनवसाने तु पूर्वे प्रतिष्ठापितेऽग्नावग्ने· पुरीषमसीत्युत्तरत उपयमनी(न्या)न्युप्य ॥ ९ ॥

प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीꣳ समिधमादधाति । विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीम् । शमीमयीं पूर्वामेके समामनन्ति । वैकङ्कतीमुत्तराम् ॥ (ख०११) ॥ १० ॥

मनुष्व त्वेत्युपसमिन्धनं, समिन्धनार्थत्वात्प्रकृतस्योपसमिन्धनस्य वैकृतमन्त्रेण—प्रेद्धो अग्न इत्यौदुम्बरी, आधीयते । विधेम त इति वैकङ्कती । ताꣳ सवितुरिति शमीमयीम् । शमीमयी पूर्वा वैकङ्कत्युत्तरा च शाखान्तरस्था । केचित्तु —सर्वत्र समिधमादधातीत्यनुवर्तेत इति पठन्ति ॥ १० ॥

अग्ने तमद्याश्वमित्यक्षरपङ्क्त्या जुहोति ॥ ११ ॥

चित्तिं जुहोमि, अग्ने तमद्याश्वमिति द्वे आहुती हुत्वेत्यापस्तम्ब ॥ ११ ॥

जुहूꣳ स्रुवं च संमृज्य चतुर्गृहीतेनाष्टगृहीतेन द्वादशगृहीतेन वा स्रुचं पूरयित्वा सप्त त इति पूर्णाहुतिं जुहोति ॥ १२ ॥

आज्येन चतुर्गृहीतेनाष्टगृहीतेन द्वादशगृहीतेन वा स्रुचं पूरयित्वा प्राकृती पूर्णाहुतिः । अग्निः सप्तवान्देवता । द्वादशगृहीतेनाऽऽज्येन पूर्णा जुहूस्तया जुहुयादित्यर्थः ॥ १२ ॥

तां जुह्वदिह सोऽस्त्विवाति दिग्भ्योऽग्निं मनसा ध्यायति ॥ १३ ॥

ता जुह्वद्यो दिक्ष्वग्निरिह सोऽस्त्विवति ध्यानम् । ततोऽतिमुक्तीः— अग्निर्यज्ञं नयतु

---

१ ग औदुम्बरीꣳ समिधमाधी° ।

प्रजानन्नित्येवमाद्या पशुबन्धवत्प्रणयनोपदेशात्तन्मते तु व्याघारणान्तामुत्तरवेदिं कृत्वा पाशुकान्त्संभारान्न्युप्य (ति (ते) सभारा एवोप्यन्ते, ततः परिधयो लुप्यन्त इति। अत्राप्याहाऽऽपस्तम्ब'—आ वेदिप्रोक्षणात्कृत्वा, (आप० श्रौ० १७-१-१) इति। सह वेदिप्रोक्षणेनेत्याभिविधि। तस्मादाहोत्तरत्र वेद्यास्तरणादि सौमिकं कर्म प्रतिपद्यते, इति। अग्निवत्युत्तर परिग्राह परिगृह्णातीति। अनुवीक्षणान्तं कृत्वा शाखामाहृत्य मैत्रावरुण्या पयस्याया वत्सापकरणम्। अन्तर्वेदि शाखायाः पलाशप्रशातनोपवेषान्तं करोति। गोमयलेपनान्त कृत्वा कुम्भ्या. प्रोक्ष्य बर्हिस्त्रिर्वेदिमिति प्रोक्षति लौकिकेनोदकेन तूष्णीकेन ॥ १३ ॥

वैश्वानरीयस्य तन्त्रं प्रक्रमयति। तत्र यावत् क्रियते तद्व्याख्यास्यामः ॥ १४ ॥

वैश्वानरस्याग्नेस्तन्त्रमङ्गसमुदाय प्रक्रमयत्यारभ्यते कर्तुं बर्हिः प्रस्तरवर्जं यदा ध्रुवा प्रस्तरे साद्यते परिस्तरणानीध्माघारसमित्प्रथमा प्रयाजानूयाजसमित्, त्रीन्परिधीनेकाम् समिध यज्ञायुरनुसंचरानितीध्ममन्त्र इध्मप्रवृश्चनानि निदधाति। १४ ॥

वेदं कृत्वाऽग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीः स्तीर्त्वा यथार्थं पात्राणि प्रयुनक्ति ॥ १५ ॥

वेद कृत्वा समूहन्त्यग्न्यगारमायतनोपलेपनादि क्रियते पूर्वमकृतमिति। अग्नीन्परिस्तीर्य पाणिप्रक्षालनादिकर्म प्रतिपद्यते कर्तुम्। यथार्थं पात्राणि न दर्शपूर्णमासवत्सर्वाणि प्रयुनक्तीत्यर्थ. ॥ १५ ॥

न प्रणीताः प्रणयति ॥ १६ ॥

विमोकाद्यभावात् ॥ १६ ॥

निर्वपणकाले वैश्वानरं द्वादशकपालं निरुप्य सप्त मारुतान्त्सप्तकपालान्निर्वपति ॥ १७ ॥

अग्नेर्वैश्वानरस्य द्वादश कपालानि मारुताना सप्तकपालमिति। केचित्तु—सर्वाण्यपराणि प्राशित्रहरणेडापात्रमन्वाहार्यस्थालीवर्जानि पूर्वाणीति। निर्वपणकाले प्राप्ते—अग्नेर्वैश्वानरस्य निर्वाप कृत्वा सप्त मारुताः सप्तकपालास्तस्मिंश्च शूर्पे पृथक् ॥ १७ ॥

तूष्णीमुपचरिता मारुता भवन्ति ॥ १८ ॥

तूष्णीमुपचरितत्वाद्दर्विहोमा एत इति। अत उपसादनप्रोक्षणादयस्तूष्णीमवहननफलीकरणप्रक्षालनावेक्षणोत्पवनकपालोपधानाधिश्रयणादीनि पृथक्तूष्णीमुपचरितत्वात् ॥ १८

यजुरुत्पूताभिः संयौति। अभिवासित आप्यलेपं निनीय। संप्रैषेण प्रतिपद्यते ॥ १९ ॥ यदन्यादि-

ध्माबर्हिषः पत्नीसंनहनाच्च तत्संप्रेष्यति ॥ २० ॥

पिष्टेषु यजुरुत्पूताभिरद्भिः सयौति । संप्रैषकाले पत्नीवर्जं संप्रेष्यति । नित्यः संप्रैषः । अन्वाम्ते तु पत्नी ॥ १९ ॥ २० ॥

यत्प्रागाज्यग्रहणात्तत्कृत्वा ध्रुवायामेव गृह्णाति ॥ २१ ॥

आज्यग्रहणकाले ध्रुवायामेव गृह्णाति, प्रयाजानूयाजाभावात् ॥ २१ ॥

प्रोक्षणीरभिमन्त्र्य ब्रह्माणमामन्त्र्य वेदिं प्रोक्ष्य प्रोक्षण्यवशेषं निनीय पवित्रे अपिसृज्य ध्रुवां स्रुवं च सादयति ॥ २२ ॥

प्रोक्षणीनामभिमन्त्रणादि कर्म प्रतिपद्यत इत्यापस्तम्बोक्ते प्रकृतिवत्। पुनर्वचनात्। इतरथा तूष्णीक प्रोक्षित इति न क्रियते वेदिप्रोक्षणम्। तेन निवर्तते । सर्वत्रोपसत्सु स्फुटदर्शनात् । स्तरणकालेऽपरेणाग्निं बर्हिस्तीर्त्वा । एकाऽऽघारसमि त । वीतिहोत्रमिति । सर्वमन्यत्प्रकृतिवत् । ध्रुवा स्रुवं च सादयति प्रस्तरे बर्हिषि वा ॥ २२ ॥

एषाऽसददिति मन्त्रं संनमति ॥ २३ ॥

एतावसदतामित्यभिमन्त्रणं ध्रुवाया. स्रुवस्य च ॥ २३ ॥

विष्ण्वसि वैष्णवं धाम प्राजापत्यमित्याज्यमभिमन्त्रयते ॥(ख० १२)॥२४

विष्णवसीति ध्रौवस्याऽऽज्यस्याभिमन्त्रणम् ॥ २४ ॥

वैश्वानरमासाद्य मारुतानासादयति ॥ २५ ॥

कपालवत्पुरोडाशादित्याद्यासन्नाभिमर्शनान्तं प्रकृतिवत् । आग्नेयविकारवत्तूष्णीक मारुतानाम् ॥ २५ ॥

उच्चैर्वैश्वानरस्याऽऽश्रावयति ॥ २६ ॥

इदानीमेव वेदनिधानं वेद्यन्तान्परिस्तरणं होतृषदनपरिकल्पन च । ततः सामिधेन्यः । उपवाजन(वी)जन वेदेन । ध्रौवाघारः । न संप्रेष्यति— अग्नीत्परिधीनिति च । इदानीमपि न संमार्ष्टि परिधीनग्निं च । तत. प्रवरो दैवस्य मानुषस्य च । नापि प्रयाजा इज्यन्ते । न तेभ्य आज्यम् । तत आवाहनप्रतिषेध. क्रियते । प्रचर्य चाऽऽज्यभागाभ्याम् । जुह्वामुपस्तीर्य कृत्स्न वैश्वानरमवदाय तूष्णीमवदानानि । तत अवदानानीत्यवस्थाभिधेयाभावात्। द्विरभिघारणं चतुरवत्तं जुहोतीति । उच्चैर्मध्यमादपि स्वराद्वैश्वानरस्याऽऽश्रवणं भवति ॥ २६ ॥

सर्वहुतमपर्यावर्तयञ्जुहोति ॥ २७ ॥

स्पष्टोऽर्थः ॥ २७ ॥

ईदृङ्चान्यादृङ्चेत्यासीनो हस्तेनोपांशु मारुतान्स-

वैहुतान्गणेन जुहोति ॥ २८ ॥ पूर्वं पूर्वं गणमनुद्रुत्योत्तरेणोत्तरेण जुहोति ॥ २९ ॥ स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च क्रीडी च साकी चोर्जिषी चेत्युत्तमं गणमनुद्रुत्य प्रथमेन जुहोति ॥ ३० ॥

उपांशु मारुतान् प्रतिनिवृत्य वैश्वानरं हुत्वा हूयन्ते दर्विहोमाः । ईदृङ्चेत्यनुद्रुत्य शुक्रज्योतिश्चेति होमः । सर्वत्र मरुतो देवता । शुक्रज्योतिश्चेत्यनुद्रुत्य ऋतजिच्चेति होमः । ऋतजिच्चेत्यनुद्रुत्याऽऽरण्यकेन धुनिश्चेति होमः । धुनिश्चेत्यनुद्रुत्य ऋतश्च सत्यश्चेति होमः । ऋतश्च सत्यश्चेत्यनुद्रुत्य स्वतवांश्चेति होमः । स्वतवांश्चेत्यनुद्रुत्य ईदृक्षास इति होमः । ईदृक्षास इत्यनुद्रुत्य ईदृङ्चान्यादृङ्चेति होमः । गणेन गणेन वा होमः । तथाऽपि चतुर्थ अरण्योऽनुवाकः । षष्ठश्च स्वतवान् । सर्वतो वा वेष्टयते मारुतैर्वैश्वानरम् । आपस्तम्बे तु स्वतवाँश्चेति षष्ठो मितासश्चेति होम एवानुषङ्गः । नानुद्रवणो मानुषीश्चानुवर्त्मानो भवन्तु स्वाहेत्यन्तोऽनुषङ्गस्य ।

अथवा— अत्रत्येषु मन्त्रेष्वाम्नाता पञ्च गणाः । आरण्यकाण्ड आम्नातो धुनिश्च ध्वान्तश्चेत्यपरो गणः । सूत्रान्तरोक्तः स्वतवानित्यादिरेकः । अतो ब्राह्मणे तु सप्त भवन्ति सप्त गणा वै मरुतो गणश एव विशमवरुन्धे ' (तै० स० ५–४–७) इति पुरोडाशानां रूप्या द्रष्टव्या । होमकाले मन्त्रोच्चारे कश्चिद्विशेषं विधत्ते—' गणेन गणमनुद्रुत्य जुहोति ' (तै० स० ५–४–७) इति । यदा प्रथमगणेन हुत्वा द्वितीयगणेन जुहोति तदानीं प्रथमगणमुच्चार्य पश्चाद्द्वितीयगणेन जुहोति । तथा द्वितीयगणमुच्चार्य तृतीयगणेन जुहुयात् ॥ २८ ॥ २९ ॥ ३० ॥

इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मान इति हुत्वोपतिष्ठते ॥ ३१ ॥

यजमान इति शेषः ॥ ३१ ॥

यदि कामयेत विशा क्षत्रꣳ हन्यामिति ग्राम्येऽनुवाक्यस्य गणस्य त्रीणि चत्वारि वा पदान्यनू- (पादानन्)च्यारण्येऽनुवाक्यस्य शेषेण जुहोति ॥ ३२ ॥ एवं त्रिभिरादितो यथासमाम्नातं ग्रामेऽनुवाक्यस्य यथा पूर्वैरेवं त्रिभिरुत्तरैर्गणैः ॥ ३३ ॥ यदि कामयेत क्षत्रेण विशꣳ हन्यामित्यारण्येऽनुवाक्यस्य षट्सु पदान्तरालेषु षड्गणानोप्य ग्रामेषु वाक्यं जपित्वाऽऽरण्येन वाक्य-

शेषं जुहोति ॥ ३४ ॥ एवं त्रिभिरादितो यथा-समाम्नातं ग्रामेऽनुवाक्येन यथा पूर्वैरेवं त्रिभिरुत्तरैर्गणैः ॥ ३५ ॥

यदि कामयेत यजमान क्षत्र क्षत्रिया वैश्येभ्य ओजस्विन स्युरिति ग्रामेऽनुवाकस्य त्रीणि चत्वारि वा पदान्यर्धपदानि, ईदृङ्चेति पदम् । एवं विधान्यपि पश्चादरण्येऽनुवाक्ये उच्येते, पञ्चमे वाक्य आरभ्य चतुर्थे वा ग्रामेऽनुवाक्य(क)शेषेण होमः । एवमाद्यैस्त्रिभिर्होम कृत्वा पश्चादरण्येऽनुवाक्ये(के) केवलेन होम । यथा पूर्वैर्हुतं त्रिभिर्गणैस्त्रीणि चत्वारि वा पदान्यनुद्रुत्येत्येवमादि । एवमुत्तरैस्त्रिभिर्जुहुयात् ।

यदि कामयेत वैश्या. क्षत्रियेभ्य ओजस्विनो भवन्त्विति यथापरिपठितम. नत्रिभिर्गणैर्गणेन गणेन हुत्वाऽऽरण्येऽनुवाक्य(क)स्य षट्सु पदान्तरालेषु षड्गणाः क्षिप्यन्ते । धुनिश्च ईदृङ्चेति गण उच्यते । ध्वान्तश्चेत्युक्त्वा शुक्रज्योतिश्चेति ध्वनश्च ऋतजिच्चेत्युच्यते । ध्वनयश्च ऋतश्चेति विलिम्पश्चेत्युक्त्वा स्वतवाँश्चेत्युच्यते । विलिम्पश्चेत्युक्त्वा ईदृक्षास इत्युच्यते । विक्षिप इत्युक्त्वा पुन केवलेनाऽऽरण्यकेन होम. । यथा पूर्वैर्हुतमेवमुत्तरैरपि होमो गणै. । 'मारुतहोमान्तो वैश्वानर इति भाष्यकृत् । उग्रश्च धुनिश्चेति वैकल्पिक ॥ ३२ ॥ ३३ ॥ ॥ ३४ ॥ ॥ ३५ ॥

न संप्रेष्यति । न संमार्ष्टि । नानूयाजान्यजति ॥ ३६ ॥

न संप्रेष्यति ब्रह्मन्प्रस्थास्याम इत्येवमादि । न समार्ष्टि परिधीनाग्नि च । न यजति चानूयाजान् । अस्मिन्काल आज्य गृहीत्वाऽनूयाजार्थं प्रतिषिद्धवर्जं सर्वं कर्तव्यमिति न्याय । आग्नेयविकारत्वाद्वैश्वानरस्य न संप्रेष्यति न समार्ष्टीति यथाश्रुति पठितं सूत्रकारेण । मारुतान्हुत्वा नारिष्ठान्वैश्वानरे हविरिदमिति च । अर्थलोपात्स्विष्टकृदादिचतुर्धाकरणान्ताना लोप । व्यूहन वाजवतीभ्याम् । यदि प्रस्तरो ध्रुवार्थं कृतः । ततः प्रकृतिवत्संस्रावान्तम् । यदि तु न कृतो न तदा । प्राक्परिधिप्रहरणात् । सूक्तवाको याज्येति वचनात् । तत. प्रकृतिवत्संस्रावान्तम् । तत. पत्नीसंयाजादि ब्राह्मणभोजनान्तं प्रकृतिवत् ॥ ३६ ॥

यं कामयेत क्षत्रियं प्र स्वादायतनाच्च्यवेतेति तस्यारण्येऽनुवाक्य(क)स्य गणस्याग्निष्ठं रथवाहनं वा व्यङ्गयेदित्यज्ञसंयुक्तः कल्पः ॥ (ख० १३) ॥३७॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने पञ्चमः पटलः ॥ ५ ॥

यं कामयेत राजान राजशत्रूणा क्षत्रेणास्य स्वेन स्वैरेव क्षत्रिया हन्येरन् । अन्ये यस्माच्च प्रच्यवेत देशान्तरं शत्रुभिर्नीयेतेति तस्यारण्येऽनुवाक्ये(के)नाहोरात्रे त्वोदी-

रयतामित्यग्निप्रवाहण शकटे यद्येताद्धि रथवाहनं शकटं तदरण्येऽनुवाक्ये(के)न व्यक्तं करोति । अन्यद्वा किंचिदस्य प्रदेशामिति । अयज्ञसयुक्तो विधिः सर्वार्थः ॥ १७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां द्वादशप्रश्ने पञ्चम पटल ॥ ५ ॥

अथ द्वादशप्रश्ने षष्ठ पटल ॥

वसोर्धारां जुहोति । आज्येनौदुम्बर्या स्रुचाऽ- ग्नाविष्णू सजोषसेत्यनुद्रुत्य वाजश्च मे प्रसवश्च म इति संततामा मन्त्रसमापनात् ॥ १ ॥

वैश्वानरे परिसमाप्तेऽग्नाविष्णू सजोषसेति चतुर्गृहीतं जुहोति । औदुम्बरीं स्रुचं व्यायाममात्रीं मृदा प्रदिग्धां पश्चादासेचनवतीं घृतस्य पूरयित्वा (आप० श्रौ० १७–६–१७) इत्यापस्तम्ब. । औदुम्बरी स्रुक्, उदुम्बरेण कृता व्यायाममात्री चतुररत्निः, मृदा प्रालिप्यते यथा न दह्यते पश्चात्तस्या आसेचन बिल पश्चिमभागे व्यायामस्य दण्डोऽल्प., मुखं दीर्घं तां घृतस्य पूरयित्वा पूर्णाहुतिरेका वाजश्च म इत्यारभ्य, वाज- शब्द एव धारा संतताऽविच्छिन्ना यावत्सर्वैर्मन्त्रैः समाप्ता । भुवनश्च स्वाहा, अधिप- तिश्च स्वाहा, इति मन्त्रे मन्त्रे स्वाहाकार । वाजश्च मे स्वाहा प्रसवश्च मे स्वाहा इत्येवमन्ता. । अर्धेन्द्राणि जुहोति, द्वादश द्वादशानि जुहोति (तै० स० ५–४–८) इति च श्रुतेः । भाष्यकारस्तु—अन्त एव स्वाहाकार इति । एतच्च सूत्रकारमतात् । स्वाहेत्यारभ्य संतता धारा इति मीमांसका । तथाहि— संतता वसोर्धारा जुहोतीत्यत्र संततवचनात्तस्य च साहित्यवाचित्वात्साहित्यस्य चानेकापेक्षितत्वात्कर्मणश्चैकत्वात्कर्म- मन्त्रयोः साहित्यमिदमुच्यते । अतोऽत्र मन्त्रादे कर्मादेश्च संनिपात. । स्यादेवं यद्येकं कर्म स्यात्, भिन्नानि त्वत्र द्वादश द्वादशानि जुहोति इति संख्यया कर्माणि तेषाम- विच्छेदः संततशब्देनोच्यते । जुहोतीति तेषामुपात्तत्वान्न मन्त्रकर्मणोः साहित्य मन्त्र- स्यानुपात्तत्वात् । अविच्छेदेऽपि संततशब्दो वर्तते न केवल साहित्ये । अतोऽत्रापि पूर्व एव न्याय. ॥ १ ॥

अन्वयव्यतिरेकाभ्यां संतत्य विधत्ते—

यं कामयेत प्राणानस्यान्नाद्यं विच्छिन्द्यामिति विग्राह्यं तस्य जुहुयात् । यं कामयेत प्राणानस्या-

आग्र॰ संतनुयामिति संततां तस्य जुहुयात् ॥२॥

अस्य यजमानस्य प्राणानन्नं च विच्छिन्द्यामित्येव द्विषन्नध्वर्युरेतं मन्त्र मध्ये विगृह्य जुहुयात् । यस्तु प्राणानामन्नस्य च सातत्यं कामयते सोऽस्य संततामाहुतिं जुहुयात् । प्रतिषेधार्थमिति न्याय । अध्वर्युकाम इति भाष्यकृत् ॥ २ ॥

यदाज्यमुच्छिष्येत तस्मिन्ब्रह्मौदनं पक्त्वा चतुरोऽध्वर्यून्भोजयेत्तेभ्यश्चतस्रो धेनूर्दक्षिणा दद्यात् ॥ ३ ॥ चतुःशरावमोदनं पक्त्वा तद्व्यञ्जनं भोजयति ॥ ४ ॥

यदाज्यमुच्छिष्येत स्रुचि तस्मिन्नाज्य ओदनश्चतुःशरावः पच्यते । अथेमं लौकिकेन न्यायेन तं ब्राह्मणाश्चत्वारः प्राश्नीयुरिति पुनरुपदेशाच्चतुर्णां ब्राह्मणानाम् । भाष्यकारस्तु गार्हपत्ये पाक इति । चतुःशरावश्चतुर्मल्लक । ओदनं पक्त्वा हुतातिरिक्तघृतेन यच्छिष्टं धारयाऽऽहृतं तस्यौदनस्य व्यञ्जनं भवति । यद्यपि ब्राह्मणग्रहणमविशेषं तथाऽपि प्राकृता एवाध्वर्युप्रभृतयो गृह्यन्ते । प्राशितवद्भ्यो भुक्तवद्भ्यश्चतस्रो धेनूर्दद्या-यजमानः । यद्यप्याज्यगृहीतेन व्यञ्जनं भुज्यते तदप्याज्ये श्रप्यते ॥ ३ ॥ ४ ॥

वाजप्रसवीयं जुहोति । सप्त ग्राम्या ओषधयः सप्ताऽऽरण्याः । पृथगन्नानि द्रवीकृत्य वाजस्येमं प्रसवः सुषुव इति चतुर्दशभिर्ऋग्भिरौदुम्बरेण स्रुवेणैकैकयर्चाऽन्नमन्नं जुहोति ॥ ५ ॥

वाजप्रसवशब्दो यस्मिन्होमसमुदाये विद्यते स वाजप्रसवीयस्तं जुहोति । सप्त ग्राम्या ओषधयस्तस्मिन्हूयन्ते सप्त चाऽऽरण्या. पूर्वोक्ता. । पृथक्पृथगन्नानि ग्राम्यारण्याना द्रव्याणामाज्येन कृत्वेति भाष्यकृत् । पच्यमानानि यथा द्रवाणि भवन्ति तथा कर्तव्यमिति न्यायः । केचिदपक्वान्याज्येन द्रवाणि कृत्वा होम कुर्वन्ति । अपरे तु अपक्वेऽप्यन्नशब्दो विद्यतेऽन्नस्यान्नस्य वपति, इति ब्रुवन्तः । तत्त्वयुक्त (भवति) भविष्यति । तदन्नमिति तस्मिन्नन्नशब्द. । औदुम्बरेण उदुम्बरमयेण स्रुवेण वाजस्येमं प्रसवः सुषुव इति प्रत्यृचं ग्राम्यान् हुत्वाऽऽरण्याञ्जुहोति—वाजो नः सप्त इति ।

केचित्—तिलमाषव्रीहियवप्रियङ्गुखणवो गोधूमा इति सप्त ग्राम्या । वेणुश्यामाकाद्य उदाहृता आरण्या. । उभयविधधान्यसमृद्ध्यै चतुर्दशाभिर्होम । एकैकेन मन्त्रेणैकैकस्य होमं विधत्ते—अन्नस्यान्नस्य जुहोति (तै० स० ५–४–९) इति । असारयेण

तत्तदन्नप्राप्त्यर्थमीदृशो होम । चोदकप्राप्तां जुहूं बाधितुं साधनान्तरं विधत्ते—औदुम्बरेण स्रुवेण जुहोति (तै० सं० ५–४–९) इति ॥ ५ ॥

पितुं नु स्तोषं महो धर्माणं तविषीम् । यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ स्वादो पितो मधो पितो वयं त्वा ववृमहे । अस्माकमविता भव । उप नः पितवाचर शिवः शिवाभिरूतिभिः ॥ मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः । तव त्ये पितो रसा रजा᳟स्यनुविष्ठिताः ॥ दिवि वाता इव श्रिताः । तव त्ये पितो ददतस्तव स्वादिष्व(ष्ठ)ते पितो ॥ प्रस्वात्या(आ)नो रथा(सा)नां तुविग्रीवा इवेरते । त्वे पितो महानां देवानां मनो हितम् ॥ अकारि चारु केतुना तवाहिमवसाऽवधीत् । यददो पितो अजगन्विवस्व पर्वतानाम् ॥ अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः । यदपामोषधीनां परिंशमा रिशामहे ॥ वातापे पीव इद्भव । यत्ते सोम गवाशिरो यवाशिरो भजामहे ॥ वातापे पीव इद्भव । करम्भ ओषधे भव पीवो वृक्क उदारथिः वातापे पीव इद्भव । तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ॥ देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादमिति हुत्वा हुत्वा पात्र्याः संपातमवनयेत् ॥ (ख० १४)॥ ६ ॥

हुत्वा हुत्वा पात्र्या संपातशेषमवनयति सर्वान्नानाम् ॥ ६ ॥

अपि वा यस्यान्नस्याग्रे जुहुयात्तस्येध्मं कुर्यात् ॥ ७ ॥

शाखान्तरोक्तानुवादः ॥ ७ ॥

यजमानायतन औदुम्बर्यामासीनमग्निमन्वारब्धं कृष्णाजिने संपातैरभिषिञ्चति ॥ ८ ॥ दक्षिणे वा पक्षावस्मिन्कृष्णाजिने ब्राह्मणं व्याघ्रचर्मणि राजन्यं वस्तचर्मणि वैश्यं पशुकाममिति ॥ ९ ॥ नित्यवदेके समामनन्ति ॥ १० ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां बृहस्पतेः

साम्राज्येनाभिषिञ्चामीति ब्राह्मणम् ॥ ११ ॥
इन्द्रस्य साम्राज्येनाभिषिञ्चामीति राजन्यम्। अग्नेस्साम्राज्येनाभिषिञ्चामीति वैश्यम् ॥ १२ ॥
पुरस्तात्प्रत्यङ्तिष्ठन्पश्चात्प्राङ्मुखमासीनं शीर्षतोऽभिषिञ्चत्याऽऽमुखादन्ववस्रावयति ॥ १३ ॥

दक्षिणं प्रत्यपि पक्षं यत्र प्रजापतेर्हृदयेन कृतमुपस्थानं तत्रौदुम्बरीमासन्दीं प्रतिष्ठाप्य तस्यामासन्द्यां कृष्णाजिनं प्राचीनग्रीवमुपरि लोमानि यथा भवन्ति तथा विस्तीर्य (प्रसार्य) तस्मिन्कृष्णाजिन आसीनमुपविष्ट प्राङ्मुखमाग्निमन्वारभ्य स्थितं सपातैरन्नशेषैरभिषिञ्चति ब्राह्मणम्। व्याघ्रचर्मणि राजन्य क्षत्रियम्। छागस्याजिने वैश्यम्। कृष्णाजिने ब्रह्मवर्चसकामं क्षत्रिय वैश्यमपि। बस्ताजिने तु पुष्टिकामं ब्राह्मणमपि। देवस्य त्वा, इत्यनुद्रुत्य मन्त्रं, पूष्णो हस्ताभ्यामग्नेस्त्वा साम्राज्येनाभिषिञ्चामीति ब्राह्मणमभिषिञ्चति। पूर्ववदनुद्रुत्येन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामीति क्षत्रियम्। पूर्ववदनुद्रुत्य बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीति वैश्यम्। 'मन्त्रविपर्यासमेके समामनन्ति' (आप०श्रौ० १७–४) इत्यापस्तम्ब। भाष्यकारस्तु--देवस्य त्वा सवितुरित्यारभ्य सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्यभिषिञ्चति। माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते। यथाऽग्निचित्यायामिति स एव वाजपेयपाठो दर्शित इति। इह तु प्रत्यक्षपाठ.। 'अग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्याहैष वा अग्नेः सव.' (तै०सं०५–६–३) इति प्रत्यक्षपाठो ब्राह्मणे। प्राङ्मुखमासीन प्रत्यङ्मुखस्तिष्ठन्नध्वर्युः क्षिप्त्वा हुतशेषमामुखाद् यावन्मुखं तावदेव स्रावयति। अत्राभिषिक्तस्य माहात्म्यं दर्शयत्यापस्तम्बः–'तदाहुर्होतव्यमेव नहि सुषुवाणः कंचन प्रत्यवरोहतीति' (आप० श्रौ०१७–७–६) इति। तदाहुर्ब्रह्मवादिनोऽन्ये शाखान्तरस्था होतव्यमेव नाभिषेकार्थं शेषः कर्तव्य इति। न ह्यभिषिक्त. सन्यजमानः कंचन दृष्टं गुरुमपि प्रत्यवरोहति, यावज्जीवं प्रत्युत्थान न कुर्यात्। एषोऽभिषेकस्य धर्मः॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

कृष्णायै श्वेतवत्सायै पयसा दध्ना वौदुम्बरीस्स्रुचं पूरयित्वा न क्रोषासेत्याहुतिं जुहोति॥१४॥

अग्निर्देवता। दधिहोमो शाखान्तरस्थः॥ १४ ॥

ऋताषाडृतधामेति षड्भिः पर्यायैर्द्वादशगृहीतेन द्वादश राष्ट्रभृतो जुहोति॥१५॥ पर्यायमनुद्रुत्य तस्मै स्वाहेति पूर्वामाहुतिं जुहोति॥१६॥ताभ्यः स्वाहेत्युत्तराम्॥ भुवनस्य पत इति रथमुखे

पश्चाऽऽहुतीर्जुहोति ॥(ख० १५) ॥ दश वा पर्याये रथस्याऽऽहवनीये धार्यमाणꣳ रथशिरोऽभि जुहोति । रथशिरसा जुहोतीत्येकेषाम् ॥ १७ ॥ समुद्गृहीतꣳ रथमध्वर्योरावसथꣳ हरन्ति । अनुनयन्ति त्रीनश्वाꣳश्चतुर इत्येकेषाम् ॥१८॥ तान्सरथानध्वर्यवे ददाति ॥ १९ ॥

कामाहुती षड्भि पर्याये. परिवर्तकैर्द्वादश जुहोति राष्ट्रभृन्मन्त्रैः—ऋताषाडृतधामा, ऊर्जो नामेत्येवमन्त. पर्याय । सकृदेवोक्त्वा तस्मै स्वाहेति प्रथमाहुतिः । ताभ्यः स्वाहेत्युत्तराहुति· । एवमुत्तरेष्वपि पर्यायेषु विभागः । ऋताषाडृतधामाऽग्निर्गन्धर्वः स इद ब्रह्म क्षत्र पातु तस्मै स्वाहा इति । तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्र पान्तु ताभ्य स्वाहा इत्येव मा भूदर्थसबन्धो विभागः । परिपाठसामर्थ्यादन्यथा परिपठितस्य मन्त्रस्यान्यथा क्रिया न युक्ताऽसति कारणे नोहेत् । अर्थान्नाभिदधाति प्रकृतिवदित्यत ऊह क्रियते विकृतौ प्रकृतिवच्छन्दोभावात् । भुवनस्य पत इति पर्यायाणां सप्तमी । भुवनस्य पत इति सप्तमीं जुहोतीत्यापस्तम्ब । पर्यायानधिकृत्यैषा श्रुतिर्विदधाति । भुवनस्य पत इति त्रयोदशीं जुहोतीत्यन्या श्रुतिराहुतीरधिकृत्य, एवमेकार्थत्वाच्छ्रुतिद्वयस्य । एतेन व्याख्यातं पर्यायमनुद्रुत्य तस्मै स्वाहेति प्रथमाहुति , ताभ्य· स्वाहेत्युत्तरा । एव पश्चाऽऽहुती रथमुखे पञ्च । केचिदाहु.—आहवनीयस्य रथशिरो धार्यमाणमभिजुहोतीति । पञ्चभिर्दशभिर्वाऽभिहुतास्वाहुतिषु रथमुख आहवनीयस्योपरिष्टाद्धार्यमाणेऽध्वर्योरावसथं नयन्ति, उद्यम्यैव हरन्तो न कर्षन्तोऽनुनयन्ति पश्चाद्रथस्य त्रीनश्वान् । यदि पष्टवाही त्रियुग्रथ· । चतुरो वा । यदि चतुर्युग्रथः । तानश्वान्रथं चाध्वर्यवे ददाति । पृथगश्वानां प्रतिग्रहः पृथग्रथस्य । न चोह. प्रकृतिविकृत्यर्थत्वान्मन्त्राणाम् । यजमानो हि निमित्ते तिस्रो वडवा द्वे वा वडवे ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

समुद्रोऽसि नभस्वानित्यञ्जलिना त्रीन्वातनामानि जुहोति ॥ २० ॥ कृष्णाजिनपुटेन वा ॥ २१ ॥

समुद्रोऽसि नभस्वानित्यञ्जलिना वात एव हूयते त्रिः । न ह्येतस्य वायोरवदानं शक्यते ग्रहीतुम् । भाष्यकारस्तु—अञ्जलिना तिस्र आज्याहुती·, इति । कृष्णाजिनपुटेन वा वातहोमः । नाञ्जलिना । उपदेशोऽपि वायुरेवात्र हूयत इति ॥ २० ॥२१॥

अग्न उदधे यात इषुर्युवा नामेति पञ्चभिः पर्यायैः प्रदक्षिणमनुपरिक्रामन्प्रतिदिशं पञ्चाऽऽज्याहुतीर्जुहोति । मध्य उत्तमेन प्राङ्मुखः । समीची नामासि प्राची दिगिति षड्भिः पर्यायैर्दध्ना मधुमिश्रेण षण्महाहुतीर्जुहोति । यथा सर्पाहुतीर्यास्ते अग्ने सूर्ये रुच इति तिस्रो रुचो जुहोति ॥ २२ ॥

अग्न उदध इत्यसमासेन पञ्चाऽऽज्याहुती । वायु. प्रकृत इत्याज्याहुतीरित्युच्यते । समीची नामासि प्राची दिगिति दध्ना मधुमिश्रेण सर्पाहुती: षट् । असमासेन परिक्रम्याग्निं प्रतिदिशमभिजुहोति । पञ्चमी षष्ठी च प्राङ्मुख एव पश्चादुपरिष्टाज्जुहोति । अनुपरिक्रामान्नित्यर्थ. । हेतयो नाम स्थेति षण्महाहुतीर्जुहोति । यथैव सर्पाहुतीर्मधुमिश्रेण दध्ना । तिस्रो रुचो यास्ते अग्न इति ॥ २२ ॥

सुवर्णघर्मस्वाहेति पञ्चार्काहुतीर्हुत्वा ॥ २३ ॥

अर्काहुती: पञ्चाऽऽज्येनैव ॥ २३ ॥

वेदिस्तरणप्रभृतीनि कर्माणि प्रतिपद्यते ॥ २४ ॥

अथैनां बार्हिषा बहुलं प्राचीन स्तीर्त्वेति वैखानसोक्तेस्तरणादि सौमिकं प्राग्धिष्णियनिवपनात्कृत्वा सर्वत. प्रसृते दशाकिव. सञ्चरेयु, इत्येवमन्त विधायोपवपनप्रत्याम्नायश्चयनम् ॥ २४ ॥

ममाग्न इत्येतेनानुवाकेन प्रति मन्त्रमिष्टकाभिर्धिष्णियाश्चिनोति । एकैकेन मन्त्रेणैकैकं धिष्णियमु- (म) पवर्जयति । अष्टावाग्नीध्रीय उपदधात्यश्मा नवम इत्येकेषाम् ॥ २५ ॥ द्वादश चतुर्विंशतिं वा होत्रीय एकादशैकविंशतिं वा प्रशास्त्रीये षण्मार्जालीयेऽष्टावितरेषु ॥(ख० १६)॥ तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः । इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् । बृहस्पते अतियदर्यो अर्हात् । एवा पित्र इति तिसृभिर्ब्राह्मीभिर्ब्रह्मसदने यमो दाधार पृथिवीं यमो विश्वमिदं जगत् । यमाय सर्वमि-

सस्थे यत्माणाद्वायुरक्षितम् । यथा पञ्च यथा षड्यथा पञ्चदशर्षयः ॥ यमं यो विद्यात्स ब्रूयाद्यथैक ऋषिर्विजानते ॥ त्रिकद्रुकेभिः पताति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप् छन्दाꣳसि सर्वा ता यम आहितेति तिसृभिर्याम्याभिर्मार्जालीये त्वेषं वयꣳ रुद्रं यज्ञसाधं वङ्कुं कविमवसे निह्वयामहे । आरे अस्मद्दैव्यꣳ हेडो अस्य तु सुमतिमिद्वयमस्या वृणीमहे ॥ अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । सुम्नायन्निद्विशो अस्माकमा च रारिष्टं वीरा जुहवाम ते हविः ॥ मृडा नो रुद्रोत नो मयस्कृधीति तिसृभी रौद्रीभिश्चात्वाले हव्यं प्रीणीहि हव्यꣳ श्रीणीहि हव्यं पच हव्यꣳ श्रपय हव्यमसि हव्याय त्वा हव्येभ्यस्त्वा हव्ये सीदेत्यष्टौ शामित्रे हव्यसूदोऽव ते हेड उदुत्तमं तत्त्वा यामि ब्रह्मणा वन्दमान इति तिसृभिर्वारुणीभिरवभृथे (तासु प्रचरन्ति । खण्डाः कृष्णा लक्ष्मणाश्चोत्कर उदस्यति अवशिष्टाश्च) ॥ २६ ॥

ममाग्ने वर्चो विहवेष्वित्यनुवाकेनैकेष्टका ऋचा ऋचोपधीयते प्रतिमन्त्रम् । हिरण्यकेशिनस्तु—' एकैकयर्चा एकैकधिष्णियमपवर्जयन्ति । इतिश्रुत्यन्तरम् । तैत्तिरीयाणां तु यद्विहव्या उपदधाति, इत्युक्त्वा ' होतुर्धिष्णिय उपदधाति' (तै० सं० ५–४–११) इति । विहव्या इति बहुवचनमेकैकस्मिन्बह्वीभिरिष्टकाभिर्धिष्णियपरिमाणाभिश्चिनोतीति । अश्मा नवमा(म आ)ग्नीध्रीयेऽष्टाविष्टकाश्चतुरस्रा (श्रा) दीर्घा इति नियमो नास्ति । (ममाग्न इत्यारभ्य) नवभिर्ऋग्भिरुपधानम् । अश्मा तु मध्य एकस्या ऋचस्त्यागः । उपधाय क्रमेण चयन भवति । होत्रीयं प्राशास्त्रीयं ब्राह्मणाच्छंसीयं पौत्रीयं नेष्ट्रीयमच्छावाकीयमिति । ततो ब्रह्मसदनं मार्जालीयमिति । यदा द्वादशहोत्रीयं तदा पञ्चमी दशमी च द्विरभ्यस्यते । यदा षोडश तदा पञ्चमी चतुरावर्तते दशमी च । यदैकविंशतिस्तदा द्विरेकैका उत्तमा तु त्रिः । यदा चतुर्विंशतिस्तदा

---

१ इदं सूत्रं व्यानपुस्तकयोर्विद्यते । २ ग. पुस्तके आचार्यास्तु ।

पञ्चमी, अष्टकृत्वोऽभ्यस्यते दशमी च । एवं सङ्ख्यां पूरयेत् । एकादश ब्राह्मणाच्छंसीये षडिष्टकास्तु मार्जालीयेऽष्टावष्टावन्येषु धिष्णियेषु उपधानमनुदेशेष्वपि चतुरश्रा वा भवन्ति धिष्णिया परिमण्डला वा । केचित्त्वाहुर्गुणविकारेषु परिमण्डला इति । तेषां धिष्णियाना यस्य यावत्य इष्टका उपधास्यन्ते शर्करा अपि परिश्रितास्तावत्य एव परिश्रयणार्थाः । अच्छावाक(स्य) धिष्णियोपधान कृत्वा ब्रह्मसदने पञ्चोपधाय विहव्यास्तव श्रिये इति षष्ठी । बृहस्पते अति यदर्यो अर्हात्, इति सप्तमी । बृहस्पतेः संमजयदित्यष्टमी । मार्जालीये विहव्या उपधाय तिस्रो यमो दाधारेति च तिस्र उपदधाति । चात्वाले विहव्या. पञ्चोपधाय तेषमिति षष्ठी । अस्या(श्या)मत इति सप्तमी । मृडा नो रुद्र इत्यष्टमी चात्वाले । हव्य प्रीणीहीति यजुर्भिरष्टौ शामित्रस्थाने । ततोऽवभृथस्थानं गत्वा विहव्या. पञ्चोपधाय–अव ते हेड, उदुत्तमं, तत्त्वा यामि, इत्युपदधाति तिस्रः, कृत्वा परिस्तरणं पूर्वं पश्चादुपधानमिष्टकानामिहाप्यवभृथे तासु प्रचरणं साङ्गस्यावभृथस्य काले । भाष्यकारस्तु–बर्हिरभिजुहोत्याहुतीना प्रतिष्ठित्या इति बर्हिः प्रत्याम्नायत्वादिष्टकाना प्रचरन्तीति तस्मिन्नेव काल उपदधाति नास्मिन्काल इति । अस्मिन्काल इति न्याय. । अस्मिन्काल उपहिता अपि तृणप्रत्याम्नाया एतेनैव तृणं प्राह्रियते । खण्डा. कृष्णा इष्टका यासा च किंचिच्चिह्न च न सर्वत्र लोहितास्ता उत्करे क्षिपति । अवशिष्टा अपि गुणयुक्ता हित्वोत्करे क्षिपति । २५ ॥ २६ ॥

यत्प्राग्यूपसंमानात्तत्कृत्वैकयूपमेकादश वा यूपान्संमिनोति ॥ २७ ॥ तेषामग्निष्ठं पूर्वेद्युरुच्छ्रयति ॥ २८ ॥

यत्प्राग्यूपसंमानात्तत्पूर्वं कर्म–अम्बनामम्बपते नमस्ते अस्तु मा मा हिंसीरिति तं तमभिक्रामत्येवमादि पूर्ववदाज्यान्यभिमन्त्र्यैवमत(न्त)मविकृतेन ज्योतिष्टोमेन विधिना । यद्यप्येकादश यूपास्तथाऽपि वेदिसमितेनैव न रथाक्षेण विमानम् । एकयूप वा करोति । अग्नीषोमीयकाल एकादश वैकादशिनधर्मेण वेदिसमिता । साग्निचित्ये वेदिसंमिता[या] एवाऽऽम्नानान्न रथाक्षविमाने लभ्यते तेषा यूपानाम् । योऽग्निष्ठ. स पूर्वेद्युरग्नीषोमीयकाले मिनोति । वेदिसमानविधान कथ लभ्यत इति पुनरालभ्यते ये त्वग्निष्ठादाश्विनं गृहीत्वोच्छ्री(च्छ्रि)यन्ते (इति।) प्रधानकालत्वादङ्गानाम्। अग्नीषोमीयकाल एव वा। येऽप्यग्निष्ठाद्विभज्यैकादशधा वेदिम् । एष एकाहेषु विधि ॥ २७ ॥ २८ ॥

अत्रैव वा । इतराभ्यो वा । अग्नीषोमीयस्य पशुपुरोडाशं निरुप्य देवसुवाँ हवींष्यनुनिर्वपत्यग्नये गृहपतय इति यथासमाम्नानम् ।

पशुपुरोडाशस्य देवसुवां च हविषाꣳ समानꣳ स्विष्टकृदिडम् ॥ (ख० ॥ १७) ॥ २९ ॥३०॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने षष्ठः पटलः ॥ ६ ॥

श्वो वेत्यहीनार्थः । श्वो वा यावन्त पशव आलभ्यन्ते तावतामुच्छ्रयो यूपानाम् । यथा द्विरात्रे पञ्च पूर्वेऽहन्यालभ्यन्ते षडुत्तर इति । त्रिरात्रे तु प्रथमेऽहनि त्रयः पशवो द्वयोरुच्छ्रयणं यूपयोरग्निष्ठ एवाऽऽलभ्यत आग्नेयः । द्वितीये यूपचतुष्टयं पशवश्चत्वारस्तथा तृतीये । एवमन्यत्राप्यहीनेषु विभागः । सत्रे तु प्रत्यक्षविभागः । यदि यूपैकादशिनी स्यात्, अन्वहमहन्यहनि न तु प्रथमेऽहन्युच्छ्रयः, अग्निष्ठस्य विद्यमानत्वात् । द्वितीयप्रभृतिष्वहःसु एकैकस्य समानम् । दीर्घसत्रेषु पशुरेवाऽऽवर्तते न यूपोच्छ्रय उच्छ्रितत्वात् । श्वो वेति विकल्पविधानाद्द्विरात्रादिष्वपि अग्नीषोमीयकाल उच्छ्रयणं लभ्यते । अग्नीषोमीयपशोः सर्वसोमार्थत्वादेकयूपे वा सर्वे ऐकादशिनी (न) आलभ्यन्ते । स तु यूपस्तेषामेवैकोऽग्निष्ठ इति । अग्नीषोमीयकाल एव द्वाभ्या रशनाभ्या परिवीयते । प्रतिपशु स्वरु. (रव.) स स्वरुभिः पशून्व्यर्धयति इति लिङ्गात् । अग्नीषोमीयस्य पशो. पशुपुरोडाशं निरुप्याष्टौ देवसुवा हवीषि निर्वपति—'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूना व्रीहीणाꣳ रुद्राय पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणा मित्राय सत्यायाऽऽम्बाना चरु वरुणाय धर्मपतये यवमयं चरुम्' (तै० सं० १-८-१०) इति । षष्टिभि(षष्टिसंख्यै)रेव दिनै. पच्यमाना आशुव्रीहय. । स्थूलबीजं महाव्रीहय । आम्बा धान्यविशेषाः । कमलबीजमित्येके । अत्र याजुषहौत्रसत्त्वे त्वमग्ने बृहद्वयः (तै० सं० १-४ ११) इत्यनुवाकोक्ता याज्यापुरोनुवाक्या ग्राह्याः । समान तु स्विष्टकृदिडं स्विष्टकृच्चेडा च पशुपुरोडाशस्य मुख्यत्वादग्निगुणकः स्विष्टकृत्स देवसुवामपि भवति । इडाप्राशनं च मैत्रावरुणपष्ठो भवति ॥ २९ ॥ ३० ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकाया द्वादशप्रश्ने षष्ठ. पटलः ॥

अथ द्वादशप्रश्ने सप्तम पटल ।

पशुकाल एकयूप एकादश पशूनुपाकरोति एकादशसु वा ॥ १ ॥

पशुकाले प्राप्ते पशुनेहीति । आग्नेय सवनीय पशुमुपाकरोति ' आप० श्रौ० १७-८-२) इत्यापस्तम्बः । त्रिवृता यूप परिवीय क्रतुपशवोऽपि लभ्यन्ते, तेषा प्रदर्शन-

माग्नेयग्रहणम् । भाष्यकारस्त्वाग्नेय एवोक्थ्यादिषु सर्वसंस्थासु च लभ्यते पुनर्विधानादिति । न त्वन्यासु शाखासु संगच्छते क्रतुपशुप्रदर्शनार्थे इत्येव संगच्छते । एकादशसु वेति । वेदिसंमितां मिनोतीति पुनर्विधानात् । एकयूपे चैकादशिनाना यद्ग्नावेकादशिनीं मिनुयात् , इति यूपभेदनिन्दा कृत्वा एकयूपत्व चैकादशिनाना विधीयते । एकादशिनीति च यस्या यूपभेदस्तामेवोपचरन्ति । 'वज्रो वा एषा समीयते यदेकादशिनी ' इति सा समर्था ' प्रत्यञ्चं यज्ञं संमर्दितोऽयेत्पात्नीवतं मिनोति यज्ञस्य प्रत्युत्तब्ध्यै सयत्वाय' इति श्रुतेः । न पश्वैकादशिन्या पात्नीवत यूपैकादशिन्यामेव 'सर्वे वा अन्ये यूपाः पशुमन्तः, इति बहुत्वं यूपानामुक्त्वोपशयपशुविधानादुपशयोऽपि यूप भेदद्वारकः । तस्मादेकयूपेष्वैकादशिनेषु न भवति सौत्रामण्या च । तच्च कात्यायनेनाप्युक्तम्—'यूपैकादशिन्यामेवोपशयपात्नीवतौ न पश्वैकादशिन्याम्' इति । अतश्च पशुगणे बहिः सोमे तत्र संमर्दितस्याभावान्नापात्नीवतः, यूपभेदद्वारत्वात्तूपशयः क्रियते । साग्निचित्य एवैकयूपो लभ्यते तत्रोक्त इति । अन्येषु तु गणेषु बहिस्तन्त्रवर्तिषु यूपभेद एव । यत्रिषु यूपेष्वालभेत, इति लिङ्गात् ॥ १ ॥

अग्निं युनज्मि शवसा घृतेनेति तिसृभिः प्रातःसवनेऽग्निमभिमृशति ॥ २ ॥

पुरस्तात्प्रातरनुवाकादग्नावसूपावहृत्य सोमम्, अग्निं युनज्मीति तिसृभिरभिमृशन्नेवाग्निं युनक्ति, यज्ञवाहनार्थं न मन्त्रान्तेनाभिमृशति ' यत्सर्वाभि पञ्चभिर्युञ्ज्यात् ' इति दोषमुक्त्वा ' यज्ञायज्ञीयस्य स्तोत्रे द्वाभ्यामभिमृशति ' इति तदप्यभिमर्शनं, नमो अस्तु मा मा हिंसीरिति द्वाभ्यामभिमर्शनं योग एव वक्ष्यति स्वयमेव सूत्रकारः ॥ २ ॥

दक्षिणाकाले हिरण्यपात्रं मधोः पूर्णं शतमानस्य कृत चित्रं देवानामित्यवेक्ष्य मध्यंदिनेऽश्वेनावघ्राप्य ब्रह्मणे ददाति ॥ ३ ॥

दक्षिणाकाले प्राप्ते प्रतिहर्त्रे तत इति कृते हिरण्मयं पात्रं मधुन पूर्णं शतमानस्य हिरण्यस्य कृत चित्र देवानामिति यजमानोऽवेक्ष्याश्वेनावघ्राप्य (पण कारयित्वा) ब्रह्मणे ददाति हिरण्यपात्रम् । तस्य प्रतिग्रहोऽग्नये हिरण्यमिति तस्य हिरण्मयत्वात् । हिरण्यपात्र मधो. पूर्णं ददाति, इति पात्रस्य प्रतिग्रहण न मधुन. ॥ ३ ॥

अध्वर्यवे कल्याणीर्दक्षिणा दद्यात् ॥ ४ ॥

अध्वर्यवे कल्याणीः सुरूपा बहुमूल्याश्च ददाति यदि चिनोत्यध्वर्युं । तथा चोक्तं ब्राह्मणे—' त वा एतं यजमान एव चिन्वीत यदस्यान्यश्चिनुयाद्यत्तं दक्षिणाभिर्न राध.

येदग्निमस्य वृञ्जीत योऽस्याग्निं चिनुयात्त दक्षिणाभी राधयेदग्निमेव तत्स्पृणोति' (तै० सं० ५-६-९) इति चयनव्यापारं यजमान एव कुर्यात् । अध्वर्युर्मन्त्रान्ब्रूयात् । यदा यजमानश्चिनोति तदा न दक्षिणा ददाति । यदाऽध्वर्युश्चिनोति तदा यजमान एव बहुमूल्या गा अध्वर्यवे दद्यादित्यर्थः । न यजमानाय दक्षिणाभागमेव विशिष्टमध्वर्यवे ददाति न ब्रह्मण इति भाष्यकृत् । अधिकमध्वर्योश्चिन्वत इति न्यायः । न ह्यङ्गनिमित्ता प्रधानदक्षिणा (वि) कुर्यात् । बोधायनमतिश्च—आरण्यकानुवाकेनात्राध्वर्यवेऽग्निदक्षिणा ददाति शतं सहस्रमन्विष्टका वेति । शतं सहस्रं वा रौप्यकमुद्रा इत्यर्थः । ॥ ४ ॥

यदन्यस्याग्निं चिनुयात्तं दक्षिणाभिर्न राधयेदग्निमस्य वृञ्जीत ॥ ५ ॥

तं दक्षिणाभिस्तोषयेत्तेनाग्निमेव तोषयति ॥ ५ ॥

उपाकृते यज्ञायज्ञि(ज्ञी)यस्य स्तोत्र एकया प्रस्तुत एकस्यां वा गीतायां समुद्रे ते हृदयमिति द्वाभ्यामग्निमभिमृशति ॥ ६ ॥

यज्ञायज्ञीयस्य स्तोत्रे वर्तमान एकया ऋचा प्रस्तावे कृते नमस्ते अस्तु मा मा हिꣳसीः, नमस्पथ इत्येव मन्त्राभ्यां द्वाभ्यामाभिमर्शनम्[1] ॥ ६ ॥

हारियोजनेन चरित इमꣳ स्तनमूर्जस्वन्तं धयापामित्यग्निविमोचनीयामेकाहुतिं जुहोति । वि ते मुञ्चामीति वा ॥ ७ ॥

नन्वग्नौ श्रूयते—'अग्निं युनज्मि शवसा घृतेनेति जुहोत्यग्निमेव तद्युनक्ति पञ्चभिर्युनक्ति पाङ्क्तो यज्ञ ' इत्यग्नियोगः । तथा—'इमꣳ स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णाꣳ स्रुच जुहोतीत्येष वाऽग्नेर्विमोक ' इति । सोऽयमग्निविमोकः किं प्रधानमात्रापवर्गे स्यादुत साङ्गप्रधानापवर्ग इति । यदि प्रधानमात्रार्थो योगस्तदपवर्गे विमोकः, साङ्गप्रधानार्थत्वे तु योगस्य सर्वान्ते विमोकः । तत्राग्नेः सर्वार्थत्वात्तत्संस्कारो योगः सर्वार्थः । तस्मात्सर्वापवर्गे विमोक इति पूर्वपक्षं कृत्वा 'पाङ्क्तो यज्ञः' इति वाक्यशेषेण यज्ञार्थता योगस्य । अतः प्रधानापवर्गे विमोक इति भाष्यकारेण सिद्धान्तितम् । एवं च सौमिकमपि वरणं यद्वृता वषट्कुर्युर्भ्रातृव्यमेव यज्ञस्याऽऽशीर्गच्छेत्, इति यज्ञसंयोगादाग्निसंयोगतुल्यन्याय केवलप्रधानार्थं भवति । तत्रावभृथे सौमिकेन वरणेन प्रत्याम्नात होतृवरणं प्राप्नोति । तत्र न

---

१ घ. द्वाभ्यामभिमर्शनं काल एव स्तीर्णे वेदे । इति पाठोऽधिकः ।

होतारं वृणीत इति प्रतिषेधोऽवक्लृप्तो भवति। इतरथा सामिकस्य वरणस्य साङ्गप्रधानार्थ-त्वादवभृथे पृथक्वरणप्राप्त्यभावात्प्रतिषेधो न स्यादिति च लिङ्गमुक्तम् । तथा द्वाद-शाहे अहरहर्युनक्ति अहरहर्विमुञ्चति, इति प्रत्यहं योगविमोकदर्शनं द्वादशाहे । इतरथा साङ्गप्रधानार्थत्व आद्यन्तयोरेव योगविमोकदर्शन स्यादिति ।

ननु–प्रधानार्थत्वेऽपि वरणस्यापूर्वत्वादवभृथस्य वाष्टिकवरणप्राप्ति । तत्र कश्चिदाह–अपूर्वताया एवायमर्थवादो होतृवरणाभावे लाघव स्यादिति । स चापूर्वत्वपक्षे वरणप्राप्तौ सत्यामवक्लृप्य(प)ते नान्यथेति । वयं तु ब्रूम – यद्यप्यपूर्वोऽवभृथस्तथाऽप्याज्यभा-गयोस्तत्र सद्भावाद्धोतुश्चाङ्गप्रधानार्थत्वात्तद्वरणमप्यङ्गप्रधानार्थम् । न हि दार्शिक वरणं केवलप्रधानार्थं यज्ञसयोगाभावात् । अतोऽसत्यप्यतिदेशे होतृवरणस्याऽऽज्यभा-गार्थतयाऽस्त्येवावभृथे प्राप्तिरिति युक्त प्रतिषेध इति । तदिद भाष्यकारीयमधिकरण-व्याख्यानमनुपपन्नमिति मत्वा वार्तिककारेण विपर्ययेण पूर्वोत्तरपक्षौ वर्णितौ । वाक्य-शेषादवभृथलिङ्गाच्च केवलप्रधानार्थो योग इति पूर्व पक्ष· । सिद्धान्तस्त्वग्ने· सर्वार्थ-त्वात्तद्योगोऽपि सर्वार्थ· । न च वाक्यशेषवशाद्विशेषः। योगोत्पत्तिविधौ वाक्यशेषाभावात्तत्र तावत्सर्वार्थत्व गम्यते पञ्चसंख्यागुणविधौ वाक्यशेष श्रुत· । न चासावुत्पत्तिवाक्या-वगतं सर्वार्थत्वमल निवर्तयितुम् । कि च यज्ञशब्दो यागमात्र ब्रवीति न प्रधानयागमेव । अतो न तद्वशात्केवलप्रधानार्थत्वम् । अवभृथे च होतृवरणप्रतिषेधोऽङ्गप्रधानार्थत्वेऽपि सौमिकस्य वरणस्य घटत एव । सौमिक हि वरणमानत्यर्थ प्राकृत तु होतृवरण प्रवृत्ते होतरि क्रियमाणमदृष्टार्थम् । अतस्तत्सर्वासु सौमेष्टिषु कार्यमिति द्वादशे वक्ष्यति । तस्माद्युक्तः प्रतिषेध. । द्वादशाहे च प्रत्यह योगविमोकदर्शनमस्मिन्नेव पक्षे घटते । विधानार्थं ह्येतद्वचनं नानुवादमात्रम्। आनर्थक्यात् । तेन सर्वादौ सर्वान्ते च सकृदेव योगविमोकयोर्न्यायत. प्राप्तयोर्वचनेनाहरहर्योगविमोकौ विधीयेते । तस्मात्स-र्वार्थो योगः सर्वापवर्गे च विमोकः ॥ ७ ॥

एकादश समिष्टयजूꣳष्यपि जुहोति ॥ ८ ॥
नवाऽऽध्वरिकाणि हुत्वा–इष्टो अग्निराहुतः
स्वाहा कृतः पिपर्तु नः। इष्टꣳ हविः स्वाहेदं
नम इति दशमैकादशे जुहोति ॥ ९ ॥

एकादश समिष्टयजूꣳषि जुहोतीति वचनादध्वरार्थानि नव हुत्वा धातारातिरिति । इष्टो यज्ञो भृगुभिराशीर्दा वसुभि स्वाहा । तस्य त इष्टस्य वीतस्य द्रविणे ह भक्षीय स्वाहा । केचिदेकमन्त्रं कुर्वन्ति । तमेव द्विरावर्तयन्ति दशमैकादश समिष्टयजुष इति वैखानसोक्तेः ॥ ८ ॥ ९ ॥

अनूबन्ध्यावपायाᳪहुतायां यदाऽऽकूता- त्समसुस्रोदित्येतेनानुवाकेन प्रतिमन्त्रमा- कूतीर्जुहोति ॥ १० ॥

अनूबन्ध्यावपाया हुताया वपने कृते स्नाते च पात्नीवतः। तस्मिन्समाप्तेऽग्नेर्विमोकः। (औदुम्बरीᳪ स्रुच घृतस्य पूरयित्वा—इमᳪ स्तनमूर्जस्वन्तं धयापामित्यग्नेर्विमोको हूयते।) ततः पशुपुरोडाशाद्यनूबन्ध्याशेषम्। यदि त्वामिक्षा, ता हुत्वा वपनं स्नान पात्नीवत च कृत्वा देविकाहविर्भि (प्रचरणादि) प्रचारादिसक्तुहोमे कृते धूमानुमन्त्रणे च। यदाकूतादिति दशाऽऽहुतीरध्वर्युर्जुहोति ॥ १० ॥

आपं त्व ऽग्ने मनसेति प्रयास्यन्नाग्नी(ग्नि)भिराग्निमुपतिष्ठते ॥ ११ ॥

यजमान इति बौधायन। योऽय मन्त्रः पठितस्त मन्त्रमुक्तप्रकारेण प्रयाणकाले ब्रूयात्। 'इत्याहैषा वा अग्नेराप्तिस्तयैवैनमाप्नोति' (५–५–७) इति। एषैव मन्त्रपाठानुष्ठितिरग्नेः प्रापिका। तस्मात्तयैवाग्निं प्राप्नोतीत्यर्थः ॥ ११ ॥

येऽग्नयः पुरीष्या इति यत्र स्वीयमग्निं पश्यति तमुपतिष्ठते ॥ १२ ॥

केचित्तु—प्रत्यवरुह्य चित्यात्पुनर्मन इत्युपतिष्ठते चित्यम्। अयं नो नभसा पुर इत्युपस्थानादि यजमानस्य वृष्टिरसीत्यन्तम्। तत आग्नी(ग्नि)भिरुपस्थानम्। येऽग्नयः पुरीष्या इति। आप त्वाऽग्ने वशयेति लिङ्गात्। 'अग्निचित्ये वशा नित्या' इति न्यायः। भाष्यकारस्तु विकल्प एवेत्याग्नी(ग्नि)भिरुपस्थानम्। प्राजहितᳪ समारोप्यैवमादिकर्म, इति वैखानसादयः ॥ १२ ॥

उप त्वाऽग्ने दिवे दिव इति तिसृभिरन्येषामग्नीन्दृष्टा(ष्ट्वा) ॥ १३ ॥

अन्येषा यजमानाना चिति दृष्ट्वोपतिष्ठते। प्रयास्यन्नेव यावन्नाध्यवस्यत्युदवसानीयार्थदेश यजमानः। केचित्तु—यावज्जीवमन्येषामग्निमु(ग्नीन्दृष्ट्वो)पस्थानं कुर्वन्तीति ॥ १३ ॥

अग्निं चित्वा सौत्रामण्या यजेत। मैत्रावरुण्या चाऽऽमिक्षया ॥ १४ ॥

उदवसानीयान्ते च कृतेऽग्निं चित्वाऽग्निगुणकेन क्रतुनेष्ट्वाऽनन्तरं सौत्रामणी मैत्रावरुणी चाऽऽमिक्षा। विना पर्वणीति भाष्यकृत्। आगामिपर्वणीति न्यायः शक्यते कालं सपादयितुमिति ॥ १४ ॥

अग्निं चित्वा संवत्सर न कंचन प्रत्यवरोहेन्न पक्षिणोऽश्नीयात् ॥ १५ ॥ यावज्जीवं वर्षति

न धावेन्न रामामुपेयान्न द्वितीयं चित्वाऽन्यस्य स्त्रियमुपेयात् ॥ १६ ॥ न तृतीयं चित्वा कांचनो-पेयाद्भार्यां वोपेयात् ॥ १७ ॥

संवत्सरं कंचिदपि न प्रत्यवरोहेत् । प्रत्युत्थान न कुर्यात् गुरूणामपि । यदा त्वभिषेकः कृतस्तदा यावज्जीवं संवत्सरमनभिषेकेऽपि । रेत सिग्व्रतत्वात् । नहीमे कंचन प्रत्यवरो-हतस्तदेनयोर्व्रतमिति । रामा यस्य शूद्रा क्रमेणाऽऽनीता सोऽपि यजमानस्ता सवत्सर नोपगच्छति । पक्षिमांसस्यापि संवत्सरमभक्षणम् । मास्तिष्कं मस्तकमास तस्य च । अग्निचिद्वर्षति देवे न धावेद्यावज्जीवम् । यदि तु कथचिद्विस्मृतौ धावेद्यस्मात्स्थाना-द्धावन कृतं तदेव स्थानमावर्तेत । द्वितीयमग्नि चित्वाऽन्यस्य वर्णस्य स्त्रियं भार्या-मविक्रमे(ये)णाऽऽहृता नोपगच्छेत्संवत्सरं न यावज्जीव रामातुल्यत्वात् । तृतीयमग्नि चित्वा कांचिदपि समानवर्णामपि सवत्सरं नोपगच्छेत् । सर्ववर्णानां सवर्णा त्ववश्यं भर्तव्या द्वयोर(व्याऽ)धिकारश्रुते. । कामतस्तु प्रवृत्तानामसवर्णभार्या न साऽवश्यं भर्तव्या ॥ १९ ॥ १६ ॥ १७ ॥

अग्निं चित्वा य एतस्मिन्संवत्सरे न विरोचेत । स क्रतुमारभमाण एकचितीकमग्निं चिन्वीत ॥ १८ ॥

अग्निं चित्वाऽग्निगुणकेन क्रतुनेष्ट्वा य एतस्मिन्सवत्सरे यस्मिश्चितोऽग्निस्तस्मिश्चेदस्या-वृद्धिर्भवति ह्रासो धनधान्यानामिति । केचित्तु—ऋद्धिमतामप्येतत्कर्मेत्याहुः । एत-स्मिन्संवत्सरे यस्मिश्चितोऽग्नि स क्रतुमाहरमाणोऽभीष्टमेकचितीकमेकप्रस्तारं चिन्वी-ताग्निम् । पूर्वचितस्याग्ने. समानमिष्टकाभिः षष्ठी चितिरिति श्रुतेः ॥ १८ ॥

सलिलाय त्वा सर्णीकाय त्वेत्यष्टौ नानामन्त्राः ॥ १९ ॥ यथार्थं लोकंपृणाः । अथ पुरीषम् ॥२०॥

सलिलाय त्वेत्यष्टौ नाना मन्त्रा उत्तरवेद्यामुपधाय पूर्वं त्रिःप्रमाणाया कृतायां पूर्वाग्नितुल्याया वाऽवान्तरा मध्यमे प्रवर्ग्योपसदा चिति', प्रवृ तिवद् व्याघारणान्तं कृत्वा प्रकृतिवद्विरमणम् । अग्नीषोमीयदिवसे पौर्वाह्णिकीभ्या प्रचर्य चयनं, षष्ठी चिति-रिति श्रुतेः । अवयवत्वादग्निधर्माणामप्रयोजनम् । अग्नेर्ह्येते धर्मा नैकदेशः शक्नोति प्रयोक्तुम् । एकचितीकं चि वीतेति पुलिङ्गनिर्देशात्तेन तुल्यः प्रस्तार एकः । अप्रति-ष्ठाया तु निमित्तेऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्ति, अथ षष्ठीं चितिं चिनुत, इति तुल्यत्वादस्यामपि चितिधर्मा. क्रियन्ते । न त्वग्निधर्माः कर्षणादयः । प्रचर्य पौर्वाह्णिकीभ्या प्रवर्ग्योपसभ्याम् । औपवसथ्ये सुब्रह्मण्यान्ते, अग्रेण

---

१ घ. न बलात्कारेणोपगच्छेत्संवत्सरं ।

प्राग्वंशप्रष्टौ नाना मन्त्रा लोकंपृणाश्चैकस्य प्रस्तारस्य सादयतीत्यादि श्वेतमश्वं पुरस्ता-न्नयन्तीत्येवमन्त कृत्वा श्वेतस्याऽऽलम्भः। तत वाङ्म आसन्नित्यारोहण चितेः । तत सलि-लाय त्वेत्यष्टौ नानामन्त्रा उपदधाति । ततो लोकंपृणाभिः [प्रच्छादयति ।] सोऽयं प्रथमविकारो भवति भरद्वाजमताच्च । उत्तरवेद्यभिमर्शनमात्मन्यग्निग्रहणं स्वयंचित्याऽभि-मर्शन तत्त्वा यामीति [परिचरण] चाग्न्यङ्गत्वान्निवर्तते गायत्र्यभिमर्शनान्त प्रथम-चितिवत् । आपराह्णिकीभ्यां प्रचर्याश्वपरिणयनम् । तत प्रवर्ग्योद्वासनादि ज्योतिष्टोम-वत् । केचित्त्वष्टौ नानामन्त्रा उपधाय लोकंपृणा उपधीयन्ते । तत पुरीषम् , इति यावदुक्त कुर्वन्ति तस्मिन्नेव तु काले ॥ १९ ॥ २० ॥

अग्निं चित्वा य एतस्मिन्संवत्सरे न प्रतिष्ठेत्स क्रतुमारभमाण एकचितीकमग्निं चिन्वीत संयच्च प्रचेताश्चेति पञ्च नानामन्त्राः । यथार्थं लोकं-पृणाः । अथ पुरीषम् ॥ २१ ॥

एतस्मिन्नेव संवत्सरे स्थानाद्वा प्रच्यवते वृद्धिर्वाऽस्य न भवति स क्रतुमभीष्टमाहर-माणस्तेन यज्ञक्रतुना क्रियेत, इत्येकचितीकमेव पूर्वाग्निप्रस्तारतुल्य चिन्वीत । पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठी चितिं चिनुत इति श्रुतेर्विप्रतिषेधात्। पूर्वचितिभि समानसंख्य-त्वान्न ह्यग्निपूपरिष्टाच्चीयते षष्ठी चितिः । चयनविधि सर्वं च । एतयोस्तु कामविपर्या-समेके प्रतिष्ठायां निमित्ते सलिलाय त्वेति । अथ यो नर्ध्नुयादिति द्वितीयः संयच्च प्रचे-ताश्चेत्येवं विपरीतौ कामावेके शाखिन. परिपठन्ति ॥ २१ ॥

पुनश्चितिं व्याख्यास्यामः । सा त्रिष्वर्थेषु श्रूयते अ(तेऽस्र)वणार्थे वा समृद्ध्यर्थे वा संतानार्थे वा ॥ २२ ॥ अ(अस्र)वणार्थां व्याख्या-स्यामः । यदीष्ट्या यदि पशुना यदि सोमेन यजेत ॥ २३ ॥ यत्रैवास्य पूर्वोऽग्निश्चितः स्यात्त-दपरमन्ववसाय यजेत ॥ २४ ॥ अपिवा येन-र्षय इत्यष्टौ नानामन्त्रा अष्टौ च लोकंपृणाः । अथ पुरीषम् ॥ २५ ॥

पुनश्चितिरिति श्रूयतेऽश्र(स्र)वणार्थे—या वा एषोऽनिष्टक आहुतिं जुहोति स्रवति वै सा । पुनश्चितौ चीयमानायामग्निचितिनिर्वीर्यवत्यस्यामाहुतयो भवन्ति, इत्यश्र(स्र) वणार्थे । समृद्ध्यर्थेऽपि पुनश्चितयः—पुनश्चितिं चिनुत ऋद्ध्या, इत्यृद्धिकामस्य ।

संतानार्थे—आ तृतीयात्पुरुषादन्नमत्ति, इति । संततिश्चाविच्छिन्ना । अन्नं चाऽऽतृतीयात्पुरुषाद् भवति । य· संतानार्थे पुनश्चिति चिनुते ।

तत्रास्रवणार्था चितिरुच्यते—यदीष्टचा यदि सोमेन यजेत योऽस्य चितः पूर्वोऽग्निस्तमन्ववसाय तस्मिन्नाहवनीय· पूर्वचिते त्वग्नौ स्थाप्यते । दर्शपूर्णमासाद्या इष्टयस्तासामग्न्यन्वाधाने पूर्वचितस्याग्नेः समीप गच्छति । पूर्वचितेऽग्नावाहवनीयं स्थापयति । वेदिदेशे स्थापयित्वा गार्हपत्यदक्षिणाग्नी । समाप्तायामिष्टौ प्रविशति । एवं नित्यकाम्यनैमित्तिकानां विधि । पशोस्त्वग्नेस्तृतीयो भागः परस्य चारत्निस्थानीया चितिरेव चोत्तरवेदिस्थानीया । प्रणयनकाले तु व्याघारणप्रभृति संभारनिवपनान्तं क्रियते । यथाप्रकृत्युत्तरतो यूपस्यान्यो यूप , समानमन्यत् । सोमेऽपि यथाऽऽसीदाग्निकी पूर्वा वेदिस्तथा लक्षणे चोत्तरवेदिस्थानीया साग्निचिज्ज्योतिष्टोमवदन्यत्सर्वं यूपम(पाद्य)पूर्वम् । नित्यनैमित्तिककाम्येषु सोमेष्वेव विधिः । एषोऽश्र(स्र)वणार्थ· ।

अपि वा नान्ववसाय पूर्वचितमग्नि याग. । अग्निहोत्रमिष्टिं च गृह एव करोति । जातायामुत्तरवेद्या पशौ सोमे च, पशौ शम्यामात्राग दशपदाया सोमे व्याघारणान्ताया कृतायामुत्तरवेदिपरिमाणा दग्धा इष्टका आनीय प्रणयनाद्यारोहणान्तं कृत्वा पूर्ववत्—‘ येनर्षय ’ इत्यष्टावुपधाय लोकपृणाश्च चितिक्लृप्त्याद्यश्वपरिणयनान्तं कृत्वा प्रथमा चितिम्तत्कृत्वाऽग्निप्रणयनादि परिचय. सभाराश्चोपर्यग्नौ धार्यमाणे, ऊर्णावन्तमित्यभिज्ञाय पश्चात्सर्वं पशुबन्धवत् । सोमे तु मध्यमायामुपसदि प्रोक्षणान्त कृत्वोत्तरवेदिं प्रकृतिवद्विरम्य (त्वत्य)श्वोभूते पौर्वाह्णिकीभ्या प्रचर्य व्याघारणमिष्टकाप्रणयनादि पूर्ववदारोहणान्त कृत्वा चयनमुत्तरवेदिपरिमाणाभिरिष्टकाभि· पूर्ववदश्वावभितास्तिष्ठेताम् । येनर्षय इत्यष्टौ नानामन्त्रा लोक पृणोति लोकपृणास्तनश्चितिक्लृप्त्यादि गायत्र्याभिमर्शनान्त कृत्वा प्रथमचितिवत् , तत आपराह्णिक्यौ, अश्वपरिणयन प्रवर्ग्योद्वासनादि ज्योतिष्टोमवत् । प्रणयने चोपर्यग्नौ धार्यमाण ऊर्णावन्तमित्यभिज्ञाय परिचय. सभारा., सर्वं ज्योतिष्टोमवत् । द्वितीयो विधिरश्र(स्र)वणार्थायाः ।

अपि वोत्तरवेद्यामुपर्यग्नौ धार्यमाणे पशौ सोमे च प्रजापतिस्त्वेत्युत्तरवेदिमभिमृशति । ततो व्याघारणप्रभृति संभारनिवपनान्त कृत्वेत्येवमादि प्रक्षिपति । तृतीयो विधिः । चतुर्थ्य(र्थोऽ)पिवा तिस्रः स्वयमातृण्णास्तासामुपधानकल्प उत्तरवेद्या कृताया सोमे पशौ वा पूर्ववत्प्रणयनाद्यारोहणे कृते स्वयमातृण्णा प्रकृतिवत्सामान्ता कृत्वा पृष्टो दिवीति पुरीषक्षेपः । स्वयमातृण्णायामेव विहिताया तेनैव प्रकारेण सा द्वितीयसामान्ता द्वितीया । ततः पुरु(री)षविधानेन तृतीया । तस्या पुरीष चिति क्लृप्त्याद्यश्वपरिणयनान्तं पुरीषवर्जं पञ्चमो विधिः ।

अपि वा तिस्रः स्वयमातृण्णास्तिस्रश्च विश्वज्योतिषस्तासामुपधानविधिः । पूर्ववत्सर्वं कृत्वा स्वयमातृण्णाया सामान्तायां कृताया पुरीषमथ विश्वज्योति प्रथमेन मन्त्रेण । अथ स्वयमातृण्णा द्वितीयाऽपि, सामान्ता स्वयमातृण्णा कृत्वा पुरीषम् । विश्वज्योतिर्द्वितीयेन मन्त्रेण तृतीयस्या स्वयमातृण्णायामुपधीयमानाया विश्वज्योतिः प्रथमा तृतीयेन मन्त्रेण । अथ स्वयमातृण्णा तृतीया सामान्ता । अथ पुरीषम् । ततश्चितिक्लृप्त्याद्यादि पुरीषवर्जमश्वपरिणयनान्तं कृत्वा प्रथमाचितिवत् । एव पशौ । सोमे तु विधिः पूर्वोक्तः । चयने त्वष्टौ लोकंपृणा उत्तरवेदिपरिमाणा उपधीयन्ते । प्रणयनादि पूर्ववत्कुर्यात् । ततः पुरीषं–पृष्टो दिवीति । तत एकादश लोकंपृणा उत्तरवेदिपरिमाणाः पुरीषं च । ततो द्वादश लोकपृणा उत्तरवेदिपरिमाणा. पुरीषं च । ततश्चितिक्लृप्त्यादिचित्यन्तं पुरीषवर्जमश्वपरिणयनान्तं प्रथमचितिवत् । अश्र(स्र)वणार्थाया सोमे क्रियमाणाया लोकंपृणाविधिमेवेच्छन्त्यन्ये । नान्यम् । इतरो विधिः पशावेवेति । अनग्निचित्यात्पुनश्चितित्वसामान्यात् । प्रथम(मा)विकारत्वात् । भाष्यकारस्तु य उक्तो विधिः सर्वत्र न प्रथम(मा)विकारत्वमिति षष्ठो विधिरश्र(स्र) वणार्थायाम् । समृद्ध्यर्थाया द्वितीयमग्निं चिन्वानो द्वितीयस्या चितौ षोडशेष्टका अवशिष्टा येनर्षय इत्यष्टौ नानामन्त्रा अष्टौ च लोकंपृणा अथ पुरीषम् । ततश्चितिक्लृप्त्यादिचित्यन्तं पुरीषवर्जं द्वितीयचितिवत् ॥ २९ ॥

श्वोभूतेऽष्टौ नानामन्त्रा एकादश लोकंपृणाः । अथ पुरीषम् । श्वोभूते एता नानामन्त्रा द्वादश च लोकंपृणाः । अथ पुरीषम् । अथ समृद्ध्यर्थां व्याख्यास्यामः । अग्निं चित्वा य एतस्मिन्संवत्सरे नर्ध्नोति । स ऋतुमारभमाणस्त्रिचितीकमग्निं चिन्वीत । सलिलाय त्वा सर्णीकाय त्वेत्यष्टौ नानामन्त्रा एकादश च लोकंपृणाः । अथ पुरीषम् । श्वोभूत एताश्च नानामन्त्रा द्वादश च लोकंपृणाः । अथ पुरीषम् । श्वोभूत एताश्च नानामन्त्रास्त्रयोदश च लोकंपृणाः । अथ पुरीषम् । संतानार्थायां तु तृतीयमग्निं चिन्वानस्तृतीयस्यां चितौ येनर्षय इत्यष्टौ च नानामन्त्रा अपरिमिताश्च लोकंपृणाः । अथ पुरीषम् ॥ (ख० १९) ॥ २६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्ने सप्तमः पटलः ।

ततः श्वोभूत एकोनविंशतिरिष्टका अवशिष्टा येनर्षय इत्यष्टौ नानामन्त्रा एकादश लोकंपृणाः पुरीषान्तम् । ततश्चितिक्लृप्त्यादिचित्यन्त पुरीषवर्जं तृतीयचितिवत् । ततः श्वोभूते च विंशतिरिष्टका अवशिष्टा येनर्षय इत्यष्टौ नानामन्त्रा द्वादश च लोकंपृणाः पुरीषमुपधाय चितिक्लृप्त्यादिचित्यन्त चतुर्थीतुल्यः पुरीषवर्जमेष समृद्ध्यर्थायाः । संतानार्थायास्तु चितिरुच्यते । तृतीयमग्निं चिन्वानस्तृतीयस्यां चितौ नानामन्त्रा उपधाय येनर्षय इत्यष्टावुपदधाति । उत्तरवेद्यामग्नावेव नान्यत्रेति उत्तरवेदिग्रहण क्रियते पुनः पुनः । ततो यथार्थं लोकंपृणा. पुरीषं, चित्यन्तं च पुरीषं तृतीयचितिवदेषा संतानार्थायाः ।

अथो खल्वाहुर्ब्रह्मवादिनो न चेतव्या पुनश्चितिः, इति सूत्रान्तरे च समृद्ध्यर्थायाः सांतानार्थायाश्च काम्यत्वादेवानित्यत्वं बोध्यम् । अश्र(स्र) णार्या तु नित्या प्राप्ता । सर्वां ह्याहुती. सवीर्या इच्छन्ति तस्याः प्रतिषेधो विकल्पार्थः । तामपि चिनोति विकल्पेन । एष रुद्रः सर्वाग्निचित्यायाः । यथा व्यघ्र सुप्तो बोध्यते तथेयं (थाऽयम) स्रवणार्थाया क्रियमाणाया बोध्यते । अतो न चेतव्या । अन्ये त्वाहुश्चेतव्येति । यथा ब्राह्मणः श्रेयान्धन प्रयच्छन्त बोधयति सुप्तमपि तथाऽत्रापि बुद्धस्येज्या क्रियते ॥

(नन्वग्निचिद्व्रतानि 'वर्षति न धावेत्' (जै०सू०९–३–१०) इत्यादीनि चयनानन्तरमेव भवन्ति क्रत्वन्ते वेति संशये

धात्वर्थश्चयन भूत निमित्तं तदनन्तरम् ।
व्रतान्यतः प्रवर्तेरन्नाऽऽहिताग्निव्रतादिवत् ॥

नैवम् ।

भावनाया निमित्तत्वं धातुस्तदुपसर्जनम् ।
तस्याश्च फलनिर्वृत्त्या निर्वृत्तिरुपलक्ष्यते ॥

न ह्यत्र चयनस्वरूपनिर्वृत्तिर्निमित्तं तत्करणिका त्वाग्निकार्मिका भावना भूता निमित्त तस्याश्चाग्न्युपकारो भाव्य । सोऽपि च क्रतु सा यतोऽग्नेर्धारण तच्चाऽऽक्रतुसमाप्तेर्वितत न तत प्राङ्निवृत्त भवति तन्निवृत्त्या च विना न भावनानिर्वृत्तिः फलापवर्गित्वाद्भावनानामाधानस्य त्वग्निगतमदृष्ट भाव्यम् । तच्चानन्तरमेव निर्वृत्तमिति विशेष) ॥ २६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां द्वादशप्रश्ने सप्तम. पटल ॥

---

१ ( ) धनुश्चिह्नान्तर्गतग्रन्थः (१२–७–) सूत्रव्याख्यानान्त योजनीय ।

अथ द्वादशप्रश्नेऽष्टम पटल ॥

अथ कानिचित्काम्यचयनानि दर्शयति-

काम्यानग्नीन्व्याख्यास्यामः । तेषामाकृति-
विकारा ब्राह्मणव्याख्याताः ॥ १ ॥

तान्व्यक्त वक्ष्याम इत्यर्थ. ॥ १ ॥

अर्थसंयोगश्चानियमश्च तत्प्रयोगे छन्द-
श्चितं चिन्वीत पशुकाम इति । यानि प्रकृतौ
छन्दाꣳसि तैरग्निं चिन्वीत । अष्टौ गायत्रीः ।
मूर्धन्वतीः पुरस्तादुपदधाति ॥ २ ॥

अग्निर्मूर्धा दिव' ककुदित्यनुवाकोक्ता नानाछन्दोयुक्ता मन्त्रास्तैरेव चितो न तु यजु-र्भिरिति च्छन्दश्चितस्तादृशमग्नि पशुकामश्चिनुयात् ।

अथ वा— छन्दश्चितमिति काम्या गुणविकारास्ते शुल्बेऽनुक्रान्ता हि प्रथम इत्युपदिशन्ति (सूत्रकारा.) । छन्दश्चित्सं छन्दोभि सर्वाणि च्छन्दासि यजुष्मतीना स्थाने गायत्र्यादिभि प्रकृतौ छन्दोभिश्चीयते यजुष्मत्यो न क्रियन्ते । एवं यजुष्मतीनां स्थानेऽन्यानि च्छन्दासि भवन्ति ॥ २ ॥

श्येनचितं चिन्वीत सुवर्गकाम इति । वक्रपक्षो
व्यस्तपुच्छः श्येनाकृतिर्भवति ॥ ३ ॥

स्वर्गकामार्थो यजमानः श्येनाकृति चिनोति । ' श्येनो वै वयसां पतिष्ठ श्येन एव भूत्वा सुवर्ग लोक पतति' (तै० सं ५ ४–११) इति । वयसां मध्ये श्येनोऽतिशीघ्र पतितु समर्थ. । श्येन एव श्येनवच्छीघ्रगाम्येव ॥ ३ ॥

कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमु-
ष्मिँल्लोके स्यामिति । कङ्काकृतिर्निरायतग्रीवः
शीर्षण्वान्भवति ॥ ४ ॥

कङ्क इव चीयत इति श्येनभेद एव। अय पक्षी वर्षासु पक्षौ पुच्छाद्वक्रौ सन्नं पुच्छं दीर्घ आत्मा मण्डलशिरश्च । शीर्षण्वानिति । प्रशस्तशिरस्क । प्रभूतत्वेनोच्छ्रितत्वं शिरस' प्रशस्तत्वम् ॥ ४ ॥

अलजचित चिन्वीत चतुःसीतं प्रतिष्ठाकाम इति
चतस्रश्चतस्रः सीताः सꣳहिताः कृषति ॥ ५ ॥

अलजो नाम भासाख्य: कङ्कसमानाकृतिः पक्षिविशेषः । स इव चीयत इति क्विप् । चतुःसीतमिति द्वादशात्मस्य प्रत्यासन्नानाञ्चतुष्टयम्, तिसृणां स्थाने एकैका ॥५॥

प्रउगचितं चिन्वीत भ्रातृव्यवानिति शकटाकृति भवति ॥ ६ ॥

प्रउगमनोमुखम् । यावानग्निः सारत्निप्रादेशस्ततो द्विस्तावतीं भूमिं चतुरश्रां कृत्वा पूर्वस्याः करण्या अर्धाच्छ्रोणी प्रत्यालिखेत् । लेखयोरन्तः प्रउगाकारो दृश्यते । तदिव चीयत इति ॥ ६ ॥

उभयतःप्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रतिजनिष्यमाणानित्युभयतः शकटाकृतिर्भवति । यथा विमुखे शकटे ॥ ७ ॥

प्राक्पश्चाच्च शकटमुखसदृशमुभयतः प्रउगम् । तेनोत्पन्नान्भ्रातृव्यान्विनाशयति । उत्पत्स्यमानानामुत्पत्तिं प्रतिबध्नाति ॥ ७ ॥

रथचक्रचितं चिन्वीत भ्रातृव्यवानिति परिमण्डलो भवति ॥ ८ ॥

रथचक्रवद्वर्तुलत्वेन चीयत इति रथचक्रचित् । यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमण्डलां कृत्वेत्यापस्तम्बबौधायनौ ॥ ८ ॥

द्रोणचितं चिन्वीतान्नकाम इति द्वयानि तु खलु द्रोणानि चतुरश्राणि परिमण्डलानि च तत्र याथाकामी ॥ ९ ॥

द्रोणे हि धान्यं भरन्त्यतो धान्यस्थानसहितमन्नं प्राप्नोति ॥ ९ ॥

पश्चात्त्सरुर्भवत्यनुरूपत्वायेति ॥ १० ॥

विज्ञायत इति शेषः ॥ १० ॥

समूह्यं चिन्वीत पशुकाम इति समूहन्निवेष्टका उपदधाति ॥ ११ ॥ दिक्षु चात्वालात्खात्वा तेभ्यः पुरीषमभ्यूहतीत्येकेषाम् ॥ १२ ॥

समूहमर्हतीति समूह्यः ॥ ११ ॥ १२ ॥

परिचाय्यं चिन्वीत ग्रामकाम इति मध्यमा[१] स्वयमातृण्णां प्रदक्षिणमिष्टकागणैः परिचिनोति

१ घ चतुरश्रं ।

॥ १३ ॥ सपरिचाय्योपचाय्यं चिन्वीत ग्रामकाम इति परिचाय्येनोक्तः ॥ १४ ॥

मध्यमा स्वयमातृण्णा प्रदक्षिणमिष्टकागणैः परिचिनोति स परिचाय्य इत्यापस्तम्बोक्तम् । परिचाय्य चिन्वीत ग्रामकामो ग्राम्येव भवतीति श्रुतेः । उपचाय्यं ग्रामकामस्य मध्यमाया चितौ मध्यमा स्वयमातृण्णा प्रदक्षिणमिष्टकागणैः परिचिनोति । नात्र दिश्या. क्रियन्ते ॥ १३ । १४ ॥

श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति चतुरश्रः परिमण्डलो वा । यथा महापैतृकी वेदिरित्येकेषाम् । त्र्यश्रिरित्येकेषाम् ॥(ख० २०)॥१५॥

श्मशानमिव चीयत इति श्मशानचित् श्मशानं शवदहनम् । य कामयेत पितृलोके भूतिः स्यादिति । पितरो बर्हिषदादयस्तेषां स्थाने भूतिरस्य भवतीति । स तु मण्डलश्चतुरश्रो वा । व्याख्याता चातुर्मास्येषु महापैतृकी वेदि. । अन्यत्स्पष्टम् । तदेवं काम्यचयनानि समापितानि । १५ ॥

तापश्चितं व्याख्यास्यामः ॥ १६ ॥

व्यक्तं वक्ष्याम इत्यर्थ. ॥ १६ ॥

संवत्सरं दीक्षितो भवति ॥ १७ ॥

द्रोणचितस्तु भवतीति सर्वस्या अस्या भूमेर्देशे तपश्चिन्वन्तीति तपश्चितः कक्षीवदादयस्तैर्दृष्टस्तापश्चितः, तस्मिन्नग्नौ संवत्सरदीक्षा नियमेन भवतीति ॥ १७ ॥

संवत्सरे पर्यागते राजानं क्रीणाति ॥ १८ ॥

प्रायणीयप्रभृतिकर्म प्रतिपद्यत इत्यर्थः ॥ १८ ॥

पुरस्तादुपसदामाग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालं संवत्सरमुपसदोऽनुपसदमग्निं चिनोति ॥ १९ ॥

उपसदोऽपि न प्रवर्ग्या. । यच्चतुर्विंशतिकृत्व· प्रवर्ग्यं प्रवृणक्ति परत्वश्रुतेर्भरद्वाजमताच्च । भाष्यकारस्तु—प्रवर्ग्योऽपि संवत्सरमेवेति पुरस्तादुपसदां मदन्तीभिर्मार्जने कृते पञ्चहविष्कमाग्नेय ऐन्द्रो वैश्वदेवो बार्हस्पत्यश्चरुर्वैष्णवस्त्रिकपाल इति । तस्यास्तदेव प्रस्तरपरिधिभिस्तीर्णपक्षे या. कृत इ(मि)तिवचनात् । अस्तीर्णपक्षेऽन्यच्चतुरश्चतुरो मासानेकैकेनोपसन्मन्त्रेण हूयते । उपसदमुपसदं कृत्वाऽग्निचयनं यथासंभवमिष्टकाः ॥ १९ ॥

प्रवर्ग्येण प्रचर्योपसदा चरन्तीत्येष विधिरुच्यते—

द्वौ द्वौ मासावेकैका चितिश्चतुर उत्तमा त्रीन्मा-
सांश्चतुस्तनानि व्रतानि भवन्ति । एवं त्रिस्त
नानि द्विस्तनानि एकस्तनानि ॥ २० ॥

द्वौ द्वौ मासावेकैका चितिरुपधीयते, यथासंभवन्तीष्टका, चतुरस्तु मासानुत्तमा चितिः । पञ्चमी चतुस्तनेन त्रीन्मासानेव त्रिस्तनादीनि ॥ २० ॥

यदृषीणामाग्नेयं सूक्तं तेन संवत्सरं चिन्वीत
॥२१॥यानि दशतयीष्वाग्नेयानि सूक्तानि तेषामे-
कैकेन सूक्तेनैकैकामिष्टकामुपदधाति ॥ २२ ॥
सूक्तपरिमाणा नानामन्त्राः । यथार्थं लोकंपृणाः ॥२३॥

ऋषीणामाग्नेयेन संवत्सरमुपधानं कुर्वन्नास्ते श्रुतिरेवं निर्णयं करोति—यदृषीणामार्षेयेषु । आग्नेयमग्निदेवत्यं, यद्येषा याज्ञि(ज्ञ)सेनी चितिरिति चितित्वसामान्यात् । चितेश्चितेर्ना-नामन्त्राणां स्थाने पूर्वोक्तेन न्यायेन भवन्ति लोकंपृणाश्च । लोकंपृणाना स्थाने यथार्थ मिति । अथ पुरीषमिति प्रकृतिक्रमेणैव पञ्चस्वपि चितिषु ॥ २१ ॥ २२ ॥ २३ ॥

आवृत्तासूपसत्सु तृतीये संवत्सरेऽभिजिता
विश्वजिता वा यजेत । सहस्रदक्षिणाः सर्ववे-
दसं व्याख्यास्यामः । परिवासं परिवासम् ॥
॥ (ख० २१) ॥ २४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्नेऽष्टमः पटलः ॥

इति सत्याषाढहिरण्यकेशिसूत्रे द्वादशप्रश्नः ॥

तृतीये तु संवत्सरे जाते, अभिजिद्विश्वजिद्वा । पर्वणि (यजेत) श्रुत्यन्तरात्सर्ववेदसं विश्वजित्संयोगेनेति न्याय. । तत्र सर्ववेदसमुपरिष्टा नाभिजितिवत्संच्छ(दि) विप्रभृति च विश्वजिद्धर्मा. । सर्ववेदसदक्षिणाऽस्येति च्छन्दोगब्राह्मणम् । अभिजिद्विश्वजितोः सर्व-वेदसधर्मा इति भाष्यकृत् । अभ्यास प्रश्नसमाप्त्यर्थ. ॥ २४ ॥

संक्षिप्य नानाविधयाऽल्पशब्दगैः सूत्रै. समर्थैरतिगूहिताशयै ।
न्यायाननेकान्तु वितन्वता जडोऽप्ययह स्वसूत्रार्थविवेचक कृतः ।
तस्मै नमोऽस्तु हिरण्यकेशिने दुर्ग्राह्यवेदाम्बुधिपारदृश्वने ।
स मे स्वसूत्रार्थगतिं कृपाम्बुधिर्दिशत्वजस्रं जडता प्रणोदयन् ।

प्रयोगवैजन्त्यास्तु मालायाः सूत्रसंस्थितेः ।
न्यायसूत्रस्येह कृतो निर्णय कौस्तुभो मणि ॥
मध्यगो यज्ञवपुषस्तुष्ट्येऽस्तु मयाऽर्पित ।
गृह्णाति हि किमप्येष भक्तैर्यद्यत्तत कृतम् ।

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां द्वादशप्रश्नेऽष्टम पटल ॥

इति द्वादशप्रश्नव्याख्या समाप्ता ।

अथ त्रयोदशप्रश्नप्रारम्भ ।

तत्र प्रथम पटल ।

विनेययुक्ताखिलसिद्धवर्गलसच्चिदानन्दसुखं मुनीन्द्रम् ।
नमामि सूत्रार्थविदे मुदाऽह हिरण्यकेश्याख्यगुरु कृपाब्धिम् ॥
गुरु गणपति नौमि जन्मज्ञानप्रदौ तथा ।
सह गौर्या महेशान नौमि विष्णु च पद्मया ॥
एकादशद्वादशयोर्व्याख्यातश्चयनक्रतुः ।
वाजपेयराजसूयौ वक्ष्येते तु त्रयोदशे ॥

एवं तावत्सर्वेज्योतिष्टोमः (स० श्रौ० १-१) इति सूत्रकृन्न्यायसूत्रे प्रदर्शितः ' सर्वकामोऽग्निष्टोमः ' (स० श्रौ० ७-१) इत्यादिना सूत्रकारेणाग्निष्टोमशब्देन वक्ष्यमाणसर्वैकाहाहीनसत्रमूलप्रकृतिभूताग्निष्टोमसस्था व्याख्यायोक्थ्य. षोडश्यतिरात्रोऽप्तोर्यामश्चाग्निष्टोमस्य गुणविकाराः (स० श्रौ० ७-१८) पञ्च सस्थाश्च व्याख्याता । अथेदानीं षोडशिगुणविकारभूतामवशिष्टामेका वाजपेयसस्था व्याख्यातु शिष्यावधानाय प्रतिजानीते—

शरदि वाजपेयेन यजेत ॥ १ ॥

वाजो देवान्नरूप. सोम पेयो यस्मिन्यागे स वाजपेय इत्येकं निर्वचनम् । यस्मादेतेन यज्ञेन देवा वाजं फलरूपमन्नमाप्तुमैच्छन्तस्मादन्नरूपो वाजः पेयः प्राप्यो येन स वाजपेय इत्यपरं निर्वचनम् । वाजपेय इति कर्मनामधेयम् । न हि द्रव्ये गुणे वा प्रसिद्धिरस्य । स च शरदि भवति । शरदि वाजपेयेन यजेत, इति सूत्रान्तरेऽपि वचनात् ।

अत्र संभारानाह बौधायन —' वाजपेयेन यक्ष्यमाणो भवति । स उपकल्पयते कृष्णाजिनꣳ सु(सौ)वर्णर(रा) जतौ च रुक्मौ बस्ताजिनꣳ शतमानꣳ हिरण्यꣳ सप्तदश सुवर्णानि कृष्णलानि हिरण्यपात्रं मधो पूर्णमौदुम्बरीꣳ रथचक्रꣳ सप्तदशारꣳ सप्तदशफलका च श्रिति यूप च तूपर चतुरश्रिꣳ सप्तदशारत्नि गोधूमकलापीमुष्णीषं नैवारꣳ सप्तदशशरावꣳ सप्तदशोषपुटान्सप्तदश वायव्यानि सप्तदश पृथुबुध्नानुपयामान्रतं च वाल च सप्तदश निष्कान्सप्तदश वसनानि सप्तदश वासोभारान्सप्तदश रथान्सप्तदश दुन्दुभीन्सप्तदश हस्तिन सप्तदश दास्यः सप्तदशानाꣳसि युक्तानि सप्तदश गवाꣳ शतानि वयसो वयसो वा सप्तदश सहस्रं वा । तस्मिन् हि सर्वाणि वयाꣳसि भवन्ति । चतुर्विꣳशति पशूनेकपञ्चाशतमश्वान्रवादिरी वितृण्णी वधैर्व्यूताम् । प्रज्ञाता आग्निष्टोमिकाः सभारा. । स ग्रीष्मस्य जघन्य ह सु पुरस्तादाषाढ्यै पौर्णमास्यै दीक्षते ' (बौ० श्रौ० ११–१) इति । वाजपेयौ द्विप्रकारौ, आप्तवाजपेयः कुरुवाजपेयश्च । अस्मिन्क्रतौ नाग्निचयनम् । चिन्वीत वाजपेयेऽग्निमिति बौधायन । न चिन्वीतेति शालीकि. (बौ० द्वै० सू० २२–१२) इति प्रतिषेधवचनात् । केचिदत्रापीच्छन्तीति च्छन्दोगमताच्चयन कार्यमिति । ज्योतिष्टोमसंस्थाभूतोऽपि वाजपेय इति वैखानसोक्ते· । आपस्तम्बेन तु क्रत्वन्तरत्वेन वाजपेय उक्त. । क्रत्वन्तरत्व वाजपेयस्य द्विप्रकारत्व च । तत्राऽऽप्तवाजपेय. प्रथम उच्यते ॥ १ ॥

तत्र वाजपेयेऽधिकारिविमुन्नयति—

ब्राह्मणो राजन्यो वा ॥ २ ॥

यतो बृहस्पतिनाऽनुष्ठित , यतो देवाना म ये बृहस्पतिर्ब्राह्मणजात्यभिमानी । ब्राह्मणबृहस्पत्योर्ब्रह्मसबन्धादैकरूप्यम् । ब्रह्मा·ीति वे· वा ब्राह्मण इति व्युत्पत्ते· । इन्द्रेणाप्यनुष्ठित । यतो देवाना म य इन्द्र क्षत्रियजात्यभिमानी । इन्द्रराजन्ययोः क्षत्रसबन्धादैकरूप्यम् । क्षत्र नाम बल तत्सद्भावादुभयो , अतो मनुष्येष्वपि ब्राह्मणराजन्ययोरेवाधिकारो नतु वैश्यस्य । अत एवाऽऽपस्तम्ब आह—'शरदि वाजपेयेन यजेत। ब्राह्मणो राजन्यो वार्द्धिकाम ' (आप० श्रौ० १८–१) इति ॥ २ ॥

तस्य षोडशिना कल्पो व्याख्यातः ॥ ३ ॥

तस्य वाजपेयस्य षोडशिवत्कल्पो विधिः । षोडशिनो विद्यमानत्वात् । प्रयोजनं सोमविक्रयकाले—शुण्ठ्याऽवीलोभकर्ण्या सोम क्रीणाति, इति । अथवा—सप्तदशदीक्षापक्षे शरदि दशम्यामुपक्रम । त्रयोदशदीक्षापक्षे चतुर्दश्यामुपक्रम । उभयो पर्वणो.

१ क. श्रुतिमिति पाठः ।

सुत्या भवति । अथ प्रातरग्निहोत्रं हुत्वाऽऽस्तेन वाजपेयेन यक्ष्य इत्युक्त्वा प्रजापतिमवाप्नवानीत्युक्त्वा फलनिर्देश । ऋद्ध्यर्थमिति वा । नित्यो वा नित्यवदेके समामनन्ति, इति वचनात् । नित्ये च नित्यवत्फलनिर्देश । अन्नार्थमिति वा । विद्युदसि सोमप्रवाकवरणादि षोडशिवत् । सोमक्रयणकाले शुण्ठ्या क्रयणम् । एषेति निर्देश[1], तस्या आत्मा भूयो वाऽत, इति सोमविक्रयिणोक्ते । एकोनशतेन ते क्रीणानीति विशेषः । अस्मे ज्योतिरित्यादि ॥ ३ ॥

सप्तदशः सर्वो भवति ॥ ४ ॥

सर्वस्तोमानि सप्तदशस्तोमानि भवन्ति ॥ ४ ॥

अथवा फलसंयोगश्रुतेर्वा कल्प्यं फलमाह—

प्रजापतिमाप्नोति ॥ ५ ॥

प्रजापतिमाप्नोतीति । प्रजापतिस्थानमाप्नोति । प्रजापतिर्वा भवति ॥ ५ ॥

सप्तदश दीक्षाः। तिस्र उपसदः । एकविंशतिं(शीं) प्रसुतः ॥ ६ ॥

सोमो भवतीति प्रतिपद्यारम्भ. । एकविंशतिरात्र प्रत्यभिषुत. सोमो भवतीति त्रित्वविधानाच्चोपसदा नाग्निचित्येत्यर्थ. । छन्दोगमतात्तस्मिन्पक्ष एकविंशीमित्यनुवादो ब्राह्मणपाठात् । तस्य त्रयोदश दीक्षास्तिस्र उपसद. सप्तदश्या प्रसुत. । अपि वा सप्तदश दीक्षास्तिस्र उपसद एकविंशत्या प्रसुत. । अपि वा तिस्र एव दीक्षास्तिस्र उपसदः सप्तम्या प्रसुत. (बौ० श्रौ० ११-१) इति बौधायनसूत्रम् । एकविंशीमिति वा कल्पान्तरम् । तथा चतुर्दश दीक्षा: षडुपसद एकविंशीं प्रसुतो नाग्निचयनमेव॥ ६ ॥

सप्तदशारत्निर्यूपो बैल्वश्चतुरश्रः खादिरः पालाशो वा गोधूमपिष्टचषालोऽपि वा तूपरः ॥ ७ ॥

सप्तदशारत्निर्बैल्वो यूप. कार्य. । खादिरो वा पालाशो वा विकल्पः । औध्वंश्चषालोऽपि चतुरश्रो नाष्टाश्रिः । प्रतिदिशं चतस्रोऽश्रय. । गोधूम चषालमिति चोभयथा श्रुत्यर्थोपपत्तेर्विकल्पः । गोधूमपिष्टचषाल तु बहुप्राकृत लभ्यतेऽश्रियादिकम् । अथवा— प्रवर्ग्येण प्रचर्योपसदा चरन्तीत्यादि यूपकाले खादिरं यूप करोति, बैल्व वा सप्तदशारत्निर्भवति चतुरश्रिः, गोधूमपिष्टेन चषाल. । नास्त्यतिरिक्त तूपर इति श्रुतेः । यूपस्य स्वरवस्त्रयोविंशति । एक एव यूप. । केचित्क्रतुपशूनामेकमेव स्वरुं कुर्वन्ति । तदैकविंशतिरेव । यदा प्रतिपशु तदा त्रयोविंशति. ॥ ७ ॥

यत्प्रागुपसद्भ्यस्तस्मिन्कृते प्रतिप्रस्थाता सुरायाः कल्पेन परिस्रुतं सुरां संदधाति ॥ ८ ॥

---

[1] ख. सोमक्रयकाले ।

या ते अग्ने रुद्रिया तनूरिति मार्जनान्ते कृते प्रतिप्रस्थाता सुरा सदधाति, यज्ञार्थं सुरा कल्पयतीत्यर्थः। लौकिकी वा पयोग्रहा वा सौत्रामणीवत् । कलौ मद्यपाननिषेधात् । सौत्रामणीवदैष्टिकी वा सौमिकी वा । ऐष्टिकी सौत्रामण्या प्रपञ्चिता तद्वदिह सौमिकी क्रि(क्र)यादिधर्मयुक्ता। ऐष्टिकी सोमे(सीसे)न क्लीबादि त्यादि तदानीमेव कृत्वा सुरेष्ट्यादिसधानान्तम् । अत्र प्रजापतये त्वा जुष्ट निर्वपामीति क्रमादि सौत्रामणीवत् । लौकिकी वा । सौमिकीपक्षे क्रयादिधर्मा नात्यलुप्ता भवन्ति । सुराप्रकृतिद्रव्ष्या (तिवाद्धि शष्प।)र्दा सोमग्रहैकवाक्यत्वात्सोमग्रहाश्च सुराग्रहाश्चेति श्रुते. । वेदिमानकाले द्विपदप्रक्रमेण वेदिमानम् । सदो विमानकाल ऐन्द्रमसीति पञ्च च्छदींषि, विश्वजनस्य च्छायेति पञ्च, इन्द्रस्य सदोऽसीति सप्त, वैष्णवं खनामीत्येकवद्धरवमन्त्रा. । खनने कृ ते न(रे)त्र पांसुभिः प्रतिप्रस्थाता दक्षिणस्य हविर्धानस्याधस्तात्पश्चादक्ष सुराग्रहार्थं द्वितीय चतुरश्र खर करोति । चात्वालाद्दक्षिणियानुपवपतीत्यादि ॥ ८ ॥

रशनाकाले सप्तदशभिर्वासोभिर्यूपं परिवेष्टयति ॥ ९ ॥

अग्नीषोमीयस्य पशोः काल आगते, अणिमत. स्थविमत प्रवीयेति कृत्वा सप्तदशवासोभिर्यूप परिवेष्टयति । प्रस.रयतीत्यर्थ. । अग्निष्ठस्य द्वाभ्या रशनाभ्या परिव्ययणमिति केचित् ॥ ९ ॥

अग्नीषोमीयस्य पशुपुरोडाशं निरुप्य देवसुवा-
हवींष्यनुनिर्वपति—अग्नये गृहपतय इति यथा
समाम्नातम् । पशुपुरोडाशस्य देवसुवां च हवि-
षां समानं स्विष्टकृदिडम् ॥ १० ॥

एतत्तन्त्रं भवत्येव ॥ १० ॥

अथ कर्मादौ सावित्रहोममाह—

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति
सवनादौ सवनादौ जुहोति ॥ ११ ॥

वीप्सया सर्वकर्मादौ कर्तव्यत्वमभिधीयते । येषा कर्मणामादौ सावित्रहोम कर्तव्यस्तानि कर्माणि ब्राह्मणेन संगृहीतानि–'सवने सवने जुहोति' (तै० ब्रा० १–३–९) इति । तत्तत्कर्मादौ बौधायनेनैवोदाहृतम्—'दीक्षणीया निर्वप्स्यन्सावित्र जुहोति । दीक्षाहुतीर्होष्यन्सावित्रं जुहोति । प्रायणीया निर्वप्स्यन्सावित्र जुहोति ' (बौ० श्रौ० ११–२) इति । स्वदाति नः स्वाहेत्यन्तः । सविता देवता ॥ ११ ॥

हिरण्यमालिन ऋत्विजः सुत्येऽहनि प्रचरन्ति ॥ १२ ॥

महारात्रे बुद्ध्वाऽऽचम्य सदस्यवर्जमृत्विजो हिरण्यमालिनो भवन्ति । यजमानोऽपि

हिरण्यमालीति केचित् । केचित्सदस्यस्य नेच्छन्ति । सदस्यो नित्यः । सदस्यः सप्तदशः पृथग्वृणीतेति च्छन्दो वचनात् ॥ १२ ॥

पात्रसंसादनकाले यथार्थं पात्राणि प्रयुनक्ति । ऐन्द्रस्यातिग्राह्यपात्रस्य स्थाने पञ्चैन्द्राण्यतिग्राह्यपात्राणि प्रयुनक्ति ॥ १३ ॥ (तेषां पूर्वेण) तेषामैन्द्रेणातिग्राह्यपात्रेण कल्पो व्याख्यातः ॥ १४ ॥ षोडशिपात्रं प्रयुज्य सप्तदश प्राजापत्यानि सोमग्रहपात्राणि प्रयुनक्ति ॥ १५ ॥ तेषांषोडशिपात्रेण कल्पो व्याख्यातः । पश्चादक्षं प्रतिप्रस्थातोपयामानि सप्तदश सुराग्रहपात्राणि क्रतुकरणो यथाऽतिरात्रे सोमग्रहकाल उपयामगृहीतोऽसि नृषदं त्वेति पञ्चभिरैन्द्रस्यातिग्राह्यस्य स्थाने पञ्चैन्द्रानतिग्राह्यान्गृह्णीयात् ॥ १६ ॥ तेषामैन्द्रेणातिग्राह्येण कल्पो व्याख्यातः । षोडशिनं गृहीत्वा सप्तदश प्राजापत्यान्सोमग्रहान्गृह्णाति ॥ १७ ॥ तेषां षोडशिना कल्पो व्याख्यातः । कुविदङ्गेति सर्वेषामेका पुरोरुगया विष्ठा जनयन्कर्वराणीति ॥ (ख० १)॥ उपयामैः प्रतिप्रस्थाता सप्तदश सुराग्रहान् । विपरीते ग्रहण्यावेके समामनन्ति ॥ १८ ॥ व्यतिषङ्गं गृह्णीतः पूर्वोऽध्वर्युरपरः प्रतिप्रस्थाता । पुरोक्षं सोमग्रहान्सादयति । पश्चादक्षं सुराग्रहान् ॥ १९ ॥

पात्रसंसादनकाले प्राप्ते, ऐन्द्रातिग्राह्यपात्र पात्रप्रयोगात् । ऐन्द्र प्रयुता(ज्य) तस्योत्तरत. पञ्च पात्राणि प्रयुनक्ति । तेषा कल्पो व्याख्यातो वृक्षस्थानादिः सौर्यातिग्राह्यपात्रप्रयोगादि. । षोडशिपात्रं प्रयुज्य प्रजापतिदेवत्यानीति सकल्प्य, हो(सो)मग्रहार्थानि प्रयुनक्ति[1] । तेषा मतकल्पे वृक्षनियमश्चतुरश्रता च । अपरास्मिन्खरे सुराग्रहार्थे प्रयुनक्ति सप्तदशोपयामान्यूर्ध्वपात्राकृतीनि शुल्बकोशाकृतीनि तेजन्तरकृतीनि वा प्रयुनक्ति । ग्रहं गृह्णाति परिप्लवया प्रयोगादि ऐन्द्रातिग्राह्यातिग्रहणात्कृत्वा–उपयामादीनि गृह्णाम्यन्तराणि त्रीणि यजूंषि ग्रहणार्थानि । ये ग्रहा अपांरसमुद्वयसमिति द्वे उपरिष्टादुपयामया, उप-

१ क. तेषा मते°। ख. तेषामग्र क°।

यामगृहीतोऽसीत्येवमन्ते एवमपञ्चभिर्मन्त्रैः पञ्चातिग्राह्यान् गृह्णाति । एष ते योनिरिन्द्राय त्वेति गृहीत्वोपसादयति । तेषां कल्पो ग्रहावकाशाद्वि(द्वै)ऐन्द्रवत् । षोडशिनं गृह्णाति अया विष्ठा इति गृह्णामीत्यन्तया । (एव) सप्तदशापि गृह्णाति । एष ते योनिः प्रजापतये त्वेति सादयति । सोमग्रहा इति ते नाम तेषां कल्पे सानुमन्त्रणादि षोडशिवत् । कुवि. दङ्गेति गृह्णाति । अपरस्मिन्सुराग्रहार्थे खरे उपयामैः पूर्वेच(वैश्च) तैः पात्रैः सुराग्रहा-न्गृह्णाति । कुविदङ्गेत्यनुपयामया । ओषधिविकारत्वेऽपूर्वत्वे च । सोमविकारत्वे सोप-यामया विपरीतेनाऽऽमनन्ति । कुविदङ्गेति सोमग्रहणात् । अया विष्ठा इति सुराग्रहाणा-मुपयामसादने सोमग्रहेष्वेव । नौषधिविकारत्वेऽपूर्वत्वे च सुराग्रहाणां सोमविकारत्वं तूपयामसादनं च तन्मन्त्रवद्भवति व्यतिषङ्ग । गृह्णात्यध्वर्युः सोमग्रहान्प्रतिप्रस्थाता सुराग्रहान् सप्तदशापि पूर्वोऽध्वर्युः पश्चात्प्रतिप्रस्थाता । एव नियमः परोक्ष सोमग्रहा नित्यानुवादः । यथायतनं ब्राह्मणपठितत्वात् ॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥

पशुकाले त्रीन्क्रतुपशूनुपाकरोति । मारुतीं पृश्निं वशामुपाकरोति । सारस्वतीं च । मेषीमपन्नद-तीम् । मेषमित्येकेषाम् । सारस्वतीं च मेषम् ॥ २० ॥

पशुकाले प्राप्ते त्रीन्क्रतुपशूनुपाकृत्य, आग्नेयमैन्द्राग्नमैन्द्र वृष्णिमुपाकृत्य समुच्चय-दर्शनान्नाऽऽग्नेयं पशुमिति सूत्रान्तरे । मारुती वशा वन्ध्या गौः । सरस्वतीदेवता च मेषी ' वाग्वै सरस्वती ' (तै० ब्रा० १–३–४) इति वाक्यशेषात् । अपन्नदतीमप-नितदन्ताम् । प्राग्वा मारुत्याः सारस्वती मेषी ' सारस्वत्याऽतिरात्रम् ' (तै० ब्रा० १–३–४) इति । सारस्वत चैकरूप सरस्वान्देवता शाखान्तरे वाक्यशेषात् । ताने-तान्पशुविधीन्बौधायन उदाहरति—आश्विन गृहीत्वा षड्रशना आदाय यूपमभ्यैति स्वर्वन्तं यूपमुत्सृज्याथैनान्पशूनुपाकरोति—आग्नेयमैन्द्राग्नमैन्द्र मारुतीं वशामिति । आपस्तम्बस्त्वाग्नेयादीनां चोदकप्राप्तानामनुवाद मत्वा मेषीमारुत्योर्विधिमुदाहरति—'पशु-काले त्रीन्क्रतुपशूनुपाकृत्य मारुतीं वशामुपाकरोति । सारस्वतीं च मेषीम्' (आप० श्रौ० १८–२–१२) इति ॥ २० ॥

सप्तदश प्राजापत्यान्पशूनुपाकरोति ॥ २१ ॥

वाजपेये प्राजापत्याः पशव सह क्रियन्ते तत्रोपाकरणानियोजनादयः संनिपातिनः प्रतिपश्वावर्तनीयास्तेषां चाऽऽवृत्तिर्नै(नै)कस्य पशो कार्त्स्न्येन कृत्वाऽपरस्यापि तथैव क्रियत इत्येवम् । किं तर्हि सर्वेषां यतः कुतश्चित्पशोरारभ्य कृत्वा ततो नियोजनमिति वक्ष्यामः । तत्रोपाकरणं यतः कुतश्चित्पशोरारभ्य यत्र क्वचित्समाप्यते । नियोजनादौ

तु संदेहः किं तत्राप्यनियम उत येन क्रमेणोपाकरणं प्रवृत्तं स एवोत्तरत्रापीति नियामकाभावात्प्रथमवद्द्वितीयादावप्यनियमः ।

प्रवृत्त्या वा नियम्येत प्रत्यासत्तेरनुग्रहात् ।
अन्यथा व्यवधानं स्यादननुज्ञाताधिकैरपि ॥

एकैकस्य हि पशोः पदार्था मिथः प्रत्यासन्नाः कर्तव्याः । वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति वचनावगतपश्वन्तरसाहित्यबलादन्यदीयैः षोडशिभिः पदार्थैर्व्यवधिमनुजानाति नाधिकैः । प्रवृत्त्या च क्रमनियमे तावद्भिरेव व्यवधानं भवत्यन्यथाऽधिकैरपि स्यात् । तस्मात् प्रवृत्त्या नियमः ॥

वाजपेये प्राजापत्याः पशवः 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति' इत्येकस्मिन्काले विहिताः सह प्रयोक्तव्याः । तेषामारादुपकारकाणां तन्त्रं द्रव्यसंस्कारास्तूपाकरणनियोजनादयः प्रतिपशु भेदेन कर्तव्याः । ते किमेकैकस्य कात्स्न्र्येन कृत्वा ततोऽपरस्य कर्तव्याः किंवोपाकरणं सर्वेषां कृत्वा ततो नियोजनमिति ।

तत्र—

एकैको हि पशुः स्वाङ्गान्यव्यपेतान्यपेक्षते ।
चोदकोऽप्येवमेवातः काण्डानुसमयो भवेत् ॥

प्रयोगवचनावगतसाहित्यबलेन ह्येकैकस्य पशोर्धर्माः संश्लिष्टाः कर्तव्याः प्रकृतौ चोपाकरणादीनामानन्तर्यं कृतमिहापि प्रतिकर्मावसायिना चोदकेन प्रतिपशु प्राप्यते । अत एकस्योपाकरणादिकं सर्वं गुणकाण्डं कृत्वा ततोऽपरस्य कर्तव्यम् । वाचनिकं तु साहित्यमारादुपकारकतन्त्रत्वादप्युपपन्नम् ।

उच्यते—

वचनेनैककालत्वं पशूनामिह चोदितम् ।
न तत्प्रयोगवचनाच्चोदकाद्वाऽपि बाध्यते ॥

काल्पनिकं प्रयोगवचननिबन्धनं साहित्यं चोदकं चानुमानम् । प्रत्यक्षवचनेन तु वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति, इत्येककालप्रयोगः पशूनामवगम्यते । यस्मिन्नेव क्षणे एकस्योपाकरणं कर्तव्यमापतति तस्मिन्नेवापरस्योपाकरणं कर्तव्यं सदशक्यतया केवलं न क्रियते । द्वितीये तु क्षणे न कश्चिद्धेतुर्येन पश्वन्तरं नोपाक्रियेतातः प्रथमं पदार्थं सर्वेषां कृत्वा ततो द्वितीयादिः कर्तव्यः । एवं दर्शपूर्णमासादिष्वनेकप्रधानसमवाये पदार्थानुसमय एव न्यायो न तु काण्डानुसमय इति स्थितम् । यत्र तु प्रधानविरोधो भवति पदार्थानुसमये तत्र काण्डानुसमय एवेति । यथाऽश्वप्रतिग्रहेष्टौ शते सहस्रे वा पुरोडाशेषु श्रप्यमाणेषु यदि सर्वेषामधिश्रपणं कृत्वाऽऽद्यस्योद्वासनं क्रियेत ततः स दह्येत । तस्मात्तत्र प्रधानविरोधेन न पदार्थानुसमयः । (९-२-२१) ॥२१॥

तेषु पशुषु गुणद्वयं वाक्यभेदमङ्गीकृत्य विधत्ते—

श्यामा तूपरा एकरूपा इव भवन्ति ॥ २२ ॥

पशूनामेकरूपत्वं नामैकविधशृङ्गपुच्छादिभिर्युक्तत्वम् । एवमिव हि प्रजापतिः समृद्धतौ (तै० ब्रा० १-३-४) इति शेषात् । प्रजापतिशब्देनात्रेश्वरस्य हिरण्यगर्भशरीराद्यभिव्यक्तेः प्रागवस्था विवक्ष्यते । सा चावस्था श्यामेव भवति । 'तम आसीत्तमसा गूढम्' इति श्रुते । जगद्रूपस्य नानात्वस्यानुत्पत्तेरेकरूपत्वम् । 'एकमेवाद्वितीयम्' इति श्रुते. । पशूना जगदीश्वरेण साम्ये सति समृद्धिर्भवति ॥ २२ ॥

पर्यग्निकृतानाꣳ सारस्वत्यन्तान्पूर्वानालभन्ते । सारस्वतप्रभृतीनुत्तरान्धारयन्ति ॥ २३ ॥ सर्वेषां प्रतिपशु बर्हीꣳषि वपाश्रपण्यः कुम्भ्यो हृदयशूलाः प्लक्षशाखाश्च तन्त्रमग्नेर्हरणमध्रिगुरुत्तमप्रयाजस्तथा पूर्वः परिवप्योऽतन्त्रः संज्ञप्तहोमो रशनामुद्‌सनमुत्तरः परिवप्यः । वपाश्रपणीनामनुप्रहरणमभिहोमो मार्जनं वग्दानं च ॥ २४ ॥

पर्यग्निकृतानामाग्नेयमैन्द्राग्नमैन्द्र मारुतमारस्वत्यन्तान्पशून्पूर्वानालभन्ते । त्रिवृता यूपरशना परिवीयेत्येवमादिपाठ्यमानहोमेषु कृतेषु प्रतिनिवृत्ते चाऽऽग्नीध्रे । सारस्वत्यन्ताना ये बध्यमानमित्येवमादिसारस्वतादीनष्टादश धारयन्ति यूपदेशस्थान एव धारयन्ति । अध्रिगु प्रतिपशो, तयेति लिङ्गात् । प्रतिपशुरिति सूत्रान्तरात् । क्रतुपश्वर्थ आरम्भः, अनैकादशिनप्रकृतत्वात् ।

अत्रेयं पद्धति.—अग्नीदग्नीन्विहर प्रतिप्रस्थाता पशुभिरेहि इति आश्विनग्रहं गृहीत्वा त्रिवृता यूप परिवीय दिव· सूनव स्थेति स्वरूणा सहाऽऽदाय तन्त्रेण गूहन सर्वस्वरूणाम् । अन्तरिक्षस्य सानाववगूहामीत्यवगूहनम् । अथ स्नपन पशूनाम् । आग्नेयमुपाकृत्य बर्हिषि प्रज्ञाते निदधाति । सैव प्लक्षशाखा सर्वत्र । अन्ये बर्हिषी । ऐन्द्राग्नम्, ऐन्द्राग्नपशुमुपाकृत्य, ऐन्द्र वृष्णिमुपाकृत्य वशा वन्ध्या गौश्छागी वा मरुद्भ्यस्त्वा जुष्टमुपाकरोमीति गोप्रतिनिधित्वेन च्छागवन्ध्या तदभावे प्रसूता उस्रा छागा मेषी इत्यन्योन्यस्य प्रतिनिधय इति बौधायन. । (गोप्रतिनिधित्वेन च्छागवन्ध्या) गोशब्दे नोस्राशब्देन वा निगमा: । आश्वलायनसूत्राच्च । मेषी अपन्नदती, सरस्वत्यै त्वा जुष्टमुपाकरोमि (मेष वा सरस्वत्यै त्वा जुष्टमुपाकरोमीति ।) प्राजापत्याः शृङ्गहीनाः श्यामवर्णास्तान् । प्रजापतये त्वा जुष्टमुपाकरोमि, इति क्रमेण सप्तदशाना प्रागेवोपाकर-

१ ख एव

णताप्लवपत्रे(णात्पत्रे)षु अाग्नेयैन्द्राग्न इत्यादि प्राजापत्यानां प्रथमो द्वितीयतृतीय इत्यादि चिह्नानि कृत्वा पादबद्धयो(देषु बर्हिर्षो)पाकरणम्। एव कुम्भीशूलवपाश्रपणीना चिह्नं च। उपाकृत्य पञ्च जुहोति। प्रजानन्तः सुवर्गं याहि पथिभि, ओषधीषु प्रतितिष्ठ शरीरैः, येषामीशे, निष्कर्ता—इमे यज्ञियं भागमेतु ये बध्यमानमनुबध्यमाना, य आरण्याः प्रमुञ्चमाना उपाकृताञ्छशमाना यदस्थाज्जीवन्देवानामपि यन्तु पाथ। अग्नेर्जनित्रमसीत्यभिहोमान्तम्। सावित्रेण रशनामादायेत्यादि अग्नये त्वा जुष्ट नियुनज्मि, इन्द्राग्निभ्या त्वा, इन्द्राय त्वा जुष्टं नियुनज्मीति त्रयाणामुत्तरतो नियोजनम्। दक्षिणत इतरेषाम्। मरुद्भ्यस्त्वा जुष्ट नियुनज्मि सरस्वत्यै त्वा (सरस्वते त्वा जुष्टं) प्रजापतये त्वा जुष्ट नियुनज्मीति सप्तदशाना नियोजन क्रमेण, सर्वत्र धर्षा मानुषात्। (न) (धर्मानुष्ठानम्।) अद्भ्यस्त्वौषधीभ्य प्रोक्षाम्यग्नये त्वा जुष्टं प्रोक्षामीत्यादि। इन्द्राग्निभ्या त्वा, इन्द्राय त्वा मरुद्भ्यस्त्वा सरस्वत्यै त्वा (सरस्वते त्वा) प्रजापतये त्वा जुष्टं प्रोक्षामीति सप्तदशानाम्। एव क्रमेण पेरुरसि स्वात्तमिति च। एवं क्रमेण स्वात्त चित्सदेवꣳ हव्यꣳ स्वदितैनमिति वशामेभ्यो। अथ वेद इत्यादिरुप्य मघार्य प्रत्याक्रम्य स ते प्राण', सयजत्रै सं यज्ञपतिराशिषेति पदार्थचतुष्टय क्रमेणैकैकस्य कृत्वा सर्वमुत्तरेषा ध्रुवासमञ्जनादि, दश प्रयाजानिष्ट्वा प्रयाजशेषेण स्वरु स्वधितिनाऽनक्ति। सर्वपशूना क्रमेणाञ्जनम्। अग्नीषोमीयस्वरुणाऽऽग्नेयमनक्ति। स्वरुमुपगूह्य पुनः स्वधित्यञ्जनम्। ततः (पुन.) कश्चित्स्वरुमादाय द्वितीयमनक्ति। पुनरुपगूह्य न स्वधित्यञ्जनम्। अन्यमादाय तृतीयमनक्ति उपगूहनान्तम्। एव सर्वाननक्ति। पर्यग्निकरणं तन्त्रेण प्रत्यपिसृज्य, प्रजानन्त इति पूर्ववदूह. पशुपते. पशव.। तेषा यान्वत्रिरे देवाꣳ स्वराडनुमन्यताम्। तन्त्रेण विमोक., विमुच्यमाने ये बध्यमाना., ऊहेन रेवतीर्यज्ञपतिमित्यादि त दक्षिणेन प्रत्यञ्चमित्यन्तमेकैकस्य कृत्वा क्रमेणेतरेषा ता(स्वा)भ्या वपाश्रपणीभ्यामन्वारम्भ। आश्राव्य प्रत्याश्राविते, उपप्रेष्य होतरजेदग्निरित्यध्रिगुः, उल्मुकाहरणं शामित्रार्थम्। ओवध्यगोह खननाना कृ(प्र)तिपादावेवाऽऽवर्तने प्रमुञ्चमाना नयनभेदान्नानाप्राण इत्यूहेन। केचिदावृत्ति' सर्वेषा पशूना दर्भास्तरणं क्रमेण, पृथिव्या' सपृच इति। आमायून्कृण्वन्तु स ज्ञपयत इत्युक्त्वा पराङ्डावर्ततेऽध्वर्यु स्वर्विद स्थ स्वर्वित्त्वा स्वारिता लोकविद स्थ लोकवित् गातुविद स्थ गातुवित् नाथविद' स्थ नाथवित्। न वा उ वेतॉं म्रियध्वे न रिष्यथ देवॉं इदेति पशुभि'। तत्र वो देव' सविता दधातु आशाना वाऽऽशापालेभ्यः। विश्वा आशा नोह। अध्वर्यु, नानाप्राणो यजमानस्य पशुभिः। अपि यन्तु पाथ.। यासा मूध इत्यस्य नोहः। इन्द्रस्य भाग, यो नो द्वेष्य(ष्ट्य) नु तꣳ रभध्वं, रवस्तेत्येकस्य रवेथामिति द्वयोः। यदस्य पारे वासिदूव न्वपदत वेपिदूव पलायिदूवं समज्ञाध्वं निमेहध्व शकृत्कुरुताभयं कुरुत सर्वाभ्यो मृडत नमो रुद्राय

मीढुषे इति बहुषु । आसिषाथा न्यषादाथा वेपिषाथा पलायिषाथा समज्ञासाथा निमेहथा शकृत्कुरुतमभयं कुरुत सर्वाभ्यो मृडतामिति द्वयोः । एकस्य यथाप्रकृति । बहुषु निषण्णेषु क्रमेणोत्थापनम् यथाजाति उच्छ एतिष्ठा उन्मे प्रतिष्ठा उद्गशात्तिष्ठा यत्पशतो मायुनकृतो रोसि वा पद्भिराघ्नते । अग्निर्मादिषु नोहः । निष्टप्त इति सर्ववपाश्रपणीना ताप प्लक्षशाखया सह, शमितार उपेतन पाशेभ्यः पशून्मुञ्चत । अदिति. पाश इति क्रमेण विमोक । ग्रीवासु निहितेषु पाशेषु मुख्यैव शूलया तन्त्रेण न्युद्वास्य ततः प्रतिप्रस्थाता पत्नीमुदानयति नमस्त आताना अनर्वा प्रेहीत्यावृत्ति. । पत्नीबहुत्वे—अ.पो देवी. शुद्धायवः, इति कृत्वा वाक्त आप्यायतामिति कृत्वा शुद्धाश्चरित्रा इत्यन्तमेकस्य कृत्वा क्रमेणेतरेषाम् । शमोषधीभ्य इत्यन्ते पशौ तन्त्रेण निनयनम् । ओषधे त्रायस्वैनमित्याद्युत्क्रन्तामीत्यरयैकस्य कृत्वा क्रमेणेतरेषाम् । ओषधे त्रायस्वैनं स्वधिते मैनꣳ हिꣳसी[ारि]त्यन्त स्त्रीपशौ (शोः) । उभयतो लोहितेनाङ्क्तेत्यन्तमेकैकस्य कृत्वा संज्ञप्ते पशौ रक्षसा भागः स्थ इति लोहित न तन्त्रेण निरसन, इषे त्वेत्यादि अच्छिन्न अग्नये त्वा जुष्टमुत्क्रन्तामि इ द्राग्निभ्या त्वा इन्द्राय त्वा मरुद्भ्यस्त्वा सरस्वत्यै त्वा (सरस्वते त्वा) प्रजापतये त्वा जुष्टमुत्क्रन्तामीति सर्वत्र वपोद्धरण शमिता मुष्टिना पिधानं करोति क्रमेण । तन्त्रेण प्रत्युष्ट क्रमेण समन्वारम्भो यजमानस्य निर्दग्धमिति तन्त्रेण प्रतिप्रस्थात्रे प्रदान च । वायो वीहि स्तोकानामित्यावृत्त्या तस्य दर्भाग्रस्य वपाया उपासन लङ्घनम् । अध प्रासन यैव आत्मन पशुषु प्रविष्टा देवाना विष्ठा मुनयो वितस्थिरे । आत्मन्वान्त्सोम घृतवान्हि भूत्वा देवान्गच्छयत सुविद यजमानाय मह्यमिति तन्त्रेणाभिमारणम् । दृꣳह गा दृꣳहत गोपति मा वो यज्ञपती रिषत् । केचिद्यस्त आत्मेत्यविकारेण, (इति) । दृꣳह गा तन्त्रेणोद्वास्य, सुपिप्पला ओषधी. कृणुतेति तन्त्रेण प्लक्षशाखाया सादयति । प्रयुता द्वेषाꣳसीति पर्यायेण प्रकृतिवदासन्नाभिमर्शनम् । इमानीन्द्रियाण्यमृतानि वीर्याण्यभिरिन्द्रिय पशवो चिकित्सन् । ताभित देवा अवतोपमा शृतानि मयि श्रयताम् , इति । केचित्— इदमिन्द्रियमिति नोह इति । घृतवति शब्द इत्यादि स्वाहा देवेभ्य इति हुत्वा जुह्वामुपस्तीर्येत्यादि प्रदानान्तं सर्वेषा पशूना कुर्यात् क्रमेण । अग्नये छागस्य वपाया मेदसोऽनुब्रूहीत्येव प्रेष्य जातवेदः । द्वितियस्य, इन्द्राग्निभ्या छागस्य वपाया मेदस एवं प्रेष्य जातवेद । तृतीयस्य, इन्द्राय वृष्णेर्वपाया मेदसो एवं प्रेष्य जातवेद. । चतुर्थस्य मरुद्भ्यो वशाया वपाया मेदसो, एव प्रेष्य जातवेद । सरस्वत्यै मेष्याया वपाया मेदसो, एव प्रेष्य जातवेद. । सरस्वत्यै मेषस्य वपाया मेदस , एवं प्रेष्य जातवेदः । पञ्चमः । अथ षष्ठस्य हिरण्यशकलानि निधाय सर्वत्र प्रजापतय इत्युपाꣳशूक्त्वा छागाना वपाना मेदसामनुब्रूꣳहीत्युच्चैः । एवं प्रेष्य जातवेदो वपाभिर्गच्छ देवानित्यूहः । केचिन्नोह इति वदन्ति । आख्यानुवादाः

त्तन्त्रेण होमः । सर्वेषा सानाय्यवदनुमन्त्रणम् । सरस्वत्या वाचमन्नाद्यं पुषेय-मित्यनुमन्त्रणम् । देवेभ्य स्वाहेति तन्त्रेण परिवप्यहोम. । क्रमण वपोद्धरणाभिघा-रणं, स्वाहोर्ध्वनभस मारुतमिति तन्त्रेण वपाश्रपणीना प्रहरणम् । सऽस्रावहोमस्तन्त्रेण (प्रजापतये स्वाहा) प्राजापत्यप्रचारस्य चोपांशुत्वैरथापिवा इति । अत्र नोह इति सूत्रकार-वचनात् । समुत्क्रम्य वपामार्जन कृत्वा प्रातःसवनाय प्रसर्पन्तीत्यन्तमित्यादि ततस्ता-भ्यामित्यृतुपात्रे प्रतीक्ष्य तेजसो मे ग्रहावकाशकाले ग्रहणमुपस्थान वीर्याय मे वर्चोदा वर्चसे पवध्वमिति तन्त्रेण विष्णोर्जठरमसीत्यादि नि.सर्पणान्तं सौमिकम् ।

माध्यदिनस्य कर्म—देव सवित.-स्वदाति न. स्वाहा । सविता देवता । कलशोद्वर्तनं होतृचमसेन वसतीवरीभ्य इत्यादि ग्राव्णामनुमोदनान्ते प्रतिप्रस्थाता सवनीयान्निर्वपेत् । उक्तेन प्रतिप्रस्थाता पशुपुरोडाशै. सह सवनीयाना निर्वपति पुरोडाशा नित्याः, पुनर-नुक्रमात् तस्य कर्म ।

सप्तसप्ततिः कपालानि द्वे भर्जनार्थे कपाले स्थाली शूर्पत्रयं (द्वंद्वशरावमपि) प्रयु-नक्ति । कृष्णाजिनादानादि सर्व पूर्ववत् । (ग्रहैकत्रियुगलादि) अथ वा पाञ्यस्तिस्र. पात्राणि संमृश्य वा न प्रस्य(स्तर) मृत्तिकास्थौदक्षायवमित्यग्निहोत्रहवणी शरावं चेति युगपदादत्ते । वेषायव इति शूर्पत्रय शूर्पे पवित्रे निधाय—अग्नये जुष्ट निर्वपामि । इन्द्राग्निभ्या जुष्ट० इन्द्राय जुष्ट० मरुद्भ्यो जुष्ट० सरस्वत्यै जुष्टमिति व्रीहयः (सरस्वते वा) अन्यस्मिञ्शूर्पे पवित्रे निधाय यवा. - इन्द्राय हरिवते जुष्टं० इन्द्राय पूषण्वते जुष्ट० अथ वा पूर्वस्मिन्निरुप्तव्रीहिषु पवित्रे निधाय सरस्वत्यै भारत्यै जुष्ट० पुनर्यवनिरुप्ते शूर्पे पवित्रे निधाय इन्द्राय जुष्ट पुनर्व्रीहिषु निधाय सरस्वते जुष्टं० अन्यस्मिन्शूर्पे पवित्रे निधाय बृहस्पतये जुष्टमिति नीवाराञ्शरावेण निर्वपति । द्वादश मन्त्रेण, तूष्णीं पञ्च, अथान्वावापोऽष्टादश । इदं देवानामित्यादि नानाबीजवत् अग्ने हव्यꣳ रक्षस्वेन्द्राग्नी हव्यꣳ रक्षेथामिन्द्र हव्यꣳ रक्षस्व मरुतो हव्यꣳ रक्षध्वं सरस्वति (त) हव्यꣳ रक्षस्वेन्द्र हरिवन्हव्यꣳ रक्षस्वेन्द्र पूषण्वन् हव्यꣳ रक्षस्व सरस्वति भारति हव्यꣳ रक्षस्वेन्द्र हव्यꣳ रक्षस्व सरस्वन्हव्यꣳ रक्षस्व बृहस्पते हव्यꣳ रक्षस्वेत्युपसा-दनम् । एवं प्रोक्षणम्—अग्नये वो जुष्टं प्रोक्षामीन्द्राग्निभ्या वो जुष्ट प्रोक्षामीन्द्राय वो मरुद्भ्यो वो सरस्वत्यै (ते) वो इन्द्राय हरिवते वो इन्द्राय पूषण्वते वा सरस्वत्यै भार-त्यै वो इन्द्राय वो सरस्वते वो बृहस्पतये वो जुष्ट प्रोक्षामीति प्रोक्षणम् । शुन्ध-ध्वमित्यादि, उलूखलप्रतिष्ठापने कृते व्रीहीणा यथाभागं व्यावर्तध्वमिति विभागः । वर्षि ष्ठमेकभाग षड्विपर्यास सप्तममेकमणिष्ठभागम् । एव विभज्य, इदमग्नेरिन्द्राग्न्योरिन्द्रस्य मरुताꣳ सरस्वत्या (सरस्वत)इति वर्षिष्ठभागं, सरस्वत्या भारत्या इत्यणिष्ठभागं अणी-

थांसं परिहाप्य भूयिष्ठोऽवहन्यते । हविरावपनादि तण्डुलप्रस्कन्दनान्तं कृत्वा यवानामपि प्रस्कन्दनान्तं कृत्वा हविरावपनादि तण्डुलप्रस्कन्दनान्त कृत्वा नीवारानोप्य हविष्कृता वाग्विसर्गः । गुदं मा निर्लेषीर्वनिष्ठुं मा निर्लेषीरिति सर्वेषां पशूनां विशासनम् । अग्निं त्रयोविंशतिधा कृत्वा सह शूलादिभिः सर्वकुम्भीनां निष्टपनं क्रमेणोपवेषादानादि भृगूणामित्यन्तमेकस्य कृत्वेतरेषाम् । पवित्राभ्या धानादि हृद-यश्रपणान्तमेकस्य कृत्वा, इतरेषा क्रमेण । अवहननादिकर्म—नीवाराणा प्रस्कन्दनान्तं कृत्वा व्रीहियवनीवाराणा च क्रमेण च त्रिष्फलीकरणं सर्वान्पृथक्प्रक्षाल्य तन्त्रेण निनयन व्रीहितण्डुलानामधिवापः । अग्नये जुष्टमधिवपामीन्द्राग्निभ्या जुष्टमधिवपामी-न्द्राय जुष्ट०मरुद्भ्यो जुष्टं० [सरस्वते जुष्ट०] सरस्वत्यै जुष्ट अधिवपामि धान्यमसि । अथ यवतण्डुलाना प्रकृतिवद्विभागं कृत्वा इन्द्राय जुष्टमधिवपामि (इति) अणूनि कुरुता-दित्यन्तं कृत्वा धृष्टयादानादि । आग्नेयमुपधायैन्द्राग्नमुपधायैन्द्रमुपधाय मारुतानुपधाय सर-स्वता(ती)मुपधाय [सरस्वन्तमुपधाय] इति क्रमेण कपालान्युपधाय द्वे भर्जनार्थे कपाले उपधाय, ऐन्द्रमुपधाय, सरस्वन्तमु० बार्हस्पत्यचरुस्थालीमुपदधाति । सर्वेषामेका-दश कपालानि । आग्नेयविकाराणामुपधाने चतुर्थस्य द्विरावृत्ति. । अष्टमस्य त्रिरावृत्तिः । मदन्तीरधिश्रयतीत्यादि । अग्नये जुष्टꣳ सवपामीन्द्राग्निभ्या जुष्टꣳ सवपामीन्द्राय जुष्ट० मरुद्भ्यो जुष्टं० सरस्वत्यै जुष्ट० [सरस्वते जुष्ट०] । अन्यस्या पात्र्या पवित्रे निधाय—इन्द्राय जुष्टꣳ संवपामीति यवपिष्टꣳ सवपति । पिष्टान्युत्पूय तण्डुलानुत्पुनाति व्रीहीश्च । पिण्डं कृत्वा यथाभाग व्यावर्तध्वमिति चतुष्कृत्वा(त्व आ)वर्तते । व्यावर्तेथामित्युत्तमौ । तयोरेव निर्देश. । इदꣳ सरस्वत्या [इदं सरस्वत] इति । आग्नेयादिसरस्वत्यन्तानधि-श्रित्य भर्जनार्थे धाना आवपति घर्मोः स्थ विश्वायुष इति । ततो व्रीहीनावपति अन्यस्मि-न्कपाले लाजार्थान् । अथैन्द्रमधिश्रित्य सारस्वतमधिश्रित्य ऋजुरुत्पूते पयसि बार्हस्पत्ये नीवारतण्डुलानावपति घर्मोऽसीति । पृ(प्र)थनादिपुरोडाशानामन्तरितं सर्वेषाम् । आप्यलेपं निनीय (निनयनादि) पशुपुरोडाशवत् । घृतागेहीति । उद्वासनकाले अग्नये जुष्टमभिघारयामि, इति । अथ त्रयाणा तूष्णीं सरस्वत्यै जुष्ट, धानार्थास्तूष्णीं सरस्वत्यै भारत्यै जुष्टं, अथ तूष्णीमैन्द्रं सरस्वते जुष्टं बृहस्पते जुष्ट सारस्वतान्तानुद्वास्य प्रकृति-वत्सवनीयानुद्वास्य सारस्वतनैवारयोरुद्वासन क्रमेण । अलकरा काले ग्रहणादि । दधि-घर्मभक्षणान्तं कृत्वा सवनीयानासादयति पशुपुरोडाशाश्च सारस्वतनैवारयोर्नाऽऽसादन तौ प्रज्ञातौ विधाय यज्ञोऽसीत्याग्नेयसारस्वतौ लाजांश्च । अयं यज्ञ इति । क्रमेण यो न कनीयः, अपतमिन्द्राग्नी भुवनान्नुदेताम् । पशुपुरोडाशौ । यो न कनीय , अपतामिन्द्रो भुवनान्नुदताम् । यो न. कनीयः, अपतं मरुतो भुवनान्नुदन्ताम् । यो न कनीयः, अपतामिन्द्रो भुवनान्नुदताम् । यो नः कनीयः, अपतमिन्द्रः पूषण्वान् भुवनान्नुदताम् । यो न कनीयः, अपतामिन्द्रो भुवना-

नुदताम् । ममाग्ने पञ्चहोत्रा (ता) । तैरध्वर्यु प्रचरति । अग्नये पुरोडाशस्यानुब्रूहि, इति संप्रैष । एवमिन्द्राग्निभ्या पुरोडाशस्येत्येव संप्रैष. । इन्द्राय पुरोडाशस्येत्येवं संप्रैषः । मरुद्भ्य पुरोडाशस्यानुब्रूहीति, पशुपुरोडाशाना सारस्वतनैवारवर्ज्यानाम् । माध्यंदिनस्य सवनस्येन्द्राय पुरोडाशानामनुब्रूहीत्यादि । आग्न्ये(ग्ने)यैन्द्राग्न्योः (ग्नयोः) प्रकृतिवदनुमन्त्रणम् । इन्द्रस्याहमन्नाद । मरुतामहमिन्द्रियाव्यन्नाद. सरस्वत्या अहं वाचमन्नाद्यम् । सवनीयाना प्रकृतिवत् । समानं तु स्विष्टकृदिडम् । उन्नीयमानेभ्य इत्यादि ॥ २४ ॥

दाक्षिणौ होमौ हुत्वा । इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहरति ॥ २५ ॥

दिवं गच्छ सुवः पतेति हिरण्योद्ग्रहणान्तम् । इन्द्रस्य वज्रोऽसीति रथवाहनादनसो रथमुपनयति । रथवाहने काष्ठविशेषे स्थापिते गमनाय सज्जीकर्तुं तस्य रथस्य तस्मात्काष्ठादवरोहण विधत्ते---इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहरति विजित्यै (तै० ब्रा० १-३-९) इति ॥ २५ ॥

अप्स्वन्तरमृतमप्सु भेषजमित्यश्वानप्सु स्नापयन्ति ॥ २६ ॥

अप्स्वन्तरित्यश्वाननुद्धृतास्त्वप्सु स्नापयन्ति । उपप्लवन स्नानं प्रत्यश्वं मन्त्रावृत्तिः । वाजिन इति मन्त्रान्त । अथाश्वान्पल्पूलयतीति बौधायनवैखानसावाहतुः । पल्पूलयति जले प्लावयति शरीर प्रक्षालयतीत्यर्थ. । अप्सु मध्येऽपमृत्युनिवारकं रोगनिवारकं च सारं वर्तते ॥ २६ ॥

वायुर्वा त्वा मनुर्वा त्वेति प्रष्टिवाहिनꣳ रथं युनक्ति ॥ २७ ॥

आदधुरित्यन्त । प्रष्टिवाहिनꣳ रथ युनक्ति । प्रत्यश्वं मन्त्रावृत्तिः । प्रष्टिवाही त्रिभिरश्वैर्युक्त. । त्रयोऽश्वा भवन्तीति लिङ्गात् ॥ २७ ॥

अपांनपादाशुहेमन्नित्यश्वानाꣳ रराटानि प्रतिसंमार्ष्टि ॥ २८ ॥

सेदित्यन्त. । अथास्य पृष्ठं मर्मृज्यत इति बौधायनोऽप्याह । मर्मृज्यते पुनः पुनः संमार्ष्टि । पृष्ठसमार्जनेन शोधितत्वाद्यागयोग्यत्वम् । गतमन्यत् ॥ २८ ॥

तूष्णीमितरान्षोडश रथान्युनक्ति (ख० २) ॥ २९ ॥

तूष्णीमितरान्षोडश रथान्वाजसृतः स्वं स्वं युनक्ति । केचिदध्वर्यव इति ॥ २९ ॥

दक्षिणाकाले सप्तदश रथान्ददाति ॥ ३० ॥

दक्षिणाकाले प्राप्ते रूपेण वो रूपमित्यादिना । अभिगम्य रथादीनि चतुर्धा विभज्य तुथो व इति ददाति । रथानेतानेव युक्तान् ददाति । दक्षिणाकाल इति दक्षिणाविभागः । गवा शतान्ता(नि) दुन्दुभिशता(नि) वा ददाति ॥ ३० ॥

सप्तदश निष्कान् सप्तदशाश्वान् सप्तदश हस्तिनः

सप्तदश गवाꣳ शतानि सप्तदश गोयुक्तानि सप्त
दश यानानि सप्तदश शयनानि सप्तदश महान-
सानि सप्तदश वासाꣳसि सप्तदश दासान् सप्त-
दश दासीः सप्तदशाजाः सप्तदशावीर्वयसो
वयसꣳ सप्तदशानि ददाति ॥ ३१ ॥
सप्तदशꣳ सप्तदशानि संपादयतीत्येकेषाम् ॥३२॥
अनुदिष्टासु दक्षिणासु यजुर्युक्तꣳ रथमध्वर्यवे
ददाति । ३३ ॥ शेष साधारणः ॥ ३४ ॥

निष्कश्चतु.सौवर्णकः । दुन्दुभयो मुरवा: । अनुदिष्टा·वङ्काना निष्क्रयणकृते यजर्यु-
क्तं रथमध्वर्यवे ददाति । प्रष्टिवाहिनमित्यर्थ । अध्वर्यो स्वीयभागो नियम्यते नाधिको
भागः । भागादधिक इति भाष्यकृत् । शेष साधारण· । ऋत्विजा सर्वेषां शेषा
दक्षिणा लभ्यते । अध्वर्योर्यावान्भाग प्रदीयतेऽधिको न्यूनो वा प्रकृतिवद्विभज्यते यावद-
ध्वर्यव इति समशो विभाग । सम एव विभाग इत्यर्थ । छन्दोगवचनात्ता सममृत्विग्भ्यो
विभजेदिति न प्रकृतिवद्विभाग । अपि वा समविभागपक्षे सप्तदश. सप्तदश एवोचितो
भागो लभ्यते । तस्मात्सप्तदशो(त्सदस्यो) नित्य । सोऽपि महर्त्विक् । पञ्च महर्त्विजो
वृणीतेति भगवता भरद्वाजेनोक्तम् । रथप्रतिग्रहमन्त्र आधान उक्त. । अश्वस्य च देवस्य
त्वेति वरुणायाश्वमिति । देवस्य त्वेति देवि दक्षिणे उत्तानायाङ्गीरसायान , इत्यनसः ।
देवस्य त्वा देवि दक्षिणे हिमवतो हस्तिन तेनामृतत्वमिति हस्तिन । अन्न दत्त्वा प्रति-
ग्रहः । अग्नये हिरण्यमिति निष्कस्य । मनवे तल्पमिति दास्या· । प्रियवचनं कृत्वा
प्रतिग्रहः । त्वष्ट्रेऽजामित्यजायाः । पूष्णेऽविमित्यवे । ग्राम्त्वा कृतस्तपसस्त्वा तन्वत
वरूत्रयस्त्वा वप(य)न् सोमाय वास इति वासस.।गवा शतस्य रुद्राय गामिति प्रतिग्रहः।
अनोयुक्तस्य यथाजाति । सप्तदश दुन्दुभीनामुत्तानस्त्वेति प्रतिग्रहः ।

वाजपेये ' सप्तदश रथाः सप्तदश दास्यः ' इति दक्षिणां विधाय श्रूयते ' यजु-
र्युक्तं रथमध्वर्यवे ददाति ' इति । तत्र संशय. किं यजुर्युक्तो रथोऽध्वर्युभागं निवर्तये-
न्नेति । तत्र

प्राकाशवद्यजुर्युक्त· स्यात्तद्भागस्य बाधक· ।
न त्वयं बाधकस्तस्य प्राप्तस्य नियमो ह्यसौ ॥

प्राकाशौ ह्यपूर्वावध्वर्य्वानतिकरत्वेन विधीयमानौ युक्तं तत्र यत्तद्भागं प्राकृतं बाधत
इति । इह तु सप्तदश रथा द्रव्यान्तराणि च वाजपेयस्य दक्षिणात्वेन विहितानि इति ।
तत्र यजुर्युक्तस्यापि रथस्य प्राप्तमेव दानं स त्वध्वर्यवेऽन्यस्मै वा कस्मैचिद्दातव्यः सन्न-

ध्वर्यो नियम्यते । ततश्च नायमर्थ —यदध्वर्यवे ददाति तद्यजुर्युक्तं रथमिति किं तर्हि यजुर्युक्तं यद्ददाति तदध्वर्यव इति । तस्य च द्रव्यान्तरसहितस्यैव दानं प्राप्तमिति तादृशस्यैव नियमान्न देयान्तरनिवृत्तिः । अध्वर्युभागे तु यथाप्राप्ते यजुर्युक्तो नियम्यते ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

अग्रेणाऽऽहवनीयं प्राञ्चो रथानवस्थापयन्ति ॥ ३५ ॥

अग्रेणाऽऽहवनीयं तत्र देशे प्राञ्चः प्राङ्मुखानवस्थापयेयू रथान् ॥ ३५ ॥

यजुर्युक्तं दक्षिणार्ध्यमग्रेणाऽऽग्नीध्रं राजपुत्रोऽवस्थाय सप्तदश प्रव्याधानिषून्रस्यति प्राचीनमुदीचीनं वा ॥ ३६ ॥ यत्र जघन्यो निपतति तल्लक्षणं कुरुते ॥ ३७ ॥

यजुर्युक्तं रथम् । अग्रेणाऽऽग्नीध्रं राजपुत्रोऽवस्थितो भवति । स इषुं धनुषि संधायास्यति निक्षेपणं करोति । स इषुर्यस्मिन्देशे निपतति तत्र गत्वा पुनरस्यति । एवं सप्तदशकृत्वोऽभ्यस्येत् । यत्र जघन्य निपतति तत्रौदुम्बरकाष्ठेन लक्षणं मिनोति ॥ ३६ ॥ ३७ ॥

यत्प्राङ्माहेन्द्रात्तस्मिन्कृते प्रतिप्रस्थाता नैवारं सप्तदशशरावं चतुर्धा विभज्य बृहस्पतये निर्वपति पयसि श्रपयति ॥ ३८ ॥ सर्पिष्मन्तं चात्वालेऽवदधाति ॥ ३९ ॥

प्राङ्महेन्द्रग्रहणात्पूर्वं नाना(रा)शसासादनान्तम् । तत्र विशेषः-अग्ने नयातं हुत्वा वनेषु व्यन्तरिक्षं, प्रजापते न त्व० वनेषु व्यन्तरिक्षं वरुणो देवता । शिष्टयोरुक्ते । एवं सादितेषु नाना(रा)शसेषु नैवारे लौकिक सर्पिरानीय चात्वाले स्थापयति ।

वाजपेये श्रूयते—बार्हस्पत्यो नैवारः सप्तदशशरावः क्षीरे चरुर्भवति, इति । अस्ति तु प्रकृतौ चतुरो मुष्टीन्निर्वपति, इति चतुःसंख्या मुष्टिद्रव्यं च । तदुभयमिह चोदकेन प्राप्तम् । न च चतुर्भिर्मुष्टिभिः सप्तदशशरावपरिमाणश्चरुः संपादयितुं शक्यते । अतोऽवश्यं बाधितव्ये सति किमुभयं बाधितव्य शरावद्रव्येण मुष्टिद्रव्यं सप्तदशसंख्यया च चतुःसंख्या किंवाऽन्यतरत् । तत्रापि किमनियमः । अथ वा मुष्ट्यनुग्रहः संख्यालोपो विपरीतं वेति । तत्राविशेषादुभयोर्बाधः । तत्रापि समानकार्यत्वाद्द्रव्यं द्रव्येण संख्या संख्ययेत्येकः पक्षः । सप्तदशसंख्याशरावपरिमाणं च यागद्रव्याङ्गं, चतुःसंख्या मुष्टिश्च निर्वापाङ्गमतो न तावत्साक्षादेकविषयत्वं येनोभयमुभयेन बाध्येत । चतुर्भिर्मुष्टिभिः सप्तदशशरावश्चरुर्न संपादयितुं शक्यत इत्यर्थाद्बाधः । तत्रैकबाधेनोपपत्तौ नोभयबाधनं युक्तम् । तस्मादन्यतरबाध । तत्राविशेषादनियम इति द्वितीयः । संख्याया द्रव्याङ्गत्वात् प्रधानस्य मुष्टिद्रव्यस्यानुग्रहः, संख्यायास्तु बाध इति तृतीयः । न संख्याया

मुष्टचङ्गत्वं वाक्यलक्षणसमानाधिकरणद्रव्यसंबन्धबाधेन द्वितीया श्रुत्या निवार्पाङ्गत्वावगमादुभयोरपि क्रियाङ्गत्वावगमात्तुल्यत्वम् । तत्र मुख्यत्वात् संख्यानुग्रहो जघन्यत्वाच्च मुष्टिलोप इति सिद्धान्तः ॥ ३८ ॥ ३९ ॥

तꣳ राजपुत्रो गोपायति ॥ ४० ॥

राजपुत्रो रक्षति । ब्राह्मणो वा ॥ ४० ॥

चात्वाले रथाक्षाकृति काष्ठं निखनाति ॥ ४१ ॥

औदुम्बरेण कृत निखायेति वैखानस. ॥ ४१ ॥

तस्मिन् रथचक्रमौदुम्बरं सप्तदशारं प्रतिमुञ्चति ॥ ४२ ।

तस्मिन्रथाक्षाकृतिकाष्ठ औदुम्बर रथचक्र सप्तदशार प्रतिमुञ्चति । उत्तरस्या वेदि श्रोण्या सप्तदश दुन्दुभीन्प्रबध्नातीति वैखानसोक्ते ॥ ४२ ॥

विष्णोः क्रमोऽसीति यजुर्युक्तꣳ रथं यजमानोऽभ्येति ॥ ४३ ॥

रथस्य समीपमभ्यागच्छति यजुर्युक्तस्य । तदेतद्यजमानकर्म ॥ ४३ ॥

अङ्कौ न्यङ्काविति रथचक्रे अभिमृशति । पक्षसी वा ॥ ४४ ॥

अभितः स्पृशत्यध्वर्युरित्यके । यजमान इत्यपरे । पारयन्त्वित्यन्त ॥ ४४ ॥

देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमिति ॥(ख०२)। ब्रह्मौदुम्बरꣳ रथचक्रमारोहति ॥ ४५ ॥

रथमातिष्ठतीति बौधायन. । आतिष्ठत्यारोहेदित्यर्थ ॥ ४५ ॥

देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेयमिति यजुर्युक्तꣳ रथं यजमानः ॥ ४६ ॥

आरोहतीत्यनुकर्ष· ॥ ४६ ॥

इन्द्राय वाचं वदतेति दुन्दुभीन्निह्रादयन्ति ॥ ४७ ॥

दुन्दुभिमुखं ताडयन्ति वाजसृतो नाध्वर्यु । एवमापस्तम्बेऽपि ॥ ४७ ॥

वाजसृत इतरान् रथानारोहन्ति ॥ ४८ ॥

वाजसृत इतरे (रान्) रथानारोहन्ति तूष्णीम् ॥ ४८ ॥

वाजिनो वाजजितो वाजꣳ सरिष्यत इति नैवारमश्वौ युग्याववघ्रापयन्ति । सर्वान्वा ॥ ४९ ॥

जिघ्रतेति मन्त्रान्तः । नैवारं चरुं धुर्यावश्वाववघ्रापयन्ति । यजुर्युक्तस्यैव रथस्य धुर्यौ । सकृन्मन्त्र· ॥ ४९ ॥

प्रप्रोथेषु च लेपान्निमार्ष्टि विष्णोः क्रमोऽसीति यजुर्युक्तꣳ रथमध्वर्युरारुह्याश्वाजनीत्यश्वाजनिमा-

दायावोऽसि सप्तिरसीत्यश्वान्समक्षिणोति ॥५० ।

प्रप्रोथेषु मुखदेशेषु लेपानवघ्रापणे येऽवशिष्टास्तान्स्पृशन्ति । विष्णोः क्रमोऽसीति यजुर्युक्तं रथमध्वर्युरारोहति । यजुर्युक्तं तूष्णीमधिरह्येत्येके । अश्वाजनि वाजयेति अश्वाजनिं कशामादायाध्वर्यु, अर्वाऽसि सप्तरसि वाज्यसीति कशया तानश्वांस्ताडयति ॥ ५० ॥

पश्चादितरे रथा अनभ्यासादयन्तोऽनुयान्ति ॥ ५१ ॥

इतरे राजवैश्यरथकाराश्च स्व स्वं तूष्णीं ताडयन्ति । यजुर्युक्तस्य पृष्ठतो गच्छन्ति, इतरे रथा. । केचित्तु—क्षत्रियाद्यभावे ब्राह्मणा एव गृह्यन्ते ॥ ५१ ॥

वाजिनो वाजं धावतेति तिसृभिराधावतोऽनुमन्त्रयते ।
चतसृभिरित्येकेषाम् ॥ ५२ ॥

तिसृभिश्चतसृभिर्वाभिर्धावतोऽश्वाननुमन्त्रयते यजमानः । अध्वर्युरित्येके ॥ ५२ ॥

वाजिनाꣳ साम ब्रह्मौदुम्बरे रथचक्रे त्रिस्त्रिः परिवर्तमाने गायति ॥ ५३ ॥

आरूढे ब्रह्मणि वाजिनां साम गायत्यध्वर्यु संप्रेष्यति । तस्य गानार्थं (र्थमा) वर्तयति । आवर्तमाने चक्रे सामगान वैकल्पिकं देवस्याहमिति यजुर्वा वदति जपति । रुहेयमित्यन्तः । सामगानशक्तस्य—आविर्मर्या इति गानमन्त्र इति । वाजिनाꣳ साम गायते (तै० ब्रा० १–३–६) इति ब्राह्मणात् । वाजिनामन्त्रार्थिना सबन्धि यत्साम तद्ब्रह्मा गायेत् । अन्नप्रदस्तु सामविशेष. शाखान्तरे द्रष्टव्यः । ब्रह्मण इदं गानमित्यापस्तम्ब. स्पष्टयति—औदुम्बरꣳ रथचक्र ब्रह्माऽऽरोहति तमाह वाजिनाꣳ साम गायेति तस्य चक्र त्रि. प्रदक्षिणमावर्तयति । ‘ तत्राऽऽवर्तमाने ब्रह्मा गायति ’ (आप० श्रौ० १८–१–४ । ११) इति ॥ ५३ ॥

अग्निरेकाक्षरेण वाचमुदजयदित्युज्जितीर्यजमानं धावत्सु वाचयति ॥ ५४ ॥

अग्निरेकाक्षरेणेति धावत्स्वश्वेषु, उज्जितीरिति ध्यात्वा यजमानं वाचयत्यध्वर्युः । स्तोममुदजयदित्यन्त· । सप्तदशेति वैखानस· ॥ ५४ ॥

लक्षणं प्राप्य प्रदक्षिणमावर्तन्ते ॥ ५५ ॥

औदुम्बरं काष्ठमाजिं प्राप्य प्रदक्षिणमावर्तन्ते । य आजि धावन्ति । उदञ्च आवर्तन्ते (तै० ब्रा० १–३–६) इति हि ब्राह्मणम् ॥ ५५ ॥

ते नो अर्वन्तो हवनश्रुतो हवमिति चतसृभिराधावतोऽनुमन्त्रयते ॥ ५६ ॥

चतसृभिः प्रत्याधावतोऽश्वाननुमन्त्रयतेऽध्वर्युः । तदेवमध्यापकसंप्रदायमनुसृत्य

मन्त्रचतुष्टयं विभक्तम् । बौधायनाचार्यस्तु ते नो अर्वन्त इत्यादिर्वाजिनो हवेष्वित्यन्त एक एव मन्त्र इत्यभिप्रेत्य चतुर्थीमिष स्य वाजीत्यादिकामृच चतुष्टयेऽन्तर्भावयामास । आपस्तम्बस्त्वेवमाह— मितद्रव इति चतसृभि प्रत्याधावतोऽनुमन्त्रयते इति ॥ ५६ ॥

तिसृभिरित्येकेषाम् ॥ ५७ ॥

स्पष्टोऽर्थ ॥ ५७ ॥

आ मा वाजस्य प्रसवो जगम्यादिति प्रत्यासृतेषु जुहोति ॥ ५८ ॥

आ मा वाजस्येत्यृचा जुहोति दर्विहोमधर्मेण । द्यावापृथिवी देवता । प्रत्यासृतेषु प्रत्यागतेष्वश्वेषु ॥ ५८ ॥

इयं वः सा सत्या संधाऽभूदिति दुन्दुभिविमोचनीयामेकामाहुतिं जुहोति ॥ ५९ ॥

इयं व सा सत्येत्यनुवाकशेषेण दुन्दुभिविमोचनीयमिति ध्यात्वा जुहोति । इन्द्रो देवता ॥ ५९ ॥

सर्वान्वोपस्पृशति ॥ ६० ॥

सर्वान्वोपस्पृशति न होम ॥ ६० ॥

वाजिनो वाजजितो वाजꣳ ससृवाꣳस इति नैवारमश्वयुग्यानवघ्रापयति । यथापुरस्तात्प्रोथेषु च लेपान्निमार्ष्टि ॥ ६१ ॥

नैवारमश्वयुग्यानवघ्रापयति । मुखे लेपान्निमार्ष्टि यथापुरस्तादित्यर्थ. ॥ ६१ ॥

कृष्णलं कृष्णलं वाजसृद्भ्यः प्रयच्छति ॥ ६२ ॥

कृष्णल कृष्णल वाजसृद्भ्य. प्रयच्छतीति वचनादेकस्य वाजसृत एक कृष्णलं प्रयच्छति । एव षोडशभ्यो दत्त्वा ॥ ६२ ॥

तानि प्रत्यादाय ब्रह्मणे ददाति ॥ ६३ ॥

तानि पुनरादाय ब्रह्मणे दद्यात् ॥ ६३ ॥

मधोष्ठालं च शतमानस्य कृतम् ॥ (ख० ४) ॥ ६४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने प्रथमः पटलः ।

यजमानो मधुना पूर्णं शतगुञ्जाफलपरिमाण सुवर्णकृतपात्र ब्रह्मणे ददाति ॥ ६४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां त्रयोदशप्रश्ने प्रथमः पटलः ॥ १ ॥

अथ त्रयोदशप्रश्ने द्वितीय पटल ।

क्षत्रस्योल्वमसीति ताप्र्यं यजमानः परिधत्ते। क्षत्रस्य योनिरसीति दर्भमयं पत्नी ॥ १ ॥

ताप्र्यं घृताक्त वस्त्रम् । तदेतत्परिधानद्वय विधत्ते—ताप्र्यं यजमानं परिधापयति । यज्ञो वै ताप्र्यम् । यज्ञेनैवैनꣳ समर्धयति । दर्भमयं परिधापयति । पवित्रं वै दर्भाः । पुनात्येवैनम् । वाज वा एषोऽवरुरुत्सते । यो वाजपेयेन यजते । ओषधयः खलु वै वाजः । यद्दर्भमयं परिधापयति । वाजस्यावरुद्ध्यै (तै० ब्रा० १-३-७) इति । ताप्र्यस्य यज्ञसाधनत्वाद्यज्ञत्वम् । एन पत्नीदेहम् । वाजपेययाजिनोऽन्नावरोधकामिन ओषधिरूपदर्भमयेनान्नमवरुद्धं भवतीति तदर्थ. ॥ १ ॥

जाय एहि सुवो रोहावेति पत्नीं यजमान आमन्त्रयते । रोहावहीति पत्नी प्रत्याह ॥ २ ॥

मन्त्रेण यजमान· पत्नीमामन्त्रयते । रोहावहीति पत्नी प्रत्याह । एवं त्रि. ॥ २ ॥

अहं नावुभयोः सुवो रोक्ष्यामीति यजमानस्त्वहं नावुभयोः सुवो रोहेति पत्नी ॥ ३ ॥

यजमानोऽन्ततो वदति । एव पत्नी ॥ ३ ॥

आयुर्यज्ञेन कल्पतामिति दशभिः कल्पैः सप्तदशारत्निं निःश्रेण्या यूपमारोहति । उभौ वा ॥ ४ ॥

आयुर्यज्ञेन कल्पतामिति दशभि कल्पामिति ध्यात्वा सप्तदशफलकयुक्तया नि.श्रेण्या यूप यजमान आरोहति । एव पत्नी । अध्वर्युरिति केचित् । त दशभि. कल्पैरारोहत्यायुर्यज्ञेन कल्पतामिति वैखानस. । त यूपम् । कल्पै. कल्पशब्दोपेतै. ॥ ४ ॥

सुवर्देवाꣳ अगन्मेत्यारुह्य जपति ॥ ५ ॥

सुवर्देवाꣳ अगन्मेति यूपाग्र प्राप्य जपति यजमान· । अभूमेति मन्त्रान्तः ॥ भाष्ये तु—बाहू उद्गृह्णाति सुवर्देवानिति । उद्गृहीताभ्या बाहुभ्या स्वर्गप्राप्तिमभिनयता यजमानेनेदमुच्यत इति ॥ ५ ॥

वाजश्च प्रसवश्चेति द्वादशाऽऽहुतीर्जुहोति ॥ ६ ॥

त्रयोदशेत्येकेषाम् ॥ ७ ॥

वाजश्च स्वाहा प्रसवश्च स्वाहा, इत्यादिभिर्द्वादशभिस्त्रयोदशभिर्वा वाजप्रसवीयानि ध्यात्वा जुहोति । वाजादयो देवताः । वाजशब्दप्रसवशब्दौ येषु कर्मसु मन्त्रस्त्वेन

श्रूयेते तानि कर्माणि वाजप्रसवीयानि। विधत्ते—द्वादश वाजप्रसवीयानि जुहोति (तै० ब्रा० १-३-७) इत्यादि ॥ ६ ॥ ७ ॥

पुरस्ताद्यूपारोहणादेके समामनन्ति ॥ ८ ॥

एके शाखिनः परिपठन्ति यूपारोहणात्पुरस्ताद्वाजप्रसवीयं जुहुयादित्यर्थः ॥ ८ ॥

समहमायुषा सं मयाऽऽयुः समहं वर्चसा सं मया वर्चः समहं प्रजया सं मया प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोष इति यूपमारुह्य ग्रहान्प्रत्यवेक्षते ॥ ९ ॥

पत्नीमिति भाष्यकृत् ॥ ९ ॥

तमाश्वत्थैरूषपुटैर्दीर्घवꣳशप्रबध्नै(द्धै)रास्यतो महर्त्विजः प्रतिदिशꣳसमर्पयन्ति । शीर्षत इत्येकेषाम् ॥ आसपुटैर्वैश्यमन्नाय त्वेति पुरस्तादध्वर्युः ॥ (ख० ५) ॥ अन्नाद्याय त्वेति दक्षिणतो ब्रह्मा । वाजाय त्वेति पश्चाद्धोता । वाजजित्यायै त्वेत्युत्तरत उद्गाता ॥ १० ॥

अश्वत्थपत्रेषु कृष्णमृत्तिका ऊषान्वोभयान्वा वंशाग्रे पुटाकृतिं कृत्वा तमारूढयजमानो(नं) घ्नन्ति । अन्नाय त्वेत्यादिभिर्मन्त्रैः । वैखानससूत्रे तु ' तमेवमासपुटैर्घ्नन्ति—अन्नाय त्वेति पुरस्तादध्वर्युः । अन्नाद्याय त्वेति दक्षिणतो ब्रह्मा । वाजाय त्वेति पश्चाद्धोता । वाजजित्यायै त्वेत्युत्तरत उद्गाता, इति । ऊषखननपांसव आसास्तानश्वत्थपत्रैः पुटीकृत्य तैरासपुटैर्यूपादवरोहन्तं यजमानं हन्युः । अत एवाऽऽपस्तम्ब आह—' तमाश्वत्थैरासपुटैरूषपुटैरुभयैर्वा वैश्याः प्रतिदिशमर्पयन्ति । महर्त्विजो वा दीर्घवंशेषु प्रबध्य ' (आप० श्रौ० १८-५-१८) इति । यथासूत्रं मुखतो घ्नन्ति, मुखं प्रत्यभिघ्नन्तीत्यर्थः ॥ १० ॥

होता(हन्ता)रं वितत्य बाहू अभिपर्यावर्तते ॥ ११ ॥

हन्तारं हन्तारमभिपर्यावर्तते इत्यापस्तम्बः । यजमान इति शेषः ॥ ११ ॥

इयं ते राण्मित्राय यन्तासि यमनो धर्ताऽसि धरुणः कृष्यै क्षेमाय रय्यै पोषायेति प्रत्यवरोहति ॥ १२ ॥

यूपाग्रे प्र(ग्रात्प्र)त्यवरोहति यजमानः । पत्न्या अप्यारोहणावरोहणे तूष्णीम् ॥ १२ ॥

अग्रेण यूपं बस्ताजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृ-

णाति ॥ १३ ॥ तेजोऽसीति तस्मिन्राजत१ रुक्मं निदधाति ॥ १४ ॥

अथाग्रेण यूपं बस्ताजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य तस्मिञ्छतमानं हिरण्यं निदधात्यध्वर्युः ॥ १३ ॥ १४ ॥

अमृतमसीति रुक्मे पादं प्रतिष्ठापयते ॥ १५ ॥

अमृतमसीति यजमानो हिरण्ये दक्षिणं पादमवदधाति ॥ १५ ॥

पुष्टिरसि प्रजननमसीति बस्ताजिने ॥ १६ ॥

बस्ताजिने सव्यं पादं प्रतिष्ठापयते यजमानः ॥ १६ ॥

तस्मादासन्दीमारोहति ॥ १७ ॥

तस्माच्चर्मणो भूमिमुपस्पृशन्नासन्दीमौदुम्बरीं च दक्षिणायतां प्रागायतां वाऽऽरोहति ॥ १७ ॥

दिवं प्रोष्ठती (ष्ठिनी) मारोहती (ता) मारुह्य प्रपश्यै (श्ये) क्रराणमनुष्याणामेधीत्यारोहन्तमभिमन्त्रयते ॥ १८ ॥

दिवं प्रोष्ठिनीमारोहतामित्यारोहन्तं यजमानमभिमन्त्रयतेऽध्वर्युः ॥ १८ ॥

माहेन्द्रप्रभृतीनि कर्माणि प्रतिपद्यते ॥ १९ ॥

अस्मिन्काले माहेन्द्रग्रहं गृह्णाति । ततः स्तोत्रोपाकरणम् । असर्जि सर्जि० ॥१९॥

तस्य स्तोत्रमुपाकृत्याभिषिञ्चति यथाऽग्निचित्यायाम् ॥ २० ॥

तस्य यजमानस्य ॥ २० ॥

रजसि स्तुवते सप्तभिरन्नपूर्वाभिरन्नहोमं जुहोति ग्राम्यारण्यानां समवदाय ॥ २१ ॥

सप्तभिः पूर्वैर्मन्त्रैर्ग्राम्या आरण्याश्चौषधीः संसृज्य समवदाय 'वाजस्येमम्' इति सप्तभिर्मन्त्रैः । सप्त पूर्वानन्नहोमाञ्जुहोति । अग्निर्देवता । वाजस्येममित्यादयः पूर्वमेवोक्ताः । हुत्वा हुत्वा पात्र्यां संपातमवनयतीत्यादि सूत्रान्तरे द्रष्टव्यम् । परंतु नास्त्यस्मत्सूत्रे संपातावशिष्टावनयनमस्मिन्याग इति गम्यते, क्रमविपर्यासात् ॥ २१ ॥

(माध्यंदिनस्य सवनस्य) मध्यम उक्थ्यपर्याये ब्रह्मसाम्न्युपाकृतेऽत्र सारस्वतप्रभृतीनुत्तरानाल-

१ क हिरण्यं ।

भन्ते ॥ २२ ॥ तेषामनभिघारिताभिर्वपाभिः प्रचरति ॥ २३ ॥ सारस्वतस्य वपया प्रचर्य समवदाय प्राजापत्यानां वपाभिः प्रचरति ॥ २४ ॥ नैवारेण प्रचरति हविराहुतिप्रभृतीडान्ता संतिष्ठते ॥ २५ ॥ महर्त्विजो हविरुच्छिष्टाशा भवन्ति ॥ २६ ॥

स्तुतस्य स्तुतमसीत्यादि । अतिग्राह्यहोमकाल इन्द्रौजस्विन्निति षड्भिरभिमन्त्रणं तन्त्रेण भेदेन वा ध्व (ज्व) लति वा इत्येत पक्षमाश्रित्य प्रयोगः । देव सवितरेतत्ते मध्यम उक्थ्यपर्याये ब्रह्मसाम्न्युपाकृते सारस्वतनैवारयोरासादन प्रियेण० यज्ञोऽसीत्यादि, तयोः प्रचारः । जुह्वामुपस्तीर्येत्यादि सरस्वते पुरोडाशस्यानुब्रूहीत्यादि (हीति) सरस्वते प्रेष्य सरस्वन्तं यजेति वा । सरस्वतेऽहमन्नाद' । बृहस्पतेऽनुब्रू ३ हीति बृहस्पते (तये) प्रेष्य । बृहस्पतिं यजेति वा । बृहस्पतेरहमन्नाद' । उभयोः स्विष्टकृतं विरुज्य प्राशित्रमुभयोरिडामार्जनान्ता समाप्यते । महर्त्विजो हविरुच्छिष्टाशा भवेयुः । काले वेत्येवं पक्षमाश्रित्य प्रयोग । देव सवित० अनुवर्सात्यादि सवनाहुत्यन्तं निःसर्पणान्तं च । इति माध्यदिनं सवनम् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

पशुकाले सारस्वत्यन्तानां सर्वेषां दैवतेन प्रचरति ॥ २७ ॥

अथ तृतीयसवनस्य कर्म । देव सवित.० स्वदाति नः स्वाहा । सविता देवा । कलशोद्वर्तनम् । तत आदित्यग्रहग्रहणादि । आग्रयण गृहीत्वोक्थ्यग्रहणम् । ततः षोडशी (शि) ग्रहणम् । पुष्टयै म इत्येते स्तुत आर्भवे पवमाने, अग्निदग्नीन्विहर पशुषु संवदस्व, विष्णो त्वं न इत्युपस्थानान्ते प्रतिप्रस्थाता शृतꣳ हवी (विः) शमितरित्याद्यनूहेन सं ते मनसा० अग्नये त्वा जुष्टमभिघारयामि, अन्यत्पृषदाज्यमानयति । एवं क्रमेण सर्वेषामभिघारणम् । इन्द्राग्निभ्यां त्वा जुष्टं० इन्द्राय त्वा जुष्टं० मरुद्भ्यस्त्वा जुष्टं० सरस्वत्यै त्वा जुष्टं० (सरस्वते त्वा जुष्टं०) प्रजापतये त्वा जुष्टं० एवं क्रमेण सप्तदशाना सर्वत्राभिघारयामीत्यभिघारणम् । यस्त आत्मेत्यध्वर्युः क्रमेण । स्वाहोष्मण इति मन्त्रेण दꣳहेत्युद्वासन क्रमेण स्वेन स्वेन हृदयशूलेन सह पञ्चहोत्रासादन क्रमेण । वपावदासन्नाभिमर्शन क्रमेण सर्वेषाम् । चतसृषूपस्तृणीत इत्यादि । आग्नेयस्येन्द्र' प्राण इति कृत्वाऽऽश्रावयेत्यादि अर्धर्चे वसाहोम' । अन्यत्र शेषमानयति । ततो वषट्कृते होमः । ततो मनोता । ऐन्द्राग्नप्रचारः । अर्धर्चे वसाहोम' । शेषमन्यत्र । पुनर्मनोतादि । इन्द्राय वृष्णेहविष' । एव प्रेष्य । अर्धर्चे वसाहोमः । शेषमन्यत्र । पुनर्मनोतादि । मरुद्भ्यो गोर्हविषः । ऐन्द्र' प्राणः, देव

प्रायन्तम् । सरस्वत्यै मेष्या हविष. । एवं प्रेष्य, अर्धर्चे वसाहोमः । शेषमन्यत्र । पुनर्मनोतादि । सरस्वत्या (तो) मेषस्य हविषो वसाहोमः । शेषमन्यत्र निधाय मनोतादि । प्राजापत्यानां तन्त्रेण मनोता । जुह्वामुपस्तीर्य हिरण्यशकलं प्राजापत्यान्सर्वान्सहावदाय त्र्यङ्गानपि सर्वान् पूर्वत्र्यङ्गैः सहावदाय समवत्तधान्यामिडावदानान्यपि पूर्वैरिडावदानै. सहावदाय प्राजापत्यमेदोभि सर्वैः प्रच्छाद्येडावदानं हिरण्यशकलमुपरिष्टात्कृत्वा द्वयोरप्यभिघारणम् । वसाः सर्वाः एकस्मिन्पात्र आनीय तस्मादगृह्यते (ह्णाति) । तत ऐन्द्र. प्राण । सर्वानवदानेऽपि—देव त्रायतोऽवसे सखायोऽनु वो प्रजापतय इत्युपाशु । छागाना हविषोऽनुब्रू३हि इत्युचै. । एवं प्रेष्य । अर्धर्चे वसाहोम. । उद्रेकान्सर्वान् पूर्वम्थापितान्समवनीय दिग्याग । वषट्कृते तन्त्रेण प्रक्षेपः । जुह्वा अधस्ताच्च ब्रूयादिति विधानम् । अवदानपर्याप्तं पूर्वमेव करोति । सर्वेषु वपावदनुमन्त्रणम् । तन्त्रेषु मेदरूपाङ्गानि (णि) प्रावृणोति न मेदसा । न हिरण्य क्षिपेत्तत्र न वाऽऽज्येनाभिघारयेत् ।

अर्धर्चे तु वसा हुत्वा दीर्घा च द्वि(दि)गुपस्थितिम् ।
अकृत्ये(त्वै)व वसाशेष पात्रेऽन्यस्मिन्निषिञ्चति ॥

प्रत्याक्रम्य नारिष्ठादिवनस्पतियाग. । उपर्याहवनीये जुह्वामित्यादिस्विष्टकृत्प्रचारः । वैश्वानरे हविरिद० इडोपाह्वानादि ॥ २७ ॥

षोडशिचमसानुन्नयन्नेकस्मै चमसगणाय राजानमतिरेचयति । तैः प्रचर्यातिरिक्तस्तोत्राय होतृचमसमुख्याꣳश्चमसानुन्नयति । स्तुतशस्त्रे भवतः । शस्त्रं प्रतिगीर्य प्राजापत्यानां मुख्यं ग्रहमध्वर्युरादत्ते । ऋत्विज इतरान् ॥ २८ ॥

सवनीयपुरोडाशप्रचरणादि सौमिक कर्म षोडशिचमसक्षालनान्तम् । अथ होतृचमसमुख्यान्दश चमसानुन्नयति उन्नेता । तत. संप्रैषः । बृहतः स्तोत्रमुपाकरोतीत्यापस्तम्बः । अभिजिदसीति स्तोमभाग. । प्रचरणकाले होतृचमसमध्वर्युरादत्ते । चमसांश्चमसाध्वर्यव ऋत्विज इतरान्सोमग्रहान् ॥ २८ ॥

सुराग्रहाणां मुख्यं प्रतिप्रस्थाता वाजसृत इतरानादत्ते । चमसाꣳश्चमसाध्वर्यवः ॥(ख० ६).।२९॥

सुराग्रहाणा मुख्य प्रतिप्रस्थाताऽऽदत्ते । वाजसृत इतरान्सुराग्रहान् ॥ २९ ॥

संपृचः स्थ सं मा भद्रेण पृङ्क्तेति प्राङध्वर्युः सोमग्रहैरुद्द्रवति । संपृचः स्थ सं मा भद्रेण

पृङ्क्तामिति वा । विपृचः स्थ विपाप्मना पृङ्क्तेति प्रत्यङ्प्रतिप्रस्थाता सुराग्रहैः । विपृचः स्थ वि पाप्मना पृङ्क्तामिति वा ॥ ३० ॥ आहवनीयन्यन्ते सोमग्रहैरवतिष्ठन्ते । मार्जालीयन्यन्ते सुराग्रहैः प्रचरति । सोमग्रहैर्वषट्कारानुवषट्कारौ । सुराग्रहाननुप्रकम्पयन्ति । व्याख्यातः सोमस्य भक्षः ॥ ३१ ॥

संपृचः स्थेत्यध्वर्युः सोमग्रहैः सह प्राङ्मुखो गच्छति । उत्तरवेदिं प्राप्य दक्षिणाऽतिक्रम्योदङ्मुखस्तिष्ठति । ऋत्विजोऽपि सोमग्रहैः सह तिष्ठन्ति । तथैव चमसाध्वर्यवः । असंभवे यथावकाशम् । विपृचः स्थेति प्रतिप्रस्थाता सुराग्रहैः सह प्रत्यङ्मुखो गच्छति अपरया द्वारा निष्क्रम्य सदः प्रविश्यापरया द्वारा सदसो निष्क्रम्य मार्जालीयं गत्वा वैश्येन सहोदङ्मुखस्तिष्ठन् वषट्कृते सोमग्रहाणां सह चमसैः प्रक्षेपः । प्रजापतेऽधिपतिस्त्वं देवानामस्याधिपतिं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु स्वाहा, इति षोडशिमन्त्रेण जुहुत्यृत्विजोऽध्वर्युश्चमसाध्वर्यवश्च तूष्णीमनुवषट्कारे च होमः सर्वेषां च सुराग्रहान् वषट्कारानुवषट्कारयोरनुप्रकम्पयन्ति । सोमग्रहाणां चमसानां च प्रजापतिर्देवता । सुराग्रहाणां च तथैव । विभ्राडिति सौर्यप्राजापत्यानामपि मन्द्राऽभिभूतिरिति वा ॥ ३० ॥ ३१ ॥

विराट्छन्दस इति भक्षमन्त्रं संनमति ॥ ३२ ॥

विराट्छन्दस इति चमसस्य ॥ ३२ ॥

दक्षिणस्यां वेदिश्रोण्यां वाजसृतो विमाथीकृत्य सुराग्रहान् भक्षयन्ति ॥ ३३ ॥

अत्राऽऽपस्तम्बसूत्रे विशेषः—'मारुत्या आहवनीयानि सोमग्रहांश्चर्त्विगभ्य उपहरन्ति । अनवदानीयान् सुराग्रहांश्च वाजसृद्भ्यः । तानि दक्षिणस्यां वेदिश्रोण्यां विमाथीकृत्य भक्षयन्ति ' (आप० श्रौ० १८–७–८) इति । दक्षिणस्यां वेदिश्रोण्यां विमाथीकृत्याऽऽच्छिद्याऽऽच्छिद्य भक्षणमिष्टिविकारा यदि सुरा इडोपाह्वानवदुपहूय भक्षणं भवति ॥ ३३ ॥

अनुयाजैः प्रचरति ते व्यूढासु स्रुक्षु सारस्वतप्रभृतीनामुत्तरेषां दैवतेन प्रचरति ॥ ३४ ॥ अपि वा यत्रैवेतरेषां पशूनां वपाभिः प्रचरेत् ॥ ३५ ॥ यत्रो हैव हविर्भिस्तद्धविर्भिर्मारुत्या अवदानीयानृत्विग्भ्य उपहरति ॥ ३६ ॥ अनवदानीयान्वाज-

सुब्रह्मण्यस्तानि दक्षिणस्यां वेदिश्रोण्यां वाजसृतो विमाथीकृत्य भक्षयन्ति ॥ ३७ ॥

गतम् प्रजापतिश्च सम्राड्वरुणश्च (इति) सोमग्रहणा भक्षण, सुरा यदि सोमविकारा तदा तु मार्जालीये विहृते इध्माधानपरिस्तरणादि होमश्च । दक्षिणस्यां वेदिश्रोण्यां (अविभज्य वा) भक्षयेदिति[1] वैखानस. । मारुतशेषभक्षण सर्वेषा ॥ ३४ ॥ ३५ ॥ ॥ ३६ ॥ ३७ ॥

ककुदो राजपुत्रो ध्रुवगोपो नैवारगोपो वा प्राश्नाति । उभौ वा । सर्वे वा ककुदम् ॥ ३८ ॥

राजपुत्रेण ककुद्भक्षणं सर्वेषामाचमनम् । (यद्यपि वक्ष्यमाणविधि· पूर्वमेवोक्तः परंतु नास्ति क्रम इत्येके व्याचक्षते ।) अग्नीदौपयजानित्यादि । गुदकाण्डै: सर्वै सह समुद्रं गच्छत स्वाहा, सर्वत्र गच्छतेति । स्वरुहोमे सर्वान्सह द्या वो धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्मना पृणध्व स्वाहा इति । सर्वजाघनीभ्यश्चतुरवदानम् । शूलोद्वासनकाले शुचः स्थ तं पाप्मानमभिशोचत । सुमित्रा न आप. ० । यूपोपस्थानकाले यूपवस्त्राण्यादायाध्वर्यवे प्रयच्छति । रशना अध्वर्यव इति च्छन्दोगवचनात् । अथाध्वर्युरुपद्रष्ट्रे तानि वस्त्राणि ददाति । गोच(गाश्च)तस्र: सोमप्रवाकायेति वचनात् । यस्य यस्य या हिरण्यमालोपयुक्ता[2] तां तां तस्मै तस्मै ददाति ॥ ३८ ॥

संतिष्ठते वाजपेयः ॥ ३९ ॥

ब्राह्मणतर्पणान्तं कृत्वा, अग्निं नराद्युदवसानीयान्त, समाप्यते वाजपेय: ।

अथ कुरुवाजपेयस्य कर्म । पूर्वोक्तकाले कुरुवाजपेयेन यक्ष्य इति संकल्प्य । पूर्वोक्तफलानि सर्वाणि । माध्यंदिने सवने सर्वेषु नाराशंसेषु दाक्षिणौ होमौ हुत्वा हिरण्यमुद्गृह्य रूपेण व इत्यादि हिरण्यं पूर्णपात्रमित्यादीनि दत्त्वा वयसो वयस इत्यादि दानं सप्तदश सप्तदश वयसा सहस्रं चतुःशत पञ्चचत्वारिंशद्ददाति । एकस्यैकाहायनप्रभृत्या पञ्चहायनेभ्यश्चप्रसाध्वर्युदानान्तं कृत्वा प्रसर्पकाणा च दत्त्वा, एतत्ते अग्न इति । अग्ने नय (इति) एवं वयसो वयस इत्यादिदानं, दक्षिणाविभाग समश एव न यावदध्वर्यव इति । सदस्यो नित्य इति भाष्यकृत् । एवमशक्तस्य सप्तदशैव गा ददाति, इति च्छन्दोगवचनात् । सप्तदशैव विभागास्ताः सममृत्विग्भ्यो विभजेदिति च्छन्दोगवचनात् । ऋत्विङ्नमस्कार कृत्वा विषाणप्रासन यज्ञपतिरित्यादि माहेन्द्रग्रहणात्पूर्वं सर्वं कृत्वा नैवारसर्पिरानीय चात्वालेऽवदधाति । अथ शुक्रपात्रेण माहेन्द्रम् । असर्जि । अप्रस्तुते

---

१ भक्षयेयुरिति । २ मालामति ।

क्षत्रस्योल्बमसि, इति पूर्ववत् । अत्र नाऽऽजिधावनं रथसंस्कारकत्वात् । रथादीनामभावात्केचित् एकेन रथेनाऽऽजिधावनमिच्छन्ति कुरुवाजपेये । तदा (वैश्यरथकारयो) राजन्यवैश्ययोश्च नेष्टः । शिष्टं सर्वं पूर्ववदिति । संतिष्ठते कुरुवाजपेयः ॥ ३९ ॥

वाजपेयेनेष्ट्वा सौत्रामण्या यजेत ॥ ४० ॥

तेनेष्ट्वा सौत्रामण्या यजेत । मैत्रावरुण्या चाऽऽमिक्षया वा ॥ ४० ॥

न कंचन प्रत्युत्तिष्ठति ॥ ४१ ॥

साक्षाद्गुरुर(राव)प्यागते । यावज्जीव न कचन प्रत्यवरोहेत्, इत्यापस्तम्बः ॥ ४१ ॥

श्वेतच्छत्री भवतीति विज्ञायते ॥ (ख०७) ॥ ४२ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने द्वितीयः पटलः ।

अत्राऽऽपस्तबीयेऽप्यधिकमेकं सूत्रयामास—'बृहस्पतिसवेन वा प्रत्यवरोहणीयेन वा यजेत । श्वेतच्छत्री ह भवतीति विज्ञायते' (आप० श्रौ० १८-७-१८) प्रत्यवरोहण यदि करोति तदा (न) बृहस्पतिसवेन यजेत । यजमानो यावज्जीवं श्वेतच्छत्री भवतीति च्छन्दोगवचनात् ॥ ४२ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलिताया
प्रयोगचन्द्रिकाया त्रयोदशप्रश्ने द्वितीयः पटलः ॥ २ ॥

अथ त्रयोदशप्रश्ने तृतीय पटल ।

ब्राह्मणक्षत्रियोभयकर्तृकसंस्थारूपो वाजपेय उक्तः । अथैकतरकर्तृको विकृतिभूतो राजसूयो विधास्यते—

राजा राजसूयेन स्वर्गकामो यजेत ॥ १ ॥

तत्राकृतवाजपेयस्य राजन्यस्यैव राजसूयेऽधिकारो न तु तेनेष्टवतः । राज्यफलाद्पि साम्राज्यफलस्यातिशयितत्वेनोत्तमफलसाधनयागानन्तरमवरफलहेतुकक्रतुकरणस्यायुक्तत्वात् । अत एव कात्यायन. 'राज्ञो राजसूयोऽनिष्टिनो वाजपेयेन' (का० श्रौ० १९ १-१२) इति । स चायं राजशब्दः क्षत्रियजातिनिमित्तः प्रदेशान्तरे दृश्यते । तस्य यत्कर्म स्मृतिविहितं तद्राज्यमित्युच्यते । किंच तत्तज्जनपदपुरपरिपालनादि । ननु राज्ययोगाद्राजशब्दप्रयोगः सार्वभौमः । तद्युक्ते ह्यक्षत्रियेऽपि राजशब्दं प्रयुञ्जते जना इति । राज्यं य. करोति स राजेति । एवं च कृत्वा राजसूय एवावेष्ट्या दर्शनं भवति । यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽऽहुतिमाहुतिं हुत्वाऽभिघारयेत् । यदि

राजन्य ऐन्द्रम् । यदि वैश्यो वैश्वदेवमिति त्रयाणामपि वर्णानामधिकारं दर्शयति । तत्कथम् । यदि राज्यस्य कर्ता राजा तदैवमुपपद्यते । अत्रोच्यते—न राज्यकर्ता राजेति शक्यते वक्तुम् । न ह्यत्र प्रत्ययलोपः प्रातिपदिकस्य प्रत्यापत्तिर्वा स्मर्यते । राजशब्दात्तु कर्मणि ष्यञ्प्रत्ययो विधीयते । तेन राज्ञः कर्म राज्यमिति शक्यते वक्तुं राज्यस्य कर्ता राजेति । यत्त्ववेष्ट्या ब्राह्मणादीनां दर्शनमुक्तं तद्राजसूयाद्बहिरन्नाद्यकामस्यावेष्टिर्विहिता तद्विषयमिति । यत्त्वेकदेशे जातौ राजशब्दप्रयोगो योगात्सार्वभौम इत्यत्र ब्रूमः । एकदेशेऽपि शब्दशक्तिमन्तरेण प्रयोगोऽनुपपन्न एव । सार्वभौमस्तु प्रयोगः स उपचारवृत्त्या राज्ञः कर्म कुर्वन् राजेव राजेत्युच्यत इति । तथा च समानचोदनाया दृश्यते—'तस्माद्राष्ट्र्यश्वमेधेन यजेत क्षत्रिययज्ञ उ (ह) वा एष यदश्वमेधः' इति । तथा–तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये यजमानं सन्तमृत्विक्त्वेनेति क्षत्रियस्य राजसूयं दर्शयति ।

राजसूयप्रकरणे (जै० सू० ४–४–१) इष्टिपशुसोमयागा अयागाश्च होमविदेवनादयः सर्वे फलाकाङ्क्षा अपि श्रुता न स्वाराज्येन फलेन सबध्यन्ते भावार्थाधिकरणन्यायेन (जै० सू० २–१–२) यजेरेव फलभावनाकरणत्वादयागाना तदङ्गत्वोपपत्तेः । राजसूयपदस्य यजिसामानाधिकरण्येन तन्मात्रनामत्वाच्च । न च राजा सोमः सूयतेऽभिषूयतेऽस्मिन्निति व्युत्पत्त्या राजसूयशब्दस्य सोमयागमात्रवाचित्वात्तेषामेव फलसंबन्धोऽस्त्विति वाच्यम् । राज्ञा क्षत्रियेण सूयते निष्पाद्यत इति व्युत्पत्त्या सर्वेष्वप्युपपन्नत्वेन यजिसंकोचे प्रमाणाभावात् । अत एव राजा क्षत्रियः सुनोति स्नाति यत्रेति व्युत्पत्त्याऽभिषेचनीयस्यैव तन्माहेन्द्रस्तोत्रकालाभिषेकवत्त्वसबन्धेन राजसूयपदप्रसिद्धेस्तस्यैव फलसंबन्ध इत्यप्यपास्तम् । उक्तव्युत्पत्त्या सर्वपरत्वसभवे यजिसंकोचे प्रमाणाभावात् । अतः सर्वे यागा एव फलप्रयुक्ता इति विदेवनादीना तद्विकृतावतिदेशः ॥ १ ॥

तैष्याः पौर्णमास्याः पुरस्तात्पञ्चरात्रे मासि दीक्षेत ॥ २ ॥

पौषपौर्णमास्या उपरिष्टात्पक्षे गते यद्यजनीयं तत्र दीक्षा माघप्रतिपदीत्यर्थः । तथा चाऽऽह कात्यायनः—'माघी(घ) पक्षयजनीये दीक्षा' (का० श्रौ० १९–१–३) इति । सूत्रान्तरे तु वसन्तादौ फाल्गुन्या पौर्णमास्या प्रथमाया वा राजा क्षत्रियोऽभिषिक्तो वा इष्टप्रथमयज्ञ आमावास्येन हविषेष्ट्वा पत्नीभिः सह प्राणानायम्य संकल्पं करोति, इति । अत्र सकल्पः—राजसूयेन यक्ष्ये शतसहस्रदक्षिणेन वा स्वर्गं लोकमवाप्नवानीति संकल्प. ॥ २ ॥

यथाऽस्यां परस्मिन्संवत्सरे तैष्यां पौर्णमास्या-

मभिषेचनीयायोक्थ्याय दीक्षा प्रवत्स्यतीति ॥ ३ ॥

स च सोमयागो दीक्षासंबन्धात् ॥ ४ ॥

ज्योतिष्टोमेनाग्निष्टोमेन प्रथमं यजेत ॥ ४ ॥

ततः पवित्रेण यक्ष्ये । विद्युदसि० । तत. सोमप्रवाकवरणमधुपर्कौ । सोमप्रवाकः—बुक्कवर्मणो राजसूयो भविष्यति । तत्र भवताऽऽध्वर्यवं कर्तव्यम् । कच्चिन्नाहीन इति पृष्टे नाहीनो राजसूय इति प्रतिवचनम् । ननु चाहर्गणत्वसामान्यादहीनत्वप्राप्त इदमुच्यते, तत्र द्राह्यायणेन त्रिरात्रप्रभृतिपञ्चाहर्गणादन्यत्र राजसूयचातुर्मास्याभ्यामित्युक्तम् । तस्मान्नाहीनो राजसूय इति प्रतिवचनम् । होतृवरणकाले भार्गवो होता भवति । त वृणीते । न काण्वकाश्यपादीन् । दशपेये भार्गवो होता भवति (तै० स० १–८–२०) इति (ब्राह्मणात्) श्रुतेः । पवित्र ऋत्विजस्त एव कृत्स्नस्य राजसूयस्य । अथ वा—कर्मणि कर्मणि पृथग्वरणम् । दशपेयेऽपि भार्गवमिति बौधायनवचनात् । दशपेय एव भार्गवमिति गम्यते । देवयजनयाञ्चा(च्ञा)पक्षे राजा देवयजनमित्यनेनैव विधिना, समारोपणकाले गार्हपत्यादीन्सर्वानग्नीन्स(दिसर्वाग्नीना स)मारोपणं सभ्यावसथ्ययोश्च । तौ नियतौ । पङ्क्तिर्वा एषेति श्रुतेः । संभारयजूꣳषि हुत्वा सोममाहृत्य परिवेषणं च । तैतो न्यग्रोधस्तिभिनीराहृत्य परिवेषणम् । न्यग्रोधफलानि । सप्तहोतु (होमं हुत्वा) स्वे दक्ष इत्युपस्थानम् ।

अथ दीक्षणीयाया अन्वाधानम्—अजस्रं त्वा० अन्नमावसथीयं० व्रतकाले वायो व्रतपते० अवहननकाले हविष्कृदागहीत्याह्वानम् । पुरोहितप्रवरेण प्रवृ(वर)णम् । अवदानकाले पूर्वप्रथमान्यवद्येद्धतश्रीत्वात् । एव पत्नीसंयाजान्ते दीक्षणीयेष्टिः संतिष्ठते । आवेदनकालेऽदीक्षिष्टायं ब्राह्मणो राजेन्द्रश्चोलवर्मणः पुत्र इति । यवागूव्रत, प्रायणीया सोमक्रयणकाले दक्षिणे चर्मपक्षे राजानं निवपति । तत्समीपे न्यग्रोधफलानि निदधाति । सोमाभिधायकमन्त्राणां फलेषूहेन प्रयोजनमिच्छन्ति मीमांसका. । नैमित्तिकमतुल्यत्वाद्समानविधानं स्यादिति न्यायेन । सूत्रकारस्य तु मन्त्राणां निवृत्तिः । तूष्णीकं समन्त्रमयं चेति वचनात् ।

अत्र सोमक्रयणे विशेष.—अꣳशुना ते अꣳशुरिति सोममभिमन्त्र्य तूष्णीं फलानि अभि त्यं देवमिति मीत्वा सोमम् । तूष्णीं फलानि । प्रजाभ्यस्त्वेत्यादि सोमं ते क्रीणानीति जपित्वा गवा ते तस्या आत्मा० द्वाभ्यां राजसूयस्येति वचनात् । द्वाभ्यां शताभ्यां क्रय. । शतद्वयस्य सप्तसोमानां सप्तधा विभागः । एकैकस्याष्टाविंशतिः, एकैकस्य

द्वाविंशानिर्वा । तस्यान्त्यवृद्धिन्यायेनान्त्ये (न्ते) निवेशः । क्षत्र.णां धृतौ, अन्यत्राष्टाविंशत्या, एको(कया)गवा ते क्रीणानीत्युक्तम् । तस्याः पांसुग्रहण, सा द्विरूपा द्विरूपया राजन्यस्येति वचनात् । अत्र सप्तविंशत्या गोभिस्ते क्रीणानीति अस्मे ज्योतिरित्यादि ।

आतिथ्यया प्रचर्य यवाग्वा व्रतं प्रवर्ग्यसंभरणकाल इदमहमामुष्यायणं द्वितीयविभक्त्या बुक्कवर्माणं कर्णाटकविशा पर्यूहामीति सिकताव्यूहनम् । महावीरप्रतिष्ठापनकाले धर्माऽसि सुधर्मा मेऽन्यस्मे क्षत्राणि धारयेत्याप्यायनं फलानामपि । उपसद्व्रतं स्तनकल्प एव । शेषमग्निष्टोमवत् ॥

महारात्रे बुद्ध्वा—ध्रुवं प्रयुज्य षोडशिपात्रं प्रयुनक्ति, अत्यग्निष्टोमवत् । केचिन्नेच्छन्ति । प्रकृतावाग्निष्टोमे षोडशीति द्रोणकलशद्वयं पूतभृद्द्वयमाधवनीयद्वयं च ग्रावचर्मणोरभेद इत्येके । ग्रावचर्मणोरभेद इति बह्वृचवचनात् । वसतीवरीणामपां प्रपा(सा)दनकाले पूर्वया द्वारा गतश्रीत्वात् । अभिषवकाल इन्द्राय त्वा वृत्रघ्न इति कृत्वा प्रत्यवरोह्य फलान्येव कुर्वन्ति । महाभिषवं कृत्वा संभृत्य चर्मग्रावाणावपोह्यापरं चर्म प्राञ्चः प्रोक्ष्याऽऽसाद्यापा क्षयान्त कृत्वा काले वा सह कृत्वा फलान्यपरे न्युप्य प्रागपागित्यादि । नात्रावीवृध० । आमास्कानिति द्रप्सश्चस्कन्देति भवतः । केचिन्नेच्छन्ति । एवमभिषुत्य प्रपीड्य लौकिकेन दध्ना संसृज्यान्यस्मिन्नाधवनीयेऽवनयति । ध्रुवं गृहीत्वा षोडशिग्रहणम् । ततो न्यग्रोधकलशं प्रतिष्ठाप्य संमार्जनं कृत्वा तस्मिन् पवित्र वितत्य फलरसात् किंचिदानयन्ति । एकधनानां यथार्थमिति । सोमस्य कृत्वा पश्चात् फलाना मैत्रावरुणचमसाद्यो उभयत्र । ततः पवमानग्रहादिफलानामपि द्वौ समुद्रौ द्वे द्रधसी भूताः स्थ० विष्णोरिन्द्रस्य विश्वेषा देवानामिति पृथगेव कृत्वा सोम त्वामिति निवृत्तिः । शृताः स्थ ० प्रजापतेरिन्द्रस्य विश्वेषा देवाना शृतस्त्वामिति भवति । यथा व्रीहिमन्त्रस्य यवप्रयोगे निवृत्तिस्तद्वदिति । चमसोन्नयनकाले यजमानचमसमुन्नेता फलरसेनोन्नयति । द्रोणकलशादुपस्तीर्येत्यादि चमसेषु हूयमानेषु मध्यतःकारिणा चमसिनां त्रयाणां हुतेऽन्त.परिध्यङ्गार निर्वर्त्य दर्भतरुणेन गृहीत्वाऽहं त्वदस्मि० (इति) तस्य चमसाध्वर्युरङ्गारे चमसं (सेन) जुहोति । अनुवषट्कृते जुहोति तूष्णीम् । भक्षणकाले भक्षेहीत्यवेक्ष्य नृचक्षस त्वा० यदत्र शिष्टमिति अह तदस्मि० इति भक्षयति यजमान. शं न एधीति । अप. (इति) बह्वृचवचनात् । सर्वत्र यजमानचमसेष्वेवं प्रयोगः ॥ ४ ॥

पश्चापवर्गो भवति ॥ ५ ॥

अपवर्ग. परिसमाप्ति. ॥ ५ ॥

शतसहस्रं सर्वेषु राजसूयिकेषु सोमेषु समशः प्रतिविभज्यान्वहं ददाति ॥ ६ ॥ तथा दक्षिणा नयेत् ॥ ७ ॥ यथाऽस्याहानि स्वकालानि स्युः । शेषमनुदिशेत् ॥ ८ ॥

दक्षिणाकाले पञ्च सहस्राणि धेनवो ददाति पवित्र इति । शतसहस्रं लक्षं सर्वेषु राजसूयिकेषु सोमेषु पवित्रादिषु सप्तसोमयागेषु च । स्पष्टमन्यत् । दक्षिणानयनकाले यथा प्रधानोत्कर्षो मा भूत्तथा नयनम् । एतदुक्तं भवति–दश वा विंशतिं वा निनीय शिष्टा यत्र कुत्रचित् स्थिता ददाति । तृतीयसवन ऋजीषमभिषुत्य फलकृजीषमभिषुण्वन्ति । विभज्याऽऽशिरावनयनं पूर्वया द्वारा प्रवेशनमाशिरस्याग्निष्टोमचमसैः प्रचर्य षोडशि-होमेन वा । अवभृथे तूष्णीं फलकृजीषप्रोक्षणं तन्त्रेण प्रक्षेपः । केचिद्वेदेन बिन्दुस्प-र्शनं फलस्य तूष्णीम् । अनूबन्ध्यायाः पशुपुरोडाशमष्टौ देवसुवा हवींष्यनुनिर्वपति । राज्ञो राज्ञां भव्यस्य वेत्यन्यत्सर्वमग्निष्टोमवत् ॥ ६ ॥ ७ ॥ ८ ॥

राजसूयेष्टिपशुबन्धानामन्वहं चोदनात् ॥ ९ ॥

अनुमत्यादय इष्टय, पवित्रादयः सोमाः, मह्लादयश्च पशवः, एते भिन्नतन्त्रा भवन्ति । कुत एतत्–अन्वह चोदनात् । अन्वहमेकैकम् ॥ ९ ॥

तेषां दक्षिणापृथक्त्वेनेष्टिपृथक्त्वं प्रतीयात् ॥ १० ॥

तेषामिष्टिपशुबन्धानां दक्षिणापृथक्त्वेन चोदनादिष्टिपृथक्त्वं जानीयात् । अन्ये त्वेवं चाश्वदाम्यग्रहणं तिस्रोऽनूबन्ध्यास्त्रैधातवी[१] चात्र भवन्ति ॥ १० ॥

अन्यदिशामवेष्टेः पृथग्दक्षिणानि तान्येकतन्त्राणि भवन्ति ॥ ११ ॥

उदाहरणार्थमिदम् ॥ ११ ॥

श्वोभूत आनुमतप्रभृतिभिरन्वहं यजेत ॥ १२ ॥

पवित्रस्यैका दीक्षा तिस्र उपसदः पञ्चम्यां प्रसुतः श्वोभूते षष्ठीप्रभृत्यनुमतादिभि-रष्टाभिरिष्टिभिर्यजेत ॥ १२ ॥

अनुमत्यै पुरोडाशमष्टाकपालं निर्वपतीति यथा-समाम्नातम् । पिष्टलानुमतं पश्चादुत्तरतश्च व्यव-शातयति ॥ १३ ॥

आरम्भार्था नान्वारम्भणीया षष्ठ्या प्रातरग्निहोत्रं हुत्वा, इष्ट्या यक्ष्ये । अत एव यत्र राजसूयादाविष्टिपशुरूपाणि प्रधानान्येवान्यप्रधानसंयुक्तानि तत्र सत्यपि

---

१ क. °वीया चा° ।

तेषां प्राधान्ये तत्तादिष्ट्या यक्ष्ये, इत्यादिसंकल्पस्य ' तत्तदिष्टिर्मे जायताम् ' इत्याकारकेच्छामन्तरेणापि ' राजसूयो मे जायताम् ' इत्याकारकराजसूयत्वप्रकारकेच्छाजन्यप्रवृत्त्याऽप्युत्पत्तिसंभवेन तत्तदिष्टित्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावान्न ततः पूर्वं तावदारम्भणीया न वा ' राजसूयेन यक्ष्ये ' इति महासंकल्पात्पूर्वं तस्यापि राजसूयत्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वेन तत्तदिष्टित्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात् । नहि राजसूयत्व दर्शपूर्णमासनिष्ठप्रकृतितानिरूपितविकृतितावच्छेदकं तस्य सोमयागेष्वपि सत्त्वेनातिप्रसक्तत्वात् । अत एव यत्र चातुर्मास्यादावाग्रयणादौ वा नातिप्रसक्त चातुर्मास्यत्वादि तत्र प्रतियागं भिन्नातिदेशकल्पने सत्यपि तस्योद्देश्यतावच्छेदकत्वे न काचित्क्षतिः ।

वस्तुतस्तु—प्रकृतावपि दर्शपूर्णमासत्वं नोद्देश्यतावच्छेदकमपि त्वाग्नेयत्वादिकमेव कालैक्यात्तु तन्त्रेण करणम् । 'दर्शपूर्णमासाभ्यां यक्ष्ये ' इत्यस्यापि च ' आग्नेयादिभिर्यक्ष्ये ' इत्येवार्थ । ततश्च विकृतावपि चातुर्मास्यादौ तत्तद्यागत्वमेवोद्देश्यतावच्छेदकं कालैक्याच्च तन्त्रेण करणम् ' चातुर्मास्यैर्यक्ष्ये ' इत्यस्य च ' तत्तद्यागैर्यक्ष्ये ' इत्येवार्थ इति न कश्चिद्विरोध. । अतस्तत्र भवत्येव तदारम्भेऽन्वारम्भणीया ।

प्रकृते तु सत्यपि तत्तादिष्टित्वादेरुद्देश्यतावच्छेदकत्वे तत्तत्सोमत्वादेरप्युद्देश्यतावच्छेदकत्वान्नान्वारम्भणीया । प्रकृतौ हि दर्शपूर्णमासावारप्स्यमान , इत्यनेन दर्शपूर्णमासयोर्विशेषणत्वनिर्देशादपूर्वसाधनत्वलक्षणावेलायां प्रकृतापूर्वनिष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नत्वे सति निरुक्तकारणतानवच्छेदकानवच्छिन्नत्वमुद्देश्यताविशेषणं विवक्षणीयम् । अतश्च राजसूये तादृशोद्देश्यताभावान्नान्वारम्भणीया । अत एव प्रकृतौ—'अग्निहोत्रं दर्शपूर्णमासौ च मे जायताम्' इत्याकारकेच्छाऽपि नोद्देश्यताघटिका । अन्यथाऽग्निहोत्रीयप्रथमप्रयोगीयाद्यपदार्थस्यापि तादृशोद्देश्यताकप्रवृत्तिविषयत्वात् तत्राप्यन्वारम्भणीयापत्तेः । अतस्तादृगिच्छोत्तर ' दर्शपूर्णमासौ जायेताम् ' इत्याकारिकेच्छा जायते सैवोद्देश्यताघटिकेति ध्येयम् ।

विद्युद्वृष्टी कर्मणि कर्मण्यादावन्ते च भवतः । अन्वाधानादि अद्य यज्ञाय० इमामूर्जं षष्ठी० ऐष्टि हवि० पौर्णमासतन्त्र, पात्रप्रयोगकालेऽष्टौ कपालानि वर्षिष्ठमेककपालं स्फ्यश्च द्वंद्वमवशिष्टानि प्रकृतिवत् । अन्वाहार्यस्थालीवर्जं च । चतुर्दशीमिश्रितायाः पौर्णमास्या अभिमानिदेवताऽनुमतिः ' अमावास्या सिनीवाली पौर्णमास्यनुमतिः ' इति श्रुतेः । ' कलाहीने साऽनुमति. पूर्णे राका निशाकरे ' इत्यभिधानात् । सा चानुमतिरत्र देवता पुरोडाशो द्रव्यमित्येतदेकं कर्म । दक्षिणाभिधानेन वक्ष्यमाणेभ्यः कर्मभ्यो भिन्नाधिकारावगमात् । निर्वपणकाले देवस्य त्वा० अनुमत्यै जुष्टं निर्वपामीति निर्वपति ।

अनुमते हव्यꣳ रक्षस्वेत्यधिवापनान्तं कृत्वा पिष्टानामनुमन्त्रणं शम्यापश्चादुत्तरतश्च व्यवस्थापयति निपातयति तण्डुलान् ॥ १३ ॥

ये प्रत्यञ्चः शम्याया अवशीयन्ते तं नैर्ऋतमेककपालं कुर्यात् ॥ १४ ॥

अस्मिन्कर्मणि पुरोडाशार्थं तण्डुलेषु पिष्यमाणेषु पश्चिमायां दिशि दृषदमभ्याधातु-मधः स्थापितायाः शम्यायाः पश्चाद्ये तण्डुलपिष्टलेशा अवशीयन्तेऽध· पतन्ति तल्लेश-जातं द्रव्यं निर्ऋतिदेवताकं, तदिदमपरं कर्म पृथग्दक्षिणाभिधानात् । आनुमतं पिष्ट्वा नैर्ऋतं पेषणं भवति ॥ १४ ॥

उपधायाऽऽनुमतस्य कपालानि नैर्ऋ-तस्य कपालमुपदधाति ॥ १५ ॥

अनुमतेरष्टावुपधाय नैर्ऋतस्यैककपालं तूष्णीं वेत्येके । प्रथममन्त्रेणोपदधाती-त्यपरे । अनुमत्यै संवापः, नैर्ऋतं तूष्णीम् । अन्यस्यां पात्र्यां नैर्ऋ-तस्य तूष्णीमुपचारः । पुरोडाशद्वयमुद्वास्योत्तिधा(सं धा)रयति ॥ १५ ॥

आसाद्या(द्याऽऽ)नुमतं नैर्ऋतेन प्रचरति ॥ १६ ॥

प्रियेणेत्यासादनम(मा)नुमतस्य, यज्ञोऽसि० अयं यज्ञः० ममाग्ने० चतुर्होता०' इत्यासन्नाभिमर्शनम् ॥ १६ ॥

व्रीहि स्वाहाऽऽहुतिं जुषाण इति स्रुवेण गार्हपत्ये जुहोति ॥ १७ ॥

अध्वर्युयजमानयोरार्तिनिवारणाय जुहुयादित्यर्थः । गृहपतिर्देवता ॥ १७ ॥

दक्षिणाग्नेरेकोल्मुकं धूपयति ॥ १८ ॥

दक्षिणाग्नेरुल्मकनयनं विधत्ते—' एकोल्मुकेन यन्ति । तद्धि निर्ऋत्यै भागधेयम् ' (तै० ब्रा० १–६–१) इति । उल्मुकेन युक्ता इत्यध्याहारः । निर्ऋतेरेकोल्मुक-प्रियत्वमर्थवादान्तरगतं हिशब्देन सूच्यते ॥ १८ ॥

पराचीनं दक्षिणापरमवान्तरदेशꣳ हृत्वा स्वकृत इरिणे प्रदरे वोपसमाधाय जुषाणा निर्ऋतिर्वेतु स्वाहेति ॥ (ख० ८) ॥ विस्रंसिकायाः का-ण्डाभ्याꣳ सर्वहुतं नैर्ऋतं जुहोति ॥ १९ ॥

दक्षिणपश्चिमयोरवान्तरदेशमङ्गुलिनिर्देशेन विधत्ते—इमां दिशं नयन्ति । एषा वै निर्ऋत्यै दिक् । स्वायामेव दिशि निर्ऋतं निरवदयते, (तै० ब्रा० १–६–१) इति । इरिणमूषरक्षेत्रं, तच्च स्वकृतं स्वतः सिद्धं न तु यतः कुताश्चिदादायोषाः प्रक्षिप्ताः । प्रदरः स्वतः सिद्धं भूच्छिद्रम् । (तस्मिन्) तत्रोपसमाधाय नैर्ऋतꣳ सर्वहुतं जुहोति ॥ १९ ॥

अङ्गुष्ठाभ्यामेष ते निर्ऋते भाग इति वा ॥ २० ॥

मुञ्चेमम५हस इत्यन्तेनाङ्गुष्ठाभ्या विस्रंसिकाकाण्डाभ्यां वा प्रदेशिनीभ्यामित्यर्थः । यद्वा-चोदकप्राप्तं जुह्वा होममपवदितुं विधत्ते—अङ्गुष्ठाभ्यां जुहोतीति ॥ २० ॥

वासोऽभिन्नान्तं दक्षिणा कृष्णं वासः कृष्णदशम् ॥ २१ ॥

कृष्णं वासः कृष्णदशमध्वर्यवे ददाति । मुख्यब्राह्मणे विहिता दक्षिणां प्रशंसति—कृष्णं वासः कृष्णतूषं दक्षिणा । एतद्वै निर्ऋत्यै रूपम् । रूपेणैव निर्ऋतिं निरव-दयते (तै०ब्रा० १-१-१) इति राक्षसजातेः पापरूपाया निर्ऋतेर्देहः कृष्णवर्णः ॥२१॥

अपः परिषिच्याप्रतीक्षमायन्ति ॥ २२ ॥

तूष्णीं परिषेचनं कृत्वा होमदेशमनवेक्षमाणा आयन्ति । पृष्ठभागदर्शनरहितं प्रत्या-गमनं विधत्ते—अप्रतीक्षमायन्ति । निर्ऋत्या अन्तर्हित्यै (तै० ब्रा० १-६-१)अदर्शना-येत्यर्थः ॥ २२ ॥

स्वाहा नमो य इदं चकारेति पुनरेत्य गार्हपत्ये जुहोति ॥ २३ ॥

अथ हस्तपादान्प्रक्षाल्यैतेनैव पथा यथेतमेत्य गार्हपत्ये स्रुवाहुतिं जुहोति स्वाहा नमो य इदं चकारेति । न स्वाहाकारस्त पू(स्तत्पू)र्वहोमीयमिति ॥ २३ ॥

अ(आ)नुमतेन प्रचरति य उदञ्चोऽवशीयन्ते तानुदक्परेत्य शुक्त्या वल्मीकवपामुद्धत्ये-दमहममुष्याऽऽमुष्यायणस्य क्षेत्रियमवयज इति शुक्त्या वल्मीकवपायां जुहोति । तामपिदधा-तीदमहममुष्याऽऽमुष्यायणस्य क्षेत्रियमपिदध इति शुक्त्या वल्मीकवपया वा ॥ २४ ॥

अयं वेद इत्यादि अनुमत्या अनुब्रूहीति अनुमतिं यज । अनुमत्याऽहमन्नादः० धेनु-र्दक्षिणा । चातुर्मास्यपर्जन्यवदूहो यज्ञ शं च म वर्जं ब्राह्मणभोजनान्तम् । शम्याया उत्तरत पतिता ये तण्डुलास्तानादाय शुक्तिकायां च गृहीत्वोत्तरतो गत्वा वल्मीकवपा-यामेकशृङ्गमुद्धत्य, अप उपस्पृश्य इदमहममुष्याऽऽमुष्यायण इति राज्ञो नामग्रहणमा-मुष्यायणस्येति युवप्रत्ययान्तं पितुर्नाम च षष्ठ्यन्तमेव गृह्णाति । एवमत्र प्रयोगः—इदमह५ राजेन्द्रवर्मणो राजेन्द्रचोळायनस्य हेतिमवयजे स्वाहा इति शुक्त्या जुहोति । वल्मी-कवपायां शुक्तिकया मन्त्रेण पूर्ववन्नाम गृहीत्वा तस्यैव शुक्त्याऽपि दधाति । केचित्तु— पेषणकाले पिष्ट्वोत्तरतः पतितांस्तांस्तण्डुलानादायोदक्परेत्येत्यादिशुक्त्योपधानान्तं कृत्वा कपालोपधानादिकं च कुर्वन्ति, इति ॥ २४ ॥

आदित्यं चरुं निर्वपतीति तदुत्तरास्वासामुत्तमा ॥ २५ ॥

श्वो भूतेऽग्निहोत्रं हुत्वा, इष्ट्या यक्ष्ये, इत्यादि । आदित्यं चरुं चातुर्मास्यादित्यवत् । श्वोभूते संकल्पादि आग्नावैष्णवमेकादशकपालं, वामनो वही दक्षिणा वही भारवाही बलीवर्दः । रुद्राय गामिति प्रतिग्रहः । श्वोभूते संकल्पादि । अग्नीषोमीयमेकादशकपालं हिरण्यं दक्षिणा । अग्नये हिरण्यमिति प्रतिग्रहः । श्वोभूते पूर्ववत्संकल्पादि, ऐन्द्रमेकादशकपालं ऋषभो वही दक्षिणा । ऋषभ. सेचनसमर्थः साण्डः । समाप्याग्नीन्परित्यज्य तदानीमेव संकल्पादि, द्विहविष्कावन्वाधाय शाखाहरणं, इन्द्राय देवभागं, अमावास्यातन्त्रं० वेदं कृत्वा वेदिकरणं यवाग्वा सायंहोमं, निशायां दोहनं इन्द्राय हविरिन्द्रियं बहुदुग्धीन्द्राय देवेभ्यः, इन्द्राय दधि प्रागुदयादुपक्रमः । पात्रासादनकालेऽष्टौ कपालानि प्रकृतिवत्सर्वाणि पात्राणि प्रातर्दोहपात्राणि । अन्वाहार्यस्थालीवर्जम् । अग्नये जुष्टं निर्वपामीत्यादि, न प्रातर्दोहः । शेषं सर्वं प्रकृतिवत् । ऋषभो दक्षिणा वरुणप्रघासवदूहः ॥ २५ ॥

आग्रयणेष्टिस्तयेष्ट्वा श्वोभूते सरस्वत्यै चरुं निर्वपाति । सरस्वते चरुं मिथुनौ गावौ दक्षिणा॥२६॥

श्वोभूते त्रिहविष्कं, पूर्ववत्संकल्पादि, पुराणानेव व्रीहिश्यामाकान्द्यावापृथिविवर्जमाग्रयणवत्सर्वम् । ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथमजो वत्सो दक्षिणा । सौम्यं श्यामाकं चरुं वासो दक्षिणा । ऐन्द्राग्नवैश्वदेवसौम्यैस्त्रिभिर्हविर्भिर्युक्त आग्रयणरूप एक एव याग. । श्वोभूते सरस्वत्यै चरुं सरस्वते चरुं मिथुनौ गावौ दक्षिणा, इति । सरस्वतीसरस्वद्देवताभ्यां हविर्भ्यां युक्तो याग एकः । तदेवमादित्यादयः सप्त संपद्यन्ते ॥ २६ ॥

श्वोभूते चातुर्मास्यान्यालभते । तैः संवत्सरं यजते ॥२७॥ न शुनासीरीयं प्रतिसमस्याति ॥२८॥

श्वोभूते चातुर्मास्यान्यालभते । चातुर्मास्यैर्यक्ष्य इति संकल्पादि । न पञ्चहोता नान्वारम्भणीया । वैश्वदेवेन यक्ष्य इत्यादि । एतेषां वैश्वदेवादीनां चातुर्मास्यानामानुमताद्यनन्तरभावित्वं पाठप्राप्तमापस्तम्बो विशदयति—एताभिरन्वहमिष्ट्वा चातुर्मास्यान्यारभते तैः संवत्सरं यजेत इति । तेषु चातुर्मास्येषु प्रथमपर्वणो वैश्वदेवस्य देशकालौ सूत्रकारेण व्याख्यातौ—'प्राचीनप्रवणे वैश्वदेवेन यजते' इति । 'फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते' इति च । शेषं पूर्ववत् । न शुनासीरीयं प्रतिसमस्यति । द्व्यहादयो मासान्ता विकल्पा न भवन्ति । चतुर्षु चतुर्षु मासेष्वेव नियम. । आगामिन्यां

फाल्गुन्यां पौर्णमास्यां शुनासीरीयेणेष्ट्वा ततः पौर्णमासेनेष्ट्वा वपनं कृत्वा चातुर्मास्याङ्गव्रतानि समापयेत् ॥ २७ ॥ २८ ॥

श्वोभूत इन्द्रतुरीयप्रभृतिभिरन्वहं यजते ॥ २९ ॥

तस्मिन्नेवाहनि श्वो वा पाक्षिकत्वं सूत्रान्तरमतात् । इन्द्र एव तुरीयो यस्मिन्कर्मणि तत्कर्मेन्द्रतुरीयम् । अन्यदीयरूपापेक्षया तुरीयत्वमनुष्ठाने तु पाठक्रमेण वरुणस्तुरीयः ॥ २९ ॥

अथेन्द्रतुरीयस्य हवींषि विधत्ते—

आग्नेयमष्टाकपालं निर्वपतीति यथासमाम्नातम् ।
चतुर्हविरिन्द्रतुरीयम् । तत्संग्रामे निर्वपेत् ॥३०॥

इन्द्रतुरीयस्य कर्म—ऐन्द्रतुरीयꣳ हविः० शाखाहरणम् । वत्सापाकरणं प्रकृतिवन्निगमा अमावास्यातन्त्रम् । तदानीमेव सायंदोहः । तण्डुलैरातञ्चनं विष्णो हव्यमिति च कृत्वा न वत्सापाकरणम् । पात्रप्रयोगे शूर्पत्रयं पात्रीत्रय, शेषं प्रकृतिवत् । शूर्पे पवित्रे निधाय, अग्नये जुष्टं निर्वपामीति व्रीहीन् । अन्यस्मिञ्शूर्पे गावीधुकान् । रुद्राय जुष्टं० पुनरन्यस्मिञ्शूर्पे यवान्वरुणाय जुष्ट० एवमेवेष्टितन्त्रं ब्राह्मणभोजनान्तम् ॥ ३० ॥

एतस्या एव रात्रेर्निशायां पञ्चेध्मीयेन यजेत ॥ ३१ ॥

इन्द्रतुरीयकर्म यस्मिन्नहनि क्रियते तस्या रात्रौ सायमग्निहोत्रꣳ हुत्वा पञ्चेध्मीयेन यक्ष्य इत्युक्त्वा ॥ ३१ ॥

निशायामपामार्गहोमेन चरन्ति ॥ ३२ ॥ सायꣳ हुतेऽग्निहोत्रेऽपां न्ययनादपामार्गानाहृत्य तान्सक्तून्कृत्वा दक्षिणाग्नेरेकोल्मुकं धूपयति ॥ ३३ ॥ पराचीनमुत्तरापरमवान्तरदेशꣳ हृत्वा स्वकृत इरिणे प्रदरे वोपसमाधाय ॥(ख०९)॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि स्वाहेति पर्णमयेनार्कमयेण वा स्रुवेणापामार्गसक्तूञ्जुहोति । इन्द्रस्य त्वौजसे जुहोमि स्वाहेति वा । हतꣳ रक्ष इति स्रुवमनुप्रहृत्यावधिष्म रक्ष इति हुत्वोपतिष्ठते ॥ ३४ ॥ वरो दक्षिणा । यद्वस्ते तद्दक्षिणा ॥ ३५ ॥

व्युष्टायां पुराऽग्निहोत्रादपामार्गहोमेन चरन्ति (आप० श्रौ० १८-९-१९) इत्यापस्तम्बः । व्युष्टाया संध्याकालेऽपां न्ययनादपां समीपादपामार्गमाहृत्याध्वर्युरेव

सक्तून्कृत्वा दक्षिणाग्नेरेकोल्मुकं ज्वलन्तमग्निं धूपयति । उत्तरापरमवान्तरं मध्यदेशमाहृत्य स्वकृत इरिणे प्रदरे वा सम्थापयति । पालाशेन स्रुवेणापामार्गसक्तुभिर्जुहोति— देवस्य त्वा० इन्द्रस्य त्वा० इति विकल्पो मन्त्रस्य होमे । हत रक्ष इति स्रुवस्याग्नौ प्रक्षेप. । अवधिष्म रक्ष इत्युपस्थाय होमकाले यद्रुक्ममाच्छादयति तस्य दानं वा । गौर्वै वर इति सूत्रकारेणोदाहृतत्वाद्वरो गौ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

एतेनैव यजेत यः पाप्मनो विभीयात्पञ्चेध्मीयेन चरति । चतुर्धाऽऽहवनीयं प्रतिदिशं व्यूहति । मध्ये पञ्चमम् । पृथगिध्मानुपसमाधाय ये देवाः पुरःसद इति प्रदक्षिणमनुपरिक्रामन्प्रतिदिशं चतस्र आहुतीर्जुहोति । मध्ये पञ्चमीम् । समूढं रक्ष इति मध्य इध्मानभिसमुह्याग्नये रक्षोघ्ने स्वाहेति पञ्चगृहीतेन पञ्चोत्तरा रथः पञ्चवाही दक्षिणा । प्रष्टिवाही वा ॥ ३६ ॥

चतुरो भागानाहवनीये (यस्य) कृत्वा प्रतिदिशमुद्धरेत् । मध्यमं पञ्चमम् । आहवनीयस्य धिष्णिय एव । पञ्च भागान्समिद्भिर्बलवत् कृत्वा जुह्वा पञ्च गृहीतं गृहीत्वा ये देवा. पुरः सदोऽग्निनेत्रा० इति प्राच्यादिषु यथालिङ्गं मन्त्रेण पञ्चमेन । देवा देवता । सर्वानाहवनीयभागान्समूढं रक्ष इति मध्य एकीकृत्य समिद्भिः प्रज्वाल्यापरं चतुर्गृहीतं गृहीत्वा—अग्नये रक्षोघ्ने स्वाहा । यमाय रक्षोघ्ने स्वाहा । सवित्रे रक्षोघ्ने स्वाहा । वरुणाय रक्षोघ्ने स्वाहा । बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा । इति यथालिङ्गं त्यागः । त्रिपादाधारवदश्वत्रयेणोह्यमान. प्रष्टिवाही । प्रष्टिवाही रथो दक्षिणा (तै० सं० १-८-७) इति मन्त्रवर्णात् ॥ ३६ ॥

तेनैव यजेत यो रक्षोभ्यो बिभीयात्पिशाचेभ्यो वा । तं च यन्कामयते तद्द्यात् ॥ ३७ ॥

यो रक्षोभ्य इत्यथशब्दसंयुक्त. कल्पः । शेषं स्पष्टम् ॥ ३७ ॥

श्वोभूते देविकाहविर्भिर्यजेत ॥ ३८ ॥

प्रातरग्निहोत्रं हुत्वा देविकाहविर्भिर्यजेत ॥ ३८ ॥

धात्रे पुरोडाशं द्वादशकपालं निर्वपतीति यथासमाम्नातम् । मिथुनौ गावौ दक्षिणा वत्सतरी वा ॥ ३९ ॥

देविकाहविर्भिर्यक्ष्य इत्यादि । देविकाहविषा५ हविरिदं० । केचिदिष्ट्या यक्ष्य इत्युक्त्वा, ऐष्ट५ हवि.० धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरु५ राकायै चरु५ सिनीवाल्यै चरु कुह्वै चरुं मिथुनौ गावौ दक्षिणा । ब्राह्मणभोजनान्तं समाप्यते ॥ ३९ ॥

प्रवीता प्रवीयमाणेत्येकेषाम् ॥ ४० ॥

नवप्रसूता गर्भिणी वा गौ. ॥ ४० ॥

ताभिः प्रजाकामः पशुकामो वा यजेत ॥ ४१ ॥

ताभिर्देविकाहविर्भि. ॥ ४१ ॥

आमयाविनं याजयेद्वा धातारं मध्यतः कृत्वा प्रजाकामः पुत्रैर्धातारमुत्तमं कृत्वाऽऽमयावी पशुना यजते ॥ ४२ ॥

समाप्ते धातृपशुः, पशुबन्धेन यक्ष्य इत्यादि । केचिन्नेच्छन्ति । षड्ढोत्रा, (उदवसानीय) उदवसाय पथिष्टि., धात्रे त्वा जुष्टमुपाकरोमीत्येव निगम. । उत्तराणि त्रीणि हवी५षि अग्निर्वैश्वानरवारुणौ च, समाप्ते पशौ च तस्मिन्नहन्येव । स च विधिरग्रे वक्ष्यति सूत्रकारः ॥ ४२ ॥

श्वोभूते त्रिषंयुक्तैरन्वहं यजते ॥ ४३ ॥

पशोरभावे देविकानन्तरे । अथवा पश्चाप्यन्वहं पाक्षिकं सूत्रकारमतात् ॥ ४३ ॥

आग्नावैष्णवमेकादशकपालं निर्वपतीति यथासमाम्नातं प्रथमं त्रिषंयुक्तं तेन यज्ञकामो यजेत । अग्नीषोमीयमेकादशकपालं निर्वपतीति यथासमाम्नातं मध्यमं त्रिषंयुक्तं वीरजन५ समामनन्ति । सोमापौष्णं चरुं निर्वपतीति यथासमाम्नातमुत्तमं त्रिषंयुक्तं तेन पशुकामो यजेत । वैश्वानरं द्वादशकपालं निर्वपतीति तेन ग्रामकामो यजेत । वारुणं यवमयं चरुमिति सर्वतः प्रादेशमात्रो वारुणश्चरुर्भवति । योग्योऽश्वो व्युप्तवहो वा दक्षिणा । समानतन्त्रौ वैश्वानरवारुणावेके समामनन्ति ॥ (ख० १०)॥४४॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने तृतीयः पटलः ॥

तासामिष्टीनां कर्म—इष्ट्या यक्ष्य इत्यादि । पौर्णमासतन्त्रम् । अग्नाविष्णुभ्यां जुष्टं० इन्द्राविष्णुभ्यां जुष्टं० विष्णवे जुष्टं० । वामन ऋषभो दक्षिणा । पूर्ववत्संकल्पादि । ऐष्ट५

हविः० । पौर्णमासतन्त्रम् । अग्नीषोमाभ्यां० इन्द्राग्नीमाभ्यां० सोमाय जुष्टं० श्यामाकच-रुर्बभ्रुर्दक्षिणा । कपिला गौः । तदानीमेव पूर्ववत्संकल्पादि । सोमापूषभ्यां जुष्टं० इन्द्रापूषभ्यां जुष्टं० पूष्णे जुष्टं० उत्करे त्रिर्निनीय यथाभागं व्यावर्तध्वं पूष्णे जुष्टमाधिवपामि संव-पामि चरुद्वय(त्रय)माधिश्रित्य पौष्णं पिण्डं स्थाल्यां क्षिपति । श्यामो गौर्दक्षिणा । तदानीमेव संकल्पादि, अग्निर्वैश्वानरेण यक्ष्ये, अग्नये वैश्वानराय जुष्टं० हिरण्यं दक्षिणा । तदानीमेव संकल्प्य वरुणेष्ट्या यक्ष्ये वरुणाय जुष्टं० प्रादेशप्रमाणा स्थाली ऊर्ध्वत्वे तिर्य-क्त्वे च, अश्वो दक्षिणा, प्रतिग्रहमन्त्रे वरुणायाश्वमित्याम्नातत्वादश्वस्य वारुणत्वं वारुणो हि देवतयाऽश्वः समृद्ध्यै (तै० ब्रा० १–७–२) इत्यत्र द्रष्टव्यम् ।

ननु सर्वत्रैकफलसाधनानामनेकेषां कर्मणां फले साहित्यावगमेऽपि देशकालकर्तृभेदे प्रयोगभेदादङ्गावृत्तिरित्युक्तम् । तदिह यत्र देशभेदो नाऽऽम्नातो दक्षिणाभेदमात्रं श्रुतं यथा राजसूये—आग्नावैष्णवमेकादशकपालं निर्वपति वामनो दक्षिणा, सोमापौष्णं चरुं निर्वपति श्यामो दक्षिणा, इत्यादौ । तत्र किं दक्षिणाभेदात्कर्तृभेदस्ततश्च प्रयोगभे-दादावृत्तिः किंवा नेति चिन्तायाम् ।

सत्यपि दक्षिणाभेदे कर्तृभेदे प्रमाणाभावः । न ह्यत्राधिष्ठानभेदस्तवादीष्टः, तदैक्य-स्योत्तराधिकरणे (जै० सू० ११–४–२) स्थापयिष्यमाणत्वात् । कर्तृभेदस्तु[1] न दक्षिणाभेदव्यापकः, प्रमाणाभावात् । दर्शपूर्णमासे चान्वाहार्यदक्षिणावृत्तावपि कर्तृभेदा-भावाच्च । दर्शपूर्णमासयोश्चत्वार ऋत्विज इत्यनेन षण्णां सहितानामेको व्यापकः कर्तृप्रयोगः समे दर्शपूर्णमासाभ्यां यजेत इत्यत्र दार्शिकप्रयोग इव विधीयते । अतश्च सत्यपि कालिकप्रयोगभेदे कर्तृप्रयोगस्यैकत्वात्कर्तृत्वैक्यावगमः ।

वस्तुतस्तु—नात्र दक्षिणाभेदोऽपि द्वादशाहवदेकफलसाधनत्वेनैकप्रयोगत्वावगमे वामनश्यामयोर्मिलितयोरेव दक्षिणात्वात् । अत एव ‘ अन्वहं द्वादशशतं ददाति ’ इत्यनेन प्रत्यहं विभज्य दानेऽपि न तत्र दक्षिणाभेद इत्युक्तम् ।

अतश्च तत्तत्प्रधानाङ्गत्वेन व्यवस्थितयोरपि वामनश्यामयोरेकप्रयोगत्वान्मिलितयोरेव दक्षिणात्वम् । आवश्यकश्चायं न्यायो ब्राह्मणकर्तृकावेष्टिप्रयोगे व्रीहिश्यामाकाग्रयणयोः समानतन्त्रत्वे चेति प्राप्ते—

दक्षिणायाः कर्तृसंस्कारकतया तद्वदेव प्रयोगान्वयित्वाद्युक्तं तद्भेदाक्षेपकत्वम् । न ह्यन्यथा तत्तत्प्रधानानां व्यवस्थितदक्षिणाम्नानं कथमपि संगच्छते । न चात्र द्वादशाह-वन्मिलितयोर्दक्षिणात्वं प्रत्येकं दक्षिणापदश्रवणेन भेदावगतेः । द्वादशाहे तु प्रत्येकदाक्षि-णापदाश्रवणात् तदैक्यमिति विशेषः । न च दर्शे पूर्णमासे च दक्षिणाभेदसत्त्वेऽपि

---

१ कर्तृत्वभेदस्तु ।

कर्तृत्वभेदाभावः। आ वर्धादिसमाख्यया तेषां तेषां कर्तृणां प्रतियागं भेदेनैव विहिततया 'दर्शपूर्णमासयोश्चत्वार ऋत्विज' इत्यस्य 'सोमे सप्तदशर्त्विज' इत्येतद्विध्यन्तरैकवाक्यतया तदर्थवादत्वेन कर्तृप्रयोगविधायकत्वाभावात्। अत एव दर्शे पूर्णमासे च पृथग्वरणानुष्ठानं याज्ञिकानाम्।

एवं च दक्षिणाया कर्तृत्वभेदद्वारा प्रयोगभेदावश्यकत्वे राजसूयान्तर्गतावेष्ट्यादौ-प्रयोगभेदिकाया अपि तस्या अन्नाद्यफलकब्राह्मणादिकर्तृकावेष्ट्यादिप्रयोगे दक्षिणापेक्षायां सति संभवे तत्तत्प्रधानाङ्गत्वेनावगतायास्तस्या एवोपस्थितत्वा दाग्नेयीन्यायेन ग्रहणं न त्वन्त क्रतुप्रयोगे बाधिताया अन्वाहार्यदक्षिणाया इति वक्ष्यते अस्तु वा तत्रापि सा। सर्वथा दक्षिणाभेदे प्रयोगभेद इति सिद्धम्॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां त्रयोदशप्रश्ने तृतीयः पटलः ॥ ३ ॥

अथ त्रयोदशप्रश्ने चतुर्थः पटलः।

अथ रत्निनां हवींष्यनुदिनं क्रमेण कर्तव्यान्युच्यन्ते। तत्र त्रयोदश हवींषि विधत्ते—

श्वोभूते त्रयोदश रत्निनाँ हवीꣳषि ॥ १ ॥

रत्नान्येषां सन्तीति रत्निनः। ब्राह्मणराजन्यवैश्यमहिष्यादयो रत्निनः। तदभिमानिदेवानां प्रियाण्येतानि हवींषि। अतस्तद्गृहेष्वेव गत्वा निर्वपेत्॥ १ ॥

यजमानस्याऽऽप्तानां गृहेष्वन्वहं निर्वपति ॥ २ ॥

आप्तानां ब्रह्मादीनां गृहेष्वन्वहं पृथक्पृथङ्निर्वपेदित्यर्थः॥ २ ॥

यस्य यस्य गृहे निर्वपति तस्य तस्य गृहादिष्टिपरिवेषणं दक्षिणा च ॥ ३ ॥

इष्टिपृथक्त्वाद्दक्षिणाऽपि पृथक्॥ ३ ॥

बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे। शितिपृष्ठो दक्षिणेति यथासमाम्नातम्। पुरोहितस्यैकेषाम् ॥ ४ ॥

रत्निनां हविर्भिर्यक्ष्य इत्यादि, रत्निनां हविषि वरणानन्तरं संकल्पः। अग्नीन्पृथक्पृथक्समारोप्य ब्रह्मणो महर्त्विजो गृहं गत्वा दार्शिकीं वेदिं कृत्वाऽग्निं मथित्वा

स्वस्वायतनेषु निधायोपावरोह्य(हणम्) । एतासामिष्टीनां यस्मिन्गृहे निर्वापस्तस्मादाढ्य पुरोडाशादिदक्षिणाब्राह्मणभोजनार्थानीति आहर्तव्यानि । पौर्णमासतन्त्र बृहस्पतये जुष्टं० चरुं निर्वपतीत्यादि । शितिपृष्ठ. श्वेतपृष्ठ । एवं सर्वत्र यागो द्रष्टव्यः । श्वोभूतेऽग्निहोत्रं हुत्वा संकल्पादि पूर्ववत् । राजन्यस्य गृहं गत्वा—ऐन्द्रमेकादशकपालम्, ऋषभो दक्षिणा । श्वोभूते संकल्पादि । महिषी प्रथमोढा तस्या गृह आदित्य चरुं० धेनुर्दक्षिणा ॥ ४ ॥

भगाय चरुं वा वातायै गृहे विचित्तगर्भा पष्ठौही दक्षिणा ॥ ५ ॥

श्वोभूते संकल्प. । ऊढवो (दासु) प्रियतमा वावाता । भगाय चरु० विचित्त गर्भा व्यक्तगर्भा पष्ठौही दक्षिणा भवतीत्यर्थ. ॥ ५ ॥

नैर्ऋतं चरुमिति सर्वतोऽङ्गुष्ठमात्रो नैर्ऋतश्चरुर्भवति ॥ ६ ॥

श्वोभूते संकल्पादि । अपुत्रा राजपत्नी केवल भोगार्था परिवृक्तिः । पुत्रादिभिः परित्यक्ता वेत्येके । तस्या गृहे कर्तव्य नैर्ऋत हवि· । हविषो द्रव्य विदधच्चोदकप्राप्तमवघातं निषेधति—स कृष्णानामिति । नखैर्निर्भिन्नाना कृष्णव्रीहीणा तण्डुलैर्नैर्ऋतं चरु निर्वपेत् । स च सर्वतोऽङ्गुष्ठमात्रो नैर्ऋतश्चरुर्भवति नाधिक इत्यर्थ ॥ ६ ॥

अङ्गुष्ठपर्वमात्रो वा सर्वहुतं नैर्ऋतं जुहोति ॥ ७ ॥

पर्वसंधि·, न पुरोडाशधर्म. । जुहोतिचोदितत्वात्स्वाहाकारप्रदानत्वाच्चायं होमो दर्विहोमः । कात्यायनेन तु पक्षान्तर सूत्रितम्—'दर्विहोम एष ते निर्ऋत इति जुहोति । वषट्कृते वा' (का० श्रौ० १५–३–१४।१५) इति । कूटा भग्नशृङ्गा गौर्दक्षिणा । अत्राप्याहाऽऽपस्तम्ब·—नैर्ऋत· सर्वतोऽङ्गुष्ठपर्वमात्रश्चरुरित्येके (आप० श्रौ० १८–१०–१६) इति ॥ ७ ॥

तक्षरथकारात्वेकस्मिन्गृहे समवनीयाऽऽग्नेयमष्टाकपालं निर्वपति सर्वायसानि दक्षिणा गोविकर्त्रक्षावापावेकस्मिन्गृहे समवनीय वैष्णवं त्रिकपालमिति वत्सः श्वेतशबलो दक्षिणा । वैष्णवं त्रिकपालं त्रयोदशं तक्षरथकारयोर्गृहे । सर्वायसानि दक्षिणा । तक्ष्णो रथकारस्य वेत्येके ॥ ८ ॥

श्वोभूते संकल्पादि वैष्णवेष्ट्या यक्ष्य इत्यादि । तक्षा वर्धको रथकार. करिण्या

---

१ तेना° ।

माहिष्याज्जातः ' वर्षासु रथकारस्येत्युदाहृतम् । तयोः साधारणमेकस्य गृहं गत्वा वैष्णवं त्रिकपालं० सर्वायसानि सर्वलोहमयानि पात्राणि दक्षिणा ददाति ॥ ८ ॥

सेनान्यो गृहे समवनीयाऽऽग्नेयमष्टाकपालं निर्वपतीति हिरण्यं दक्षिणा ॥ ९ ॥

श्वोभूते सेनान्यो गृहे गत्वाऽऽग्नेयमष्टाकपालं० हिरण्यं दक्षिणा श्वोभूते संकल्पादि सूतः सारथिः, ब्राह्मण्या क्षत्रियाज्जात इति । तस्य गृहे वारुणं दशकपालं० महानिरष्टः पीडितवृषणो दक्षिणा । श्वोभूते ग्रामण्यो गृहे ग्राम नयतीति ग्रामणीः । वैश्यानां महत्तरस्तस्य गृहे संकल्पादि। मारुतेष्ट्या यक्ष्ये मारुतं सप्तकपालं० पृश्निः शुक्लः । अल्पतनुरित्यन्ये । श्वोभूते पूर्ववत्संकल्पादि । क्षत्ता नाम यष्टिहस्तोऽन्त पुराध्यक्षः सर्वेषां नियन्ता प्रतिहारापरपर्याय. । मन्त्री(न्त्रि)दूतो वा । क्षत्रियाया शूद्राज्जातः क्षत्ता, इत्यादि तस्य गृहे सावित्र द्वादशकपाल० संकीर्णवर्ण उपध्वस्तो दक्षिणा । श्वोभूते संकल्पादि। संग्रहीता नाम रथयोजयिता । संग्रहीता धनसंग्रहकर्ता कोशाध्यक्षो वेति । तस्य गृह आश्विनेष्ट्या यक्ष्ये । आश्विन द्विकपाल० सवात्यौ समानमातरौ वत्सावेकोदरावित्यर्थः । श्वोभूते संकल्पादि । पौष्ण्येष्ट्या यक्ष्ये । यो राज्ञः प्राप्तं षष्ठ भाग प्रजाभ्यो गृह्णाति स भागदुघ । तस्य गृहे पौष्णं चरुं० श्यामा गौर्दक्षिणा ॥ ९ ॥

रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणा । असिर्वापाराव(सिर्वालावृ)तः केसरपाशा वा गोव्युच्छती(नी)रज्जुः ॥ १० ॥

श्वोभूते संकल्पादि । अक्षावापो द्यूतकारस्तस्य गृहे गावीधुकोऽरण्यगोधूमनिष्पन्न. । रौद्रं गावीधुकं चरुं० । शबलश्चित्रवर्ण. । उद्वारो दीर्घपुच्छ. । गोविकर्तस्य वा(तुर्वा) । केसरपाशाभिधानी दक्षिणा। कृपणो वालाभिवीतः शबलो वा । त्रिवत्स इति विज्ञायते। असिर्वालावृतो वार्ध्री वालप्रतिग्रथिता गोव्युच्छनी(बरामी)दामतूषा शबलो वा वत्सतरः । अश्वः शोणकर्ण इत्येक इत्यापस्तम्बीये दक्षिणाविशेषा विहिताः । केचित्तु—अक्षावापो नामाक्षाणा क्षेप्ता, अक्षगोप्ता वा द्यूतकारः । गोव्युच्छनी रज्जुर्मृगयासहायभूता । गोहिंसको व्याधः । तयोरुभयोर्गृहेभ्यो गवीधुका आ(ना)रण्यगोधूमान्सभृत्य तै रुद्रदेवत्यं चरुं यजमानस्य गृहे निर्वपेत्, इति व्याचक्षते ॥ १० ॥

अथ दूतगृहे कर्तव्यमाज्यहोमरूपं रत्निहविर्विधत्ते—

अध्वने स्वाहेति पालाकलस्य गृहे जुहोति ॥ ११ ॥

अनृतदूतं ब्रुवते । धनुर्वेत्रवीतं दक्षिणा ॥ १२ ॥

त्र्यश्रभ्रमया बाणवन्तो दक्षिणा ॥ १३ ॥

पालाग (क) लो नाम दूतः । तथैव कात्यायन पालाग (क) लस्थाने दूतशब्द प्रयुक्तवान् ' चतुर्गृहीतं जुषाणोऽध्वाऽऽज्यस्य वेत्विति दूतस्य ' (का० श्रौ० १९-३-१३) इति । आपस्तम्बेन तु यूपविशेषपरत्वेन व्याख्यातः । अध्वने स्वाहा, इति पालाग (क) लस्य गृहे जुहोत्यनृतदूत ब्रुवते (आप० श्रौ० १८-१०-२९) इति । पालाग (क) लमनृतवादिन दूतमिति ब्रुवत आचार्या इत्यर्थः । त्र्यश्रभ्रमया इषुधयो बाणवन्तो धनुर्वा वेत्रवेष्टितमित्यापस्तम्बः ॥ ११ ॥ १२ ॥ १३ ॥

ऐन्द्रमुत्तमं यजमानस्य गृहे निर्वपति । अन्वहमेके ब्रुवते । इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं (प्रति) निर्वपति । इन्द्रायाऽंहोमुचे । यन्नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादिति सूक्तवाकस्याऽऽशीःषु होताऽनुवर्तयति ॥ १४ ॥

होमे कृते समारोप्याग्नीन्स्वगृहं गत्वा— ऐन्द्रकर्म, मथित्वाऽऽयतने निधाय, इष्ट्या यक्ष्ये । अमावास्यातन्त्रम् । इन्द्राय सुत्राम्णे जुष्टं० इन्द्रायांऽहोमुचे जुष्टं० । सूक्तवाके होताऽनुवर्तयत्ययं नो राजेति । इद याजुषं हौत्रम् । सूत्रान्तरे तु नारिष्ठान्हुत्वाऽय नो राजेत्यध्वर्युर्जपतीति ऋषभो दक्षिणा । निष्कः कवचमित्येके ॥ १४ ।

स्वयमवपन्नाया अश्वत्थशाखायै मैत्रं पात्रं चतुःस्रक्ति करोति ॥ १५ ॥ श्वेतां श्वेतवत्सामाम्रस्य दृतौ दुहन्ति । तत्स्वयंमूर्तं संयोगेन परिवहति ॥ १६ ॥ तत्स्वयं मथितमातपे विषजन्ति ॥ १७ ॥ तत्स्वयं विलीनमाज्यं भवति ॥ १८ ॥

ऐन्द्रकर्मणि समाप्ते स्वयमवपन्नाया अश्वत्थशाखायाः स्वयंभग्नाया अश्वत्थशाखायाः स्थविष्ठमेकं मैत्रस्य चरोः पात्रं करोति । चतुःस्रक्ति चमसाकृति । आम्रस्त्ये (स्य) दृतौ दुहन्ति गाम् । अमथितपूर्वे दृतौ, आम्रे वा दृतौ । श्वेतवत्सयुक्ता श्वेता गौः । तत्स्वयंमूर्तं संयोगेन परिवहति प्रापयति । तत्स्वयंमथितमातपे विषजन्ति । तत्स्वयं विलीनमाज्यं भवति । इति । तदिदमापस्तम्बेन स्पष्टीकृतम्— 'श्वेता श्वेतवत्सा गामाम्रस्य दृतौ दुहन्ति तत्स्वयंमूर्तं संयोगेन परिवहति तत्स्वयंमथितमातपे विषजन्ति

तत्स्वयं विलीनमाज्यं भवति' (आप० श्रौ० १८–११–६) इति । आम्रेण फलपुष्परसेन लेपितायां (ते) दृतौ यत्पय आतञ्चनमन्तरेणैव मूर्तं दधि भवति तच्च बदरादिफलसंयोगेन परिवहति तक्रवत्परित· क्षरति । तदिदं स्वयमथितम् । नात्र मृद्भाण्डे पाक. किंत्वाश्वत्थे पात्रे चतुस्रक्तौ न तु वर्तुले । तच्च पात्रं यया कया च्छिन्नशाखया न कर्तव्यं किंतु वाय्वाद्यभिघातेन स्वयमेव पतितया निष्पादनीयमिति । एवं कृत्वा वसोदित्येके ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

तैष्यां पौर्णमास्यामभिषेचनीयायोक्थ्याय दीक्षाः प्रवर्तयन्ति ॥ १९ ॥

तदिदमापस्तम्बेन स्पष्टीकृतम्—श्वोभूतेऽभिषेचनीयस्योक्थ्यस्य दीक्षाः प्रक्रमयति, (आप० श्रौ० १८–११–७) इति । श्वोभूतेऽग्निहोत्रं हुत्वाऽभिषेचनीयेन यक्ष्य इत्युक्त्वा विद्युत् । केचिदिहापि वृतानामपि वरणमिच्छन्ति । तन्त्रपक्षे तु कर्माणि कर्माणि पक्षेऽस्मिन्वरुणदेवतोपस्थानान्त, न समारोपणम्, आज्य पशव इत्यादि संभारयजूंषि हुत्वा सोमपरिवेषण फलानामपि पवित्रवत्फलचमसप्रयोग· । अभिषेचनीयदशपेययो. पर्याप्तमाहरति । न सप्तहोता । केचिदिच्छन्ति । दीक्षार्थत्वात् । स्वे दक्ष इत्युपस्थानम् ॥ १९ ॥

मैत्राबार्हस्पत्यं दीक्षणीयं भवति ॥ २० ॥

मैत्राबार्हस्पत्या दीक्षणीया सा पत्नीसंयाजान्ता समाप्यते ॥ २० ॥

पात्रसंसादनकाले यथार्थं पात्राणि प्रयुनक्ति स्थालीं कपालानां स्थाने प्रयुनक्ति ॥ (ख० ११) ॥ २१ ॥

अन्वाधानादि पौर्णमासतन्त्रं स्वयंदिनं बर्हि । अस्यादिना न छिनत्ति । स्वयच्छिन्नानाहरति । स्वयकृतश्चेध्मश्च तथैव । तयो. सह सनहनादयः क्रियन्ते । शुल्बास्तरणादि बर्हिस्तथैवेऽमस्य पात्रससादनकाले बार्हस्पत्यचरुपात्र मैत्रं दारुपात्रं स्फ्यश्च द्वंद्वं प्रकृतिवदन्यानि ॥ २१ ॥

मैत्रं चरुं निर्वपणकाले बृहस्पतये निरुप्य मित्राय निर्वपतीति । यथा वा त्रिष्फलीकृतेषु विभागमन्त्रेण कर्णांश्चाकर्णांश्च तण्डुलान्विविचन्ति । क्षोदिष्ठांश्च स्थविष्ठांश्चेत्येकेषाम् ॥ २२ ॥ ये कर्णाः स पयसि बार्हस्पत्यः । येऽकर्णाः स आज्ये

मैत्रः स यदा शृतः स्यादथ तं मैत्रपात्रमु-
परिष्टादवदधाति ॥ २३ ॥ तस्मिन्पवि
त्रेऽवधाय स्वयंविलीनमासिञ्चति ॥ २४ ॥
तस्मिन्पवित्रवत्याज्ये स्थवीयस्तण्डुलानावपति
॥ २५ ॥ तावुत्तराधरौ सह शृतौ करोति
॥ २६ ॥ धर्ममात्रꣳ श्रपणमर्धꣳ स्वयंदिन
बर्हिः स्वयंकृत इध्मो निम्नमध्यवस्यति ।
सा स्वयंकृता वेदिर्भवति । वेद्याः करोति ।
अर्धꣳ स्वयंकृतं भवति । अर्धं बर्हिषो
दाति । अर्धं स्वयंदिनमुपसनह्यति । अर्धमिध्मं
करोति ॥ २७ ॥ अपि वा स्वयंकृता वेदिर्भ-
वति । संलोभ्य (प्यं) बर्हिः संचार्ये(र्य)ध्मः
॥ २८ ॥ प्रचरणकाले बार्हस्पत्येन प्रचर्य मैत्रेण
प्रचरति ॥ २९ ॥ इतरथा वा । शितिपृष्ठो बार्ह
स्पत्यस्य दक्षिणा । अश्वो मैत्रस्य । व्युप्तवहो वा ।
सा चैव श्वेता श्वेतवत्सा दक्षिणा ॥(ख० १२)॥३०॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने चतुर्थः पटलः ।

निर्वपणकाले बृहस्पतये जुष्टं० मित्राय जुष्टं० निष्फलीकृतांस्तण्डुलान्यथाभागं व्यावर्तेथामिति विभाग. । विविनक्ति कर्णाश्छिन्नानकर्णानच्छिन्नान्कोऽिष्टान्क्षुद्रतरान्स्थ-विष्ठान्स्थूलतरान् । एव विविच्य पृथक् पृथक् पात्रे निधाय धृष्टिरसि ब्रह्म यच्छेत्यादि, ध्रुवोऽसीति बार्हस्पत्यमुपधाय मैत्रमुपदधाति । श्वेतायै श्वेतवत्सायै पय आनयति, ऊहेनोत्पूय घर्मोऽ-सीति बार्हस्पत्य चरुमधिश्रयति स्थाल्या पयसि क्षिपतीत्यर्थ. । ईषद्यदा श्रितस्तदा मन्त्रेण दारुपात्रेणापिदधाति । ऊहेन स्वयंविलीनमाज्यमुत्पूय मैत्रपात्रेऽवनयेदेकपा-त्रेणोदकमप्यानीय तस्मिन्काले घर्मोऽसीतीतरानावपत्यकर्णांस्तावुत्तराधरौ करोति बार्ह स्पत्यमधस्तान्मैत्रमुपरिष्टाद्रज्जुभि. संवेष्ट्य मृदा प्रलिप्योत्तराधरकरणमेव सह शृतौ भवतः । अन्तरितं० अविदहन्त० बार्हस्पत्यमासाद्य मैत्रमासादयति । अयं यज्ञो० ममाग्ने० पञ्चहोता० इत्याद्येव प्रचरति । प्रधानयाग । दक्षिणाकाले श्वेतपृष्ठ गामश्व वाऽ-न्तर्वेदि स्थापयित्वा सहस्रधारावुत्सावक्षीयमाणौ ते दध्नं. पृथिवीमन्तरिक्ष दिव च तै. शितिपृष्ठगवाश्वश्वेतगौ(गवी)श्वेतवत्सैरतितराणि मृत्युमिति । केचिद्द्विवचनेनोहमिच्छन्ति ।

अस्मिन्पक्षे च ब्रह्मा द्विवचनेन, इतरे बहुवचनेनोहः शितिपृष्ठगवाश्वश्वेतगोश्वेतवत्सा इति। रुद्राय गा वरुणायाश्व० अन्यतरस्य च न बार्हस्पत्यस्य वा विस्मरणे पृथगिज्याया पुन श्वेता धेनु श्वेतवत्सा दीयते। पत्नीसंयाजान्ता धारयति ध्रौवमाज्यमित्यादि, उत्तरेण बर्हि प्राग्वंशमित्यादि सनीहारप्रस्थापनान्तमिति ॥ २२ ॥ २३ ॥ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलिताया प्रयोगचन्द्रिकाया त्रयोदशप्रश्ने चतुर्थ. पटलः ॥ ४ ॥

अथ त्रयोदशप्रश्ने पञ्चम पटल ।

अथ द्वितीयस्याभिषेचनीयाख्यस्य सोमयागस्य प्रयोगोऽभिधास्यते। तत्राभिषेचनीयस्य चोदकप्राप्ता दीक्षामाह—

तथा दीक्षाः प्रवर्धयन्ति(न्त्य) अभिषेचनीयस्य।
यथा दशरात्रे शिष्टे संवत्सरस्य दशपेयो भविष्यति ॥ १ ॥

तत्काल. कात्यायनसूत्रे दर्शितः—फाल्गुनीपक्षे यजनीयेऽभिषेचनीयाय दीक्षते, (का० श्रौ० १५-३-४९) इति। फाल्गुनी(न)पौर्णमासी(स्या) मुपरिष्टादमावास्यायामभिषेचनीयस्य दीक्षा। ततःप्रभृत्यागामिन्या. फाल्गुन्याः पौर्णमास्या उपरिष्टाद्द्वितीयायामभिषेचनीयस्य प्रायणीया यथा स्यादेव दीक्षावृद्धिः। भाष्यकारस्तु—तैष्या पौर्णमास्यामभिषेचनीयस्य दीक्षा· संवत्सरमागामिमाघशुक्ले प्रायणीया स्यादेवं दीक्षावृद्धिरिति व्याचष्टे। प्रथमरात्रिवर्जमन्यासु रात्रिषु अग्ने त्वꣳ सुजागृहीत्यादिदीक्षितधर्मा प्रवर्तन्ते। सर्वत्र यवाग(गू)व्रत पयसि वा श्रपयेत् ॥ १ ॥

सह सोमौ क्रीणाति। अभिषेचनीयाय दशपेयाय चार्धं
राज्ञः पुरोहितस्य ब्रह्मणो वा दशपेयार्थं निदधाति ॥२॥

उक्तकाले प्रायणीयया प्रचर्याभिषेचनीयस्य दशपेयेन सह सोमक्रयः। पदपांसुग्रहणमुभयार्थं, तत्सग्रहेषु निदधाति इहार्धाक्षाञ्जनम्। अर्धेन दशपेय उभयार्थं सोमफलमाहृत्यानूहेन प्रयोग – सोम क्रीत्वा फलान्यपि तथैव सोमं ते क्रीणामि, गवा ते क्रीणामि, तस्या आत्मा० भूयो वा अ० पञ्चाधिकेन पञ्चशतगोभिस्ते क्रीणानीति अस्मे ज्योति, द्वे ऊर्णास्तुके एकाभिषेचनीयस्यैका दशपेयस्याग्रेण प्राग्वंशं स्थापयति। अच्छिद्रपत्रः प्रजा इत्युपावहृत्य विभज्यार्धं सोमस्य फलाना च बद्ध्वा पुरोहितस्य

गृहे दशपेयार्थं निदधाति । न प्रवृञ्जनं, उक्थ्यत्वात् । पञ्चदश च्छदींषि । वपायागादि वसतीवरीग्रहणान्तं पूर्ववत्सर्वं कर्तव्यम् ॥ २ ॥

देवसुवां हवींषि विधित्सुस्तेषामग्नीषोमीयपशुपुरोडाशानन्तरभावित्वं वक्तुमाह—

अग्नीषोमीयपशुपुरोडाशं निरुप्य देवसुवाॅं हवीꣳष्य नुनिर्वपत्यग्नये गृहपतय इति यथासमाम्नातम् । पशुपुरोडाशस्य देवसुवां च हविषाꣳ समानꣳ स्विष्टकृदिडम् ॥ ३ ॥

अग्नीषोमीयपशुपुरोडाशयागे ता(गान्त) निरुप्याष्टौ देवसुवा हवींष्यनुनिर्वपति समानं तु स्विष्टकृदिडम् । अथवा—स उपवसथ इति वाजसनेयश्रुतेः । उपवसथः सुत्यादिवसात्पूर्वमहः । अग्नीषोमीय पशुपुरोडाश निरुप्य तदनु 'देवसुवा हवींषि निर्वपेत् । सुवन्त्यनुजानन्तीति सुवो देवाश्च ते सुवश्चेति देवसुवस्तेषाम् , देवस्वाम् । 'ओ सुपि' (पा० सू० ६–४–८३) इति यणादेशः । प्रसवितृत्वं चैषामाम्नायते— 'देवसुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानाꣳ सवाः । त एवास्मै सवान्प्रयच्छन्ति । त एनꣳ सुवन्ते' (तै० ब्रा० १-७-४) इति ॥ ३ ॥

पुरस्तात्स्विष्टकृतः सविता त्वा प्रसवानाꣳ सुवतामिति यजमानस्य हस्तं वेदयत्येष वः कुरवो राजेति । यदि कौरव्यः । एष वः पञ्चाला राजेति यद्यु वै पाञ्चालः । एष वो भरता राजेति वा कुरुपञ्चालानेष ते जनता राजेत्यन्यान्राज्ञः । सोमोऽस्माकं ब्राह्मणानाꣳ राजेत्युक्तः ॥ ४ ॥

पशुपुरोडाशस्विष्टकृतः पुरस्तात्सविता त्वा प्रसवानाꣳ सुवतां महते जानराज्यायेति ब्रह्मा यजमानस्य हस्तं गृह्णाति । अध्वर्यू रत्निभ्यो जानपदेभ्य. प्रकाशयति एष वो भरता राजेत्यन्तेन तेभ्यो जनपदेभ्यः, तेषां चेद्राजा राजसूययाजी, इति । एष वः कुरवो राजेति यदि कौरव्यः, कुरुभ्यो जानपदेभ्यस्तेषा चेद्राजा । एष वः पञ्चाला राजेति पाञ्चालेभ्यो जानपदेभ्यः । एष वः कुरुपाञ्चाला राजेति कुरुपाञ्चालेभ्य. । उभयेषां चेद्राजा । शबरादन्यतरेण कुरुवर्गतया (वर्गेण) पञ्चाला इति । उक्तेभ्योऽन्येषामेष वो भरता राजेत्यापस्तम्ब. । सोमोऽस्माकं ब्राह्मणानाꣳ राजेति ब्रह्मा जपति ॥ ४ ॥

प्रति त्यन्नाम राज्यमधायीति वारुणीभ्यां यजमानो मुखं विमृष्टे ॥ ५ ॥

आनडिति मन्त्रान्त. । मुखमार्जन तु द्वाभ्या विमृष्टे (तै० ब्रा० १-७-४) इति ॥ ५ ॥

विष्णोः क्रमोऽसीति त्रीन्विष्णुक्रमान्प्राचः क्रामति ॥ ६ ॥

वाजपेये रथसमीपगमने व्याख्यातम् ॥ ६ ॥

यत्प्राङ्माहेन्द्रात्तस्मिन्कृते प्रतिप्रस्थाता मारुतमेकविंशतिकपालं निर्वपति ॥ ७ ॥ गणैः कपालान्युपदधाति ॥ ८ ॥ आरण्ये [ना]नुवाक्येन गणेन मध्य उपधायाऽऽमिक्षायाः कल्पेन मैत्रावरुणीमामिक्षां करोति ॥ ९ ॥

पुरोडाशम्विष्टकृदादि, यजमानस्य प्रैषे दभिधर्मस्य लोपः । महारात्रे बुद्ध्वा, इत्यादि । पात्रासादनकालेऽतिग्राह्याणामप्रयोग । न षोडशीपात्रं, प्राङ्माहेन्द्रात्कृत्वा मारुतमेकविंशतिकपाल निर्वपति । वैश्वदेवी चाऽऽमिक्षा । तस्याश्च कर्म- एकविंशति. कपालानि स्फ्यश्च हृह, इत्यादि । सवनीयानामुत्कर्षपक्षे सवनीयाना (न) शाखा स्यात्, शाखा, इतरथा शाखाहरणादि मरुद्भ्यो जुष्टं० कपालोपधानकाले ईदृङ्चान्यादृङ्चैतादृङ्च प्रतिदृङ्च मितासश्च समितासश्च सभरा इति सप्तकपालानि ध्वनिश्च ध्वान्तश्च ध्वनयश्च ध्वनयंश्च निलिम्पश्च विलिम्पश्च विक्षिप इति सप्त। ध्रुवमसीत्यादि सप्त । एवमेकविंशतिमुपधाय वैश्वदेव्या दोहनम् । पुरोडाशमधिश्रित्य लौकिकदध्यानयनम् । अन्तरित० स ब्रह्मणा० इत्यादि ॥ ७ ॥ ८ ॥ ९ ॥

अभिवासितैर्वायव्यैरपां ग्रहान्गृह्णाति ॥ १० ॥ देवीरापो अपांनपाद्राष्ट्रदास्थ राष्ट्रं दत्त स्वाहेति सारस्वतीष्वप्सु हुत्वैतेनैव गृह्णाति ॥ ११ ॥ अर्थेतः स्थेति वा । एवमितरासु येन येन जुहोति तेन तेन गृह्णाति ॥ १२ ॥ राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहेति होमार्थेऽनुषजति । राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्तेति गृह्णाति ॥ १३ ॥ पुरुषे पशौ वाऽभ्य वेतेऽपां पतिरसीति ॥ (ख०) १३ ॥ समुद्रियाः सैन्धवीर्वा प्रतीपमन्य ऊर्मिः पताति । अन्वीपमन्यो वृषाऽस्यूर्मिरिति यः प्रतीपं तं गृह्णाति । वृषसेनोऽ-

सीति योऽन्धीपम् । महावर्गाः स्थेति स्थावराणाम् । याः स्थानं न प्रवहन्ति परिवाहिणीः स्थेति स्रवन्तीनाम् । या आप उच्छ्रेरते परिणतिं ब्रुवते । व्रजक्षितः स्थेति कूप्यानाम् । मरुतामोजसः स्थेति ह्रादुनीनाम् । सूर्यवर्चसः स्थेत्यातपतिवर्ष्याणाम् । सूर्यत्वचसः स्थेति यासु रूपाणि परिदृश्यन्ते । मान्दाः स्थेति स्थावराणां या वा मन्दमिव स्यन्दन्ते । वाशाः स्थेति पृष्ठानाम् । शक्करी स्थेति गोरुल्ब्या(तुल्या)नाम् । विश्वभृतः स्थेति पयसः । जनभृतः स्थेति दध्नः । अग्नेस्तेजस्याः स्थेति घृतस्य । श्रविष्ठाः स्थानधृष्टा इति वा । अपामोषधीनाꣳ रसः स्थेति मधुनः षोडश सप्तदश वा गृह्णाति ॥ १४ ॥

अभिवासितैः सुगन्धितैर्वायव्यैर्वृक्षोद्भूतैर्ग्रहैर्वोर्ध्वमुखानि वायव्यानि तैरपां ग्रहान्गृह्णातीति वचनात् । अभिषेकार्थं वायव्यानि षोडश सप्तदश वा शाखान्तरगतेनैकेन मन्त्रेण सह षोडशसंख्यामपि षोडशभिर्गृह्णाति(तै० ब्रा० १–७–५) इत्यादौ द्रष्टव्याः । अर्थेत इत्यादीनां षोडशमन्त्राणां होमशेषत्वं ग्रहणशेषत्वं च पूर्वं विहितम् । अर्थेतः स्थेति जुहोति, वहन्तीनां गृह्णाति, (तै० ब्रा० १–७–५) इत्यभिधानात् । तत्रोभयत्रावस्थितां षोडशसंख्यां समस्य प्रशंसति–'षोडशभिर्जुहोति षोडशभिर्गृह्णाति '(तै० ब्रा १–७–५) इत्यादिना । यद्वा—वायव्यानि सप्तदश वा करोति यज्ञियवृक्षैर्वक्ष्यमाणस्तत्तद्देशादानीय गृह्णाति सरस्वतीजलं वहन्तीनां जलं समुद्रजलं यत्र कुतश्चिन्नद्यां पुरुषः पशुर्वा तिष्ठति तत्र प्रतिस्रोतं य ऊर्मिर्युध्यति तस्या भूमेर्जलमानयति पृथक् पृथक् । कूपस्था अप आनयति प्रतिस्रोतसजलं च प्रयत्नेनाऽऽनयेत् । यत्र कुत्रचिद्गता आपस्तत्रैव स्यन्दन्ति ता आनयन्ति । महानदीनां समीरेद्य(पे य)त्र नदी महानद्यां पतति तस्या आनयति । आदित्ये दृश्यमाने यदा वर्षति तदा वर्षजलमानयति । अशोष्यजलमानयति । यत्र कुत्रचिद्रसजलमानयति । गोगर्भोदकं पयो दधि घृतं च मधु माक्षिकं च । आग्नीध्रमण्डपसमीपे ग्रहग्रहणं क्रमेणोच्यते–अर्थेतः स्थापो देवीर्मधुमतीरित्यादि राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा, इति सारस्वतोदके । आज्यहोमस्याभिवारणरूपत्वात् । उक्तजले वायव्येनाऽऽज्येन जुहोति । तस्मिञ्जले वायव्येन गृह्णाति । अर्थेतः स्थापो

देवी राष्ट्रं दत्त राष्ट्रममुष्मै दत्तेति राज्ञो नामग्रहणम् ' राजेन्द्रवर्मणो दत्तेति गृहीत्वाऽन्यत्र निदधाति । एवमुत्तराणि । येन जुहोति तेन गृह्णाति ॥ १०--१४ ॥

अपो देवीर्मधुमतीरगृह्णन्निति गृहीत्वाऽभिमन्त्रयते ॥ १५ ॥

समुद्रजले वा पुंनदो यथा शोणादिस्तदन्यतमजले, अपां पतिरस्यपो देवी० दत्त स्वाहा । प्रतिस्रोत ऊर्मियुद्धजले वृषाऽस्यूर्मिरपो देवी० । अनुस्रोत ऊर्मिजले वृषसेनोऽस्यपो देवी० । कूपजले व्रजक्षित स्थापो देवी० । प्रतीपजले, अन्यज्जले वा मरुतामोजः स्थापो देवी० । उत्स्यन्दितजले प्रभावती (री) स्थापो देवी० परिवाहिनदीजले हिरण्याः स्थापो देवी० । आतपति वर्षजले सूर्यवर्चस स्थापो देवी० । प्रस्रवजले सूर्यत्वचसः स्थापो देवी० । स्थावरजले मान्दा स्थापो देवी० । प्रुष्टजले वस्याः (श्याः) स्थापो देवी० । [अ]वस्य ऽ(श्या)योदके का(वा)शा. स्थापो देवी० । गोगर्भजले शक्करी स्थापो देवी० । पयसि विश्वभृत स्थापो देवी० । दधनि जनभृतः स्थापो देवी० । घृते अग्नेस्तेजस्याः स्थापो देवी० । मधुनि अपामोषधीना रस. स्थापो देवी० । इति च गृहीत्वाऽभिमन्त्रयत इत्यर्थः ॥ १५ ॥

देवीराप: सं मधुमतीर्मधुमतीभिः सृज्यध्वमिति वैतसे द्रोणे समवनयति ॥ १६ ॥

वैतसे द्रोणे कलशाकृतौ देवीराप० वन्वना इत्यन्तेन ग्रहान्समवनयति । तथा चाऽऽह्णाऽऽपस्तम्ब.—देवीराप इति वैतसे सते ग्रहान्समवनीय, (आप० श्रौ० १८-१३-२१) इति । अप्सु जातो वृक्षविशेषो वेतसस्तेन निर्मित द्रोणकलशसदृशं पात्रं सतं तस्मिन्सते वायव्यैर्गृहीतास्ता अपोऽवनयेदित्यर्थः ॥ १६ ॥

अत्राभिमन्त्रणमेके समामनन्ति ॥ १७ ॥

शाखान्तरोक्तो विकल्पः ॥ १७ ॥

अनाधृष्टाः सीदतेत्यन्तरा होतुर्धिष्णियं ब्राह्मणाच्छंसिनश्च सादयति ॥ १८ ॥ अपरेण होत्रीयमुपसादयतीत्येकेषाम् ॥ १९ ॥

दधतीरित्यन्तः । अन्तरा होतुर्धिष्णियं ब्राह्मणाच्छंसिनश्च सादयति ॥१८॥१९॥

अनिभृष्टमसीति शतातृण्णं सौवर्णं रुक्ममादाय शुक्रा वः शुक्रेणोत्पुनामीति तेन त्रिरुत्पुनाति ॥ २० ॥

अनिभृष्टमसि० दात्रमसीत्यन्तेन शतमान हिरण्य सतेऽवधायेत्यापस्तम्बः । तेन शतमानेन शुक्रा वः शुक्रेणोत्पुनामि० चिताना , इत्यन्तेनोत्पुनाति सकृत् । त्रिरिति भाष्यकृत् । तदा शुक्रा वः शुक्रेणोत्पुनामि स्वाहा राजसूयाय चितानाः, चन्द्रा वश्च-

न्द्रेणोत्पुनामि० राजसूयाय चितानां, अमृता वो अमृतेन स्वाहा राजसूयाय चितानां इति त्रिभिर्मन्त्रैः ॥ २० ॥

सधमादोद्युम्निनीरूर्ज एता इति चतुर्षु पात्रेषु व्यानयति ॥ (ख० १४) ॥ पालाश औदुम्बर आश्वत्थे नैयग्रोधेऽवशेषं द्रोणे करोति ॥ २१ ॥

सधमादो० मातृतमास्वन्त इ(रि)त्यन्त । पालाशादिषु पात्रेषु क्षिपति । प्रतिपात्रं मन्त्रावृत्तिर्द्रव्यपृथक्त्वात् । अवशेषं द्रोणे करोति ॥ २१ ॥

तौक्मो(रौक्म औ)दुम्बरं दधि च यजमानं भोजयति ॥२२॥

स्पष्टोऽर्थः ॥ २२ ॥

एकशतेन दर्भपुञ्जीलैराङ्क्ते । शतेनेत्येकेषाम् । पञ्चाशता दक्षिणमक्ष्येकपञ्चाशतोत्तरमभ्यज्य क्षत्र-स्योल्बमसीति तृपाणां वृक्षाणां वासो यजमानः परिधत्ते । क्षत्रस्य योनिरसीति पाण्डुरमुष्णीषम् । तृतीयं श्वेतपाण्डुरमित्याचक्षते । अप उपस्पर्श-यित्वाऽऽविन्नो अग्निरित्याविदो यजमानं वाच-यन्बहिःसदसमभ्युदानयति ॥ २३ ॥

दर्भपुञ्जीलैरभ्यज्य क्षत्रस्योल्बमसीति तार्प्यं क्षत्रस्य योनिरसीति पाण्डुरवासश्च परिधत्ते । अथवा त्रीणि वासांसि, द्वे परिधानार्थे पाण्डुरं तार्प्यं चैकमुत्तरीयं च । अथवा शिरोष्णीषमेव कृत्वाऽथैनमेकशतेन (शतेन वा) दर्भपुञ्जीलैः पवयति । एक-शतेनाऽऽङ्क्ते यजमानमेव । पञ्चाशता दक्षिणमक्षि युगपदेकपञ्चाशता सव्यम्, इत्यन्यथा क्रमः । आग्नीध्रागार एतानि कर्माणि कुर्यात् । अध्वर्युरप उपस्पृशति आविद इत्येवं संज्ञानाविन्नो अग्निरित्यादीन्वाचयन्यजमानमध्वर्युर्बहिरुदानयति ॥ २३ ॥

एष वः कुरवो राजेत्यावेदयति । मनसाऽनुप्रक्रा-माति । मनसोर्ध्वमनूज्जिहीते ॥ २४ ॥

राज्ञो नामग्रहणमसाविति । आविन्नोऽयं राजेन्द्रवर्मणः पुत्रो राजेन्द्रचोलायनोऽस्य विश्वस्मिन्राष्ट्र इत्यादि । अत्राप्यापस्तम्बे विशेषः--इन्द्रस्य वज्रोऽसीति धनुर्यजमा-नाय प्रयच्छति । शत्रुबाधमाः स्थेति त्रीन्बाणांवत. । पात मा प्रत्यञ्चमिति प्रदीयमा-नाननुमन्त्रयते । पात प्राञ्चं पात प्रत्यञ्चं पातोदञ्चमिति प्रयच्छन्नध्वर्युर्जपति । मित्रोऽ-सीति दक्षिणं बाहुं यजमान उद्यच्छते । वरुणोऽसीति सव्यम् । एतद्वा विपरीतम् । हिरण्यवर्णावित्युद्यतावभिमन्त्रयते । अथैनं पञ्चभिर्दिशो व्यास्थापयति । समिधमातिं-

होति । मनसा चानुप्रक्रामति । (आप० श्रौ० १८-१९-२) इति । अध्वर्युरनुक्रामति मनसा, न कर्मणेत्यर्थ ॥ २४ ॥

अत्र मारुतमेकाविंशतिकपालमेके समामनन्ति ॥ २५ ॥

अत्र मारुतवैश्वदेव्योर्निर्वापाद्यासन्नाभिमर्शनान्ते प्राङ्माहेन्द्रादपा ग्रहानित्यादि मनसाऽनुक्रामान्तं कृत्वा प्राङ्माहेन्द्रादित्यस्मिन्नभिवास्यापा ग्रहानित्यादि मनसाऽनुक्रामान्तम् । आप्यलेपनिनयनाद्यासन्नाभिमर्शनान्त, माध्यंदिनं चेत्यस्मिन्पक्षे सवनीयैः सहाभिवासनान्ते, अपा ग्रहानित्यादि मनसाऽनुक्रामान्तम् । ततः सौमिकं वैष्णव्यर्चोपस्थानान्तं कृत्वा सवनीयप्रचरणादि माहेन्द्रात्प्राक् । तत आसन्दीप्रतिष्ठापनादि प्राक्पार्थहोमात्कृत्वा मारुतं पुरोडाशं तूष्णीं स्थापयित्वा त बर्हिषदं कृत्वैना व्याघ्रमिति मन्त्रेण स्फ्येन पुरोडाशं भिनत्ति । यत्स्फ्य आश्लिष्यति यच्च प्रतिशीर्यते तद्विष्णवे शिपिविष्टाय जुहोति, (आप० श्रौ० १८-१९-४) इत्यापस्तम्बः । अभिचरत अ (तोऽ) नभिचरतो न च्छेदनहोमौ ॥ २५ ॥

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति शार्दूलचर्म विवेष्टयति ॥ २६ ॥

अग्रेण प्रशास्तुर्धिष्णियं खादिरीमौदुम्बरीं वाऽऽसन्दीं प्रतिष्ठाप्येत्यापस्तम्बः । प्रशास्तुर्धिष्णियस्य पुरस्तादग्रेणोक्तलक्षणामासन्दीं प्रतिष्ठाप्य सोमस्य त्विषिरसि० भूयादिति शार्दूलचर्माऽऽस्तृणाति ॥ २६ ॥

अग्रे सदो दक्षिणे द्वारबाहौ तद्यजमान आरोहति । अवेष्टा दन्दशूका इति । आपः केशवापाय प्रयच्छति ॥ (ख० १५) ॥ लोहायसं प्रयच्छतीत्येकेषाम् ॥ २७ ॥

अग्रेसदो दक्षिणे द्वारबाहौ तदासन्दीमारोहति यजमानः । स्पष्टमन्यम् ॥ २७ ॥

निरस्तं नमुचेः शिर इति सीसं क्लीबाय विध्यति चैनꣳ सीसं क्लीबेन विध्यतीत्येकेषाम् ॥ २८ ॥

नपुंसकाय प्रयच्छति सीसं लोहमयम् ॥ २८ ॥

प्रत्यस्तं नमुचेः शिर इति वाऽप उपस्पृश्य ॥ २९ ॥

अत्र स्पष्टमाहाऽऽपस्तम्बः— तामारोहन्यजमानोऽवेष्टा दन्दशूका इति दक्षिणेन पदा सीसं पण्डकाय प्रत्यस्यति । निरस्त नमुचेः शिर इति सव्येन लोहितायसं केशवापाय तौ बहिर्वेदि निरस्यतः । अपामुपस्पर्शन तयो ॥ २९ ॥

अमृतमसीति रजतꣳ रुक्मं व्याघ्रचर्मण्युपोहति ।
अधस्तात्पादयोर्दिद्योन्मा पाहीति शतातृण्णꣳ सौ
वर्णꣳ रुक्मं यजमानस्य शिरसि निदधाति॥३०॥

उपोहति व्याघ्रचर्मण्यावेष्टयति। तत अ(तोऽ)धस्तात्पादयोस्तदुपोहति शतगुञ्जापरिमित सौवर्णं रुक्मं शतच्छिद्रं यजमानस्य शिरसि निदधाति अर्सासि सर्जास्त्यादि ततो माहेन्द्र-स्तोत्रम् ॥ ३० ॥

सोमो राजा वरुण इत्येताभ्यो देवताभ्यः प्रोच्याग्नये
स्वाहेति षट्पूर्वाणि पार्थानि हुत्वा पृथिव्यै स्वाहेति
षट्पूर्वा भूतानामवेष्टीर्जुहोति ॥ ३१ ॥

प्रोच्याभिमन्त्र्य । ततोऽग्नये स्वाहेति षट् पार्थानि जुहोति । बृहस्पतये स्वाहेत्य-न्तानि । पृथिव्यै स्वाहेति षट्भूतानामवेष्टीर्नक्षत्रेभ्य स्वाहेत्यन्तैरूर्ध्वबाहु तिष्ठन्त आ(मा)सन्त्याम् । तदुक्तमापस्तम्बेन–ऊर्ध्वबाहु तिष्ठन्त माहेन्द्रस्य स्तोत्र प्रत्यभिषि-ञ्चति (आप० श्रौ० १८–१९–१०) इति ॥ ३१ ॥

सोमस्य त्वा द्युम्नेनाभिषिञ्चामीत्यध्वर्युर्वाऽऽहुति
जुहूꣳ (हुतꣳ) हूयमानेऽभिषिञ्चति ॥ ३२ ॥ पर्ण-
मयेन पुरस्तादध्वर्युः । एवमितरे । औदुम्बरेण
दक्षिणतो ब्रह्मा । राजन्यो वा । आश्वत्थेन
पश्चाद्वैश्यः । नैयग्रोधेनोत्तरतो जन्यमित्रम् ।
स्यादुपरिष्टाद्देवनस्याऽऽसिञ्चति ॥ ३३ ॥

सोमो राजा० मरुतामोजसेत्यनेन पालाशेन पुरस्तात्पुर स्थितोऽभिषिञ्चति । अनेन मन्त्रेणौदुम्बरेण दक्षिणतो ब्रह्मा । आश्वत्थेन पश्चाद्वैश्य । तेन नैयग्रोधेन जन्य उत्तरत. । जन्य. मित्रं सर्वदा नपुंसकम् । सखेत्यर्थ ॥ ३२ ॥ ३३ ॥

क्षत्राणां क्षत्रपतिरसीत्यभिषिच्यमानमभि
मन्त्रयते ॥ ३४ ॥

अध्वर्युरिति शेषः ॥ ३४ ॥

अति दिवस्पाहीति कृष्णविषाणया राजसूयिका-
नि वासाꣳसि विवृत्य समाववृत्रन्नधरागुदीची-
रिति येऽभिषिच्यमानस्य लेपा व्यवस्रवन्ति ।
तान्पात्रे समुन्मार्ष्टि ॥ ३५ ॥

कृष्णविषाणया ताप्यौ दिवासासि विस्रंसयत्यध्वर्यु । तान्युत्करे त्यजति । अति दिवस्पाहीति । अस्मिन्काले शस्त्रप्रतिगरप्राप्तिर्यथा स्यात्तथा कार्या । अभिषिच्यमानस्याङ्गेषु य उदकलेपास्तान्पात्रैरुन्माष्टर्यध्वर्यु । यो योऽभिषिञ्चतीति भाष्यकृत् ॥ ३५ ॥

इन्द्राय स्वाहेति षडुत्तराणि पार्थानि हुत्वाऽह्नयः
स्वाहेति षडुत्तरा भूतानामवेष्टीर्जुहोति ॥ ३६ ॥

प्रतिगरं पार्थान्यवेष्टीश्च जुहोति । इन्द्राय स्वाहेति षट्पार्थानि । अह्नयः स्वाहेति षड्भूतानामवेष्टी. । अथ प्रतिगर —उक्थं वाचीत्यन्तम् ॥ ३६ ॥

रुद्र यत्ते क्रयी परं नामेति यो द्रोणे शेषस्तमुदङ्-
परेत्याऽऽग्नीध्रे जुहोति ॥ (ख० १६)॥ ३७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने पञ्चमः पटलः ॥

अत्र स्वाहाकारोऽध्याहृत. । यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयतीति श्रुतत्वाद्रुद्रस्योच्छेषणभागत्वम् । तत्रैव कश्चिद्विशेष विधत्ते—उदङ्परेत्याऽऽग्नीध्रे जुहोति । एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते (तै० ब्रा० १—७-८) इति । अत्र वा प्ररेक जुहुयात् । या भार्या कामयेत राष्ट्रमस्मै प्रजा स्यादिति तस्या औपासने प्रतिहितमारम्भयित्वा ये पात्रेषु[1] लेपा व्यवसृतास्तेभ्यो नामव्यतिषञ्जनीयौ होमौ जुहुयात् । प्रजापते न त्वदेतानीति । असावमुष्य पुत्रोऽमुष्या असौ पुत्र इति नामनी व्यतिषजति । नामानीत्येके (आप० श्रौ० १८—१६—१६) इत्यापस्तम्बीये विशेष ॥ ३७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां त्रयोदशप्रश्ने पञ्चमः पटलः ।

अथ त्रयोदशप्रश्ने षष्ठ पटल ।

अथ रथेन विजयोऽभिधीयते—

इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहरति ॥ १ ॥

वाजपेये व्याख्यातम् ॥ १ ॥

मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीति
प्रष्टिवाहिनꣳ रथं युनक्ति ॥ २ ॥

[1] यस्मिन् पा० ।

यज्ञस्य योगेनेत्यन्तः । रथस्याश्वत्रयोपेतत्वं प्रष्टिवाहिन युनक्ति । तादृशं रथ प्रकारान्तरेण प्रशंसति—' त्रयोऽश्वा भवन्ति । रथश्चतुर्थ । द्वौ सव्येष्ठसारथी । षट्संपद्यन्ते ' (तै० ब्रा० १–७–९) इति । सव्येष्ठेत्यत्र दक्षिणस्थेत्यर्थ्य हार्यम् । ततः पार्श्वद्वयवर्तिनौ द्वौ सारथी संपद्येते ॥ २ ॥

विष्णोः क्रमोऽसीति रथमातिष्ठति ॥ ३ ॥

रथसकाशं गच्छति । यजमान आरोहति रथं सारथिश्च सगृ(ग्र)हातीश्व(च) ॥ ३ ॥

मरुतां प्रसवे जेषमिति प्रयास्याति ॥ ४ ॥

प्रयाति ॥ ४ ॥

प्र सम्राहिष इति दक्षिणतो ब्रह्मा त्रिष्टुभाऽन्वेति ॥ ५ ॥

दक्षिणतो ब्रह्मा गच्छति ॥ ५ ॥

प्रतिहितोऽन्वारभत इत्येकेषाम् ॥ ६ ॥

अन्वारम्भः स्पर्शः । प्रतिहितो राजपुत्रो रथमन्वारभते ॥ ६ ॥

सधनू राजन्यः पुरस्तादुत्तरतो वाऽवस्थितो भवति ॥ ७ ॥ तं जिनात्याप्तं मनः समहमिन्द्रियेणेति ॥८॥

बाणहस्तो राजा पुरस्तादुत्तरतो वा इषुपातमात्रे तिष्ठति । तं जित्वोत्सृष्ट अ(ष्टोऽ)सौ जितो भवति—आप्तं मनः समहामिन्द्रियेणेति मन्त्रेण ॥ ७ ॥ ८ ॥

तस्मा एतान्निषूनस्याति प्रति त्वाऽऽप्तं मनः समहमिन्द्रियेणेति प्रदक्षिणमावर्तते ॥ ९ ॥

य इषुमात्रे तिष्ठति तस्मै राजन्यायैतानिषून्प्रक्षिपेत्—आप्त मन इति । इषुप्रति (प्रतीषु) मन्त्रावृत्तिः । समह० वीर्येणेति प्रदक्षिणमावर्तते ॥ ९ ॥

एषु वज्रो वाजसातमस्तेन नौ पुत्रौ वाजसꣳसेदि(याताभि)ति धनुः पत्न्यै प्रयच्छाति । धनुरार्त्निं प्रयच्छतीत्येकेषाम् । पत्नी धनुराज्ञोऽ(र्त्नीअ)पनुदतीत्येकेषाम् । अश्वानुपस्पृशतीत्येकेषाम् ॥ १० ॥

पत्न्यै प्रददाति । अन्ये पक्षाः शाखान्तरस्थाः ॥ १० ॥

इयदस्यायुरस्यायुर्मे धेहीति राजतमणिं यजमानः प्रतिमुञ्चते ॥ ऊर्गसीत्यौदुम्बरम् । युङ्ङसीति सौवर्णम् ॥ ११ ॥

अन्यप्रतिमोकनिवृत्त्यर्थं यजमानग्रहणम् । रजतताम्रसौवर्णान्मणीन्प्रतिमुञ्चते । पृथक्कृद्रव्यपक्षे तु मन्त्रावृत्तिरिति भाष्यकृत् ॥ ११ ॥

मध्ये सौवर्णमेके समामनन्ति ॥ १२ ॥

स्पष्टोऽर्थः ॥ १२ ॥

मित्रोऽसीति दक्षिणं बाहुमुपावहरते । वरुणोऽसीति सव्यम् । एतद्वा विपरीतम् ॥ १३ ॥

मित्रोऽसि वरुणोऽसीति च दक्षिणं सव्यं च बाहुमुपावहरते यजमानः ॥ १३ ॥

समहं विश्वैर्देवैरिति वैश्वदेव्यामामिक्षायाꣳ हस्तावुपावहरते । अत्रैते हिरण्ये ददाति सौवर्णꣳ राजतं च मणिम् ॥ १४ ॥

वैश्वदेव्यामामिक्षाया हस्तौ दक्षिणोत्तरावुपावहरते यजमानः ॥ १४ ॥

नमो मात्रे पृथिव्या इत्यवरोहन्पृथिवीमवेक्षते ॥ ॥ (ख० १७) ॥ पशूनां मन्युरसि तवेव मे मन्युर्भूयादिति वाराही उपानहावभ्यवरोहति ॥ १५ ॥

पृथिव्यवेक्षणमुत्तरकर्मार्थम् । वराहचर्ममय्यावुपानहौ प्रत्यवरोहति ॥ १५ ॥

प्रति त्यन्नाम राज्यमधायीति वारुणीभ्यां मुखं विमृष्टे ॥ १६ ॥

यजमानसंस्कारार्थम् ॥ १६ ॥

अग्रेणाऽऽग्नीध्रं चतुरवस्ता(स्रा)वं खरं विमितं विमिन्वन्ति । दक्षिणत उपचारं क्षत्रस्य नाभिरसीति तस्मिन्खादिरीमासन्दीं प्रतिष्ठापयति । क्षत्रस्य योनिरसीति तस्यां कृत्त्यधीवासमास्तृणाति ॥ १७ ॥

आग्नीध्रागारस्य पुरस्ताच्चतुरवस्ता(स्रा)वं चतुष्टयनाडिकं चतुर्द्वारकमिति केचित् । अन्यस्मिन्स्थाने विमितं खरं विमिन्वन्ति हर्म्यं स्थापयन्तीत्यर्थः । दक्षिणत उपचारं संचारं क्षत्रस्य नाभिरिति तस्मिन्यथोक्तलक्षणामासन्दीं प्रतिष्ठाप्य क्षत्रस्य योनिरसीति तस्यामासन्द्यां कृत्त्यधीवासं चर्मपटश्चा(टं चाऽऽ)स्तृणाति प्रसारयतीत्यर्थः ॥ १७ ॥

अवनह्यति हनि विशि मा दृꣳहेत्यवनह्यति ॥ १८ ॥

अवनह्यति बध्नाति आसन्दीपादेषु ॥ १८ ॥

स्योनाऽसीत्यासीदति ॥ १९ ॥

यजमानः ॥ १९ ॥

स्योनामासीद सुषदामासीदेति सीदन्तमभिमन्त्रयते ॥ २० ॥

गतम् ॥ २० ॥

मा त्वा हिꣳसीदित्यारोहति ॥ २१ ॥

उपविशति ॥ २१ ॥

मा त्वा हिꣳसीन्मा मा हिꣳसीदित्यारोहन्तमभिमन्त्रयते ॥ २२ ॥

गतम् ॥ २२ ॥

निषसाद धृतव्रत इत्यासीनो जपति ॥ २३ ॥

उपविष्टमभिमन्त्रयतेऽध्वर्युः ॥ २३ ॥

अग्नये गृहपतये स्वाहेति स्रुवेण गार्हपत्ये रथविमोचनीयानि हुत्वा हꣳसः शुचिषदिति सहसंग्रहीत्रा रथवाहने रथमादधाति ॥ २४ ॥

अग्नये गृहपतये स्वाहेति चतुर्भिर्मरुतामोजसे स्वाहा, इत्यन्तं रथविमोचनीयं जुहोति । हꣳसः शुचिषदिति मन्त्रेणाश्वस्य प्रग्रहं सम्यग्गृह्णातीति संग्रहीता । सं रथवाहने प्रष्टिवाहिन रथं स्थापयति । एतदन्तं यजमान उद्यतबाहुर्भवेदित्येके ॥ २४ ॥

आहिते संग्रहीताऽवरोहति ऋत्विजोऽनश्व(रत्निनश्व)राजानं पर्युपविशन्ते समुपविष्टेषु ब्रह्मा३नित्यध्वर्यु यजमान आमन्त्रयते । त्वꣳ राजन्ब्रह्माऽसि सविताऽसि सत्यसव इति प्रत्याहैवं होतारं ब्रह्माणमुद्गातारं वाऽऽमन्त्रयते । उत्तरेणोत्तरेण मन्त्रेण प्रत्याहुः ॥ २५ ॥

राजानं प्रत्यृ(परित ऋ)त्विजोऽध्वर्य्वादयो रत्निनश्च पूर्वोक्ता उपविशन्ति । पुरस्तादध्वर्युः । दक्षिणतो ब्रह्मा । पश्चाद्धोता । उत्तरत उद्गातेति । रत्निनामानियमः । उपविष्टेषु सर्वेषु यजमानोऽध्वर्युर्ब्रह्मा३नित्यामन्त्रयते । त्वꣳ राजन्ब्रह्माऽसि सविताऽसि सत्यसव इति प्रत्याह । एवं ब्रह्माणं प्रति ब्रह्मा३नित्याह त्वꣳ राजन्ब्रह्माऽसीन्द्रोऽसि सत्यौजा इति प्रत्याह, एव होतारं मित्रोऽसीति । उद्गातारं वरुणोऽसीति ॥ २५ ॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति स्फ्यं ब्रह्माऽथ राज्ञे प्रयच्छति । अध्वर्युः प्रयच्छतीत्येकेषाम् ॥ २६ ॥

रध्येत्यन्तः । ब्रह्मा प्राकृतं स्फ्यं राज्ञे प्रयच्छति ॥ २६ ॥

एष वज्रोऽसि वाजसातमः ॥ (ख० १८) ॥ तेन मे रध्येति वा राजा पुरोहिताय । पुरोहितः प्रतिहिताय । प्रतिहितो रत्निभ्यस्तमवरपरꣳ संप्रयच्छन्ति । अन्ततोऽक्षावापाय प्रयच्छति ॥ २७ ॥

राजा पुरोहिताय पुरोहित. प्रतिहिताय प्रतिहितो रत्निभ्यो रत्निनामनियमोऽन्ततोऽक्षावापाय प्रयच्छति ॥ २७ ॥

तेन स स्फ्येनाधिदेवनमुद्धृत्य तिस्रः पञ्चाशतः पञ्च वा पञ्चाशतोऽक्षान्निवपति ॥ २८ ॥ उद्भिन्न॑ राज्ञ इति ततश्चतुरोऽक्षान्निरूह॑श्चतुःशतानपिसृज्य पष्ठौहीं विदीव्यन्ति ॥ २९ ॥ ब्राह्मणो राजन्यो वैश्यः शूद्र इत्योदनमधिपणं विजित्य दिशोऽभ्यय॑ राजाऽभूदिति पञ्चाक्षान्यजमानाय प्रयच्छति ॥ ३० ॥

[1]अक्षावापस्तेन स्फ्येनाधिदेवन द्यूतस्थानं तस्मिन्मण्डप उद्धृत्याक्षान्निवपेत् । अक्षा, सौवर्णा अनियतपरिमाणा. परःशता भवन्ति । शताधिकास्तेषा चतुरो निष्कपरिमाणा. चतुराधिकमाना अवरसंज्ञकाश्चतुरश्रास्त्रिकोणाकारा धनुराकारा वृत्ताकारा । ब्राह्मणादयो द्यूतकर्मण्यभियुक्ता: पष्ठौहीं महापणत्वेन निधाय मम कर्णयो॰, मम विषाणस्य, मम खुरस्य, मम पुच्छस्य, इत्यहिंसन्तो मनसा कृत्वा विदीव्यन्ते (न्ति) विदेवन कुर्वन्तीत्यर्थ. । ओदनमुद्ब्रुवत इति चाग्न्याधेयवत् । तया विजितया पष्ठौहीमो(ह्यौ)दनं कुर्वन्तीत्यर्थ· । एवं विदेवनप्रकारो ब्राह्मणांश्चतुरो वर्णानित्योदनमधिपण विजित्य राजा पञ्चादृगृह्णाति । ब्राह्मणश्चतुरश्राद्गृह्णाति । राजन्यस्त्रिकोणात् । वैश्यो धनुराकारात् । शूद्रो वृत्ताकारात् । एवं गृहीत्वाऽनियतपरिमाणाक्षाणा कतिपयाक्षानादाय निवपति । चतुरश्चतुरो विभजेत् । यदाऽविभक्ते तदाऽपि चतु(त्वा)रो भवति(न्ति) । दिशोऽभ्यय॑ राजाऽभूदिति पञ्चाक्षान्राज्ञे प्रयच्छतीत्यर्थ· ॥ २८ ॥ २९ ॥ ३० ॥

तानपिसृज्य मङ्गल्यनाम्नो (म्न आ)ह्वयति सुश्लोकाँ ३ इति संग्रहीतार॑ सुमङ्गलाँ ३ इति भागदुघ॑ सत्यराजा३निति क्षत्तारम् । तानाहूय ब्रह्मणे क्षेत्रं ददाति ॥ ३१ ॥ यत्कामयते ब्रह्मा त उपद्रष्टारः ॥ ३२ ॥

अथ मङ्गल्यनाम्नो राजाऽऽह्वयति वक्ष्यमाणान्पुरुषान्सुश्लोकाँ३इत्यादिक्षत्तारमित्यन्तानाहूय चतुष्पात्क्षेत्रं ब्रह्मणे ददाति । मङ्गल्यनामानो दीयमानस्य क्षेत्रोऽ(त्रस्यो)पद्रष्टारो भवन्ति चतुष्पात्क्षेत्रं चत्वार. पादा अस्येति । अथवा चतुर्भिर्बलीवर्दै सह क्षेत्रं ब्रह्मणे ददाति ॥ ३१ ॥ ३२ ॥

यां कामयेत भार्यामस्यै प्रजा राष्ट्र॑ स्यादिति तस्या औपासने प्रतिहितमन्वारम्भयित्वा

---

१ चतुरतमाना· मानशब्दो गुञ्जादिषु व्यवह्रियत इति गम्यते ।

प्रजापते न त्वदेतानीति ये पात्रेषु लेपास्तैर्नाम-
व्यतिषञ्जनीयौ होमौ जुहोति ॥ ३३ ॥ असा-
वामुष्यायणोऽमुष्या असौ पुत्र इति नामनी
व्यतिषजाति ॥ ३४ ॥

यस्याः पुत्रो राज्ञ (जा) स्यादिति कामयेत तस्या औपासने भिन्ने समुदिते वा तं प्रतिहितं तस्याः पुत्रमन्वारम्भयित्वा पालाशादिपात्रस्थलेपाञ्जुह्वा गृहीत्वा प्रजापते न त्वदेतानीत्यृचमुक्त्वा राजेन्द्रवर्मा राजेन्द्रवर्मणः पुत्रोऽदितिदाया राजेन्द्रचोळ(ल)वर्मपुत्रः स्वाहा । एवं द्वितीयहोम । अथ नामनी व्यतिषजाति प्रजापते० तन्नो अस्त्वित्यन्तमुक्त्वा राजेन्द्रवर्मा राजेन्द्रचोळवर्मण पुत्रो वयꣳ स्याम पतयो रयीणाꣳ स्वाहेति प्रथमा । एवं द्वितीया तन्नो अस्त्वित्यन्तमुक्त्वाऽदितिदाया राजेन्द्रवर्मा पुत्रो वयꣳ स्याम पतयो रयीणाꣳ स्वाहा, इति ॥ ३३ ॥ ३४ ॥

शौनःशेपमाख्यापयते । ऋचो गाथामिश्राः
॥ (ख० १९) ॥ परःशताः परःसहस्रा वा ॥ ३५ ॥

शुनःशेपेन दृष्टं शस्त्रं शौनःशेपं, तदध्वर्युर्होतारं वाचयेत् । तेन 'वरुणपाशादेवैनं मुञ्चति' (तै० ब्रा० १-७-१०) इति ब्राह्मणम् । तत्र ऋक्संख्या विधत्ते— परःशतं भवति (तै० ब्रा० १-७-१०) इति । परःशतं शताद्धिकम् । ऋक्संख्या चाऽऽपस्तम्बेन स्पष्टीकृता— शौनःशेपमाख्यापयत ऋचो गाथामिश्राः परःशताः परःसहस्रा वा (आप० श्रौ० १८-१९-३०) इति ॥ ३५ ॥

हिरण्यकशिपावासीनो होताऽनुशꣳसति ॥ ३६ ॥

स्पष्टोऽर्थः ॥ ३६ ॥

हिरण्यकूर्चयोस्तिष्ठन्नध्वर्युः प्रतिगृणाति । ओमि-
त्यृचः प्रतिगरस्तथेति गाथायाः ॥ ३७ ॥

शौनःशेपाख्यानकाले शृण्वतो भवेद्यजमानः । ॐ इत्यृचः प्रतिगरस्तथेति गाथायाः । हिरण्यकशिपावासीनो होतारं शंसति । हिरण्यकूर्चयोस्तिष्ठन्नध्वर्युः प्रतिगृणाति ॥ ३७ ॥

अपवृत्ते शौनःसे(शे)पे हिरण्यकशिपुं होत्रे
ददाति । हिरण्यकूर्चावध्वर्यवे ॥ ३८ ॥

अपवृत्ते परिसमाप्ते शौनःशेपे शस्त्रस्य शस्त्रमिति (शस्त्रे) यजमानो हिरण्यकशिपुं होत्रे हिरण्यकूर्चम (र्चाव) ध्वर्यवेऽभिषेचनीयौ च रुक्मौ ददाति ॥ ३८ ॥

अत्र मारुतेनैकविꣳशतिकपालेन वैश्वदेव्याऽऽमि-
क्षया प्रचरेत् । एना व्याघ्रं परिषस्वजानाः सिꣳ

हꣳ हिन्वन्ति महते सौभगाय । समुद्रं न सुहुतं
तस्थिवाꣳसं मर्मृज्यन्ते द्वीपिनमप्स्वन्तरित्यवदास्य-
न्पुरोडाशमभिचरन्स्फयेन समया विभिन्द्यात् ।
स्फय आश्लिष्येद्यद्यावमार्जेत्तद्विष्णव उरुक्रमाया-
वद्येत् ॥ ३९ ॥

हविर्धानं प्रविश्य मारुतवैश्वदेवयोः प्रचारः। स्फ्येन पुरोडाशं भिन्द्यादित्यादि ॥३९॥

अत्रैते हिरण्ये ददाति । सौवर्णं राजतं मणिं च ।
यदि पुरस्तादृत्ते भवतः ॥ ४० ॥

भेदने पुरोडाशे (शस्य) कृते नास्ति स्विष्टकृतं, समान तु स्विष्टकृदिडामार्जे-नान्तम् । हिरण्ये सौवर्णं राजतं मणिं च ब्रह्मणे ददाति । यदि पुरस्तान्नदद्या-त्तदा ॥ ४० ॥

माहेन्द्रप्रभृतीनि कर्माणि प्रतिपद्यते ॥ ४१ ॥

माहेन्द्रस्य प्रचरणादि कर्म नित्यम् । अतिग्राह्यहोमाः पूर्ववत् ॥ ४१ ॥

अवभृथादुदेत्यापां नप्त्रे स्वाहेत्यप्सु जुहोति ॥ ४२ ॥

फलचमसप्रयोगो गुणफलाश्च प्रवर्तन्ते । समानमाऽवभृथात् । अवभृथेष्टिमनूयाजान्तां विधायावभृथादुदेत्यापा नप्त्रे स्वाहेति होम । यत्ते ग्राव्णेति पवित्रवत् ॥ ४२ ॥

ऊर्जो नप्त्रे स्वाहेति शुष्के रथाणौ दर्भस्तम्बे वा ॥ ४३ ॥

जुहोतीत्यनुवर्तते । अवभृथदेशविहारयोरन्तराले होमे दर्भस्तम्बादिषु वा ॥ ४३ ॥

अग्नये गृहपतये स्वाहेति प्रत्येत्य गार्हपत्ये ॥ ४४ ॥

विहारदेशं प्राप्यापोऽन्वचारिषामित्युपस्थायाग्नय इति गार्हपत्ये जुहोति । ४४ ॥

ऐन्द्रीꣳ सूतवशामनूबन्ध्यामालभते ॥ ४५ ॥
तस्या नैवारं पशुपुरोडाशं चतुष्पद्याः सूनाया
निर्वपति ॥ ४६ ॥ शकटपत्याम्नायो भवति
॥ ४७ ॥ संतिष्ठतेऽभिषेचनीयः ॥ ४८ ॥
॥ (ख० २०) ॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने षष्ठः पटलः ।

उदवसानीयादि । इन्द्रदेवत्या सूतवशामनूबन्ध्यामालभते । इन्द्राय गोर्वपाया मेदस इत्यादि । तस्यां नीवारेभ्यः पशुपुरोडाशस्य निर्वापः (एवं पशुपुरोडाशं निरुप्य)

पशुपुरोडाशं नैवारं चतुष्पद्या. सूनाया निर्वपति । चतुष्पद्या सूनाया यस्या मांस छिद्यते विक्रयार्थम् । तस्या नीवारेभ्य पशुपुरोडाशस्य निर्वाप । एव पशुपुरोडाश निरुप्याष्टौ देवसुवा हवींषि राज्ञो निवपनादि । शेष पूर्ववत् । एवमभिषेचनीय समाप्यते ॥४८॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां त्रयोदशप्रश्ने षष्ठ पटल ।

अथ त्रयोदशप्रश्ने सप्तम पटल ।

अथ संसृपा हवींषि दशसंख्याकानि विधीयन्ते--

श्वोभूते सप्तभिः संसृपां हविर्भिरन्वहं यजते ।
आग्नेयमष्टाकपाल निर्वपतीति यथासमाम्नातम् ।
पूर्वे पूर्वे देवयजनमध्यवस्यति । यत्राऽऽहवनी-
यः पूर्वः स्यात्तत्रापरस्या गार्हपत्यः सप्तन्या इष्टेः
प्राग्वंश आहवनीयो बहिर्गार्हपत्यः ॥ १ ॥

सम्यक्सृप्यते प्राप्यते वीर्यमाभिरग्न्यादिभिर्देवताभिरिति संसृपो देवतास्तासा हवींष्यपि तन्नामकानि । तान्येतानि हवींषि प्रशंसति—' वरुणस्य सुषुवाणस्य दशधेन्द्रिय वीर्यं परापतत् । तत्संसृद्भिरनुसमसर्पत् । तत्संसृपां संसृत्त्वम् । अग्निना देवेन प्रथमेऽहन्ननु प्रायुङ्क्त ' (तै० ब्रा० १-८-१) इत्यादि । स वरुण. प्रथमेऽहनि देवेन द्योतनात्मकेनाग्निना सहाष्टाकपाल प्रायुङ्क्ताऽऽग्नेयमष्टाकपाल निरवपदित्यर्थः । द्वितीयेऽहनि वाग्रूपया सरस्वत्या चरु निरवपत् । तृतीये प्रसवकारणेन सवित्रा सह द्वादशकपालं निरवपत् । चतुर्थे पशुभिरुपलक्षितेन पूष्णा सह चरु निरवपत् । पञ्चमे ब्राह्मणाभिमानिना बृहस्पतिना सह चरु निरवपत् । षष्ठे द्योतनात्मकेनेन्द्रेण सहैकादशकपाल निरवत् । सप्तमे स्वकीयदेवतारूपेणातीतकल्पगतवरुणेन सह दशकपालं निरवपत् । अष्टमे राज्ञा यजमानेन सोमेन सह चरु निरवपत् । नवमे रूपवता त्वष्ट्रा सहाष्टाकपाल निरवपत् । दशमे यज्ञरूपेण विष्णुना सह त्रिकपालं निरुप्य तदिन्द्रियमाप्नोत् । यदि यजमानस्यापि संसृपो यागा भवेयुस्तदाऽसौ यजमान इन्द्रियसामर्थ्यं प्राप्नोतीति ब्राह्मणार्थ. । उत्पत्तिविधिभिर्विहिताना संसृपामनेनार्थवादेन भिन्नदिनानुष्ठानविधिरुन्नेयः । षष्ठ्यामागामिनो दशपेयस्य देवयजनस्य पश्चात्संसृपा हविषामुत्तमायामिष्टेराहवनीयायतन दशपेयस्य प्राग्वंशे गार्हपत्यस्थाने यथा स्यादेव पश्चाद्दा-

१ सप्त वा ।

र्शपौर्णमासिकी वेदिर्भवेत् । अग्निहोत्रं हुत्वा संसृपां हविर्भिर्यक्ष्य इति संकल्प्य सर्वेषां संसृपां हवि० इति सर्वेषामाग्नेयमष्टाकपालं हिरण्यं दक्षिणा । आग्नेयस्याऽऽहवनीयस्याऽऽयतनं उत्तरस्य गार्हपत्यायतनम् । श्वोभूते सारस्वतं चरुं वत्सतरी दक्षिणा । श्वोभूते सावित्रं द्वादशकपाल० उपध्वस्तो दक्षिणा, पूर्ववद्विहारः । श्वोभूते पौष्णं चरुं श्यामो दक्षिणा । श्वोभूते बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा । श्वोभूते ऐन्द्रमेकादशकपालमृषभो दक्षिणा । वारुणं दशकपालं महानिरष्टो दक्षिणा । सर्वेषां पूर्वस्याऽऽहवनीयमुत्तरस्य गार्हपत्यम् । तत्प्रकारश्चाऽऽपस्तम्बेन स्पष्टीकृतः—'श्वोभूते परेण सौमिकं देवयजनं दशभिः सप्तभिर्वा संसृपां हविर्भिर्यजत आग्नेयमष्टाकपालमिति पूर्वे पूर्वे देवयजनमध्यवस्यति । यत्र पूर्व आहवनीयस्तत्रोत्तरो गार्हपत्यः । उत्तमायाः प्राग्वंश आहवनीयो बहिर्गार्हपत्यः' (आप० श्रौ० १८-१०-९) इति ॥ १ ॥

अथाष्टमनवमदशमाना हविषां स्वस्वदिनेषु कंचित्कालविशेषमाह—

अथ तया यजते । तस्याꣳ संस्थितायामपराह्णे दशपेयाय दीक्षते ॥ २ ॥ अप्सु दीक्षायाः स्थाने षट्पुण्डरीकां द्वादशपुण्डरीकां वा हिरण्यस्रजं यजमानः प्रतिमुञ्चते ॥ ३ ॥ तदहर्दीक्षितो राजानं क्रीणाति दशभिर्वत्सतरैः साण्डैः ॥ ४ ॥ न पणते न परिवहति ॥ ५ ॥ क्रयमेवापरं करोति ॥ ६ ॥ पुरस्तादुपसदाꣳ सौम्यं चरुं निर्वपति । अन्तरा त्वाष्ट्रमुपरिष्टाद्वैष्णवम् ॥ ७ ॥

अभिषेचनीयात्सोमयागादूर्ध्वं दशपेयः सोमयागः कर्तव्यः । तस्य च संसृव्यागसंबन्धिनि सप्तमेऽहन्येका दीक्षा कर्तव्या । तत ऊर्ध्वं त्रिषु दिनेषूपसदः कर्तव्याः । तत्र प्रथमोपसद्दिने उपसद्यागात्पूर्वं सौम्याख्येन संसृपाऽष्टमहविषा प्रचरेत् । मध्यमोपसद्दिने पौर्वाह्णिकापराह्णिकोपसदोर्मध्ये त्वाष्ट्रेण नवमहविषा प्रचरेत् । तृतीयोपसद्दिने पौर्वाह्णिकापराह्णिकोपसदावनुष्ठायोपरिष्टाद्वैष्णवेन दशमहविषा प्रचरेत् । दशपेयतन्त्रमध्ये त्रयाणां हविषामनुष्ठानमापस्तम्बेन स्पष्टीकृतम्—अपराह्णे दशपेयस्य तन्त्रं प्रक्रमयतीत्युपक्रम्यैवं पठ्यते- एका दीक्षा । तिस्र उपसदः । पुरस्तादुपसदाꣳ सौम्यं चरुं निर्वपति । अन्तरा त्वाष्ट्रमष्टाकपालमुपरिष्टाद्वैष्णवं त्रिकपालम् (आप० श्रौ० १८-२०-१९) इति ।

ननु राजसूये संसृप्शब्दवाच्यान्याग्नेयाष्टाकपालादीनि दश हवींष्याम्नातानि तेष्वष्टमनवमदशमानि सौम्यत्वाष्ट्रवैष्णवानि । तद्विषयमिदं वाक्यमाम्नायते—पुरस्तादुपसदाꣳ सौम्येन प्रचरति । अन्तरा त्वाष्ट्रेण । उपरिष्टाद्वैष्णवेन (तै० ब्रा० १-८-१) इति ।

योऽयं राजसूये सोमयागस्तस्मिन्नुपरि(दि)ष्टानामुपसदामादिमध्यावसानेषु सौम्यादीना त्रयाणामनुष्ठानमनेन वाक्येन चोद्यते । ततो वाक्यात्सौम्यादीन्युपसदामङ्गानीति प्राप्ते ब्रूमः—उपसदामिति षष्ठ्याः कालवाचिना पुरस्तादिति शब्देनान्वयात्सौम्यादीना काल विशेषसंबन्धपरमिदं वाक्यं नत्वङ्गाङ्गिभावपरम् । ततो न कस्याप्यङ्ग सौम्यादिकं किंत्वनुमत्यादिवत्प्रधानम् ॥

अत्रेयं पद्धतिः—वारुणेनेष्ट्वा तदहरेव द्वादश्यामपराह्णे दशपयेन यक्ष्य इत्यादि । प्रथमोपसदि तदहरेव वरणभेदपक्षे भार्गवं होतारमस्मिन् वृणीते, न मक्षहोता, न सोमपरिवेषणम् । दीक्षणीया विधाय वपनं कृत्वाऽऽपो अस्मानिति स्नानादि, अपोऽश्नातीत्यन्ते तस्मिन्स्थाने द्वादशपुण्डरीकस्रजं प्रतिमुञ्चते । शरीरे द्वादशपद्ममालामाबध्नाति, न मन्त्रेणैवेति लिङ्गात् । अथास्मै क्षौममहतमित्यादिसनीहारप्रस्थापनान्तान्गृहीतान्पासूत्रेधा विभज्य तत्सा गृहेषु निदधाति । देव सूर्येत्यादि प्रजाभ्यस्त्वेत्यन्त लुप्यते । पूर्वमेव क्रीतं (तानि) पुरोहितग्रहाऽऽग्र(गृहग)तसोमफलान्याहृत्य क्षौमेण वाससोपसंगृह्येत्यादिविस्रंसनान्तं कृत्वा सोमविक्रयिणे प्रदाय वत्सतरी पुनरतूष्णीमेव ददाति । अस्मे ज्योति० स्वजा अभीत्यादयोऽपोर्णुते, न स्वान भ्राज । तूष्णीमुष्णीषदण्डयो प्रदानं मैत्रावरुणाय, मित्रो न एहीत्याद्यच्छिद्रपत्र इत्यन्तो लुप्यते । वनेषु व्यन्तरिक्षमित्युष्णीषबन्धनं कर्तव्यम् । हस्तेन राज्ञे नयनमा प्राग्वंशात् प्राग्वशसमीपे यत्र कुत्रापि(त्रचित्) सोमफले(ल)के स्थापयित्वाऽऽतिथ्येन प्रचरति । आतिथ्याया हविष्कृदन्त कृत्वा, उर्वन्तरिक्षमिति प्रव्रजति प्रतिप्रस्थाता पूर्व प्रतिपद्यत इत्याद्यातिथ्यया प्रचर्य मदन्तीभिर्मार्जनान्ते सौम्यस्य कर्माऽऽस्तीर्णपक्ष उपसादनम् । उपसदा प्रस्तरबर्हिरेव परिधयश्च सोमाय श्यामाकश्चरुः, बभ्रुर्दक्षिणा । पौर्वाह्णिकीभ्या प्रवर्ग्योपसद्भ्या प्रचर्य तदहरेवाऽऽपराह्णिकीभ्या प्रवर्ग्योपसद्भ्या प्रचर्य विरमति । त्रयोदश्या श्वोभूते पौर्वाह्णिकीभ्या प्रचर्य सुब्रह्मण्यान्तेऽन्तरा त्वाष्ट्रमष्टाकपालं० शुण्ठो दक्षिणा । ततो यूपाहुत्यादि । तत श्वोभूते चतुर्दश्यां पौर्वाह्णिकीभ्यां प्रचर्य तदानीमेवाऽऽपराह्णिकीभ्या प्रचर्य वैष्णव त्रिकपालं वामनो दक्षिणा, ब्राह्मणभोजनान्तेयमेवेष्टिराज्येडान्तेति भाष्यकृत् ॥ ७ ॥

तासामौपसदं बहिः(र्हिः) परिधयश्चार्थं साधयन्ति ॥ ८ ॥

तासामिष्टीनामौपसदं तन्त्र बर्हिः पृथक्तन्त्रत्वात्कृत्स्नेष्टिचोदनाच्च परिध्यादयोऽर्थान्साधयन्ति संगृह्णन्तीत्यर्थ ॥ ८ ॥

सप्तदशो दशपेयोऽग्निष्टोमः । सारस्वतीर्वसतीवरीः ॥ ९ ॥

प्रवर्ग्योद्वासनादि । वसतीवरीग्रहणकाले यदा सरस्वतीनदीसमीपे देवयजनं तदा तत्र वसतीवरीः । अन्यथा तज्जलमाहृत्य बहुयाजी कुम्भ्यस्तं(म्भीस्थ) कृत्वा गृह्णाति ।

यद्वा—प्रकृतौ वहन्तीना गृह्णातीति प्रवाहमात्रगतानामपां वसतीवरीत्वादत्रापि तत्प्राप्तौ सरस्वतीगता एवाऽऽपो विधीयन्ते ॥ ९ ॥

चोदकप्राप्त होतृसामान्यादिक बाधितु विशेषानाह—

भार्गवो होता भवति । श्रायन्तीयं ब्रह्मसामं भवति । वारवन्तीयमग्निष्टोमसामम् ॥ १० ॥

प्रकृतौ य कोऽपि होतेत्यत्रापि तत्प्राप्तौ भृगुगोत्रोत्पन्न एवेति विशेष्यते । प्रकृतौ ब्राह्मणाच्छंसिन प्रत्याज्यस्तोत्र गायत्रसाम्नो विहितत्वात्तदपवादाय श्रायन्तीयं सामात्र विधीयते । श्रायन्त इव सूर्यमित्यस्यामृच्युत्पन्न साम श्रायन्तीयम् । प्रकृतौ यज्ञायज्ञीयस्याग्निष्टोमसामत्वात्तदपोह्य वारवन्तीय साम विधीयते । अश्वं न त्वा वारवन्तमित्यस्यामृच्युत्पन्न वारवन्तीय साम ॥ १० ॥

अथ पद्धतिः-महारात्रे बुद्ध्वे त्यादिपरिप्लवासादनान्ते ।

पात्रसमासादनकाले दश चमसानधिकान्प्रयुनक्ति ॥ ११ ॥

दश चमसानधिकान्प्रयुनक्ति ॥ ११ ॥

उन्नयनकाले दश चमसानधिकानुन्नयति ॥ १२ ॥

एव चमसोन्नयनकालेऽपि दश चमसानधिकानिति वचनाच्चमसाध्वर्यव(र्यूणा)वृद्धिः ॥ १२ ॥

भक्षणकाले य आ दशमात्पुरुषादविच्छिन्नसोमपीथः स भक्षस्य कर्ता दशमात्पुरुषादन्वाख्याय शतं ब्राह्मणाः सोमपाः संप्रसर्पन्ति ॥ १३ ॥

दश दशैकैकं चमसं भक्षयन्ति ॥ १४ ॥

शत ब्राह्मणा सोमयाजिनो वक्ष्यमाणगुणविशिष्टाः सदः प्रसर्पन्ति । एवं सदसो वृद्धिः । भक्षणकाले प्राकृतेषु चमसेषु भक्षितेषु चापूर्वचमसान् । शतं ब्राह्मणाः सोमयाजिन एकैकस्मिन्दश दश सोमयाजिनः, आ दशमात्पुरुषादविच्छिन्नसोमपीथान्दश पुरुषान्कथयेरन्नीदृग्भूतेति न प्रतिज्ञामात्रेण तेऽपि विद्यावन्तः प्राकृतपरिमाणादधिकाः स्थविष्ठाश्चमसानुन्नयन्ति ॥ १३ ॥ १४ ॥

दक्षिणाकाले हिरण्यप्राकाशावध्वर्यवे ददातीति यथासमाम्नातम् । उक्षाणं ग्रावस्तुते वेहायमानामित्रोऽन्नेत्रे बस्तं सुब्रह्मण्याय ॥ (ख०२१) ॥ १५ ॥

प्राकाशौ सुवर्णदर्पणौ । हिरण्यस्रजमुद्गात्रे । रुक्म वर्तुलं सुवर्णाभरणं होत्रे । अश्वं प्रस्तोतृप्रतिहर्तृभ्याम् । द्वादश पष्ठौहीर्ब्रह्मणे । वशा मैत्रावरुणाय । ऋषभं ब्राह्मणाच्छंसिने । वाससी नेष्टापोतृभ्याम । स्थूरीयवाचितमच्छावाकाय । अनड्वाहमग्नीधे । एकगोयुक्त रथं चमसाध्वर्यवे ददातीत्येके । अन्यत्स्पष्टम् ॥ १९ ॥

ननु राजसूये श्रूयते प्राकाशावध्वर्यवे ददाति (तै० सं० १-८-१८) इति । प्राकाशौ दीपस्तम्भावित्येके । दर्पणावित्यपरे । तौ किं प्राकृतस्य दक्षिणाद्रव्यस्य बाधका-वुताध्वर्युभागस्यैव । तत्र प्राकाशौ ददातीति कर्मकारकवाचिद्वितीयाश्रुतिकृतेन दानसंबन्धेन प्राकाशावध्वर्यव इति वाक्यकृते पुरुषसबन्धेऽपोदिते सति देयद्रव्यप्रतीतेर्देयान्तरस्य कृत्स्नस्य बाध इति पूर्वपक्ष. । अध्वर्यवे ददातीति संप्रदानकारकवाचिचतुर्थीश्रुतिकृतस्य दानक्रियासंबन्धस्यापवदितुमशक्यत्वात्संप्रदानविशिष्टदानक्रियासबन्धेऽपि द्विती याश्रुतेरविरोधादध्वर्युभागस्यैव बाध इति राद्धान्त ॥ १५ ॥

संतिष्ठते दशपेयः ॥ १६ ॥

अग्निष्टोमचमसै. प्रचर्य षोडशिहोम , न होम इति भाष्यकृत् । दशपेयोऽग्निष्टोमहोमयागः । अवभृथादुदेत्यानूबन्ध्याया. पशुपुरोडाशमष्टौ देवसुवामेतानि हवींष्यनुनिर्वपतीत्यादि । समाप्यते दशपेयः ॥ १६ ॥

तस्मिन्सꣳस्थिते दिशामवेष्ट्या यजते ॥ १७ ॥

तस्मिन्संस्थिते दशपेय उपोषणं कृत्वा पञ्चाग्नीन्समारोप्य दिशामवेष्ट्योदवस्यति, न पूर्णाहुति. । नोदवसानीयधर्मा. पञ्चकपालादय. । इदमूनश्रेय इति कृत्वाऽग्निम्मथित्वोपावरोह्याऽऽयतने निदधाति ॥ १७ ॥

आग्नेयमष्टाकपालं निर्वपतीति यथासमाम्नातꣳ हविषो हविष इष्ट्वा बार्हस्पत्यं प्रत्यभिघारयेत् ॥ १८ ॥

दिशामवेष्ट्या यक्ष्य इत्यादि । अद्य यज्ञाय दिशामावेꣳ हविः० शाखाहरणमित्यादि कुम्भीलेपनान्तम् । अग्नये जुष्ट० इन्द्राय जुष्टं विश्वेभ्यो देवेभ्यो जुष्टं० इत्यादि । प्रातर्दोहकर्म । मित्रावरुणाभ्यामिति निगमाः । घर्मोऽसीति लौकिकदध्यानयनम् । आग्नेयादीना चतुर्णा मध्य एकैकयागादूर्ध्वं पञ्चमहविषि अभिघारणम् । दक्षिणाकाले हिरण्यर्षभपष्ठौहीवशाशितिपृष्ठा । ब्राह्मणतर्पणान्तेयमिष्टिः ॥ १८ ॥

तयाऽन्नाद्यकामः स्वर्गकामो वा यजेत ॥ १९ ॥

यजमानः ॥ १९ ॥

ब्राह्मणो यजमानो मध्ये विधायाऽऽहुतिमाहुतिꣳ हुत्वाऽभिघारयेत । यदि राजन्य ऐन्द्रम् । यदि वैश्यो वैश्वदेवम् ॥ २० ॥

एतयैवेष्ट्या राजसूयाद[न्न]कामसंयोगे ब्राह्मणादय. कुर्वन्ति ॥ २० ॥

अथावेष्टिं विधाय द्विपशुयुक्तं पशुबन्धकर्म विधत्ते—

श्वोभूते द्विपशुना पशुबन्धेन यजेत ॥ २१ ॥

यस्मिन्दिने दशपेयसमाप्तिस्तस्मिन्नहन्यपराह्णे वेत्याऽऽस्तम्ब । श्वोभूत इति सूत्रकारवचनबलात् । पशुबन्धेन यक्ष्य इत्यादि ॥ २१ ॥

आदित्यां मल्हां गर्भिणीमालभते । मारुतीं पृश्निं पष्ठौहीम् । अश्विभ्यामुपांशु मारुत्या प्रचरति । आश्रुतप्रत्याश्रुते अप्युपांशु भवतः । उच्चैरादित्यायाः ॥ २२ ॥

अदितिर्देवता यस्या. सेत्यादित्या मल्हा मणिला गलस्तनयुक्तेत्यर्थ. । पृश्निरल्पतनुः श्वेतवर्णा वा । अदितेर्भूमित्वेन राष्ट्रत्वं मरुता च वैश्यत्वमसकृदुक्तं तदेतदभिप्रेत्य प्रशंसति—आदित्यां मल्हा गर्भिणीमालभते । मारुतीं पृश्निं पष्ठौहीम् । विशं चैवास्मै राष्ट्रं च समीचीं दधाति (तै० ब्रा० १–८–३) इति । पाठप्राप्तं क्रमं प्रशंसति आदित्यया पूर्वया प्रचरति । मारुत्योत्तराया (तै० ब्रा० १–८–३) इति । आश्रवणस्य चोदकप्राप्तमुच्चध्वनित्वमादित्ययागेऽनूद्यापवदितुं विधत्ते—उच्चैरादित्याया आश्रावयति । उपांशु मारुत्यै (तै० ब्रा० १–८–३) इत्यादि ।

अथ पद्धतिः—न षड्ढोता पश्चिष्ट्यादि उपशयेन सह यूपत्रयच्छेदनमग्निष्ठादिस्वरुद्वय(त्र)यं वेदिकाले यूपैकादशिनीवत् । अग्रेणाऽऽहवनीयमेको दक्षिणतस्स्थान एकस्तस्माद्रथाक्षमात्रमेकं भवति । एकस्मिन्पक्षे द्वयपक्षे वा तस्मिंस्तयोर्वा भवति प्रयोग. । तदशुभम् । अग्रेणाऽऽहवनीयमेव भवत्येको यूप. । तस्माद्रथाक्षमात्रद्वयस्योपरत्रयस्य(येन) तृतीयभागेन चतुर्भि पश्चादित्याद्यङ्गुल्यास्तृतीयभागातिरिक्तेन सप्तनवाधिकसप्तत्यङ्गुल्या संमितेन वेदिमानम् । केचिद्यूपस्यासयो स्थित स्याद्वैकस्य रथाक्षस्योपरद्वयस्य तृतीयभागेन । केचिदर्धाङ्गुल्यास्तृतीयभागातिरिक्तैक(द्वि)चत्वारिंशदङ्गुल्या संमितेन वेदिमानम् । दशपदोत्तरवेदिरिति केचित् । एकादशिनीप्रकृतित्वात् । केचिच्छम्यामात्रामिच्छन्ति । पात्रप्रयोगे षड्यूपरशना द्वे पशुरशने द्वे कुम्भ्यौ द्वे शूले चतस्रो वपाश्रपणी(ण्यो) दर्भयुगलौ यूपकाल एकादशिनीवत् । यूपद्वयस्योच्छ्रयणं रथाक्षमात्रो यूपान्तराल उपशयनिधानं चैकादशिनीवत् । द्वाभ्यां रशनाभ्या परिव्ययणं पशुभ्यामेहीति केचित् । मल्हा मणिला मासपिण्डद्वय यस्या ग्रीवाया. सा मल्हा । पृश्नि पष्ठौही च गर्भिणी चोपद्व(श)य उपाकरोति । उपशय आखुनिर्देश । पश्वहोमे च द्विवचनेनोहः । निष्क्रीते इमे यज्ञियभागमिताम् । सुवर्गं यातम् । उपाकृते शशमाने । अपीताम् । सा ते द्विवचनेन । तेषा ये वव्राते(व्रिरे) ते स्तराऽमायु कृण्वन्तु संज्ञपयत । स्वर्विदौ स्थ. स्वरित-

मित्यादि । द्विवचनेनैव लोकविदौ स्थो लोकमित नाथविदौ स्थो नाथमितं गातुविदौ स्थो गातुमित न वा उ वेतन्म्रियेथे न रिष्यथो देवाꣳ इदिष्व आशाना वा नानाप्राण पशुभ्यामपीत रविष्ठा वाशिषाथा वेपिषाथा पलायिषाथा समज्ञासाथां निमेहथ शकृत्कुरुथ, अभयं कृत मर्वाभ्यो मृडत यत्पशूमायुमकृणुत प(पा)शाभ्यां पशून् प्रमुञ्चत ओषधे त्रायस्वैनं द्वि स्वधिते मैनमिति च । यौ वामात्मानौ पशुषु प्रविष्टौ यौ वितस्थाते, आत्मन्वन्तौ घृतवन्तौ गच्छतं, विन्दत, उद्धहत, ओषधीः कृतम् । आदित्ये-भ्यश्छागस्य वपाया मेदस प्रेष्येत्यादि उच्चैरादित्याय । मरुद्भ्यो गोर्वपाया मेदस इत्यादि उपांशुना । वपामार्जनान्ते वरदानमुक्त गार्भिण्या षष्ठौह्याश्च । पशुपुरोडाशादिवपावत्प्र-चारोऽङ्गाना शेषमेकादशिनीवत् । समुद्रं गच्छ स्वाहेत्यादि द्यावा धूमो गच्छतु० पृणेथाꣳ स्वाहेत्यादि यूपोपस्थानादि ब्राह्मणभोजनान्त संतिष्ठते द्विपशुयुक्त कर्म ।

श्वोभूते द्वितीयाया सद्यो वा सात्यदूताना हविर्भिर्यक्ष्य इत्यादि । सात्यदूतानां हवि-रिदमेषां मयि । अमावास्यास्तन्त्रम । निर्वापणकालेऽश्विभ्या पूष्णे जुष्टं० द्वादशकपालं सरस्वते सत्यवाचे० चरु सवित्रे सत्यप्रसवाय द्वादशकपालम् । अश्विनौ पूष०हव्यꣳ रक्षध्वं(स्व) सरस्वन्सत्यवाक् । हव्यꣳ रक्षध्वं सवित सत्यप्रसव हव्यमित्यादि प्रधान-यागान्तेऽश्विनो पूष्णोरहमन्नाद प्रजनिषीय प्रजया च पशुभिरिति वा । उत्तरयो-रन्नाद. । दक्षिणाकाले तु तिसृभिरिषुभिर्युक्तं धनुस्तिसृधन्वं तत्प्रक्षेपाय निर्मिता शुष्कदृति । तदुभयमत्र देयम् । ब्राह्मणतर्पणान्तेयमिष्टि ॥ २२ ॥

अथ प्रयुजा हवींष्युच्यन्ते—

ततः श्वोभूते षड्भिः प्रयुजाꣳ हविर्भिर्यजते ॥ २३ ॥

सात्यदूताना हविषि समाप्ते तत परेद्यु प्रयुजा हविर्भिर्यक्ष्य इत्यादि । प्रयुजा हविरिदम्० ।

आग्नेयमष्टाकपालं निर्वपतीति यथासमाम्नातम् ।
दक्षिणो रथवाहनवाहो दक्षिणा ॥ २४ ॥

निर्वापणकालेऽग्नये जुष्टं० सोमाय जुष्ट० सवित्रे जुष्ट० बृहस्पतये जु० त्वष्ट्रे जुष्टं० अग्नये वैश्वानराय जुष्ट० इत्यादि प्रधानयागान्ते सोमवर्जमन्नाद । दक्षिणाकाले रथस्य वाहन रथवाहनमन्यच्छकट यस्मिञ्शकटे रथस्येषयोरग्रमवस्थाप्यते तस्य रथवाहनस्य शकटस्य वाहको दक्षिणो यो बलीवर्दोऽसौ पूर्वषट्के दातव्य इति भाष्यकृत् । ब्राह्मणतर्पणान्तेय-मिष्टिः संतिष्ठते ॥ २४ ॥

अथोत्तरषट्कस्येष्टिमाह—

श्वोभूते षड्भिरुत्तरैः सारस्वतं चरुं निर्वपतीति यथा-
समाम्नातम् ॥ २५ ॥ तिसृधन्वꣳ शुष्कदृतिर्दण्डमुपान-

हौ च तद्दक्षिणाऽश्वो वा । शोणकर्ण इत्येकेषाम् । तत्प्रतिराजभ्यः प्रहिणोति ॥ २५ ॥ अभ्यषिक्षि राजाऽभूवमित्यावेदयाति ॥ २६ ॥

श्वोभूते प्रातरग्निहोत्रं हुत्वा प्रयुजा हविर्भिर्यक्ष्य इत्यादि । षट्चरवः । सरस्वत्यै जुष्टं० पूष्णे जुष्टं० मित्राय जुष्टं० वरुणाय जुष्टं० क्षत्रपते जुष्टं० अदित्यै जुष्टं० इत्यादि पिण्डं कृत्वा घर्मोऽसीति स्थाल्या क्षिपतीत्यादि । उत्तरो रथवाहनवाहो दक्षिणा, इत्यापस्तम्बः । अत्र ब्राह्मणेऽपि—दूतान्प्रहिणोति । आविद एता भवन्ति । आविदमेवैनं गमयन्ति । अतो दूतेभ्य एव न च्छिद्यते (तै० ब्रा० १-८-३) इति विधिर्द्रष्टव्यः । प्रतिराजभ्यो दूतान्प्रेषयति । एते दूता आविदो भवन्त्येतदीयं शासनमा समन्ताद्वेदयन्ति ख्यापयन्तीत्याविदः । तेन दूतप्रेषणेनैवं यजमानमाविदं गमयन्ति आ समन्ताद्विद्यते ख्याप्यत इत्यवित्कीर्तिस्तां प्रापयन्ति । किं चाय दूतेभ्यो न विच्छिद्यते सर्वतः प्रेषयितुं कदाचिद्दूता न लभ्यन्त इत्येव विच्छेदो न भवति किंतु सर्वदा बहवो दूताः संनिहिता वर्तन्ते । दूतप्रेषणप्रकार आपस्तम्बेन स्पष्टीकृतः—'तान्यभ्यवस्नाय प्रतिराजभ्यः प्रहिणोति । अभ्यषिक्षि राजाऽभूवमित्यावेदयते' (आप० श्रौ० १८-२२-४) इति । तानि तिसृधन्वादीनि दक्षिणाद्रव्याण्यभ्यवस्नायामित आक्रम्य स्नात्वा तानि प्रतिराजभ्यो दर्शयितुं दूतहस्ते दत्त्वा प्रेषयति । स च दूतो राज्ञ एतद्वचनं तेषामग्रे कथयति अभिषिक्तोऽस्मि युष्माकं सर्वेषां राजाऽभूवमिति ॥ २६ ॥

संवत्सरमग्निहोत्रं जुहोति ॥ २७ ॥ अनुसंतत्यै तत्र येऽग्निहोत्रेणाप्रतिषिद्धाः क्रतवस्तानाहरेत् ॥ २८ ॥ संवत्सरे केशवपनीयेनातिरात्रेण यजते ॥ २९ ॥ तत्र वपनप्रवादा मन्त्रास्तेषामादिप्रवादैरादितो वापयेतान्तप्रवादैरन्ततः । संतिष्ठते केशवपनीयः ॥ ३० ॥

केशवपनीयातिरात्रस्य वैशेषिका धर्मा उच्यन्ते । तत्र कात्यायनः—अभिषेचनीयाद्वा संवत्सरात्केशवपनीयोऽतिरात्रः सामापवर्गः (का० श्रौ० १९-९-२६) इति । पशुबन्धद्वयानन्तरं केशवपनीयातिरात्रयागः कर्तव्यः । अभिषेचनीयसोमयागं कृत्वा संवत्सरपर्यन्तं केशवपनाकरणलक्षणं व्रतमाचर्यम् । ततस्तद्व्रतविसर्जनार्थमेकः सोमयागः पौर्णमासी सुत्यः कार्यः स एव केशवपनीयातिरात्र उच्यते । रात्रिमतीत्य वर्तेत इत्यतिरात्रोऽतिरात्रसंस्थया कार्यः ॥

ततः संवत्सरमग्निहोत्रꣳ हुत्वा केशवपनीयेन(यक्ष्ये) यजेत । संवत्सरमग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यान्याग्रयणानि प्रवर्तन्ते अन्यानि नित्यानि नैमित्तिकानि । न काम्यानि । श्वोभूते प्रथमायां वपनं कृत्वा केशवपनीयेनातिरात्रेण यक्ष्य इत्यादि पवित्रवदेका दीक्षा तिस्र उपसदः पञ्चम्या प्रसुत इति । तस्मिन्प्रयोगे दीक्षणीया कृत्वा वपनकाले स्वधिते मैनमिति कृत्वा ये केशिन इत्याद्यापस्तम्ब । येनावपदित्यन्तैश्चाऽऽदिप्रवादैश्चतसृभिर्वपनं देवश्रूरित्यस्य स्थाने दन्तधावनादि । अतिरात्रसस्थ. केशवपनीय. । सप्तविंशत्या गोभिम्ते क्रीणानीति विशेष । षोडशिमान् । अष्टाविंशत्येति केचित् । सर्वमतिरात्रवत् । पूर्ववत्फलचमसप्रयोग. । अनूबन्ध्यावपाया हुताया मा ते केशानित्यादि यत्समीन्तमित्यन्तैरन्तप्रवादैर्वपन कृत्वा स्नात्वाऽय प्रयोग । सर्वमहीनद्वादशाहवत् ॥ २७ ॥ ॥ २८ ॥ २९ ॥ ३० ॥

तस्मिन्सꣳस्थिते व्युष्टिद्विरात्रेण यजेत ॥ ३१ ॥

तस्मिन्केशवपनीये समापिते व्युष्टिद्विरात्रेण यक्ष्य इत्यादि ॥ ३१ ॥

तस्य ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति ॥ ३२ ॥

तस्य व्युष्टिद्विरात्रस्य । सावित्रमग्नि चेष्य इत्यादि शर्कराणामुपकल्पन सनीहारप्रस्थापनान्तं कृत्वा समन्वारम्भहोमः—अपैतु मृत्यु० इत्यादि । केचिदत्रोपदिशन्ति । द्वादशाहं दीक्षितो भवति । आगामिन्या तृतीयाया प्रायणीय्या प्रचर्य सोमक्रयणकाले गवा ते क्रीणानि तस्या आत्मा० भूयो वा० एकोनशतगोभिम्ने क्रीणानि । षट्पञ्चाशद्गोभिस्ते क्रीणानीति केचित् । तत परेद्यु पौर्वाह्णिकीभ्या प्रचर्य सेनेन्द्रस्येत्यन्ते संभारयजूꣳषीति व्याचष्टे । एव सर्वोपस्थानान्ते यूपच्छेदनकालेऽग्निष्ठप्रथमास्त्रयोदश यूपान्मन्त्रेणेत्यादि । वेदिकाल एकादशिनीवत् । दश रथाक्षामित्यादि । उपसदि पञ्चम्या पौर्वाह्णिकीभ्या प्रचर्य वेदिकरणम् । विमिमीत्वेत्यभिमन्त्रणम् । चतु शिखण्डेति । तत उत्तरवेदिदेशमध्ये शङ्कुमित्यादि । दध्ना मधुमिश्रेण शर्कराभिरिति बाह्या लेखाः संपूरणार्थाः कृत्वाऽऽपराह्णिकीभ्या प्रवर्ग्योपसद्भ्या प्रचर्य, श्वोभूते पौर्वाह्णिकीभ्या प्रचर्य प्रजापतिस्त्वा सादयत्वित्यादि संचितोक्थ्यन्त कृत्वाऽऽपराह्णिक्यौ । द्वादशेऽहनि प्रवर्ग्यमुद्वास्याग्निप्रणयन कृत्वाऽतिमुक्त्यन्ते काठकाहुतय. । असवे स्वाहेत्यन्ता एकविंशतिश्छदि.सद संतृण्णे अधिषवणफलके । अग्नीषोमीयकालेऽग्रेवासनान्तम् ॥ ३२ ॥

सर्वस्तोमोऽतिरात्र उत्तरं गायत्रं पूर्वेऽहन्त्साम भवति । त्रैष्टुभमुत्तरम् । रथंतरं पूर्वेऽहन्त्साम भवति । बृहदुत्तरे वैखानसम् । पूर्वेऽहन्त्साम

भवति । षोडश्युत्तरे हविष्मान्निधनं पूर्वमहर्भवति । हविष्कृन्निधनमुत्तरम् । अमावास्यायां पूर्वमहर्य-जनीयमुत्तरम् । आपूर्यमाणपक्षस्य वा । ये पुण्ये अहनी स्याताम् ॥ ३३ ॥

श्वोभूते ध्रुवा प्रयुज्य षोडशिपात्र न वा परिप्लवादि । पशुपात्राणा काले त्रिगुणा दश पञ्च द्विगुणा पञ्च कुम्भ्य पञ्च शूला वपाश्रपणीर्दर्भयुगलानि ऐन्द्रवायवग्रम् । पशु-भिरेहि आश्विनं गृहीत्वा यूपचतुष्क मिनोति । अञ्ज(अभ्यादा)नाद्याग्निष्ठाद्दक्षिणामित्याद्यु-त्तरापवर्गः । तत उपशयनिधान कार्पेय्यैकादशिनीवत् । आग्नेयमग्निष्ठाद्दक्षिणोत्तरयोरैन्द्रौ । उत्तरे सारस्वत. पशु. । दक्षिणे सावित्रः । तत उपशय आखुर्निर्देशः । दक्षिणाकाले दशसहस्र ददाति । अग्निष्टोमचमसैः प्रचर्य षोडशिहोम , अग्निष्टोमसस्थाया यज्ञायज्ञीये स्तूयमान उत्तरस्मिन्नहनि वसतीवरीर्गृह्णाति । सूक्तवाक उच्यमाने श्वः सुत्यामिति प्रैषं पत्नीसयाजान्ता सतिष्ठते ।

मैत्रावरुण्या शाखाच्छेदनादि कुम्भीलेपनान्तं दिवैव रात्रौ वसतीवरीः परिहृत्य दोहनं, पशुशाखाहरणादि परिस्तरणान्तम् ।

महारात्रे बुद्ध्वेत्यादि, अतिरात्रसम्था सषोडशिका. । पशुपात्रप्रयोगे द्वादश यूपरशना. षट्पशुरशना. षट्कुम्भ्य. शूलाश्च वपाश्रपणीर्दर्भयुगलानि च शुक्रग्रहादि पशुभिरेहीत्यादि आश्विनौ गृहीत्वा षड्यूपान् मिनोति । अग्निष्ठाद्दक्षिणोत्तरयोर्दक्षिणत आरभ्य व्यत्यासेनोदगपवर्गा. पूर्वोपशयान्त तन्त्रेण स्थापयति भेदेन वा । तत उपशयस्य च्छेदनम् । रशनाद्वयस्य परिव्ययणम् । मितानामुपशयस्य च । अस्मिन्नहनि । मितानामाद्ये वैश्वदेवानामुपाकरोति । द्वितीय उत्तरे सौम्यं तृतीये दक्षिणे मारुतमुत्तरे चतुर्थे पौष्णं, पुनश्चोत्तरे पञ्चमे बार्हस्पत्यं, अथ दक्षिणे षष्ठे-वारुण, तत आखुनिर्देश । दक्षिणाकाले दशसहस्र ददाति । काठकदक्षिणा (पृथक्) पूर्वेद्यु प्रसर्पणान्त तन्त्रेण तिरोह्नान्तम् । अग्नीदौपयजानित्यादि अनूबन्ध्यावपां हुत्वा पात्नीवत कर्म, पशुपुरोडाशादि देवसुवामेतानि हवींषि, इत्यादि उदवसानीयान्तम् । पौर्णमास्या पूर्वमहरित्यादिविकल्प. । अमावास्याया पूर्वमहरित्यस्य प्रयोग उक्तः । आपूर्यमाण इति विकल्प प्रथमाया पूर्वं द्वितीयायामुत्तर दशम्येकादशी वा ॥ ३३ ॥

क्षत्त्राणां धृतिरग्निष्टोमस्तेनान्ततो यजेत ॥ ३४ ॥

यस्मिन्नहनि व्युष्टिद्विरात्रसमाप्तिस्तस्मिन्नहनि क्षत्त्राणां धृतेरारम्भः । द्वितीयार्थ वोक्तप्रयोगस्य आरम्भ. । क्षत्त्राणा धृतिना यक्ष्य इत्यादि पवित्रवत् । एका दीक्षा तिस्र उपसद पञ्चम्या प्रसुत इति । सोमक्रयणकाले गवा ते क्रीणानीत्युक्त

एकात्रिंशद्गोभिस्ते क्रीणानीति । अथवा-अष्टाविंशत्या गोभि' [इति] । दक्षिणा काले पञ्च सहस्राणि ददाति । अग्निष्टोमचमसैः प्रचर्य षोडशि (प्रचार.) अग्नीदौप-यजानित्यादि राजसूये तिस्रोऽनूबन्ध्या विकल्पेनाऽऽम्नाताः ॥ ३४ ॥

पञ्चापवर्गो भवति ॥ ३५ ॥

अग्निष्टोमः पञ्चापवर्ग' फलप्राप्ति, उदवसानीयान्तम् ॥ ३५ ॥

संतिष्ठते राजसूयः ॥ ३६ ॥

संतिष्ठते समाप्यते ॥ ३६ ॥

राजसूयेनेष्ट्वा सौत्रामण्या यजेत ॥ (ख०२३) ३७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्ने सप्तम पटल. ।

अनन्तरे पर्वणि सौत्रामणी मैत्रावरुणी चाऽऽमिक्षा ॥ ३७ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोग-चन्द्रिकायां त्रयोदशप्रश्ने सप्तम पटल. ।

अथ त्रयोदशप्रश्नेऽष्टम पटल ।

आचार्येण राजसूयोऽनुविहित इदानीमवसरप्राप्तं सौत्रामण्यनुविधास्यन्(न) क्रियते--

त्रिरात्रे पुरस्तात्सीसेन क्लीबाच्छष्पाणि क्रीत्वा क्षौमे वासस्युपनह्य निदधाति ॥ १ ॥

नवमीप्रभृति त्र्यह त्रिरात्र इति । नवम्यां सौत्रामण्या यक्ष्य इत्युक्त्वा विद्युदसि, षड्ढोता पशुवत् सिद्धे(सीसे)न क्लीबाच्छष्पाणि क्रीणाति इति सिद्धम् । यद्वा--त्रिरात्रे पुरस्तात्सुरेष्टि. । लोहं सीसमित्युच्यते । क्लीबाच्छष्पाणि रोमाणि तरुणयवास्तोक्मानि व्रीहय इति शम्यामात्रा भवन्ति व्रीहय. । व्रीहयश्च तरुणयवाश्च तोक्मानि शष्पाणि वोच्यन्ते इति । क्षौमे वाससि बद्ध्वा निदधाति स्थापयति । त्रिरात्र यथा न शुष्काणि भवन्ति तथोपायः क्रियते ॥ १ ॥

सौत्रामण्यास्तन्त्रं प्रक्रमयति ॥ २ ॥

सौत्रामण्यास्तन्त्रमारभते । अङ्गसमुदायस्याऽऽख्यात(न)मिति तदारभेत कर्तुम् ॥२॥

तत्र यावत्क्रियते तद्व्याख्यास्यामोऽग्नीनन्वाधाय वेदं कृत्वाऽग्नीन्परिस्तीर्य पाणी प्रक्षाल्योलपराजीस्स्तीर्त्वा यथार्थं पात्राणि प्रयुनक्ति

---

१ परिसमाप्यते ।

स्थालीं कपालानाꣳ स्थाने प्रयुनक्ति ॥ ३ ॥

न षड्ढोताऽग्निं[1] परित्यज्यते । अस्मिन्नाग्निहोत्रहोमः । ततो द्वादश्यां प्रातरग्निहोत्रं हुत्वा सुरेष्ट्यर्थमग्निं प्रणीयते । न विद्युदसि । ततोऽन्वाधानम्—अग्निं गृह्णामि० चतुरहे यज्ञायुरनुसंचरानिति विशेषः । इमामूर्जं द्वादशी ये प्रविष्टा सौत्रामणीयꣳ हविरिदमेषा मयि । केचिदैष्टꣳ हविरिति । अन्वाहितजपे कृते बर्हिराहरणादि, नेध्मम्, अग्न्यलंकरणान्ते परिस्तरणम् । ततः पाणिप्रक्षालनादि, यथार्थं पात्राणि प्रयुनक्ति स्वस्वस्थालीं च शम्यादृषदुपलवर्जान्यपरतः, परतः स्रुवं वेदं पात्रीमाज्यस्थालीं प्रणीताप्रणयन मदन्त्यर्थमुपवेष वेदाग्रं मेक्षणं योक्त्रमिति ॥ ३ ॥

निर्वपणकालेऽश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे प्रभूतान्व्रीहीन्निर्वपति ॥ ४ ॥

निर्वापणकाले प्राप्तेऽश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्णे जुष्टं निर्वपामीति निर्वापणादयस्तन्त्रेण संस्कार्या(राः ।)अश्विनौ सरस्वतीन्द्र सुत्रामन्हव्यꣳ रक्षध्वमिति । निर्वापवत् प्रोक्षणं प्रोक्षामीति विशेषः ॥ ४ ॥

चरुकल्पेन श्रपयित्वाऽग्रेण गार्हपत्यमवटं खात्वा सुरायाः कल्पेन परिस्रुतꣳ संदधाति ॥ ५ ॥

उपवेषमादाय स्थाल्या कपालधर्मः, तामधिश्रयणं ध्रुवोऽसीति न तु निर्दग्धं, तण्डुलानुत्पूय समापो अद्भिरिति प्रणीताभिः संयौति अद्भिः परीति मदन्तीभिः, घर्मोऽसीति सहाद्भिरधिश्रयण, अन्तरितमविदहन्तः, नाऽऽप्यलेपनिनयनं न वेदिकरणं ब्राह्मणस्य मूर्धन्खरे वा सादयेत् स्फ्यं तिर्यञ्चꣳ स्तब्ध वा स्रुवं च स्रुचश्च संमृष्टिं पत्नीꣳ संनह्याऽऽज्येनोदेहीत्यादि, आर्द्रो भुवनस्येति चरोरुद्वासनान्तम । ततोऽग्रेण गार्हपत्यमवटं खात्वा तस्मिन्नवटे स्थाप्यते स्थाल्यामेव सुरासधानं तस्यामुदकं क्षिपति । अल्पं हविर्महती स्थाली क्रियते ॥ ५ ॥

स्वाद्वीं त्वा स्वादुनेति शष्पैः सुराꣳ सꣳसृजति ॥ ६ ॥

अत्र व्रीहियवाद्यङ्कुर शष्पशब्दाभिधेय बालतृणं चोपलक्ष्यते ॥ ६ ॥

सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेति सꣳसृष्टामभिमन्त्रयते ॥ ७ ॥

यजमान इति शेषः ॥ ७ ॥

तिस्रो रात्रीः सꣳहिता वसति ॥ ८ ॥

---

१ अग्निं ।

शाप्ये. संसृष्टायांत्रिषु दिनेषु तथैव निवासं विधत्ते—तिस्रः सꣳसृष्टा वसति । तिस्रो हि रात्रीः क्रीतः सोमो वसति (तै० ब्रा० १-८-९) इति । क्रीतसोमस्य त्रिरात्रवासोऽन्यत्र प्रसिद्धः । तथा च श्रूयते—'तꣳ सोममाह्रियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्स तिस्रो रात्रीः परिमुषितोऽवसत्तस्मात्तिस्रो रात्रीः क्रीतः सोमो वसति' (तै० सं० ६-१-९) इति । तिस्रो रात्रीः संसृष्टा वसति ।

अथ चतुर्दश्यामन्वाहितानामग्नीना न त्यागस्तेष्वेवाग्निहोत्रादीनि । अथ पञ्चदश्यां यदि पौर्वाह्णिकं पर्व तदा दर्श. पूर्णमासो वा क्रियते ततस्त्रिपशुरारभ्यते । यदि त्वौत्तरभाविकं पर्व ततः समाप्य त्रिपशुं पञ्चदश्यां दर्शं पूर्णमासं वा । अथ सौत्रामण्याः पयोग्रहमाश्रित्य प्रयोगः । पञ्चदश्यामेव सौत्रामण्या यक्ष्य. इत्युक्त्वा पञ्होता, ततः पश्विष्टिः शाखाहरणादिव्रतप्रवेशः ॥ ८ ॥

एकयूपं छिनत्ति ॥ ९ ॥

यूपाहुत्यादिपशुस्नपनान्तं प्रकृतिवत् । अयं तु विशेषः । ग्रहपात्रसादनकाले वत्सापाकरण प्रातर्दोहवत्, पशुशाखया सतं नार्यो कुम्भीस्थाने प्रा दोहपात्राणि, कुम्भीमभिधानी निदाने दोहनपात्राणि सुरायाः उद्भेदनकाल एता आचरन्तीत्यादिसंक्षालननिनयनान्तं प्रातर्दोहवत् । पशुशाखाया उपवेषं च, अश्विभ्या सरस्वत्या इन्द्राय सुत्राम्ण इति निगमाः । ब्राह्मणमूर्धन्खरे वा सादयित्वा, इन्द्रमिन्द्रियमित्यादिदर्शवद्ग्रहाभिमेशनं खरादधस्तात् कृत्वा वालमध्येन पवित्रेण पावनं पुनातु ते परिस्रुतमित्यविकारेण यथायतनं सादयित्वा पश्वपाकरणादि मार्जनान्तं पूर्ववत् । ग्रहाणामथवा पाशुकानि ध्रुवान्तान्याज्यानि गृहीत्वा कुविदङ्गेति च पूर्ववदैन्द्रमासाद्यित्वा प्रोक्षणीरासिमन्त्र्येत्यादि वपामार्जनान्तं पूर्ववत् । ततः पुरोडाशं विर्वपतीत्यादि सर्वं पूर्ववत् । *मासराभावात्तस्य निवृत्तिः । तत्रश्लोकाः—

पर्वण्येव पयोग्रहेऽप्यसुध्मायागू खरे सादनात्
प्राक्कुम्भीसतयोः कृते त्वपनयेद्दत्सान्पशोः शाखया ॥
त्रीण्यूर्ध्वानि च दोहपात्राणि खरं मूर्धन्खरे वा सुरा
निष्टप्तानि च दोहकर्म सदने सन्नाभिमृष्टिस्तथा ॥
खरादधस्तान्वालेन पावनं तु पुनः खरे ।
इषे त्वेति वपाहोमो मार्जनादि च पूर्ववत् ॥

---

* अङ्कुरितयवचूर्णं मासरम् ।

अथ त्रिपशोः कर्म, न पश्चिष्टि. परिगृहीतत्वात् । सुरादेवताया यत इन्द्रः स एव सुत्रामा वेति केचित् । पश्चिष्ट्यादि इन्द्र सुत्रामा, अन्येऽन्य इन्द्र इति । तस्मात्पश्चिष्ट्यादिसुरेष्टौ यदि व्रतोपायन कृतमिह न पश्चिष्टि कृत्वा, क्रियत आसन्नेषु हविःषु कृत्वा व्रतोपायनं पश्चिष्टि । शाखाहरण प्लक्षशाखाया च यूपाहुत्यादिचषालकरणान्तं स्वरवत्त्रय न स्वरुभि. पशून्व्यर्थेयमिति श्रुते । एको यूपः । नोपशयपात्नीवती ॥ ९ ॥

न वेदं करोति । पुरस्तात्कृते नार्थान्कुरुते ॥ १० ॥

नेष्ट्वा वेदिं करोति । न वेदं करोति वेदार्थान्पूर्वं कृतेनैवोपदेशात्सर्वं तेनैव ॥ १० ॥

सौमिक्यास्तृतीयमात्रीं वेदिं करोति ॥ ११ ॥

सौमिक्या वेदेस्तृतीये यजेत । प्रक्रमस्य त्रिकरण्या वा वेदिमानम् । चतुर्विंशत्यङ्गुलसंमितेन दण्डेन दशाभिः पश्चाद्द्वादशाभि. प्राची, अष्टाभि. पुरस्तात् , न दशपदोत्तरवेदिः शम्यामात्रैव पशुबन्धवदिति विधानात् एकादशिन्या प्रत्यक्षविहिता एव प्रवर्तन्ते । तस्माच्छम्याप्रमाणोत्तरवेदिरिति भाष्यकृत् ॥ ११ ॥

यस्मिन्कालेऽध्वर्युरुत्तरवेदिं करोति तस्मिन्काले प्रतिप्रस्थाता चात्वालात्पुरीषमाहृत्य दक्षिणेनोत्तरवेदिं चतुरश्रं खरं करोति ॥ १२ ॥

यस्मिन्काल उत्तरवेदिं करोत्यध्वर्युस्तदा प्रतिप्रस्थाता चात्वालात्पुरीषमाहृत्य मृत्तिका दक्षिणोत्तरवेदिं (द्या) खर पीठ करोति । उत्तरवेद्या क्रियमाणायामेव तूष्णीं खरकरणमेषामन्वाहार्यपचनस्यादूरे वेद्यामेव सुराग्रहार्थे द्वितीय खर करोति । चात्वाले तस्मादाहृत्य पुरीषमध्वर्यु , निःसारणान्तं पशुवत् ॥ १२ ॥

यस्मिन्कालेऽध्वर्युराहवनीयं प्रणयति तस्मिन्काले प्रतिप्रस्थाता दक्षिणाग्नेरङ्गारानाहृत्य खरे न्युप्योपसमादधाति ॥ १३ ॥ न पाणी प्रक्षालयते ॥ १४ ॥

अग्निप्रणयनकाल उत्तरवेदिक प्रणयत्यध्वर्यु । प्रतिप्रस्थाता दक्षिणाग्नेरग्निमाहृत्य दक्षिणेनोत्तरवेदिखरे न्युप्य तूष्णी यथा व्यवायो न भवति तथा पश्चादुपसमादधाति । अतिमुक्त्यन्तमौत्तरवेदिकस्य बर्हिराहरणादि परिस्तरणान्त पाशुक, पाणिप्रक्षालनादि । पात्रासादनकाले प्राप्ते पाशुकेष्वेव विकार., द्वे यूपरशने तिस्र. पशुरशनाः कुम्भीत्रयं वपाश्रपणीत्रय वृष्णीर्यदैन्द्रस्तदा कुम्भीशूलवपाश्रपणीनां तन्त्र मेषवृष्ण्यो. । एव पाशुकानि प्रयुज्य ॥ १३ ॥ १४ ॥

---

१ एतत्सूत्रमिति ।

अश्विभ्याᳪ सरस्वत्या इन्द्राय सुत्राम्णे त्रीणि
वैकङ्कतान्यूर्ध्वपात्राणि प्रयुनक्ति ॥ १५ ॥

अश्विभ्याᳪ सरस्वत्या इन्द्राय सुत्राम्णे, त्रीण्यूर्ध्वपात्राणि सुराग्रहार्थे खरे प्रयुनक्ति ॥ १९ ॥

सतᳪ शतातृण्णाᳪ स्थालीᳪ रुक्मं वालस्राव
च ॥ १६ ॥

सत द्रोणकलशाकृति प्रयुनक्तीति विशेष. । परिमण्डलं शतच्छिद्रं मार्तिकं स्थालीविधानात् । प्रयुनक्ति वालस्राव वालमय शुचिभिर्गोवाले. कृतं सुराक्षालनार्थं प्रयुनक्ति । केचिद्दशापवित्रवद्बस्त्रे बध्वा श्येनपत्र श्येनपुच्छ च कलबदरकर्कन्धुसक्तुलाशुकानि संमृज्योर्ध्वपात्राणि जुहूवत्संमार्ष्टि पालाशत्वाच्च तस्य पात्रीधर्मास्तद्दारुमयम् । शतच्छिद्रा मार्तिकी स्थाली ॥ १६ ॥

यत्प्राक्पशूपाकरणात्कृत्वोद्भिद्य सुराᳪ सते
निषिच्य पुनातु ते परिस्रुतमिति वालमयेन
पवित्रेण पुनाति ॥ १७ ॥

प्राक्पशूपाकरणात्कृत्वा तत्र विशेष. । देवस्य वा ददत इति रशनामादायाऽऽदानं परिवीरसीत्यविकारेण दिव सूनुव स्थ, अन्तरिक्षस्य त्वा स्थानावगृह्णामि, एवमन्तं कृत्वोऽद्भिद्य सुरा ब्राह्मणस्य मूर्धन्खरे वा सादयित्वा तूष्णीं प्रियेणेति । केचित्पुनातु ते परिस्रुतमिति वालमयेन पवित्रेण सुरा पावयन्ति खरस्याधस्तात् ॥ १७ ॥

वायुः पूतः पवित्रेणेति सोमवामिनः । सोमातिपवितस्य वा । प्राङ्सोम इति सोमातिपवितस्य
पूतां ब्राह्मणस्य मूर्धन्सादयित्वा ॥ (ख०२४) ॥ १८ ॥

प्रत्यङ् सोम इति सोमवामिन प्रत्यङ् सोमो अतिद्रुत इति पवितस्य पूतां यथायतनं सादयति । यत्र पूर्वमासादित तत्रैवाऽऽसादयति ॥ १८ ॥

पशूपाकरणप्रभृतीनि कर्माणि प्रतिपद्यते । आश्विनमजं धूम्रमुपाकरोति । सारस्वतं च मेषमैन्द्रमृषभं वृष्णिं बस्तं वा । बार्हस्पत्यं चतुर्थᳪ
सोमवामिनः सोमातिपवितस्य वा ॥ १९ ॥

एकयूपे पशूनुपाकरोति । एकादशिनीवदित्यादि, इषे त्वेत्यादि, अश्विभ्यां त्वा

१ सोमातिपावितस्य

जुष्टमुपाकरोमीति धूम्रवर्णमजं, इषे त्वेत्यादि, सरस्वत्यै त्वा जुष्टमिति मेषं, सरस्वती देवता, वाग्वै सरस्वतीति वाक्यशेषात् । इन्द्राय जुष्टमित्यृषभं वृष्णि वाऽन्ये बर्हिष्यादाय बृहस्पतये त्वेति चतुर्थोऽजः, अतिपवितस्य सोम पीत्वोदरात्स्रवण यस्य सोमातिपवितः । अनित्यः, उपाकृत्य पञ्च जुहोति, ऊहेन सुवर्ग यात ओषधीषु प्रतितिष्ठते येषामशि० निष्क्रीता इमे यन्तु ये वध्यमाना, न तु चतुर्थेनोहः प्रमुञ्चमाना उपाकृतान्शु(ञ्छ)शमाना० अग्नेर्जनित्रमसीत्यादि अभिहोमान्तं, देवस्य त्वा० पशुरशनामादाय पशोर्दक्षिण इत्यादि, धर्षा मानुषानश्विभ्या त्वा जुष्टं नियुनज्मि, दक्षिणतो निर्योजनम् ।

ततः सारस्वतस्य धर्षा मानुषान्० सरस्वत्यै त्वा जुष्टं नियुनज्मि ततः धर्षामानुषानिन्द्राय त्वा जुष्टं नियुनज्मि, तत. अद्भ्यस्त्वौषधीभ्य इत्यादि अश्विभ्यां त्वा जुष्टं प्रोक्षामीत्यादि प्रोक्षति । अपा पेरुरसीत्यादि क्रमेण पायनं त्रयाणाम् । स्वात्तमित्यादि च क्रमेण वेदनिधानादि स्रुच्यमाघार्येत्यादि सं ते प्राण इत्यादि सं यज्ञपतिरित्यन्तमेकस्य कृत्वेतरयोः क्रमेण, ध्रुवासमञ्जनादि सर्वाञ्जनं तन्त्रेण, सकृत्स्वधित्योरन्तधाय, स्वधितिनैकमङ्क्त्वा पशून्पुनः स्वधित्यञ्जनमन्येन शकलेन च द्वितीयस्याञ्जनं पुनः स्वधित्यञ्जनमन्येन स्वरुणा सहाञ्जनं, स्वरूणा चिह्नकरणं, पशूनां कुम्भ्यादीना च पर्यग्निकरणं तन्त्रेण, पशुपतेः पशवस्तेषा यान्वीत्रेर देवास्तान्स्वराऽनुमन्यतां, विमोकस्तन्त्रेण ये बध्यमानान्मुख्यवपाश्रपण्या अन्वारम्भः । एवं त्रियेज्ञपतिमित्यादि तं दक्षिणेमेत्यन्तमेकस्य कृत्वेतरयो. । केचित्प्रतिपशावाग्निगोवध्यगो(?)हखननमुल्मुकाहरणं च नाऽऽवर्तन्ते । प्रमुञ्चमाना० नानाप्राणो० इति निनयनं तन्त्रेण, तदा सर्व तन्त्रेण स्वस्वाभ्यामालभ्य वपाश्रपणीभ्या मुख्यस्यान्वारम्भः । दर्भास्तरणादि क्रमेण, अमायु कृण्वन्तः संज्ञपयत स्वर्विदः स्थ (इत्यादि लोकविद स्थ गातुविद स्थ नाथविद स्थ न वा उ ऐतन्म्रियसे(ध्वे)० आशानां वा आशा० नाना प्राणाः पशुभिर्यज्ञं० इत्यादिबहुवचनप्रयोगो न तन्त्रेण दैव्याः शमितार.० उपेतन० पाशेभ्यः पशून्प्रमुञ्चत इति पाशस्य विमोकः पृथक्पृथक्, मुख्यवपाश्रपण्या सकलानुदस्य नमस्त आतानेत्यादि अपो देवीरित्यन्तं, वाक्त आप्यायतामित्यादि शुद्धाश्चरित्रा इत्यन्तमेकस्य कृत्वा, इतरयोः । त्रायस्वैन, इति उत्क्रन्तामीत्यन्तमेकस्य कृत्वेतरयोः । अन्ये व्युदस्य लोहितान्ता रक्षसां भागः स्थेति । अच्छिन्नो राय अश्विभ्या त्वा जुष्टमुत्क्रन्तामीति । सरस्वत्यै त्वा० इन्द्राय त्वा० तन्त्रेण प्रत्युष्टं० सर्वा अन्वारभेत यजमानः। उल्मुकैकदेशामित्यादि निर्दग्ध तन्त्रेण वायो वीहि० भेदेन यस्त आत्मेति च । केचित् ओ(दू)हेन ये च आत्मान इत्यादि, प्रविष्टा विनस्थिरे । आत्मन्वन्त० सुपिप्पला

ओषधीः कृत। इदमिन्द्रियमिति भेदेन उत्तमप्रयाजादि। पूर्वं परिवप्यꣳ हुत्वा जुह्वामुपस्तीर्येत्यादिक्रमेण। वपाप्रचारः—अश्विभ्यां छागस्य वपाया मेदसोऽनुब्रूहीत्यादि, एवं प्रेष्य जातवेदः० । एवं सरस्वत्यै मेषस्य वपाया मेदस एवं प्रेष्य। इन्द्रायर्षभस्येव प्रेष्य। सारस्वतस्य—सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं० इतरयो. सानाय्यवत्। उत्तरपरिवप्यहोमः। वपोद्धरणाभिघारण भेदेन, स्वाहोर्ध्वनभस मारुत गच्छत। तन्त्रेणाभिहोमः ॥ १९ ॥

हुतासु वपासु रुक्ममृषभꣳ सात्वरीं च वडवां दक्षिणां ददाति ॥ २० ॥

हुतासु वपासु निष्कमृषभं सात्वरीं च वडवां ददातीत्यापस्तम्ब. । दक्षिणाकाल ऋषभो बलीवर्दः सात्वरी शीघ्रगामिनी अश्वस्य योषिद्वडवा। ता चान्तर्वेद्या स्थापयति ब्रह्मणो ब्रह्मगी स्थो ब्रह्मणे वो हुताद्य मा मा हिꣳसिष्ट हुताद्य मह्यꣳ शिवा भवत (इति)। ब्रध्न पिन्वस्वेत्यविकारेण सहस्रधारा उत्सा अक्षीयमाणा ते दध्नु पृथिवीमन्तरिक्षं दिव च तै रुक्मर्षभसात्वरीवडवाद्रव्यैरतितराणि मृत्युं ब्राह्मणा इमे वो निष्कर्षभसात्वरीवडवाः। केचिन्नपुंसकेनोहमिच्छन्ति। निष्कशब्दो नपुंसकमिति। अनुशासनिकाद्या विकल्पाः। अग्नये हिरण्यम्। रुद्राय गाम्। वरुणायाश्वमिति प्रतिग्रहः। चात्वाले मार्जनम् ॥ २० ॥

तत्कृत्वा वायव्यैः सुराग्रहान्गृह्णात्युपयामगृहीतोऽस्यच्छिद्रं त्वाऽच्छिद्रेणाश्विभ्यां जुष्टं गृह्णामीत्याश्विनं ग्रहमध्वर्युर्गृह्णाति। उपयामगृहीतोऽस्यच्छिद्रं त्वाऽच्छिद्रेण सरस्वत्यै जुष्टं गृह्णामीति सारस्वतम्। प्रतिप्रस्थाता। उपयामगृहीतोऽस्यच्छिद्रं त्वाऽच्छिद्रेणेन्द्राय सुत्राम्णे जुष्टं गृह्णामीत्यैन्द्रं यजमानः ॥ २१ ॥

तत्कृत्वेतिवचनात् प्रकृतिवत्। ग्रहावकाशश्रुतंकारौ न भवत.। आश्विनमध्वर्युर्गृह्णाति। सारस्वतं प्रतिप्रस्थाताऽऽग्नीध्रो वा। ऐन्द्र ब्रह्मा यजमानो वा। (आप० श्रौ० १९-२-९) इत्यापस्तम्बसूत्रे विशेष. ॥ २१ ॥

कुविदङ्गेति सर्वेषामेका पुरोरुक् ॥ २२ ॥

सर्वत्रानुवर्तते ॥ २२ ॥

कुवलसक्तुभिराश्विनꣳ श्रीणाति । बदरसक्तुभिरित्येकेषाम् । सिꣳहलोमभिश्च कर्कन्धूसक्तुभिः सारस्वतꣳ शार्दूललोमभिश्च बदरसक्तुभिरैन्द्रं कुवलसक्तुभिरित्येकेषाम् । वृकलोमभिश्च । अपि वा सिꣳहावध्वर्युर्मनसा ध्यायेत् । शार्दूलैः प्रतिप्रस्थाता । वृकैर्यजमानः ॥ २३ ॥

कुवलसक्तुभिः सिंहलोमभिश्चाऽऽश्विनं गृह्णाति । बदरसक्तुभिः शार्दूललोमभिश्च सारस्वतं श्रीणाति । कर्कन्धूसक्तुभिर्वृकलोमभिश्चैन्द्रं श्रीणाति । एतेषां फलचूर्णैः श्रीणाति । सिंहः प्रसिद्धः । शार्दूलः पि(लो द्वीपी) । वृकः प्रसिद्धः । तेषां लोमाभावे सिंहं मनसा ध्यायेत् ॥ २३ ॥

एष ते योनिरश्विभ्यां त्वा, एष ते योनिः सरस्वत्यै त्वा, एष ते योनिरिन्द्राय त्वा सुत्राम्ण इति यथारूपं ब्राह्मणस्य मूर्धन्सादयित्वा ॥ (ख०२५) ॥ २४ ॥

गृहीतान्ग्रहस्तथा(न् ग्रहा)न्श्ये(श्ये)नपत्रेण सर्वतः परिमृज्य यथारूपं सादयेत् ॥२४॥

पशुपुरोडाशप्रभृतीनि कर्माणि प्रतिपद्यते ॥ बार्हस्पत्यं पशुपुरोडाशं निरुप्यैन्द्रमेकादशकपालं निर्वपति । सावित्रं द्वादशकपालम् । वारुणं दशकपालम् ॥ २५ ॥

ततः पुरोडाशान्निर्वपति । बार्हस्पत्यस्य नैमित्तिकस्य निरुप्येतरेषां निर्वापः । तस्यैकादश कपालानि द्वादश वा पुरोडाशानां त्रयस्त्रिꣳशत्कपालानि स्फ्यश्च द्वंद्वमित्यादि सर्वं पशुपुरोडाशवत् । इन्द्राय जुष्टं निर्वपामि । सवित्रे जुष्टं० वरुणाय जुष्टं० इन्द्र हव्यꣳ रक्षस्व सवितर्हव्यꣳ रक्षस्व वरुण हव्यꣳ रक्षस्वेति । निर्वापवत्प्रोक्षणम् । हविष्कृता वाच विसृज्य पशून्विशास्ति निष्टपनादि हृदयश्रपणान्तमेकस्य कृत्वाऽनन्तरमितरयोः । तत्र विशेषः—गुद मा निर्ल्लेषीरित्यादि, अवहननादि निर्वापवदधिवपनमैन्द्रस्यैकादशोपदधाति । सवितुर्द्वादश वरुणस्य दश कपालानि मदन्तीरधिश्रयति, इत्याद्याप्यलेप निनीय घृतागेर्हीत्यादि ॥ २५ ॥

तानासाद्य यथागृहीतं ग्रहानाददतेऽश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सोमानाꣳ सुराणामनु-

ब्रूहि । अश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सोमान्सुरान् प्रस्थितान्प्रेष्येति संप्रेष्यति ॥ २६ ॥ वषट्कृते जुहोति ॥ २७ ॥

ऐन्द्रं तूष्णीमभिघार्य सवित्रे जुष्टं० अलंकृत्य सादनान्तमाग्नेयवत् । सावित्रवारुण- योरभिमर्शनम् । यो नः कनीय अपतमिन्द्रो भुवनान्नुदताम्, अथ ग्रहै प्रचरन्ति जुहूविकारा अप्युपभृद्वर्जे ये गृह्णन्ति ग्रहाम्तं त स स आदत्तेऽध्वर्यु. । अश्विभ्यामि- त्यादि संप्रैषः ॥ २६ ॥ २७ ॥

अनुवषट्कृते हुत्वा बार्हस्पत्यस्य पशुपुरोडाशेन प्रचरिते ब्राह्मणं परिक्रीणीते ग्रहोन्छेषणस्य पातारम् । यदत्र शिष्टꣳ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामीति भक्षयति ॥ २८ ॥

युवꣳ सुराममश्विनेति सर्वदेवत्ये याज्यानुवाक्ये भवतः । सोमस्याग्ने वीहीत्यनुय- जति (आप० श्रौ० १९–२–१) इत्यापस्तम्बः । अनुवषट्कृते हुत्वा बार्हस्पत्यस्य पशुपुरोडाशेन प्रचारः । ततो हुतशेषं भक्षयति यजमानः ॥ २८ ॥

नाना हि वां देवहितꣳ सदोमितं मा सꣳसृक्षाथां परमे व्योमन् । सुरा त्वमसि शुष्मिणी सोम एष मा मा हिꣳसीः स्वां योनिमाविशन्निति भक्षय- न्तमभिमन्त्रयते ॥ २९ ॥

यजमान इति शेषः ॥ २९ ॥

द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्या- नाम् । ताभ्यामिदं विश्वं भुवनꣳ समेत्यन्तरा पूर्वमपरं च केतुमिति वा वल्मीकवपायामवन- येत् ॥ ३० ॥ स्वयं वा पिबेत् । सत्रेहुतां वा जुहुयात् ॥ ३१ ॥

वल्मीकवपायां वाऽवनयेद्ग्रहशेषम् ॥ ३० ॥ ३१ ॥

दक्षिणाग्नौ प्रबध्य शतातृण्णाꣳ स्थालीं वितत्य धारयन्ति । शतातृण्णेन सौवर्णेन रुक्मेणापिहि- ताम् ॥ ३२ ॥

दक्षिणेऽग्नौ शतातृण्णा स्थाली प्रबद्धा धारयन्ति । तस्या बिल उदीचीनदशं पवित्रं वितत्य यन्मे मनः परागतमिति तस्मिञ्छतमानं हिरण्यं निधाय, (आप० श्रौ० १९-३-७) इत्यापस्तम्ब. । दक्षिणाग्नौ खरे वा तस्मिञ्छतच्छिद्रां स्थालीं कस्मिंश्चिद्रुद्ध्वा धारयति कश्चित्पुरी (रु) षः । तस्या बिल उदीचीनदशं पवित्रं वितत्य वालस्य यन्मे मन. परागतमिति तस्मिन्वाल्मये शतमानं हिरण्यं बिले निधीयते ॥ ३२ ॥

पितरो मदन्ताꣳ सोमप्रतीका व्यशेम देवहितं यदायुः । इन्द्रपीतो विचक्षणो व्यशेम देवहितं यदायुः । यन्मे मनो यमं (नः परागतं) यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसि व्यशेम देवहितं यदायुरिति तस्यामेव सुरावशेषमवनयेत् ॥ ३३ ॥

प्राचीनावीत्यध्वर्यु. सुराशेषमवनयेत् ॥ ३३ ॥

स्रवन्तीं. पितृमतीभिर्याज्यानुवाक्याभिरुपतिष्ठते ॥ ३४ ॥

स्रवन्ती स्थाली सौमीभि पितृमतीभिरुपतिष्ठते ॥ ३४ ॥

त्वꣳ सोम प्रचिकितो मनीषेति ॥ (ख० २६) ॥ तिसृभिः पुरस्तादध्वर्युरुत्तराभिस्तिसृभिर्दक्षिणतो ब्रह्मोत्तराभिस्तिसृभिः पश्चाद्धोतोत्तराभिस्तिसृभिरुत्तरत आग्नीध्रः कव्यवाहिनीभिस्तिसृभिः । अत्र शतातृण्णां स्थालीं निदधाति । ब्राह्मणो राजन्यो वैश्यो वा नाऽऽद्रियेत । दक्षिणमग्निं प्रणयितुꣳ स्वयमेतꣳ सुरावशेषं व्रतयन्नासीत ॥ ३५ ॥

त्वꣳ सोम प्रचिकित० त्वया हि नः० त्वꣳ सोम पितृभिः, इत्यध्वर्यु· पुरस्तात् प्रत्यङ्मुख उपतिष्ठते स्रवन्तीं स्थालीम् । दक्षिणतो ब्रह्मोदङ्मुखो बर्हिषदः पितरः, आऽहं (अथा)पितॄन्० उपहूता. पितर , इति तिसृभिर्होता, अग्निष्वात्ताः पितरः० ये अग्निष्वात्ता ये अनग्निष्वात्ता अभिवान्यायै दुग्धे जुषमाणा इति पश्चात्प्राङ्मुखः, यदग्ने कव्य वाहन·, त्वामग्न ईडितो जातवेद मातली कव्यैरिति तिसृभिर्दक्षिणेऽग्नौ शतातृण्णामध्वर्युः स्थापयति राजन्यवैश्ययोर्दक्षिणाग्नेरग्निप्रणयनादिशतातृण्णाप्रतिष्ठापनान्तं न भवति॥३५॥

पशुभिः प्रचर्य पुरोडाशैः प्रचरति ॥ ३६ ॥

ततः प्रतिष्ठापने कृते बार्हस्पत्यस्य पशुपुरोडाशेन प्रचर्याध्वर्युः श्रु(शृ)त५ हविः शमितरित्यादि स ते मनसा मनः, अश्विभ्यां त्वा जुष्टमभिघारयामीति, एवमन्तमेकस्य कृत्वोत्तरयोरन्यत्पृषदाज्यमानीयान्यत्स्वाहोष्मण इति तन्त्रेण, क्रमेण पञ्चहोत्रोपसादयति क्रमेणाऽऽसन्नमभिमृश्य तच्चतसृपूपस्तृणीतेत्यादि उपभृति त्र्यङ्गावदानं हिरण्यमुपरिष्टादभिघारणं च न भवति । इडायामप्यवत्ते यूष्णो(तूष्णीमु)पसिच्य नाभिघारयति । वसाहोमहवणीं गृहीत्वाऽनवदानीयैः संमृश्य—अश्विभ्यां छागस्य हविषोऽनुब्रूहि एवं प्रेष्य, अर्धर्चे वसाहोमं हुत्वोद्रेकमन्यस्मिन्नवनयति वषट्कृते होमः प्रत्याक्रम्य पूर्ववत्सर्वमुपस्तरणं न त्विडापात्रस्य, सरस्वत्यै मेषस्य हविषोऽनुब्रूहि । एव प्रेष्य । वषट्कृते होमः । अर्धर्चे वसाहोमः । उद्रेकमन्यस्मिन्नवनयति । उत्तमस्य पशोरुपस्तरणादि ऐन्द्रः प्राण इत्यन्तं प्रकृतिवत् । इन्द्रायर्षभस्य हविषोऽनुब्रूहि एवं प्रेष्य, अर्धर्चे वसाहोमः । उद्रेकान्समवनीय दिशः प्रदिश इत्यादिदिगुपस्थानान्तं वषट्कृते होमः । सानाय्यवदनुमन्त्रणमाद्यन्तयोः । सरस्वत्या अहमिति मध्यमस्यैवं कृत्वा पुरोडाशै प्रचरति जुह्वामुपस्तीर्येत्यादि इन्द्रायानुब्रूहि इन्द्रं यज, इन्द्रस्याहमिन्द्रियाव्यन्नादः । सवित्रेऽनुब्रूहि सवितारं यज, सवितुरहमन्नादः । वरुणायानुब्रूहि वरुणं यज वरुणस्याहमन्नादः । अथ नारिष्ठान्हुत्वा वनस्पतियागं कुर्यात् ॥ ३६ ॥

पशूनां पुरोडाशानां च समान५ स्विष्टकृदिड५ सꣳस्थाप्य ॥ ३७ ॥

पुरोडाशेभ्यः स्विष्टकृते समवद्यति पशुस्विष्टकृते समवद्यतीति वचनात् । पशुस्विष्टकृता सहावदायाभिघार्य हिरण्यशकलं पूर्वमेव कृतं स्विष्टकृद्यागं कृत्वा वैश्वानरे हविरिदं० । ततः प्राशित्रं बार्हस्पत्यादारभ्य पुरोडाशेभ्य इडा, पश्विडया सहाभिघारणं, यजमानभागवर्जं पुरोडाशाना मार्जनान्तम् । अथाग्नीदौपयजानित्यादिपाशुकं कर्म प्रतिपद्यते । समुद्रं गच्छत स्वाहेत्यादि स्वरुहोमः । जाघनीभिश्च पत्नीः संयाजयन्ति । न पत्न्यञ्जली निनयनं नात्र योक्त्रविमोकः । उपवेषोद्वासान्तं कर्म कुर्यात् ॥ ३७ ॥

शूलैर्मासरेण पात्रैश्चावभृथमवयन्ति ॥ ३८ ॥

शूलैर्हृदयशूलैः । मासरमृजीषकल्पेन प्रतिपादयति । बल्कसं मासरमित्याचक्षते (आप० श्रौ० १९-४-८) इत्यापस्तम्ब. । पात्रैर्ग्रहैश्च चशब्देन शतातृण्णा स्थाल्यपि गृह्यते । वारणमेककपालं निर्वपति । अवभृथस्य कर्म—परिस्तरणी परिभोजनी उलपराजी वेदश्च नास्ति । उपवेष कृत्वा पुरोडाशसिद्ध्यर्थानामेव पात्राणां पुनः प्रयोगः । अग्निहोत्रहवणीवर्जमपरतः पुरोडाशसिद्ध्यर्थानि पात्राणि प्रयुज्य पवित्रकरणादि

वरुणाय जुष्टं निर्वपामीत्यादि आप्यलेपं निनीय प्रोक्षणीरासादयति आज्येनोदेहीति। चतुर्गृहीतान्याज्यानि, अयं प्राणश्च। अवभृथवद्वारुणमलंकृत्योत्तरवेद्यंसे तूष्णीमासादयति ॥ ३८ ॥

तस्य सौमिकेनावभृथेन कल्पो व्याख्यातः ॥ ३९ ॥

तस्यावभृथस्य सौमिकेन समानः कल्पो व्याख्यातः। तथाचाऽऽयुर्दा इत्यवभृथमवैष्य-ञ्जुहुयात्। उरु१ हि राजा० ॥ ३९ ॥

न साम गीयते ॥ ४० ॥

न साममायनं प्रस्तोतुरभावात् ॥ ४० ॥

तूष्णीमेव परेत्य मासरमृजीषकल्पेन प्रतिपादयति ॥ ४१ ॥

शतं ते राजन्नित्याद्यवभृथवत्। स्विष्टकृदन्तेऽनूयाजान्ते वा कृते मासरमृजीषकल्पेन प्रतिपादयति। मासरस्य तूष्णीमेव प्रोक्षणम्। मासरेण स्रुचं पूरयित्वा मन्त्रेण निमज्जनं, तूष्णीं बिन्दुस्पर्शनम् ॥ ४१ ॥

यस्ते देव वरुण गायत्रच्छन्दाः पाशो ब्रह्मन्प्रतिष्ठितस्तं त एतेनावयजे तस्मै स्वाहेत्याश्विनपात्रं प्रविध्यति। यस्ते देव वरुण त्रिष्टुप्छन्दाः पाशः क्षत्रे प्रतितिष्ठितस्तं त एतेनावयजे तस्मै स्वाहेति सारस्वतस्य। यस्ते देव वरुण जगतीछन्दाः पाशो विशि प्रतिष्ठितस्तं त एतेनावयजे तस्मै स्वाहेत्यैन्द्रस्य। यस्ते देव वरुणानुष्टुप्छन्दाः पाशो दिक्षु प्रतिष्ठितस्तं त एतेनावयजे तस्मै स्वाहेति शतातृण्णा१ स्थालीम्। यस्ते देव वरुण पङ्क्तिच्छन्दाः पाशो वाचि प्रतिष्ठितस्तं त एतेनावयजे तस्मै स्वाहेति शूलान् ॥ ४२ ॥

आश्विनादिपात्राणां स्थाल्यादीनां च प्रक्षेपः। तत इमं विष्यामीति पत्नी योक्त्रविमोकं करोति। अन्ये वाससी परिधाय योक्त्रेण वाससी क्षिपति। देवीराप:० प्रागस्य तूष्णीं सुमित्रा न आप इति स्नातः पत्नी यजमानश्चान्योन्य पृष्ठे प्रधावतः। नाञ्जलिविमोकः। दीक्षाविमोकार्थत्वात्। नोन्नेतृप्रेषणमुन्नेतुरभावान्नोन्नयनम्। अहतवाससोः परिधानं यजमानपत्न्योः। उद्वयमित्यादित्यमुपतिष्ठते ॥ ४२ ॥

तूष्णीं प्रत्यायनं क्रियते ॥ ४३ ॥

उदकान्तं प्रत्यायनं च समित्पाणयस्तूष्णीं गच्छन्ति । न तु महीगानिति, विहारदेशं गत्वा एधोऽस्येधिषीमहीत्यादि अपो अन्वचारिषमित्यन्तं सर्वे । ततो यजमानो विष्णुक्रमादिब्राह्मणभोजनान्तं निरूढपशुबन्धवत्समिदाधानान्तं कृत्वाऽऽयाडग्निरित्युपस्थाय ब्रह्मा निष्क्रामति । ततो विष्णुक्रमादिरित्येके ॥ ४३ ॥

सोमवामिनं याजयेत् । सोमातिपवितं याजयेत् । राजानमवरुद्धं ग्रामकामं प्रजाकामं पशुकामाश्रिया प्रत्यभिरूढमभिचरन्वा यजेत । सर्वेष्वभिषेकेष्वाम्नाता । तया ब्राह्मणो राजन्यो वैश्यो वा भूतिकामो यजेत भूतिकामो यजेत ॥ (ख० २७) ॥ ४४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे त्रयोदशप्रश्नेऽष्टमः पटलः ।

इति हिरण्यकेशिसूत्रे त्रयोदशः प्रश्नः ॥ १३ ॥

सोमातिपूतसोमवामिनोश्च सौत्रामणी भवति । शाखान्तरश्रवणात्सोमातिपूतः सोमवामी च ब्राह्मण एव । न हि क्षत्रियवैश्ययोरेतद्विशेषणमिति । ननु च सोमकार्ये तयोरपि न्यग्रोधविधानम् । तेन तदतिपवने तद्वमने च किमिति न भवति । नैतदेवम् । यदि नाम कार्यापत्त्या धर्मप्राप्तिर्भवति । न चाय सोमधर्मः । किं तर्हि तदतिपवने यागान्तरविधानमिति । अग्निचितस्तु वर्णत्रयस्यापि भवति । अग्निसंयोगविधानात् । आपस्तम्बोऽप्याह—'तया सोमवामिन सोमातिपवितं राजानमपरुध्यमानमपरुद्धमाभिषिच्यमानमभिषिक्तं वा याजयेत् । अभिचर्यमाणो यजेत । अभिचरन्नन्नाद्यकामः प्रजाकामः पशुकामो वा । सर्वेष्वभिषेकेष्वाम्नाता । तया ब्राह्मणो राजन्यो वैश्यो वा तेजस्कामो यजेत' (आप० श्रौ० १९-४-१४) इति । त्रयाणां वर्णानां भूतिकामो यजेत । द्विरुक्तिः प्रश्नसमाप्त्यर्था ॥ ४४ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकाया त्रयोदशप्रश्नेऽष्टमः पटलः ।

त्रयोदशप्रश्नः समाप्तः ॥ १३ ॥

अथ चतुर्दश प्रश्न ।

विनेययुक्ताखिलसिद्धवर्यलसच्चिदानन्दसुखं मुनीन्द्रम् ।
नमामि सूत्रार्थविदे मुदाऽहं हिरण्यकेश्याख्यगुरुं कृपाब्धिम् ॥
गुरुं गणपतिं नौमि जन्मज्ञानप्रदौ तथा ।
सह गौर्या महेशानं नौमि विष्णुं च पद्मया ॥
वाजपेयराजसूयौ गतावित्थं त्रयोदशे ।
अश्वमेधं नृमेधं च व्याचष्टेऽथ चतुर्दशे ॥

ननु ' योऽश्वमेधेन यजते ' (तै० सं० ५-३-१२) इत्यादौ राजपदाभावात्त्रयाणा वर्णानामेवाधिकारोऽश्वमेधस्येति प्रतीयते। तदेवं पापक्षयार्थमश्वमेधक्रतुं तदुपासनं च कुर्यात्। तथा च ' सर्वस्य वा एषा प्रायश्चित्ति. सर्वस्य भेषजꣳ सर्वं वा एतेन पाप्मान देवा तरति ब्रह्महत्यां अतरन्नपि वा एतेन ब्रह्महत्यामतरन्सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद ' (तै० सं० ५-३-१२) इति । येयमश्वमेधानुष्ठितिः सैषा सर्वस्य पाप्मन उपपातकरूपस्य महापातकरूपस्य च प्रायश्चित्तिर्भवति। किंच सर्वस्य व्याधिजातस्य तद्धेतुपापक्षयद्वारेणाश्वमेधानुष्ठान भेषजम् । अत एवेदानींतना देवाः पूर्वस्मिन्मनुष्यजन्मन्येतेनाश्वमेधेन गोवधादिरूपमुपपातकं ब्रह्महत्यादिरूपं महापातकं च परिहृतवन्तः। तस्मादिदानीमपि योऽश्वमेधक्रतुना यजते सोऽयमुपपातकमहापातके तरति । योऽपि च पुरुष एनमश्वमेधं शास्त्रोक्तप्रकारेण जानाति । ज्ञानं च द्विविधम्—अर्थनिर्णय उपासनं च। तत्रार्थनिर्णय. पदवाक्यप्रमाणपर्यालोचनया संपद्यते । उपासनप्रकारस्तु सप्तमकाण्डस्थान्तिमानुवाके—'यो वा अश्वस्य मेध्यस्य शिरो वेद'-(तै० सं० ७-५-२८) इत्यभिधास्यते । सौत्रामणीविधानसमनन्तरं श्रुतिमन्त्रपाठावसरप्राप्तोऽश्वमेधोऽनुविधीयते—

राजाऽश्वमेधेन यजेत ॥ १ ॥

राजशब्दोऽभिषेकवति क्षत्रिये वर्तत इत्युक्तं प्रदेशान्तरे । तथा च ' क्षत्रिययज्ञ उ वा एष यदश्वमेधस्तस्माद्राष्ट्र्यश्वमेधेन यजेत ' इति । कात्यायनोऽपि सूत्रयामास— ' राजयज्ञोऽश्वमेध. ' (का० श्रौ० २०-१) इति । राज्ञो यज्ञो राजयज्ञः । न ब्राह्मणवैश्ययोरिति । अश्वमेध इति त्रिरात्रस्य यज्ञक्रतोर्नामधेयम् । आपस्तम्बोऽपि— ' राजा सार्वभौमोऽश्वमेधेन यजेत । अप्यसार्वभौम. ' (आप० श्रौ० २०-१) इति । अश्वमेध इति सर्वेष्टिपशुसोमानां समुदायनाम । राज्ञो नित्योऽश्वमेध इति ॥ १ ॥

यः कामयेत सर्वा व्युष्टीर्व्यश्नुवीयेति ॥ २ ॥

वाजसनेयिब्राह्मणमिति शेषः । स सर्वकामस्य भवति । सर्वकामावाप्तिश्च परमात्माख्यस(त)त्त्वप्राप्तिमन्तरेण न भवति । यावच्छरीरकालभाव(वि)नो हि कामा इति । तेन सर्वकामस्येति मुमुक्षोरित्येतदुक्तं भवति । तथा च ' सर्वान्ह वै कामानाप्नोति सर्वा व्युष्टीर्व्यश्नुते योऽश्वमेधेन यजते ' इति । यद्वा—सर्वे कामा ब्राह्मणस्य विजयो राज्ञः पुष्टिर्वैश्यस्य चेति त्रयाणां वर्णानामेवाश्वमेधाधिकार इति ॥ २ ॥

पुण्यनामधेयं चित्रं देवयजनमध्यवस्यति । यस्य पुरस्ताद(दा)पः सुखाः सूपावगाहा अनपस्वरीः ॥ ३ ॥

पुण्यं पावनं नामधेयं यस्य श्रवणमात्रेण प्रतीयते तत्पुण्यनाम स्थानं पुष्करवनं गौतमवनं वाराणसी कुरुक्षेत्रमित्यादि । यत्राऽऽपः पुरस्तात्सुखाः सुखस्पर्शा नात्युष्णा ग्रीष्मर्तौ नातिशीता हेमन्तर्तौ । सूपावगाहाः सुतीर्था । अनपस्वरीः, अपेत्य न पः (याः) स्वरन्ति संभृता वहन्ति संस्कारयन्ति भूमिमम्बुभिः स्रोतोभिरशोष्या वा । एवंगुणविशेषणविशिष्टायां भूमौ चित्रानक्षत्रकालेऽध्यवस्यति देवयजनं करोतीत्यर्थः । चैत्र्यां पौर्णमास्यां प्रातरग्निहोत्रं हुत्वाऽश्वमेधेन यक्ष्ये स्वर्गं लोकमवाप्नवानीत्युक्त्वा गृह एव ब्राह्मणैः सह स्वस्तिवाचनं कृत्वा विद्युत्० । सोमप्रवाकवरणं च मधुपर्कादिभिरभ्यर्च्य तं प्रेषयेत् । स चाध्वर्य्वादिगृहान्प्रत्यागत्य क्रमेण राजेन्द्रवर्मणोऽश्वमेधो भविष्यति तत्र भवताऽध्वर्य्वादि, एवमुद्गातृपर्यन्तानां नाहीन इत्युक्ते नाहीनोऽश्वमेध इति प्रतिवचनम् । महन्मेऽवोच इति जपानन्तरं साध्वर्युब्रह्महोतॄन्हस्त्यश्वादिभिरपदातीनानयन्ति राजमनुष्यास्त आरूढा एव देवो देवमेत्वित्यादि राजगृहं गच्छन्ति । तत उ(उ)द्गातृणां मधुपर्कः । ततो देवतोपस्थानं नान्दीश्राद्धम् । हस्त्यश्वादिनाऽऽग्नीध्रमानयति । तत आग्नीध्रवरणं मधुपर्कं च कुर्यात् ॥ ३ ॥

चैत्र्यां पौर्णमास्यां सांग्रहण्येष्ट्या यजेत तस्या योत्तराऽमावास्या तस्यां संज्ञान्या ॥ ४ ॥

इमां जनतां स्वस्यापेक्षितं जनसमूहं संग्रहीष्यामीत्यभिप्रेत्य सांग्रहण्याख्ययेष्ट्या यजते । सा चेष्टिः—वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकाम इत्यत्रोत्पन्ना । संगृह्यतेऽपेक्षितं सर्वं ययाऽसौ सम्रहणी सैव सांग्रहणी । सांग्रहण्येष्ट्या यक्ष्य इत्यादि, सांग्रहणीयं हविः० काम्येष्टिप्रकरणे वक्ष्यते । अनन्तरममावास्यायां तस्यां संज्ञान्या यक्ष्य इत्यादि । सा च कृत्स्नेष्टिर्व्याख्यास्यते । एते कामरहिते ॥ ४ ॥

वैशाख्यां पौर्णमास्यां प्राजापत्यमृषभं तूपरं बहुरूपमालभते ॥ ५ ॥

वैशाख्या पौर्णमास्या मैत्रावरुणप्रतिप्रस्थातारौ हस्त्यश्वादिभिर्वाऽऽनयन्ति । ततः प्राजापत्यमृषभ तूपर सर्ववर्णं शुक्लनीलपीतादियुक्तमालभेत । पशुबन्धेन यक्ष्ये, सर्वान्कामानवाप्नवानीत्युक्त्वा । प्रजापतये त्वा जुष्टमुपाकरोमीति । शेषं निरूढपशुबन्धवत् ॥ ५ ॥

तस्या योत्तराऽमावास्या तस्यामपदातीन् महर्त्विजः प्रतिदिशं समावहन्ति ॥ ६ ॥

अनन्तरभाविन्याममावास्याया हस्त्यश्वादिभिर्वोद्गातुरानयनं भवति । तदाऽऽरूढ एव देवो देवमेत्वित्यादि । आगते मधुपर्कः । अथवाऽस्मिन्काले वरणं कृत्वा मधुपर्कः । तस्यामपदातीन्महर्त्विज आनयन्ति । महर्त्विजामानयनमस्मिन्नहनीत्यर्थः । उद्गातृवर्जमाग्नीध्रं पूर्वमेवेष्टेरानीतं पशौ मैत्रावरुणप्रतिप्रस्थातारौ ॥ ६ ॥

अथर्त्विगानयने विशेषमाह—

अन्वहमितरान्वाऽऽवहन्त्या सुब्रह्मण्यायाः ॥ ७ ॥

अन्वहमितरानानयन्ति हस्त्यश्वादिभिर्यथाज्येष्ठमा सुब्रह्मण्यायाः । अथवा—ये ऋत्विजः स्वस्वगृहे वृतास्तानृत्विजोऽपदातीनावहन्ति पादसचार निवार्य हस्त्यश्वादीनारोह्य राजपुरुषास्तानृत्विज आनयन्ति । तत्र कालावधिरा सुब्रह्मण्याया इति । यस्यां चैत्र्यां पौर्णमास्या साग्रहणी तत आरभ्य सवत्सरेऽतीते सत्युपरितनसंवत्सरे वैशाख्याममावास्याया त्रैधातवीयरूपाया दीक्षणीयामारभ्य सप्तसु दिनेषु तस्या दीक्षणीया समाप्तायां तत्समाप्तिदिनमारभ्य दिनत्रये दीक्षा परिसमाप्य तत्रोपरितने प्रायणीयेऽहनि सुब्रह्मण्या प्रवर्तते । तत्सुब्रह्मण्यापर्यन्तमृत्विजा समावहन कर्तव्यम् । तद्यथा—साग्रहणीष्टिदिने तस्य तस्य गृहे गत्वा सोमप्रवाकेण वृतानध्वर्युब्रह्महोतृनाग्नीध्र च हस्त्यश्वादिकमारोप्येष्ट्यर्थमानयन्ति । अनन्तरभाविन्या वैशाख्या पौर्णमास्या प्राजापत्यमृषभं तूपरमालब्धुं सोमप्रवाकवृतौ मैत्रावरुणप्रतिप्रस्थातारौ हस्त्यश्वादिकमारोप्य राजपुरुषा आनयन्ति । तदनन्तरभाविन्या वैशाख्याममावास्याया ब्रह्मौदनार्थं चतुर्णां महर्त्विजामपेक्षितत्वादध्वर्युब्रह्महोतृणा पूर्वमेवाऽऽनीतत्वादवशिष्टमहर्त्विजमुद्गातार हस्त्यश्वादिभिरानयन्ति । अथाऽऽगामिसवत्सरगताया वैशाख्याममावास्याया दीक्षणीयेष्टौ साम गातुं प्रस्तोतारं हस्त्यादिभिरानयन्ति । ततो दीक्षारम्भादिवसादूर्ध्वं तृतीयादिष्वहःस्वन्वहमितरानष्टावृत्विजो हस्त्यश्वादिकमारोप्याऽऽनयन्ति । ब्राह्मणाच्छंसिनमच्छावाकं नेष्टारं प्रतिहर्तारं ग्रावस्तुतं पोतारमुन्नेतारं सुब्रह्मण्यमित्येतान्सोमार्थमानयन्ति ॥ ७ ॥

यद्यप्ययमश्वमेधो द्वादशाहविकृतिद्वारा परम्परयाऽग्निष्टोमविकृतिः । अतो वपनादिकमत्र प्राप्तम् । तथाऽप्येतद्दीक्षासमीपे न त्वत्र । अतोऽप्राप्तमपूर्वं वपनादिकमत्राऽऽह—

केशश्मश्रूणि वापयते । नखानि निकृन्तते । दतो धावते । स्नाति । अहतं वासः परिधत्ते ॥ ८ ॥

अत्राऽऽपस्तम्बोऽपि—'अमावास्यामिष्ट्वा देवयजनमभिप्रपद्यते । केशश्मश्रु वपते । नखानि निकृन्तते । दतो धावते । स्नाति । अहतं वासः परिधत्ते' (आप०श्रौ०२०–१–१६) इति । अहतमच्छिन्नं नूतनम् ॥ ८ ॥

अधिवृक्षसूर्ये वाचं यच्छति ॥ ९ ॥

वाचं यत्वोपवसति । सुवर्गस्य लोकस्य गुप्त्यै (तै० ब्रा० ३–८–१) इति ब्राह्मणम् । वाग्यमनपूर्वकेणोपवासेन स्वर्गलोको रक्षितो भवतीत्यर्थः ॥ ९ ॥

वाग्यतस्यैताꣳ रात्रिमग्निहोत्रं जुहोति ॥ १० ॥

वाग्यतस्यैताꣳ रात्रिमग्निहोत्रं जुह्वति । प्रातर्होमोऽपि रात्रौ वोपस्येव प्राक्प्रातर्होमाद्वाग्विसर्गः । अन्यकर्तृकाग्निहोत्रहोमः ॥ १० ॥

अरातयो रातयश्च परित आसते रातय इत्येकेषाम् ॥ ११ ॥

ये रातयस्ते जागरयन्ति, इत्यापस्तम्बः । ये रातयः मित्राणि जागरयन्ति ॥ ११ ॥

नमो द्रष्ट्रे नम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमोऽनुख्यात्रे नमः शृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नमो वाचे नमो वाचस्पतये नमश्चक्षुषे नमः श्रोत्राय नमस्तपसे नमो ब्रह्मण इत्युद्यन्तमादित्यमुपातिष्ठते ॥ १२ ॥

एकविंशत्या नमस्कारैरुद्यन्तमादित्यमुपातिष्ठते ॥ १२ ॥

उदित आदित्ये नमोऽग्नये पृथिविक्षित इत्यग्निमुपतिष्ठते । नमो वायवेऽन्तरिक्षक्षित इति

वायुम् । नमः सूर्याय दिविक्षित इति सूर्यम्
॥ १३ ॥

अध्वर्युस्तिसृभिरग्निं वायुं सूर्यं यथालिङ्गमुपतिष्ठते यजमान इत्येके ॥ १३ ॥

वैतसमिध्ममभ्याधाय हिरण्यगर्भः समवर्तताग्र इत्यष्टौ पूर्णाहुतीर्जुहोति ॥ १४ ॥ देवा देवेषु पराक्रमध्वमिति तिस्रः ॥ १५ ॥

अथ प्राग्वंशकरणम् । एदमगन्म, एते पन्थान इति । सर्वेषां गार्हपत्यादीनां समारोपणं गतश्रीत्वात् । देवयजनमध्यवसाने प्राग्वंशं प्रविश्य आहवनीये वैतसमिध्ममभ्याधायैकादश पूर्णाहुतीर्जुहोति हिरण्यगर्भ इत्यष्टौ । देवा देवेषु पराक्रमध्वꣳ स्वाहा । प्रथमा द्वितीयेषु पराक्रमध्वꣳ स्वाहा । द्वितीयास्तृतीयेषु पराक्रमध्वꣳ स्वाहा ॥ १४ ॥ १५ ॥

चतुष्टय्य आपो दिग्भ्यः समाभृता भवन्ति ॥ १६ ॥

चतुष्प्रकाराश्चतुष्टय्य । आनयति वर्ष्याः कूप्याः स्थावरा वहन्त्यश्चतसृभ्यो दिग्भ्यः समाभृता नैकस्याः । यद्वा—वर्ष्याः कूप्याः स्थावरा वहन्त्यश्चेति जलानां चातुर्विध्यम् । एतच्चाऽऽरुणकेतुके चयने स्पष्टमाम्नातम् । प्राच्यादिभ्यश्चतसृभ्यो दिग्भ्यस्ता आप आहर्तव्या न त्वेकस्या दिशः ॥ १६ ॥

आहृतास्वप्स्वोदनपाकमाह—

तासु ब्रह्मौदनं पचति ॥ १७ ॥

तास्वप्सु ॥ १७ ॥

पात्र्यामुपस्तीर्य राजतꣳ रुक्मं निधाय तस्मिन्ब्रह्मौदनमुद्धृत्य प्रभूतेन सर्पिषोपसिच्योपरिष्टात्सौवर्णꣳ रुक्ममवधायाभिघार्य चतुर्भ्य आर्षेयेभ्यो महर्त्विग्भ्य उपोहति ॥ १८ ॥

पात्र्यामुपस्तीर्य राजतमित्यादि सौवर्णꣳ रुक्ममुपरिष्टात्कृत्वा प्रयच्छति । आर्षेयग्रहणं कर्त्रन्तरे प्रतिनिधीयमानेऽसंनिहिते तदशक्तौ वाऽऽर्षेयार्थं यथा स्यादिति । औपासने श्रपणं ब्रह्मौदनस्य ॥ १८ ॥

प्राशितवद्भ्यश्चतुरः सहस्रान्सौवर्णान्निष्कान्ददाति चतुरश्चाश्वतरीरथानेतौ च शतमानौ रुक्मौ ॥ (ख० १) ॥ १९ ॥

प्राशितवद्भ्यश्चत्वारो महर्त्विजस्तेभ्य. सहस्रान्सौवर्णान्निष्कान्ददाति, किंच चतुरश्चाश्वतरीरथानेतौ च रुक्मौ ॥ १९ ॥

द्वादशारत्निस्त्रयोदशारत्निर्वा दार्भी मौञ्जी वा रशना । तां ब्रह्मौदनस्योच्छेषणेनानक्ति ॥ २० ॥

भुक्तस्य यदुच्छेषणं पात्रस्थं तेनानक्ति । दृढत्वात्(य) ॥ २० ॥

अश्वस्य रूपाणि समामनन्ति श्वेतः कृष्णः पिशङ्गः सारङ्गोऽरुणपिशङ्गो वा ॥ २१ ॥ यस्य वा श्वेतस्योल्ब कृष्णं तमालभते । सोमपं सोमपयोः पुत्रम् ॥ २२ ॥ यौ शिशू जातौ पुरा तृणाद्या-त्सोमं पाययन्ति तौ सोमपौ भवतः । तयोर्यो जायते स सोमपयोः पुत्रः । यं शिशुं जातं पुरा तृणाद्यात् सोमं पाययन्ति स सोमपो भवति ॥ २३ ॥ मातृमन्तं पितृमन्तं पृष्ठे वहे च दान्त-मध्वर्युः राज्याय परिददाति ॥ २४ ॥ ब्राह्मणा राजानश्चायं वोऽध्वर्यू राजा या ममापचितिरे-तस्मै तां कुरुतादेष वो यच्च चिकित्सितं तद्व-श्चिकित्सितमासदिति । यावद्यज्ञमध्वर्यू राजा भवति ॥ २५ ॥

अश्वस्य रूपाणि । सर्वकृष्णः सर्वश्वेत', इत्यादीनि मातृमान् पितृमान् वोढा सोमपः सोमपयोः पुत्र एवंभूतयोरश्व आ(मश्वमा)लभ्य रशनाञ्जनोत्तरकालमध्वर्यु राज्याय परिददाति । ब्राह्मणा आस इ(दि)ति परिदानम् । आडै(ढ)क पलम् । हे राजानश्चायमध्वर्युर्भवतां राजा या मम पूजा सा भवतामध्वर्यो भवतामेष करोति एतस्माअध्वर्यवे भवतु । यावद्यज्ञमेष राजा भवति । अध्वर्युरुद्गातारं कृतमेवेति (यद्वेष करोति तद्वः कृतमासदिति) ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

देवस्य त्वेति रशनामादायेमामगृभ्णन्रशनामृतस्ये-त्यश्वमन्वाधिवदति ॥ २६ ॥

द्वादशारत्निस्त्रयोदशारत्निर्वा रशना । आदद इत्यन्तः । तामादाय, इमामगृभ्णन्रशनामृतस्येत्यभिमन्त्र्येत्यापस्तम्ब. ॥ २६ ॥

ब्रह्मन्नश्वं मेध्यं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति ब्रह्माणमामन्त्रयते ॥ २७ ॥

अध्वर्युराह । यद्वा-ब्रह्मन्नश्वमिति मन्त्रेण ब्रह्माणमामन्त्र्य ॥ २७ ॥

देवेभ्यः प्रजापतये तेनर्ध्नुहीति प्रत्युक्तेऽभिधा असीत्यश्वमभिदधाति ॥ २८ ॥

तेन प्रसुते बध्नाति ॥ २८ ॥

अत्रैकेऽध्वर्योः परिदानमामनन्ति ॥ २९ ॥

अत्रैके शाखिनोऽध्वर्योः परिदानं परिपठन्ति ॥ २९ ॥

श्वानं चतुरक्षमानयन्ति । विष्वक्व(ग्ब)न्धेन बद्धम् । पितुरनुजायाः पुत्रः पूर्वो नयति मातुरनुजायाः पुत्रः पश्चात्पौंश्चलेयः सैध्रकं मुसलं धारयन्पेशसा जानुं वेष्टयित्वा पश्चादन्वेत्यपोऽश्वमभ्यवगाहन्ति श्वानं च ॥ ३० ॥

अक्ष्णोरुपरिभागेऽक्षिसदृशं बिन्दुद्वयलाञ्छनं यस्य शुनः सोऽयं चतुरक्षः । तत्राश्वस्यावगाहनप्रदेशे श्वा कश्चिन्नेतव्यः । तन्नयनप्रकारमापस्तम्ब आह—'आनयन्ति श्वानं चतुरक्षं विष्वग्बन्धेन बद्धं पितुरनुजायाः पुत्रः पुरस्तान्नयति मातुरनुजायाः पुत्रः पश्चात्सैध्रकं मुसलं पौंश्चलेयः पेशसा जानु वेष्टयित्वा पश्चादन्वेत्यापोऽश्वमभ्यवगाहन्ति श्वानं च' (आप० श्रौ० २०-२-१०) इति । यजमानस्य राज्ञः पितृष्वस्रीयो मातृष्वस्रीयश्च गच्छतः । सर्वतो बद्ध्वा नीयमानस्य शुनः पुरस्तात्पश्चाच्चोभौ गच्छतः ॥ ३० ॥

प्रजापतये त्वा जुष्टं प्रोक्षामीति पुरस्तात्प्रत्यञ्चमश्वं प्रोक्षति । इन्द्राग्निभ्यां त्वेति दक्षिणत उदञ्चम् । वायवे त्वेति पश्चात्प्राञ्चम् । विश्वेभ्यस्त्वा देवेभ्य इत्युत्तरतो दक्षिणा । देवेभ्यस्त्वेत्यधरतात्सर्वेभ्यस्त्वा देवेभ्य इत्युपरिष्टात्सर्वाभ्यस्त्वा देवताभ्य इति वा ॥ ३१ ॥

प्रजापतये त्वेत्यनेन मन्त्रेण पूर्वस्यां दिशि प्रत्यङ्मुखावस्थितोऽध्वर्युः प्रोक्षेत् । एवमुत्तरत्र ज्ञेयम् ॥ ३१ ॥

यत्र शुनोः प्रतिष्ठा तच्छ्वानं प्रसौति । पुरस्ताद्वा प्रोक्षणात् ॥ (ख० २) ॥ ३२ ॥

प्रोक्षणात्पुरस्ताद्वेति विकल्पः ॥ ३२ ॥

यो अर्वन्तं जिघांसतीति पौंश्चलेयः सैध्रकेण मुसलेन शुनः प्रहन्ति ॥ ३३ ॥

सैध्रको महासारो वृक्षो यस्य वृक्षस्य मध्ये लोहसमानं सारं कृष्णारुणादिवर्णयुक्तं विद्यते तदीय मुसलं साधनम् । बहुषु पुरुषेषु चलति न त्वेकस्मिन्भर्तरि नियता वर्तत इति पुंश्चली दासी । तत्पुत्र शुनो हन्ता । पौंश्चलेयो हन्ति (तै० ब्रा० ३–८–४) इति ब्राह्मणम् ॥ ३३ ॥

पूर्वेद्युर्वा शुनः प्रहण्यात्परो मर्त इत्यश्वस्याधस्पद उपप्लाव्य दक्षिणमुपप्लायति ॥ ३४ ॥

'तमश्वस्याधस्पदमुपास्यति परो मर्त पर. श्वेति दक्षिणोपप्लाव्य' (आप० श्रौ० २०–३–१४) इत्यापस्तम्ब' । भाष्यकारस्तु सूत्रान्तरमनुसृत्य यो अर्वन्तमिति मन्त्रं हनने विनियुज्य परो मर्त इति मन्त्रः पादानामध. शुनोऽक्ष्णोरुपरिभागेऽक्षिसदृशं बिन्दुद्वयलाञ्छनं तत्प्रक्षेपे विनियुक्तवान् ॥ ३४ ॥

अहं च त्वं च वृत्रहन्निति ब्रह्मा यजमानस्य हस्तं गृह्णाति ॥ ३५ ॥

हस्तं दक्षिणहस्त राज्ञो गृह्णीयादित्यर्थ. ॥ ३५ ॥

अभिक्रत्वेन्द्रभूरधज्मन्नित्यध्वर्युर्यजमानं वाचयति ॥ ३६ ॥

स्पष्टोऽर्थः ॥ ३६ ॥

ऐषीकमुदूहमाहरन्ति । पुरस्तात्प्रत्यञ्चमभ्युदूहति वरत्रया निबद्धम् । तस्मिन्नार्द्रा वेतसशाखोपसंबद्धा भवति । तं द्वे शते दक्षिणतो द्वे उत्तरतो वितत्य धारयन्ति ॥ ३७ ॥

आहरन्त्यैषीकमुदूहम् । उदूह्यत(हति)एषा(ता)भूमि संमार्जयति पुरस्तात् प्रत्यञ्चमिति वचनात् । वरत्रया बद्ध तस्मिन्नुदूह आर्द्रवेतसशाखोपसबद्धा भवति । चर्मरज्जुत्रयं बद्ध्वेत्यर्थ. । तमुदूह द्वे शते जना दक्षिणतो द्वे शते उत्तरतो धारयन्त्युदूहो महान् भवति ॥ ३७ ॥

तेनैनं महर्त्विजः प्रतिदिशं समुक्षन्त्यनेनाश्वेन मेध्येनेष्ट्वाऽयं राजा वृत्रं वध्यादिति शतेन राजपुत्रैः सहाध्वर्युः पुरस्तात्प्रत्यञ्चम् । अनेनाश्वेन मेध्येनेष्ट्वाऽयं राजा प्रतिधृष्योऽस्त्विति शतेनाराजभिरुग्रैः सह ब्रह्मा दक्षिणत उदञ्चम् । अनेनाश्वेन मेध्येनेष्ट्वाऽयं राजाऽस्यै विशो बहुग्वै बह्वश्वायै बह्वजाविकायै बहुव्रीहियवायै बहुमाषतिलायै बहुहिरण्यायै बहुहस्तिकायै बहु-

दासपूरुषायै रयिमत्यै पुष्टिमत्यै बहुरायस्पोषायै समृद्धायै राजाऽस्त्विति शतेन सूतग्रामणिभिः सह होता पश्चात् प्राञ्चम् । अनेनाश्वेन मेध्येनेष्ट्वाऽयꣳ राजा सर्वमायुरेत्विति शतेन क्षत्तृसंग्रहीतृभिः सहोद्गातोत्तरतो दक्षिणा समुक्षितमश्वमनू(नु)दकमाक्रमयत्तिष्ठꣳश्चतुर्दिशं यन्त्यन्तरा स्थानमाक्रमणं च ॥ ३८ ॥

तेनोदूहेनाश्वं प्रत्यञ्चं प्रत्यङ्मुखं चत्वारि शतान्युदूहन्ति । उदकस्थमश्वं शतेन राजपुत्रैः सहाध्वर्युः पुरस्तात् प्रत्यङ् तिष्ठन्प्रोक्षति—अनेनाश्वेनेति मन्त्रेण । इतरे तूष्णीम् । शतेन । राजभिरुग्रैरनाभिषिक्तै राजपुत्रै. सह ब्रह्मा दक्षिणतोऽनेनाश्वेनेति । सूतग्रामणिभिः सह होता पश्चात् प्राङ्मुखोऽनेनाश्वेनेति । क्षत्तृसंग्रहीतृभि. सहोत्तरत उद्गाता—अनेनाश्वेनेति । अत्रैषीकमुदूहमुपप्लावयति प्रवाहयति । अनुदकदेशेऽश्व संस्थापयति । प्रोक्षणमुदक एव नेतरस्थले । यत्र न पुरा तिष्ठति तत्स्थानमाक्रमयति । स्थानाक्रमणयोरन्तरा यत्पूर्वं प्रवाहयति । उदकादुत्तिष्ठतोऽश्वस्य पदम् ।

केचित्तु—अध्वर्युब्रह्महोतृद्गातारश्चत्वारस्तदीयेन समुक्षणेन प्राच्यादिभ्यश्चतसृभ्यो दिग्भ्यः सकाशादेनमश्वमभिसमीरयन्त्याभिमुख्येन तत्तद्दिशि सम्यगुत्साहयन्ति । राजपुत्रा अभिषिक्तक्षत्रियपुत्राः स्वय राज्यार्हास्तै. शतसख्याकैः सहितोऽयमध्वर्युः पूर्वस्या दिशि प्रत्यङ्मुखः स्थित्वा तमश्वं प्रोक्षेत् । अनेनेत्यादिवध्यादित्यन्त. प्रोक्षणमन्त्रः । उग्राः शूराः । सूताः सारथयः । ग्रामण्यो ग्रामनेतारो ग्रामस्वामिनः । वैश्यशूद्राभ्यां मातापितृभ्यामुत्पादिताः क्षत्तारः । कोशवृद्धिकारिण. सग्रहीतार. । स्पष्टमन्यत् ॥ ३८ ॥

इदं विष्णुः प्रतिद्विष्णुर्दिवो वा विष्णविति तिसृभिर्वैष्णवीभिस्तिस्र आहुतीर्जुहोति ॥ ३९ ॥

तस्मिन्पादे तिस्रो वैष्णवीर्जुहोति । जुहोतिचोदितत्वात्स्वाहाकारप्रदानम् ॥ ३९ ॥

अग्नये स्वाहा सोमाय स्वाहेत्यश्वस्तोकान्प्रस्कन्दतोऽनुमन्त्रयते ॥ ४० ॥ दशकृत्व एतमनुवाकमावर्तयति ॥ ४१ ॥

अश्वस्य स्तोकान् विप्रुषोऽनुमन्त्रयमाणः स्तोक्या ' अग्नये स्वाहा सोमाय स्वाहा ' (तै० सं० ७-१-१६) इत्याद्या वा(ग्व)ष्टमा दशान्वाह ॥ ४० ॥ ४१ ॥

अनुवचनीयानां मन्त्राणा संख्यामाह—

शतकृत्व इत्येकेषाम् । सहस्रकृत्व इत्येकेषाम् ॥ ४२ ॥

अग्नये स्वाहा (तै० सं० ७-१-१९) इत्यनुवाकत्रय आम्नाता । तत्र मध्यमानुवाके पठिता एकादश मन्त्राः । तत्रान्तिम ' सर्वस्मै स्वाहा ' इत्ययमुपसंहाररूपत्वादन्ते पठनीयः । ततः पूर्वे तु दश मन्त्राः शतकृत्व आवृत्ताः सहस्रं सपद्यन्ते । तत्सहस्रमनुब्रूयादित्यर्थः ॥ ४२ ॥

अथ मन्त्रसंख्याया पक्षान्तरमाह—

अपरिमितकृत्व इत्येकेषाम् ॥ ४३ ॥

सहस्रसंख्या गणयित्वा परिमितस्यानुवचनेन भोगमपि परिमितमेव प्राप्नुयात् । अतो गणनामकृत्वैवापरिमिता अनुब्रूयात् ॥ ४३ ॥

अग्नये स्वाहेन्द्राग्निभ्यामित्यश्वस्य पूर्वहोमाञ्जुहोति ॥ ४४ ॥

गृहं प्रत्यागत्याऽऽहवनीयं विहृत्याग्नये स्वाहेति पूर्वहोमान् ॥ ४४ ॥

विभूर्मात्रेत्यश्वमभिमन्त्र्य भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वेत्युत्सृजति ॥ ४५ ॥

विभूर्मात्रा प्रभूः पित्रेत्यश्वस्य दक्षिणे कर्णे यजमानमश्वनामानि वाचयित्वा (आप० श्रौ० २०-५-९) इत्यापस्तम्बः । द्वितीयदिने प्रोक्षणानन्तरं विभूर्मात्रा इत्यादीन्यश्वनामानि अश्वस्य दक्षिणे कर्णे यजमानं वाचयतीति भावः । भूरसीति पुनरश्वसमीपं गत्वाऽनेन मन्त्रेणाश्वं रशनाभ्यामुत्सृजति रशनाबन्धं विमुञ्चतीत्यर्थः ॥ ४५ ॥

तं परिददाति देवा आशापाला इति शतं वै तल्प्या राजपुत्रा देवा आशापालाः कवचिनस्त एनं गोपायन्ति । अनिवर्तयन्तोऽनुयान्ति ॥४६॥

देवा आशापाला इति । रत्निभ्यः परिददाति । शतं कवचिनो रक्षन्ति । अपर्यावर्तयन्तोऽश्वमनुचरन्ति । चतुःशता इतीत्येकेषाम् । शतं तल्प्या राजपुत्राः संनद्धाः सनद्धसारथिनः, शतं वैश्या विपाथिनः, शतं शूद्रा वरूथिनः । तेऽश्वस्य गोप्तारो भवन्ति । अनेन मन्त्रेण तेभ्य एव राजपुत्रेभ्यो रक्षणार्थमेनमश्वं परिददाति । अस्मिन्मन्त्र आशापालदेवशब्देनाभिषिक्तस्य राज्ञः पुत्रास्तल्प्या राज्ञा सहैकस्मिंस्तल्पे शयनार्हाः शतसंख्याका विवक्षिताः । यद्वा—इदं शतमश्वस्य, आशापालाश्चतसृषु दिक्षु रक्षामन्त्रोक्ता देवा इत्यर्थः । देवनशीलाः देवाः । चतुर्णां शतानामिदमुपलक्षणम् । प्राधान्यादस्योपादानम्, ' चतुःशता रक्षन्ति ' (तै० ब्रा० ३-८-९) इति ब्राह्मणम् । केचित्—रत्निभ्यः परिददाति रत्निनः कवचिनश्च संनद्धा अनुवर्तिनः पृष्ठतोऽश्वमनुगच्छन्ति । शतं तल्प्याः पाणिगृहीत्याः पुत्रा राजपुत्राः उग्रा उग्रजीविनः पर्वतवा

सिन. । वैश्या (विपणिनः) विपथिन. पन्थानमतिक्रम्याश्वस्य पार्श्वयोर्गच्छन्ति । ये शूद्रा वरूथिन. गृहगामिनोऽश्वस्य यवसमाहरन्ति एतेऽश्वस्य गोप्तार इति ॥ ४६ ॥

यद्यद्ब्राह्मणजातमुपेयुस्तान्पृच्छेयुः कियद्यूय-मश्वमेधस्य वेत्थेति । यो न विद्यात्तं जित्वा तस्य कुलात्खादं पानं चोपनिवपेयुः ॥ ४७ ॥

यद्यद्ब्राह्मणजातमुपेयुरुपगच्छेयुस्तत्पृच्छेयुः कियद्भवानश्वमेधस्य जानाति मन्त्रं ब्राह्मणं कल्प वेति । यदि न किंचिज्जानाति त जित्वा तस्य गृहाद्भक्षणमश्वस्य खादं चणकादि पानीयं नयेयु· ॥ ४७ ॥

यज्जनपदेऽन्नं तदेषामन्नम् । रथकारकुले वसति ॥ (ख०३) ॥ ४८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशप्रश्ने प्रथमः पटलः ।

यद्ब्राह्मणाना कृतान्न तदेषामन्नम् (आप० श्रौ० २०–९–१७) इत्यापस्तम्बः । न तु क्षत्रियवैश्यानामन्नमितरेषा च भक्षण भवति । सायंकाले रथकारगृहेऽश्वस्य वासो भवति ।

आहूते सुब्रह्मण्येऽत्र समायाते शचीपती ।
पदातितैव युक्तेति प्रागेवाऽऽनयनं कृतम् ॥
रशनाञ्जनत पश्चादध्वर्यु परिदापयेत् ।
राज्याय स च राजा स्याद्यावत्संतिष्ठते क्रतुः ॥
आनयन्ति ततः श्वानं यजमानस्य पूरुषाः ।
विष्दग्बन्धेन बद्धाङ्ग चतुरक्षं विवक्षितम् ॥
अक्ष्णोरुपरि य. श्वेतबिन्दुद्वितयलाञ्छितः ।
तं समाचक्षते श्वान चतुरक्ष विचक्षणा. ॥
सैध्रक मुसल हस्ते गृह्णन्दासीसुतस्ततः ।
सौवर्णावृतजानुस्तु पृष्ठतोऽश्वमनुव्रजेत् ॥
प्रवेशयन्त्यश्वमथाप्सु मुह्यन्
श्वानं जले यत्र शुनोऽप्रतिष्ठा ।
अध्वर्युणाऽथ प्रसुतो जपीति
स पौश्चलेयोऽस्य शुन. प्रहन्ति ॥

---

१ कियद्यूयमश्वमेधस्य ।

संनाभ(ह्)वन्त. क्षितिपालपुत्रा·
संनद्धसूता शतमस्य तल्प्या ।
गोपायिनार. शतमेवमुग्रा:
संनाहितास्ताद्दशसूतयुक्ता. ॥
वैश्या. शतं प्रान्तचरा. पथ. स्यु-
र्वरूथिन. स्यु शतमेव शूद्रा ।
ता (ते) स्वैरचारं परिपालयन्तोऽ-
नावर्तयन्तोऽनुचरन्ति सर्वे ॥

पृच्छेयुः पथितेऽश्वमेधविषय भो ब्राह्मणा वः कियत्
मन्त्रब्राह्मणकालवेदनामिति स्युर्वेत्यकिंचिद्विदः ॥
आदेयं तुरगस्य तद्भवनतः स्यात्खाद्यपेयादिक
तेषां क्षत्रियवैश्यवेश्मत इह ग्राह्य कृतान्न भवेत् ॥
रथकारगृहेऽश्वस्य वसत. सायमस्य तु ॥ ४८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां चतुर्दशप्रश्ने प्रथमः पटलः ।

=====

अथ चतुर्दशप्रश्ने द्वितीय पटल ।

इह धृतिः स्वाहेत्यश्वस्य चतुर्षु पत्सु चतस्रः सायं धृतीर्जुहोति ॥ १ ॥

अश्वस्य बन्धनस्थानीया इह धृति., इत्याद्या धृतयश्चतुर्षु पत्सु होतव्याः । अन्यो विप्रतिषेधादश्वेन सहाऽऽगतोऽध्वर्युः प्राकृतस्रुक्स्रुवाज्यस्थाल्याज्येन जुहोतीत्यर्थः ॥ १ ॥

सवित्रे प्रातरष्टाकपालम् ॥ २ ॥

निर्वपतीति शेषः । श्वोभूते तृतीयायां सवित्रे जुष्टमित्यादि नारिष्ठान्तं कर्म कुर्यात् ॥ २ ॥

पुरस्तात्स्विष्टकृत ईंकाराय स्वाहेंकृताय स्वाहेत्याहवनीयेऽश्वचरितानि जुहोति । अञ्ज्येताय स्वाहा कृष्णाय स्वाहा श्वेताय स्वाहेत्यश्वरूपाणि

॥ ३ ॥ विपरीतमेके समामनन्ति ॥ ४ ॥ हिर-
ण्य५ शतमान दक्षिणा ॥ ५ ॥

पुरस्तात्स्विष्टकृत इत्युपहोमस्य कालचोदनात्, आयनाय स्वाहा प्रायणाय स्वाहे-त्युद्रावाञ्जुहोतीत्यापस्तम्ब ऽकाराय स्वाहेत्यनुवाकेन प्रतिमन्त्रम् । अञ्ज्येताय स्वाहा कृष्णाय स्वाहा, इत्यष्टाचत्वारिंशतमेकमतिरिक्त सर्वस्मै स्वहेति । दक्षिणाकाले शत-मान हिरण्यम् ॥ ३ ॥ ४ ॥ ५ ॥

तस्या५ स५स्थितायामित्यददा इत्ययजथा
इत्यपच इत्यदः साध्वकरोदिति ब्राह्मणौ
वीणागाथिनौ गायतः ॥ ६ ॥

तस्या प्रातरिष्ट्या ब्राह्मणतर्पणान्तायां समाप्तायामत्र ब्राह्मणो वीणागाथी गायति-इत्यददा इति नित्यशो ब्राह्मणेभ्यो भूम्यादि दान(दत्त)वान् । इत्ययजथा वाजपेयराजसूयादिभिरिष्टवान् । इत्यपच हरिणादिमांसादि पक्ववान् । इत्यदः साध्व करोदिति । शास्त्रमनुसृत्य सन्मार्गमकरोदित्येव गायतौ वीणागाथिनौ ॥ ६ ॥

सवित्रे प्रसवित्रे मध्यंदिन एकादशकपालः ।
रजत५ शतमानं दक्षिणा ॥ ७ ॥

माध्यंदिनेष्ट्या यक्ष्य इत्यादि सवित्रे प्रसवित्रे जुष्टमित्यादि ब्राह्मणतर्प-णान्तम् ॥ ७ ॥

सवित्र आसवित्रेऽपराह्णे द्वादशकपालः । सुवर्ण५
शतमानं दक्षिणा ॥ ८ ॥

ब्राह्मणतर्पणान्तेयमिष्टिः ॥ ८ ॥

तस्या५ स५स्थितायां दक्षिणेन वेदि५ हिरण्मयं
कशिपूपस्तृणाति । तस्मिन्होतोपविशति ॥ ९ ॥

आद्यायामेवोद्रावहोमादिगानान्त सम्स्थितायामापराह्णिक्यामिष्टौ दक्षिणेनाऽऽहवनी-यमित्यादि ॥ ९ ॥

दक्षिणतो ब्रह्मोद्गातारौ ॥ १० ॥

तस्मिन्नुपविशत इति शेषः ॥ १० ॥

हिरण्यकशिपोरग्रेण होतारम् ॥ ११ ॥

दक्षिणेनाऽऽहवनीय होता हिरण्यकशिपावुपविशतीत्यापस्तम्ब ॥ ११ ॥

हिरण्मये कूर्चे फलके वाऽध्वर्युः ॥ १२ ॥

उपविशतीति शेष । पुरस्तादध्वर्योर्हैरण्ये कूर्च इत्यापस्तम्बः ॥ १२ ॥

दक्षिणतो वीणागणगिन उपसन्ना भवन्ति ॥ १३ ॥

उपोपविशन्ति ॥ १३ ॥

समुपविष्टेष्वध्वर्यो३ इति होताऽध्वर्युमामन्त्रयते ॥ १४ ॥

सर्वेषूपविष्टेष्वध्वर्यो३ इति होताऽध्वर्युं प्रत्यामन्त्रयते ॥ १४ ॥

पारिप्लवमाख्यास्यन् भौवन्यवं च हो३
इह होतरित्यध्वर्युः परिगृणाति ॥ १५ ॥

हो३ इ होतरिति प्रतिगरः ॥ १५ ॥

समाप्ते पारिप्लवे भौवन्यवे च वीणागणगिनः
पुराणैरिमꣳ राजभिः ॥ (ख० ४) ॥
साधुकृद्भिर्यजमानꣳ संगायतेति संप्रेष्यति ।
एवꣳ सदा संप्रेष्यति ॥ १६ ॥

संस्थितयोराख्यातयोः संप्रेष्यति वीणागणगिन इति युधिष्ठिरादिभिस्तुल्यमिति कृत्वेमं संगायतेति । एवमुक्तप्रकारेण संप्रैष ॥ १६ ॥

सायंधृतिषु हूयमानासु इत्यजिना इत्ययुध्यथा इत्यमुꣳ संग्राममहन्नित्यदो वीर्यमकरोदिति राजन्यो वीणागाथी गायति ॥ १७ ॥

धृतिषु हूयमानासु राजन्यो वीणागाथी इत्यजिना मांधात्रादिभिस्तुल्य एव शत्रुं जितवान् युद्धं कृतवान् संग्रामं कृतवान् इत्यादि ॥ १७ ॥

नित्यꣳ सायꣳ सायंधृतीर्जुहोति । प्रातः प्रातरिष्टिभिर्यजते । नित्यं पारिप्लवं भौवन्यवं च नित्यम् । वीणागणगिनौ ब्राह्मणराजन्यावेष्टीनामपवर्गाद्गायतोऽपवृत्तास्विष्टिषु ताभ्याꣳ शतमनोयुक्तं च ददाति । शते चानोयुक्ते चेत्येकेषाम् ॥ १८ ॥

नित्यमिति वचनादहरहः साय प्रातर्धृतिहोमादि । एवमेतानि सावित्राद्दीनि संवत्सरं कर्माणि क्रियन्ते (आप० श्रौ० २०–७–२) इत्यापस्तम्बोक्तिः । संवत्सरमित्यत्यन्तसंयोगे द्वितीया, इति वचनात्संवत्सरपर्यन्तमित्यर्थः । अपवृत्तास्विष्टिषु ताभ्यां वीणागाथिभ्यां शतमनोयुक्तं रथं च दद्यात् । शते चानोयुक्ते चेत्येके शाखिनः पठन्ति ॥ १८ ॥

त्रिंशन्मास एष संवत्सरो भवति ॥ १९ ॥

एवं सावित्रेष्ट्यादि गृह एवाऽन्वह संवत्सरं गानान्तानि क्रियन्ते । सावनाच्चान्द्रमासोक्तस्याऽऽगामिन्या वैशाखपौर्णमास्या उपरिष्टादमावास्याया उर्ध्वमपि सावित्रेष्ट्यादीनि । एष संवत्सरो त्रिंशन्मासात्मको वर्तत इत्यर्थ ॥ १९ ॥

ऊर्ध्वमेकादशान्मासादाश्वत्थे व्रजेऽश्वं बध्नाति ॥ २० ॥

संपूर्ण एकादशमासे तृतीयाप्रभृति । अश्वत्थमये गृहे काष्ठे पडीरा(टीर)शंकोर(ड्काव)श्वं बध्नन्त्यश्वपरिचारकाः ॥ २० ॥

तस्मै बद्धाय यवसमाहरन्ति ॥ २१ ॥

स्पष्टोऽर्थः ॥ २१ ॥

यद्यश्वमुपतपद्विन्देदाग्नेयमष्टाकपालं
निर्वपेदिति ब्राह्मणव्याख्यातान्यश्वप्रायश्चित्तानि ॥ २२॥

यानि ब्राह्मणव्याख्यातान्यश्वप्रायश्चित्तानि तान्यापस्तम्बोऽपि सूत्रयामास—‘ यद्यश्वमुपतपद्विन्देदाग्नेयमष्टाकपालं निर्वपेत्सौम्यं चरुं सावित्रमष्टाकपालम् । पौष्णं चरु यदि श्रोणः । रौद्रं चरुं यदि महती देवताऽभि मन्येत । वैश्वानर द्वादशकपालं निर्वपेन्मृगाखरे यदि नाऽऽगच्छेत् । यद्यधीयादग्नयेऽंहोमुचेऽष्टाकपाल सौर्यं पयो वायव्य आज्यभागः । यदि वडवामधीयात्प्राजापत्यं चरु द्वादशकपाल वा । यदि नश्येद्वायव्यं चरुम् । यदि सेनाऽभीत्वरी विन्देतेन्द्राय यजत एकादशकपालम् । यदि प्रसह्या(ह्याऽऽ)नयेयुरिन्द्राय प्रसह्वन एकादशकपालम् । यद्यन्धः स्यात्सौर्यं चरुमेककपाल वा । यदि श्वभ्रेऽवपतेद्वैष्णव चरुम् । यद्यविज्ञातेन यक्ष्मणा म्रियेत प्राजापत्य चरु द्वादशकपालं वा । यद्यमित्रा अश्वं विन्देरन्हन्येतास्य यज्ञः । अथान्यमानीय प्रोक्षेयु ’ (आप० श्रौ० २०–८–२) इति ।

उपतपत्संतापकरो रोगविशेषः । श्रोणो दुष्टत्वक् । श्रौण्यस्य त्वग्दोषस्य चिकित्सकः पूषा । महती देवता रुद्र. पशूनामधिपतिः । तस्मिन्पशुष्वभिमन्यमाने सति ज्वरादिना पशुः पीड्यते । अश्वस्य पशुत्वेन रुद्रदेवत्यत्वाद्रौद्रयागेऽनुष्ठिते सति स्वकीययैव देवतया चिकित्सितत्वाद्रोगरहितो भवतीत्यर्थः । मृगस्याश्वस्याऽऽखरः सुत्येऽहनि निवासस्थानं तत्राऽऽगमनाभावे वैश्वानरेष्टिं कुर्यात् । वडवा गर्दभी वा चिन्तयेदारोहेद्वा । आज्यमेव भागो भजनीयं हवि. । आज्यभागस्योपांशुयाज(ग)वत् । यदि वडवामारोहेत्स्मरेद्वा प्राजापत्यं चरुम् । यदि सर्वत्र न दृश्येत वायव्य चरुम् । यदि सेनाऽभीत्वरी अभिगमनशीलो त्वरितगमनो वा; इन्द्राय यजेत । प्रसह्य बलेन नयेयु , इन्द्राय प्रसह्व-

(ह्व)ने । यद्यन्ध. सौर्यं चरुम् । यदि जीर्णे कूपे पतेद्वैष्णवश्चरुः । अविज्ञातेऽनेन रोगेणेत्यविज्ञाते प्राजापत्यश्चरु । अमित्रा. शत्रवो यद्येनमश्च प्राप्नुयुः । अन्यं तद्रूपं. वर्णं सवयसम् । मातृमन्तामित्यादिविशिष्टमानीय प्रोक्षेयु. । प्रजापतये त्वेति पृथिव्यै त्वेत्यन्तेन श्रोणत्वादौ विहितप्रायश्चित्त कृत्वोत्सृज्यान्यमानीयेत्यादि ॥ २२ ॥

अमावास्यायामुखा५ संभरति ॥ २३ ॥

एतस्य संवत्सरस्योत्तरेत्यापस्तम्ब । उत्तराऽमावास्या यस्या महर्त्विज उद्गातुरानयनं कृत ततुप्रभृत्यागामिन्या वैशाखपौर्णमास्या उपरिष्टादमावास्यायामुखासंभरणादीनि । एष सवत्सरश्चान्द्रमानेन । तस्याममावास्याया प्रात. पवित्रेष्टि कृत्वा बृहस्पतिपुरोहिता इति, कृष्णाजिन उखार्थं पुरीषसभरण, काले सीद होत. स उ लोक इति । तिसृभिस्ति-सृभी राजन्य इति वचनात् । चमस इति चतस्रो हुत्वा स्वाहाऽऽधिमाधीताय स्वाहेति त्रीणि वैश्वदेवानि हुत्वा विराम. । धौवसमाप्ति. । समाप्ते वीणागाथिभ्या दानम् । इति वैखानससूत्रम् । उखापचनादि यस्मिन्कस्मिश्चिद्दिने । यस्मिन्कस्मिन्पर्वणि पञ्चपशु-भिर्वायव्येन वा यजेत, इति ॥ २३ ॥

त्रैधातवीया दीक्षणीया ॥ २४ ॥

आगामिवसन्तेऽग्निवद्दीक्षणीया । यस्मिन्कस्मिश्चित्पर्वणि महावीरकरणम् । आगामि-वसन्ते प्रस्तोतुरानयन हस्त्यश्वादिभिः । प्रातरग्निहोत्र५ हुत्वा दक्षिणावर्जं पूर्वमेव महि-ष्युखाकरणस्थापनान्त करोति, । माध्यदिने सवित्रे प्रसव इत्यादि सौवने संवत्सरे समाप्ते सावित्रेष्ट्यादीति । आज्य पशव इत्यादि आदितस्त्रैधातवीयां विधाय दीक्ष-णीया पत्नीसयाजान्ता सतिष्ठते ॥ २४ ॥

दीक्षाहुतिकाले त्रीणि वैश्वदेवानि जुहोति । चत्वार्यौद्ग्रहणानि ॥ २५ ॥ अग्निना तपोऽन्व-भवादित्यौद्ग्रहणानि । स्वाहाऽऽधिमाधीताय स्वाहेति वैश्वदेवानि । सप्ताहमन्वहमौद्ग्रहणैर्वैश्व-देवैश्च प्रचरति ॥ २६ ॥ सोऽयं दीक्षाहुतिकालो विवृद्ध उत्तरोत्तराणि वैश्वदेवानि भवन्ति ॥२७॥ सर्वाण्युत्तमेऽहनि हूयन्ते ॥ २८ ॥

उत्तरेण बर्हि· प्राग्वंशमित्यादि आहवनीयमुपोपविशतीत्यन्तं कृत्वाऽऽकूत्यै प्रयुजे० इति चत्वार्यौद्ग्रहणानि हुत्वा वाचा म० इति चतस्र. स्वाहाऽऽधिमाधीताय स्वाहेति त्रीणि वैश्वदेवानि हुत्वा विराम इति भाष्यकृत् । श्वोभूते प्रथमाया चत्वार्यौद्ग्रहणानि वा हुत्वा वाचाम इति केचित् । उत्तरेषु न वाचाम इत्येके । काय स्वाहा इति त्रीणि वैश्वदेवानि ।

एवं द्वितीयायां, अदित्या इति त्रीणि । तृतीयाया सरस्वत्येति त्रीणि । चतुर्थ्यां पूष्ण इति त्रीणि । पञ्चम्यां त्वाष्ट्र इति त्रीणि । षड्डुत्तमेऽहन्यौद्ग्रहणानि जुहोति । सर्वस्मै स्वाहेति पूर्णाहुतिमुत्तमाम् । षडहमाग्नावैष्णवेन प्रचरति । सप्तम्यामाग्निक्या त्रिहविषेति वाजसनेयकम् । (आप० श्रौ० २०–८–११) इत्यापस्तम्ब· । सप्तमेऽहनि दीक्षारम्भश्चेदुपेक्षाया चौद्ग्रहणानि हुत्वा वाचा म इति पञ्चमम् । अनभ्यासपक्षे मनसा म इति हुत्वाऽऽकूतिमग्निमिति षडाग्निकी , विश्वदेवस्येति पूर्णाहुति. । विष्णवे स्वाहेति त्रीणि वैश्वदेवानि । सर्वस्मै स्वाहेति पूर्णाहुति· । आदिषु त्रिषु पुरस्तादन्ते च स्वाहाकार उत्तम एवान्या आग्निकी , अहन्यहनीति केचित् । चत्वार्यौद्ग्रहणानि हुत्वा सप्ताहं यजमानस्य भोजनम् । क्षारलवणवर्जनं, व्रतस्या (स्य) प्रवृत्तत्वात् । अथवा षडहमाग्नावैष्णवेन । त्रैधातवीया सप्तमेऽहनि । आग्निक्या त्रिहविष्क [या] ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

भुवो देवानां कर्मणेति कृष्णाजिनमारोहन्तमृतुदीक्षाभिरभिमन्त्रयते ॥ २९ ॥

भुवो देवानामिति पथ्याऽसीति पूर्वत्रानुषज्यते । वसुभिर्देवेभि·, दीक्षयामीत्यन्तम् । पथ्याऽसि रुद्रेभिः पथ्यास्त्वाऽऽदित्येभि. पथ्याऽसि विश्वेभि. पथ्याऽस्यङ्गिरोभिः, इत्यादि । इमां धियमिति कृष्णाजिनमारोहन्त यजमानमभिमन्त्रयते । अह दीक्षामित्यादिश्चामित्यन्तम् । यत्प्राङ्मुष्टिकिरणात्कृत्वोखाप्रवृञ्जनम् । गतश्रीत्वान्निर्मन्थ्येन पचन्तीति ॥ २९ ॥

आ ब्रह्मञ्जज्ञि बीजमिति जातमुख्यमुपतिष्ठते ॥ ३० ॥

आ ब्रह्मन्० जज्ञि बीजम्० । इत्यनुवाकाभ्या जातमुख्यमुपतिष्ठते । प्राकृतस्य निवृत्तिः ॥ ३० ॥

विसृष्टायां वाचि वीणागणकिनः ॥ (ख० ५) ॥
देवैरिमं यजमानꣳ संगायेति संप्रेष्यति ॥ ३१ ॥

विसृष्टायां वाचि यजमानो व्रत कृणुतेत्युक्ते संप्रेष्यत्यध्वर्यु । वीणागणकिन इत्यादि, इन्द्रतुल्य इति गायन्ति ॥ ३१ ॥

वसतीवरीषु प्रह्रियमाणासु जघन्यं देवैः संप्रेष्यति । प्रजापतिना सुत्यासूदवसानीयायामन्ततः ॥ ३२ ॥

एवं सदौपवसथात् । प्रजापतिना सुत्यास्ववभृथोद नीयानूबन्ध्योदवसानीयास्विति देवैरन्ततः (आप० श्रौ० २०—८—१७) इत्यापस्तम्ब । एवमौपवसथात् । अग्निवद्दीक्षापरिमाण त्र्यहपक्षमाश्रित्य प्रयोग । केचिद्द्वादशाहवद्दीक्षोपसदौ । तदा शिशिरे दीक्षान्त इत्याद्यत्र तिस्रो दीक्षा. । षडुपसद । यदह प्रयायादित्यादि गार्हपत्यचितिं कृत्वा प्रायणीय प्रचर्य वेदिमानम् ॥ ३२ ॥

द्विस्तावा वेदिः । एकविंशशोऽग्निः ॥ ३३ ॥

वेदिकाले द्विस्तावा वेदि. । त्रिस्तावोऽग्निरेकविंशशो वा (आप० श्रौ० २०—९—१) इत्यापस्तम्बोऽपि सूत्रयामास । वेदिकाले द्विगुणा प्राकृत्या वेदिं करोति । द्विकरण्या वेदिमानम् । त्रिंशदङ्गुलस्य चतुरश्रस्य वाऽक्ष्णयारज्जु. । स प्रक्रमः । त्रिस्तावोऽग्नि पुरुषस्य त्रिकरणी । पुरुषस्थानीया प्रमाण तिर्यक्द्विकरण्यायामस्तस्याक्ष्णयारज्जुस्त्रिकरणी एव पुरुषस्य त्रिकरणी, आत्मचतुर्थांशेन चतुर्भागीया, तस्यार्धेन तत्पादा. पञ्चमभागेन पञ्चमभागीयास्तदर्धेन पादेष्टका गार्हपत्यचिते प्रकृतिवद् धिष्णियाना च । प्रायणीया प्रचर्य वेद्यग्नी शौल्बेन मित्वा मन्त्रेण वेदि मित्वा प्रायणीय-ध्रुवादित्यादि । सोमक्रयणकाले गवा ते० तस्या आत्मा० भूयो वा० एकोनसहस्र ते क्रीणानि । त्रिरात्रपर्याप्तसोमफलयोः क्रय. । आतिथ्यया प्रचर्याग्निमानादि । चित स्थ० सं ते पयांसि० इति सिकतान्यूहनम् । आतिथ्याया ध्रुवादित्यादि तद्वग्निवदौपवसथ्यात् । अहरहर्देवैरिति वीणागाथिन. सायकाले [गायेयु] । यूपच्छेदनकाले—एकविंशतिं यूपान् । राज्जुदालोऽग्निष्ठ श्लैष्मातक । तत्रिवल्के (दुभयत.) पौतुद्रवा । बैल्वा. षट् खादिरा. षट् पालाशा. षट् । एकविंशत्यरत्नय सर्वे । पालाशा उपशयपात्नीवतविशाला यूपाः प्राकृतपरिमाणा औपवसथ्येऽहनि ॥ ३३ ॥

वैश्वानरीयेण प्रचरति ॥ ३४ ॥

अग्निगुणको वैश्वानर. । ब्राह्मणतर्पणान्तेयमिष्टिः ॥ ३४ ॥

अग्नये गायत्राय त्रिवृते राथंतराय वासन्तायाष्टाकपाल इति दशहविषं सर्वपृष्ठामिष्टिं निर्वपति ॥ ३५ ॥

शाखाहरणादि प्रसूनमयं बर्हिर्वैश्वदेवपर्ववत्परिस्तरणं, षट्पञ्चाशत्कपालानि चतस्रः स्थाल्यः । निर्वापणकाले—अग्नये गायत्राय त्रिवृते राथंतराय वसन्ताय जुष्ट निर्वपामि । इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्माय० विश्वेभ्यो देवेभ्यो जागतेभ्य. सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो जु० मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्या वैराजाभ्यां शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय जुष्ट० सवित्र

आतिच्छन्दसाय त्रयस्त्रिꣳशाय रैवताय शैशिराय जुष्टं० अदित्यै विष्णुपत्न्यै जु० अग्नये वैश्वानराय जुष्टं० अनुमत्यै जुष्टं० काय जुष्टं० इत्यादि उत्करे त्रिर्निनीय यथाभागमित्यादि कपालान्युपधाय प्रातर्दोहकर्म निष्टपनादि कामधुक्ष० मित्रावरुणाभ्यामामुष्टुभ्यामेकविꣳशाभ्यां वैराजाभ्याꣳ शारदाभ्याꣳ हविरिन्द्रियामितिनिगमाः । पिण्डं कृत्वा व्यावर्तध्वमिति त्रि. । अथवा व्यावर्तध्वमिति चर्वर्थान् व्यावर्तध्वमितिपुरोडाशान् व्यावर्तेथामिति पुरोडाशौ । अधिश्रयणादि । परिधीन्परिदधाति गन्धर्वोऽसीति नास्ति, कस्त्वेत्यस्यामिष्टौ । तेषां प्रत्याम्नायः । अस्य यज्ञस्येति त्रिष्वप्यनुषङ्गः । नात्रामुष्मा इति कायस्य नामग्रहणं कायानुब्रूहि कं यज । एककपालधर्मेण प्रचारः । मधुश्च स्वाहेत्यादि ब्राह्मणतर्पणान्तेयमिष्टिः ॥ ३५ ॥

समिद्दिशामिति याज्यानुवाक्या भवन्ति ॥ ३६ ॥

इदं याजुषं हौत्रम् ॥ ३६ ॥

कस्त्वा युनक्ति स त्वा युनक्त्विति परिधीन्युनक्ति ॥ ३७ ॥

गतम् ॥ ३७ ॥

रथवाहने हविर्धाने राज्जुदालमाग्निष्ठमेकाविꣳशत्यरत्निं संमिनोति ॥ ३८ ॥

वसोर्धाराऽग्निवत् । हविर्धानप्रवर्तनकाले रथवाहने हविर्धानार्थे भवतः । रथवाहनसमर्थे अनसी । यूपसंमानकाले राज्जुदालमेकविꣳशत्यरत्निमाग्निष्ठं मिनोति ॥ ३८ ॥

पौतुद्रवावभितो भवतः ॥ ३९ ॥

पौतुद्रवौ देवदारुमयौ दक्षिणत उत्तरतश्च ॥ ३९ ॥

त्रयः खादिरा दक्षिणतस्त्रय उत्तरतः । त्रयो बैल्वाः पालाशा दक्षिणतस्त्रय उत्तरतो बैल्वानेक उत्तमान्त्समामनन्ति पालाश उपशयः ॥ ४० ॥

इत्येवमादिव्यत्यासेन मानम् । तत उपशयनिधानम् । अग्नीषोमीययागः ॥ ४० ॥

चतुष्टय्य आपो दिग्भ्यः समाभृता वसतीवरीर्गृह्णाति ॥ ४१ ॥

तत. सुब्रह्मण्यान्ते चतुष्टय्य इत्यादि देवयजन एव पशुपुरोडाशादिदेवसुवां हवींषि, याजमानस्येत्यत्र । सुब्रह्मण्यान्ते वीणावादी प्रजापतितुल्य इति गायति ॥ ४१ ॥

श्वोभूते प्रतायते चतुष्टोमोऽग्निष्टोमो गोतमचतुष्टोमयोः पूर्वः ॥ ४२ ॥ पशुकाल ऐकादशिनान्पशूनुपाकरोति ॥ ४२ ॥

महाराष्ट्रे बुद्ध्वा गोतमचतुष्टोमयोः पूर्वम् । ध्रुवां प्रयुज्याग्निष्टोमवत्षोडशिपात्रं, हृदे त्वेत्यूहः। पर्याहमुपावहृत्य, अग्निं युनज्मीत्यादिसर्वमग्निष्टोमवत् । पशुकाल आग्नेयं सवनीयपशुमेकादशिनान्वा ॥ ४२ ॥

दक्षिणाकाले मध्यमं प्रतिराष्ट्रस्य यदन्यद्ब्राह्मणानां दिक्षुवित्ताद्भूमेः सेनाभ्यः पुरुषेभ्यश्च । तच्चयहे समशः प्रतिविभज्यान्वहं ददाति ॥ ४३ ॥

दक्षिणाकाले प्राप्ते यद्ब्राह्मणाना दिक्षु न्याय्यधनं यस्मिन्नश्व उत्सृष्टस्तत्प्रभृति संचितं धनं त्र्यहे समशोऽन्वहं ददाति ॥ ४३ ॥

प्राचीं दिशमध्वर्यवे दक्षिणां ब्रह्मणे प्रतीचीꣳ होत्र उदीचीमुद्गात्रे ॥ ४४ ॥

प्रागादिदिग्धनमध्वर्य्वादिभ्यः क्रमाद्ददाति ॥ ४४ ॥

अपि वा प्राचीꣳ होत्रे । प्रतीचीमध्वर्यवे । एतदेवान्वायन्ति होत्रकाः ॥ ४५ ॥

अपि वेति पक्षान्तरप्रदर्शनार्थम् । अत्राप्यापस्तम्बीये विशेष –महिषीं ब्रह्मणे ददाति। वावाता होत्रे । परिवृक्ती(क्ति)मुद्गात्रे । पालाकिलीमध्वर्यव इति विज्ञायते(आप०श्रौ०२० १–१०–१।२) इति । महिषी ब्रह्मणे ददातीति वचनात्तासामपि धनं ददातीत्यर्थ. । अग्निदक्षिणाऽध्वर्यवे कल्याणीरित्यादि ॥ ४५ ॥

पत्नीसंयाजान्तमहः संतिष्ठते ॥ (ख०६) ॥ ४६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशप्रश्ने द्वितीयः पटलः ॥ २ ॥

विषाणाप्रासनान्ते यज्ञायज्ञीयेऽग्निष्टोमसाम्नि वर्तमाने चतुष्टय्य आप इत्यादि वसतीवरीर्गृह्णाति । एकया प्रस्तुतामित्यादि पत्नीसयाजान्तमह· संतिष्ठते परिसमाप्यत इत्यर्थः ॥ ४६ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसकलितायां प्रयोगचन्द्रिकायां चतुर्दशप्रश्ने द्वितीयः पटल. ।

अथ चतुर्दशप्रश्ने तृतीय पटल ।

अभित आहवनीयꣳ षट्त्रिꣳशतमुपतल्पान्मिन्वीत ॥ १ ॥

न सृज्यविसर्गः परिहरन्ति पत्नीभ्य उदकमियन्ति, पत्नीना पन्येजनार्थम्(१)। सम्भिधमा-

१ क्रमेण ।

हुत्वाऽऽदधाति। एवमन्तमहः। तत्र विशेष –हार्यो(रियो)जने श्वः सुत्यमिति प्रैषो बह्वृचमतात्। सूक्तवाक इत्यापस्तम्बमते। तच्छुत्वाऽऽग्नीध्रश्चापि प्रेष्यति। प्रजापतिना तुल्यं इति गानम। एवं कृतेऽस्तमिते षट्त्रिंशतमुपतल्पान्मिन्वति ॥ १ ॥

अस्तमित आदित्ये षट्त्रिंशतमुपतल्पनारुह्यै-कस्मै स्वाहा इत्येतैरनुवाकैः खादिरैः स्रुवैः सर्वाꣳ रात्रिमन्नहोमाञ्जुहोति ॥ २ ॥ आज्यं मधु तण्डुलान्पृथुकाल्लाजान् करम्भान् धानाः सक्तून्मसूस्यानि प्रियङ्गुतण्डुलाꣳश्चाऽऽज्येनान्नेनेति ॥ ३ ॥ व्यत्यासं जुहोत्ययुज आज्येन युजोऽन्नेनान्ततो जुहोति ॥ ४ ॥

ततो दक्षिणतश्चोत्तरतश्चोपतल्पानासाद्य षट्त्रिंशदध्वर्यव उपाकृताः खादिरैर्दीर्घदण्डैः स्रुवैः सर्वां रात्रिमन्नहोमाञ्जुहोति। मधु माक्षिकम्। तण्डुला व्रीहिभिर्निष्पन्नाः। पृथुकाश्चिपिटका। लाजा व्रीहिप्रभवा पुष्पवद्विकसिताः। करम्भा आज्यमिश्रिताः सक्तव। धाना भर्जितयवतण्डुला। सक्तवो भर्जिततण्डुलपिष्टानि। मसूस्यानि, एतेनैव नाम्नोत्तरदेशे प्रसिद्धो धान्यविशेष। येन सूपनिष्पत्तिः। प्रियङ्गुतण्डुलांस्तु हेमसमानवर्णत्वात्प्रियाङ्गा। दशद्रव्याणा मिश्रीकृत्य होम। दशान्नानि जुहोति (तै० ब्रा० ३–८–१४) इति। अत्राऽऽपस्तम्बोऽपि–चतुष्टयमेके समामनन्ति। आज्येन जुहोति लाजैर्जुहोति धानाभिर्जुहोति सक्तुभिर्जुहोति। एकस्मै स्वाहा इत्येतेषामनुवाकानामयुज आज्येन युजोऽन्नेन। आज्येनान्ततः (आप श्रौ० २०–१०–७) इति। एकस्मै स्वाहेति प्रथमतृतीयपञ्चमसप्तमनवमा अयुज आज्येन, द्वितीयचतुर्थषष्ठाष्टमदशमा युजोऽन्नेन ॥ २ ॥ ३ ॥ ४ ॥

अत्रैके प्रयुक्तानां प्रयोक्ष्यमाणानां च मन्त्राणामुपयोगꣳ समामनन्ति ॥ ५ ॥ उषसे स्वाहेत्युषसि जुहोति व्युष्ट्यै स्वाहेति व्युष्टायाम्। उदेष्यते स्वाहेत्युदेष्यति। उद्यते स्वाहेत्युद्यति। उदिताय स्वाहेत्युदिते। सुवर्गाय स्वाहा लोकाय स्वाहा इत्यन्ततो जुहोति। अन्नपरिशेषान्निदधाति ॥६॥

एवमेतानुवाकान्पुन पुनरभ्यासं रात्रिशेषं हुत्वा। अन्येऽभ्यासे संस्थाने वाऽनुवाकेनाऽऽज्येन। अनुवाकस्यान्ततः सर्वस्मा इत्यन्ततः। उषसे स्वाहेत्यादीनामेव

प्रयोगः। एकस्मा इत्यादि प्रागुषसे स्वाहा इत्यादि सकृद्धुत्वा पूर्ववदाज्येनान्नेन च व्यत्यासेन भवति।

(अथानेन-विभूर्मात्रेतित्रयोदशान्विहीत्यन्तानि अग्नये स्वाहेतीह धृतिः स्वाहेति नव भूरसीत्युत्सर्गमन्त्रः, देवा आशापाला इति परिदानमन्त्रश्च। आयनाय स्वाहेत्युद्द्रावान्, अग्नये स्वाहेति पूर्वहोमान्, पृथिव्यै स्वाहेत्यन्तं हुत्वाऽग्नये स्वाहेति पूर्वदीक्षाः। पृथिव्यै स्वाहेत्येकविंशिनीं दीक्षां भुवो देवानामित्यृतुदीक्षाश्चतुर्दश पूर्ववदनुषज्यते दीक्षयामीत्येताः पञ्च ब्रह्मणा चत्यृतमेषामिति द्वे आदिष्टे अन्ते द्वे अन्ते चतस्रो धृतयः। अर्वाङ्यज्ञो भूतं भव्यमिति नव। आ मे ग्रहा इति तिस्रः। अग्निना तपोऽन्वभवदिति चतुर्विंशतिः स्वाहाऽऽधिं दद्भ्यः अञ्ज्येताय० कृष्णाय० ओषधीभ्य०, वनस्पतिभ्यो० मेषस्त्वा० कूप्याभ्यः स्वाहा० अम्भोभ्यः० नभोभ्यः० महोभ्यः०। नमो राज्ञे त्रयोदश। मयो भूर्दश। प्राणाय स्वाहा मिताय स्वाहा पृथिव्यै स्वाहा दत्वते स्वाहा यः प्राणतो य आत्मदा० इति महिमानौ। आ ब्रह्मन्ब्राह्मणो० द्वादश। जाज्ञि बीजं पञ्च अग्नये समनमत्० संनमन्त्विति मन्त्रान्तः। वायवे समनमत्० अन्तरिक्षाय समनमत्० यथा वायुरन्तरिक्षेण समनमदेवं मह्यं भद्राः समनमन्। सूर्याय चन्द्रमसे वरुणाय साम्ने ब्रह्मणे राज्ञे रथाय प्रजापतये समनमदेवमिति सर्वत्रानुषङ्गः। भूताय स्वाहा भविष्यते स्वाहा इति भूतभव्यौ। यदक्रन्दः प्रथमं० हविष्मानित्यनेनाऽऽज्येनान्नेन च व्यत्यासम्) एकस्मा इति रात्रिशेषं प्रागुषसि जातायां—उषस इति सकृत्, व्युष्ट्यै उदेष्यते, उद्यते उदिताय प्रज्ञातानन्नशेषान्निदधाति। एवं वर्तमाने प्रधानेऽध्वर्युर्वसतीवरीः परिहृत्य पञ्चदोहादिधर्मदधिलोप उक्थ्यत्वात्। एका पलाशशाखा बाह्या पक्षशाखा वेतसशाखाहरणादि सवनीयपरिस्तरणान्तम्॥ ९॥ ६॥

प्रतायत एकविंश उक्थ्यो महानाम्नी साम॥ ७॥

महारात्रे बुद्ध्वा प्रतायत एकविंश उक्थ्यो महानाम्नी साम गायति॥ ७॥

अन्तरेणाऽऽग्रयणोक्थ्यौ। लौकिकं सोममभिषुत्य। सुवर्णरजताभ्यां पात्राभ्यां महिमानौ गृह्णीतो यः प्राणत इति सौवर्णेनाध्वर्युः पूर्वं गृह्णाति। य आत्मदा इति वा॥ ८॥ हिरण्यगर्भः समवर्तताग्र इति राजतेनोत्तरं प्रतिप्रस्थाता॥ ९॥

न त्वतिग्राह्यपात्रं ध्रुवां प्रयोज्य षोडशिपात्रं त्रिरात्रस्य मध्यमेऽहनि, इति राजतसौवर्णौ वायव्यौ। तूष्णीं पारिप्लवादि। सवनीयपशूनां पात्रासादनकाले जुह्वा सह वैतसस्य कटस्य प्रयोगः। द्विचत्वारिंशद्यूपरशना द्विरशनो यूप इति। उपशयस्य द्वे

रशाने । एवं चतुश्चत्वारिंशत् । नवत्यधिकशतत्रयं पशुरशनाः। एकोनविंशत्यधिक पञ्चशतानि स्वरवः । तेषामेकः पूर्वमेवं प्रयुक्तस्तेन सह प्रयोग. । एकोनपञ्चाशदधिकपञ्चशतानि दर्भयुगलानि नवत्यधिकशतत्रयं कुम्भीः (म्भ्यः) । अश्वतूपरगोमृगाणां संहत्य हृदयशूलवपाश्रपणीनां कुम्भीवत्खाते तेषां चिह्नम् । हृदे स्वेत्यूहः (त्यहः) पर्याप्तमाहुत्याग्निं युनज्मीति शुक्रग्रहमाग्रयणं च गृहीत्वा लौकिकसोमं तूष्णीमभिषुत्य लौकिकाद्भिः संयुत्य यः प्राणत इत्युपयामान्तेन गृह्णाति । राजतेन य आत्मदा० इत्युपयामान्तेन सौवर्णेन सूर्यस्त इति पूर्वं साद यति । चन्द्रमास्ते महिमा इत्युत्तरमुक्थ्यादि उक्थ्यवदेव परिध्यञ्जनादिपरिमार्जयति धारेत्यादिविप्रुड्ढोमान्तं कुर्यात् ॥ ८ ॥ ९ ॥

आयुर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभावसुः । दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रस इत्यश्वस्य ग्रीवासु सौवर्ण५ रुक्मं प्रतिमुञ्चते ॥ १० ॥

शोभनं निष्कमाभरणविशेषमश्वस्य ग्रीवासु कण्ठे बध्नाति ॥ १० ॥

श्येनोऽसि गायत्रच्छन्दा अनु त्वाऽऽरभे स्वस्ति मा संपारयेत्यश्वस्य वालधिमन्वारभन्ते ॥ ११ ॥

अश्वस्य पुच्छमन्वारभ्य सर्पन्ति नवागग्रेगा, हिरण्येन स्तोत्रोपाकरणम् । आस्तावदेशं गत्वा हिरण्यकशिपुमुद्गातारमपरुध्य निर्वास्योद्गाता रथमश्वं वृणीते ॥ ११ ॥

अग्निर्वृत्राणि जङ्घनदित्यश्वमन्वारभ्य बहिष्पवमान५ सर्पन्ति आऽक्रान्वाजी क्रमैरत्यक्रमीद्वाजीति वा । उद्गातारमपरुध्याश्वमुद्गीथाय वृणीते। वडवा उपरुन्धन्ति । ता यदाभि हिं करोति स उद्गीथः । यत्प्रत्यभि हिं कुर्वन्ति स उपगीथः । उदगासीदश्वो मेध्यो यज्ञिय इति जपति । शतेन शतव(प)लेन च निष्केण शतमानेन वोद्गातारमुपशिक्षे(क्ष्ये)मा देवतामुद्गायन्तीमनूद्गायेत्युद्गातारमाह ॥ १२ ॥

अग्निर्मूर्धेत्यापस्तम्बः । अश्वमन्वारभ्य-अन्वारम्भः स्पर्शः । बहिष्पवमान५ सर्पन्ति प्रसर्पकाः । अश्वं वडवासमीपे धारयन्ति । वडवा प्रति हिंकरोति चाश्वस्तदुद्गानमश्वं

---

१ पूर्व एव ।

प्रति वडवा यदभि हिंकुर्वन्ति तदुपगानम् । शतेन गवां शतपलपरिमाणेन निष्केण । निष्क आभरणविशेष. । शतपलानि शतसुवर्णानि निष्कानि(णि) याचयित्वा—उद्गासीदित्युक्त्वा याचते । ततः संप्रेष्यति । इमामिति तेन शतपलेन बहिष्पवमानमुपाकरोति बर्हिषि प्रत्याम्नाय. ॥ १२ ॥

नमो राज्ञे नमो वरुणायेति वेतसशाखयाऽश्वं तूपरं गोमृगमित्यग्निष्ठ उपाकरोति ॥ १३ ॥

उपाकृतायेत्यन्तः । पर्यग्न्ययणमुपशयान्तानामग्निष्ठवर्ज्यानाम् । नव नव स्वरवः । अष्टादशाथोना दशाधिकशतद्वयसंख्याविशिष्टाने(नामे)कोनत्रिंशच्छतानामारण्यपश्वर्थानां, तान्स्वरूनग्निष्ठ उपगूहति । अथाश्वादीनां स्नपनम् । इषे त्वेति । बर्हिरादाय उपवीरसीति वेतसशाखा, उपो देवान्प्रजापतिरित्यन्तयोः स्थाने नमो राज्ञ० मयि धेहीत्यन्तमुक्त्वा प्रजापतये त्वा जुष्टमुपाकरोमीत्यश्वम् । उपाकृताय स्वाहेति बर्हिषि निधाय, अन्यआ(दा)दाय तेनैव मन्त्रेण वेतसशाखया सह प्रजापतये त्वेत्यादि तूपरगोमृगौ । अश्व. प्रसिद्धः । तूपर. शृङ्गरहितोऽज. । गोमृग आरण्यगो. पतिः ॥ १३ ॥

प्लक्षशाखाभिरितरान्पशून् ॥ (ख० १७)॥ आग्नेयः कृष्णग्रीवः पुरस्ताल्ललाटे सारस्वती मेष्यधस्ताद्धस्त्यो: (त्सक्थ्योः) सावित्रौ बाह्वोः सु(सौ) म्यायामौ पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थ्यौ सक्थ्योः। शितिपृष्ठौ बार्हस्पत्यौ पृष्ठे । धात्रे पृषोदर उदरे वायव्यः श्वेतः पुच्छ इत्यश्वे पर्यङ्ग्या(ङ्ग्या)न् ॥ १४ ॥

अथोपाकरणादिसंस्कारार्थं बहवोऽध्वर्यवो भवन्ति । विप्रतिषेधाद्वि(द्वे)त्युत्तरेषां त्रयाणामेकैकोऽध्वर्युः । ग्राम्यानारण्यान्पशूनुपाकरोति । अश्वे निश्चलेऽथ पर्यङ्ग्यान् । प्रोक्षणादि संस्कृते यूपस्थानीय उपाकरोति ॥ १४ ॥

रोहितो धूम्ररोहित इत्यष्टादशिनः ॥ १५ ॥

नव नव प्रतिविभज्यैन्द्राग्नदशमानेके समामनन्ति, (आप० श्रौ० २०–११–१) इत्यापस्तम्ब. । अष्टादशसंख्याकानां पशूनामेकैकः संघातः ॥ १५ ॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्राः सारस्वत्यो वत्सतर्यः पौष्णाः श्यामाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिव्या उक्ताः संचरा एताः ॥ १६ ॥

कृष्णो वर्णो ग्रीवायां यस्य च्छागस्यासौ कृष्णग्रीवः । बभ्रुः पिङ्गलवर्णः । श्यामाः श्यामवर्णाः । पृश्नि शुक्लबिन्दुचितश्चित्रवर्णः ॥ १६ ॥

ऐन्द्राग्नाः पृश्नयो मारुताः कृष्णा वारुणाः कायास्तूपराः । अग्नयेऽनीकवते प्रथमजानालभते । मरुद्भ्यः सांतपनेभ्यो बाष्कान्मरुद्भ्यो गृहमेधिभ्यः सावातान्मरुद्भ्यः क्रीडिभ्यः सꣳसृ (सृ) ष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टानुक्ताः संचरा एताः ॥ १७ ॥

ऐन्द्राग्नाः प्राशृङ्गा ऐन्द्रा बहुरूपा वैश्वकर्मणाः पितृभ्यः सोमवद्भ्यो बभ्रून्धूम्राननूकाशान्पितृभ्यो बर्हिषद्भ्यो धूम्रान्बभ्रूननूकाशान्पितृभ्योऽग्निष्वात्तेभ्योऽनूकाशान्बभ्रून्धूम्रान् । रोहितास्त्रैयम्बकाः । कृष्णाः पृषन्त इत्येके । श्वेता आदित्या उक्ताः संचरा एता ऐन्द्राग्ना बहुरूपा वैश्वदेवाः प्राशृङ्गाः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्या इति चातुर्मास्यांश्च पशून्समशः प्रतिविभज्येतरेषु यूपेषूपाकरोति ॥ १८ ॥

सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविति द्वंद्विनः पशून्यथासमाम्नातमग्निष्ठ एवोपाकरोति ॥ १९ ॥

अश्वे तेषा नियोजनम् । केचिदग्निष्ठ एव नियोजनं पर्यङ्ग्यानामपि आग्नेयं कृष्णग्रीवमित्यादि नासिकयो(नासिकापुटयो) र्मूर्ध्वँल्ललाटमिति स्मृतिमात्रमेव । प्लक्षशाखया—अग्नये त्वा जुष्ट० उत्तरेषा स्वीयं स्वीयं बर्हिषि चाऽऽदायान्य चलं ललाटस्य पूष्णे त्वेति शिरोदेशस्येन्द्राय पूषभ्या बाहोरग्नये त्वा सक्थ्योः, त्वष्ट्रे त्वा० पृष्ठे श्वेतपृष्ठौ पशू । बृहस्पतये त्वा पार्श्वयो सूर्याय त्वा० यमाय त्वाऽधस्तात्, धात्रे त्वा० पुच्छे (च्छस्य) सूर्याय त्वा० पर्यङ्ग्याश्छागाः । उत्तरा अष्टादशिनो नव नव विभज्यावशिष्टयूपेषु रोहित इत्याद्या अग्निष्ठस्योत्तरे नव । अग्निष्ठस्य दक्षिणेऽप्येवं व्यत्यासेनोपाकरणक्रम. । ऐन्द्राग्नक्रम इत्यापस्तम्बेऽपि विकल्पः शाखान्तरमताम्नानाद्विकल्पस्तस्य । अस्माकं तु नित्य एकस्मिन्गणे रोहितो लोहित. पुच्छैर्निर्वापः शिवदिर्वापः(?) धूम्ररोहितोऽस्पष्टलोहित. कर्कन्धुरोहितो बदरफलवर्णः । एतान्प्रजापतये त्वा० । बभ्रुः पाण्डुरकपिलः । अरुणबभ्रू रक्तकपिलः । शुकबभ्रुर्हरितशुकसमानवर्णः । रुद्राय

त्वा० । श्येतोऽरक्तकवर्णः । श्येताक्षोऽरक्तदृष्टिः । श्येतग्रीवः प्रसिद्धः । पितृभ्यस्त्वा० । कृष्णा वशा वन्ध्या गावस्तिस्र· । वरुणाय त्वा० श्वेतवशास्तिस्रः । सूर्याय त्वा० धूम्रललामा धूम्रपुच्छा. । तूपराः शृङ्गहीना· । मित्राबृहस्पतिभ्या त्वा० । पृश्नि· र्नानावर्णः शुक्ल इत्येके । तिरश्चीनपृश्निः, तिर्यक्प्रवृत्तपृश्निवर्णः । एतेनोर्ध्वपृश्निर्व्याख्यातः । मरुद्भ्यस्त्वा जुष्टं० । फल्गूर्लवणवर्णो बदरफलवर्णः पाटलवर्णो वा । लोहितोर्णी लोहितलोमा । बलक्षी लोहिताक्षी (श्वेताक्षी वा) सरस्वत्यै त्वा० । पृषती चित्रवर्णा । स्थूलपृषती अनल्पचित्रा । क्षुद्रपृषती अत्यल्पचित्रा । विश्वेभ्यो देवेभ्यस्त्वा० । श्यामास्तिस्रो वशाः । ईषद्रक्तकृष्णाः । पूष्णे त्वा० । रोहिणीर्गोरोचनवर्णाः । मित्राय त्वा० । अरुणललामाः संध्यावर्णपुण्ड्राः । इन्द्राबृहस्पतिभ्या त्वा० । शितिबाहुः । बाह्वोरेकदेशे श्वेतत्वं यस्य अन्यत· प्रथमादन्यत्र बाह्वेकदेशे श्वेतत्वं यस्य सः । समन्तः सर्वत. बाह्वोः श्वेतत्वं यस्य सः । इन्द्रावायुभ्यां० । शितिरन्ध्रो रन्ध्रेषु श्वेतः । अन्यत एकस्मिन्रन्ध्रे श्वेतत्वम् । समन्तः सर्वरन्ध्रेषु श्वेतत्वम् । मित्रावरुणाभ्या त्वा० । शुद्धवाल ईषच्छुक्लवालः सर्वशुद्धवालः स्फटिकसदृशवालः । मणिवालः शुक्लाशुक्लवालः । अश्विभ्या त्वा० शिल्पा नानावर्णास्तिस्रो वशाः । विश्वेभ्यो देवेभ्यस्त्वा० । श्येनीः कुमुदसंनिभाः । परमेष्ठिने त्वा० । श्यामललामाः श्यामपुण्ड्राः । सोमापूषभ्या त्वा० । उन्नत उन्नतपृष्ठ· । ऋषभो युवा वामनो ह्रस्वः । इन्द्रावरुणाभ्या त्वा० । शितिककुत् श्वेतककुत् । शितिपृष्ठ उक्तः । शितिभसत् श्वेतजघन. । इन्द्राबृहस्पतिभ्या त्वा० । शितिपाच्छित्योष्ठः शितिभ्रुः । इन्द्राविष्णुभ्या० । सिध्माः सिध्मलाङ्गाः पादे सिताः सिध्माख्यरोगयुता वा तद्वैस्तेओडुपत् । कर्णास्तिस्रस्तादृश्यो वशाः । विश्वकर्मणे त्वा० । पृषोदराश्चित्रोदरा धात्रे त्वा० । श्वेतललामा. श्वेतपुण्ड्रा·, इन्द्रापूषाभ्या त्वा० । कर्णाच्छिन्नकर्णा यमाय त्वा० । श्वितिङ्गाः श्वेताङ्गाः श्वेतभे(पा)दा वा सोमाय त्वा० । नकुला नकुलवर्णा अग्नये यविष्ठाय त्वा० । रोहिणीर्लोहितवर्णा वसुभ्यस्त्वा० । अरुणा अरुणवर्णा अदित्यै त्वा० । द्विवर्षा रुद्रेभ्यस्त्वा० । बभ्रुललामा श्वेतपुण्ड्राः कपिलाः सोमेन्द्राभ्या त्वा० । शुण्ठा अल्पकाया विष्णवे त्वा० । अधीलोधकर्णाः कर्णोपरि प्ररूढकर्णा विष्णव उरुक्रमाय त्वा० । उरुक्रमाय विस्तीर्णपादाय । लप्सुदिनो लम्बमानपुच्छः । पञ्चान्योऽर्धतृतीयवर्षा आदित्येभ्यस्त्वा० । त्रिवत्सास्त्रिवर्षा आङ्गिरोभ्यस्त्वा० । गौरललामा गौरपुण्ड्रा इन्द्राविष्णुभ्या त्वा० । शितिपृष्ठा इन्द्राय राज्ञे त्वा० । शितिककुद इन्द्रायाधिराजाय त्वा० । शितिभसद इन्द्राय राज्ञे त्वा० । तुर्यौह्यः सार्धचतुर्वर्षाः साध्येभ्यस्त्वा० । षष्ठौह्यश्चतुर्वर्षा विश्वेभ्यो देवेभ्यस्त्वा० । कृष्णललामा अग्नेन्द्राभ्यां त्वा० रोहितैता लोहितश्वेता अदित्यै त्वा० । कृष्णैताः कृष्णश्वेता इन्द्राण्यै त्वा० । अरुणैता अरुणश्वेताः संन्ध्यावर्णाः कुह्वै त्वा० । धेनवो नवप्रसूता

राकायै त्वा० । अनड्वाहः शकटवाहाः । सिनीवाल्यै त्वा० । रोहितललामा लोहित॰पुण्ड्रा अग्नाविष्णुभ्यां त्वा० । पिशङ्गा गोरोचनवर्णाः सोमाय त्वा० । सारङ्गाः सोमाय राज्ञे त्वा० । नभोरूपा आकाशवर्णाः पर्जन्याय त्वा० । अजा मल्हा गलस्तना इन्द्राण्यै त्वा० । मेष्य आदित्येभ्यस्त्वा० । मालङ्गा महाकाया द्यावापृथिवीभ्यां त्वा० । कृष्ण॰ललामा वरुणाय त्वा० । रोहितललामा वरुणाय राज्ञे त्वा० । अरुणललामा वरुणाय रिशादसे त्वा० । शिल्पा विश्वेभ्यो देवेभ्यस्त्वा० । पृश्नयः सर्वदेवता येषां ते सर्वदेवत्याः सर्वाय त्वा० । एवं सर्वत्र । सञ्ज्ञोपसर्जनानां प्रतिषेधान्न सर्वनामकार्यम् । सर्वाभ्यो देवताभ्यस्त्वा० । श्वेतललामा ऐन्द्रासूराभ्यां त्वा० । अत्र रोहितप्रभृति त्रयाणां त्रयाणां प्रत्येकमुपाकरणं कार्यम् । अष्टादशिनो नव नव प्रतिविभज्योपाकरणं करोत्येव॰मारण्यानाम् । तान्यूपान्तरालेषु धारयन्ति । दश दश प्रायश आरण्यानां ये दुर्ग्राह्याः पुरुषमृगकिंनरसिंहादयस्तान्, चित्रं प्रतिकृतिं (वोल्लिख्य) वा विधायोपाकरणा॰द्युत्सर्जनान्त कुर्यात्, इति कठसूत्रम् । यूपान्तरालेष्वारण्यान्पशून्बन्धनोपायेन बध्नीयुरिति मानवकल्पसूत्रम् । नाडीषु मशकान् । करण्डेषु सर्पान् । पञ्जरेषु मृगव्याघ्रसिंहान् । कुम्भेषु मकरमत्स्यमण्डूकान् । जालेषु पक्षिणः । कारेषु(रासु) हस्तिनः । नौषु चोदकानि । यथार्थानीतराणि । ये पशवो येन येनोपायेन यूपान्तरालेषु तिष्ठन्ति तेन तेनोपायेन स्थाप॰नीया इति तात्पर्यार्थः ।

अत्र येषामारण्यानां पशूनां पदानामर्थो न ज्ञायन्ते ते निगमनिरुक्तनिघण्टुव्या॰करणवृत्त्यभिधानग्रन्थेभ्यो विलोक्यावगन्तव्याः । अष्टादशिनानुपाकृत्याऽऽरण्यानुपाक॰रोति—सूकरो वराहस्त बर्हिभ्यां प्लक्षशाखया च इन्द्राय राज्ञे त्वा जुष्टमुपाकरोमीत्यु॰क्त्वा । कृष्णः कृष्णमृग., वरुणाय राज्ञे त्वा० । ऋश्यः शृङ्गी मृगः, यमाय राज्ञे त्वा० । गवयो गोपश्वाकृति. सास्नादिरहितः, ऋषभाय राज्ञे त्वा० । गौरोऽत्यन्तश्वेतमृगः शार्दूलाय राज्ञे त्वा० । मर्कटो वानरः पुरुषराजाय त्वा० । वर्तिका चटकासदृशा । टिट्टिभः क्षिप्रः श्येनाय त्वा० । क्रिमिः (कीटः) गोमयवृत्तिर्गोमयपिण्डकारी नीलगवे त्वा० । कुलुङ्गो दंष्ट्रामृगः कटु॰स्वनः सोमाय राज्ञे त्वा० । शिशुमारो ग्राहो जलचरः सिन्धवे त्वा० । हस्ती गजो हिमवते त्वा० । मयुः किंनरः किंपुरुषो वा प्रजापतये त्वा० । उलो मण्डूकः सर्पो वा । हलीक्ष्णस्तृणहिंसक. । हरितचटक इत्यन्ये । वृषदंशो मार्जारः । एते त्रयो धातृदेवत्याः । प्रत्येकं धात्रे त्वा० । एवं सर्वत्र । शारिः शुकस्त्री पुरुषवाक् सरस्वत्यै त्वा० । शुकः श्वेत. पुरुषवाक् सरस्वते त्वा० । आरण्योऽजः शरभः । नकुलः प्रसिद्धः । शाका मक्षिका, पूष्णे त्वा० । क्रौञ्चो दारुणरवः । खञ्जरीटो वा । वाचे त्वा० । झ(ज)षो जषवत्तुण्डो मकरः अपानपात्रे त्वा० । नक्रो दीर्घतुण्डो ग्रहः । मकरः पर्य॰

रक्तसुण्डो ग्रहः कलीकयो बहुपान्मत्स्यः । अकूपाराय त्वा० । पैङ्गराजो भरद्वाजो रक्ताक्षः, वाचे त्वा० । कुषीतकः समुद्रकाकः । आरण्यकुक्कुटो वा । भगाय त्वा० । आती कुरङ्गी । वाहसः पृष्ठे क्षुल्लकशङ्खवाही जन्तुः । दर्विका जलपक्षी । वायवे त्वा० । चक्रवाको दिवाविहारी दिग्भ्यस्त्वा० । अजगरो महोरगो बलाय त्वा० । आखुर्मूषकः । सृजया कृष्णमहिषः । नीलमक्षिका वा जीवंजीविका । शयण्डकः कृकलासः । वृक्षगोधा वा शर(ल)भो वा । मित्राय त्वा० । असितः कृष्णसर्पः, मृत्यवे त्वा० । स्वजः पल्लं बिलादिषु यत्स्वयमेव जायते तत्स्वेदज श्वेतसर्पो वा नानापदो वा । मन्यवे त्वा० । कुम्भीनसः स्वापशीलः सर्पः । पुष्करसादोऽहिराजः पुष्करसर्पो वा भ्रमरो वा । लोहिताहिर्लोहितसर्पः । त्वष्ट्रे त्वा० । वाहसोऽल्पसर्पः प्रतिश्रुत्कायै त्वा० । पुरुषमृगो नरमुखमृगश्चन्द्रमसे त्वा० । गोधा स्थलगोधा । कालका सरटा । दार्वाघाटः कृष्णसारङ्गः । वनस्पतिभ्यस्त्वा० । एणी मृगी, अह्ने त्वा० । कृष्णः कृष्णमृगो रात्र्यै त्वा० । पिकः कोकिलः क्ष्विङ्का रक्तमुखी वानरी नीलशीर्ष्णी कृष्णमुखी वानरी गोलाङ्गुली अर्यम्णे त्वा० । कत्कटः कर्कटो धात्रे त्वा० । बलाका प्रावृट्प्रिया सूर्याय त्वा० । ऋश्यः पुमृगः । मयूरः शिखी, श्येनः पत्री । गन्धर्वेभ्यस्त्वा० । कपिञ्जलोऽधोनिपाती शकुनिः वसुभ्यस्त्वा० । तित्तिरिस्तित्तिभः पुरुषवाक्शकुनी रुद्रेभ्यस्त्वा० । रोहिता ऋश्यस्त्री कुण्डृणाची ग्रहगोधिका कुलयमत्स्यः । गोलत्तिका खञ्जरीटकोऽप्सरोभ्यस्त्वा० । सृमरश्चमरः । पृषतः श्वेतबिन्दुशबलाङ्गो मृगः । विश्वेभ्यो देवेभ्यस्त्वा० । पित्वो महापुत्तिका व्याघ्रो वा । न्यङ्कुर्गोमायुर्हरिणो वा । ऋक्ष इत्यन्ये । कशः शृगालः । अनुमत्यै त्वा० । अन्यवापः काकः अर्धमासेभ्यस्त्वा० कश्यपः, मासेभ्यस्त्वा० । क्वयिर्जलकुक्कुटः कुटरुर्मृगसिंहः उलूकविशेषो वा । दात्यौहः काको जलकुक्कुट इत्येके, सिनीवाल्यै त्वा० । शितपुटो भ्रमरो बृहस्पतये त्वा० । शका मक्षिका भूम्यै त्वा० । पान्त्रो गृहकेलिकः शुकः । कशः सूतवशा नकुलजातिरत्यल्पको वा । मान्थीलवः समारमुकूजलकुक्कुटो वा पितृभ्यस्त्वा० । जहका बिलवासी क्रोष्टा । शललीजातीया, ऋतुभ्यस्त्वा० । लोपा श्मशानशकुनिका संवत्सराय त्वा० । कपोतो रक्तपादः । उलूको दिवाभीतः । शशः शशकः, निर्ऋत्यै त्वा० । कृकवाकुः कुक्कुटः सवित्रे त्वा० । रुरुः शृङ्गत्यागी मृगः, रुद्राय त्वा० । कृकलासः सरटः । शकुनिः काकः । पिप्पका कुलालशकुनिका शरव्यायै त्वा० । हरिणः प्रसिद्धो मरुद्भ्यस्त्वा० । शार्गः आरण्यचटकः, ब्रह्मणे त्वा० । तरक्षुर्व्याघ्रविशेषः । व्याघ्राकारगर्दभभक्षक इत्येके । चित्रव्याघ्रविशेषः । कृष्णः श्वा चतुरक्षोऽक्ष्णोरुपरिबिन्दुद्वयवान् । गर्दभः खरः, इतरजनेभ्यस्त्वा जु० । भूङ्क्ष्णा श्वेतकाकः, अग्नये त्वा० । अलजो भासः । अन्तरिक्षाय त्वा० । उद्रो जलबिडालः । मद्गुः पानीयकाकः । प्लवः परिप्लवः अद्भ्यस्त्वा० । हंससाचिः क्षुद्रहंसः, अदित्यै त्वा० ।

कीर्शा कुक्कुटविशेष, इन्द्राण्यै त्वा० । गृध्रः प्रसिद्धः । शितिकक्षी पाण्डुरोदरो गृध्र. । वार्ध्राणसः कङ्कणत्वारिकः खड्गमृगो वा दिव्येभ्यस्त्वा० । श्वाविच्छल्ली सूचीरोमो द्यावापृथिवीभ्या त्वा० । सुपर्णो गरुड. पर्जन्याय त्वा० । हंसः प्रसिद्धः । वृकोऽरण्यश्वा । वृषदश उक्त । इन्द्राय त्वा० । उद्र उक्त, अद्भ्यस्त्वा० । लोपाशः क्रोष्टा, अर्यम्णे त्वा० । सिंहनकुलव्याघ्राः प्रसिद्धाः, महेन्द्राय त्वा० । परश्वान् महिष आरण्यांस्तान्यूपान्तरालेषु धारयन्ति । दश दश प्रागारण्याना दुर्ग्राह्याः पुरुषमृगसिंहकिंपुरुषादयस्ताश्चित्रपटे विलिख्योपाकरणाद्युत्सर्जनान्तं कुर्यादिति केचिद्व्याचक्षते । नैतद्युक्तम् । प्रतिनिधिकरणे प्रमाणाभावात्कर्महानिप्रसङ्गाच्च । सूकरो बर्हिभ्या प्लक्षशाखया चेन्द्राय राज्ञे त्वा जुष्टमुपाकरोमीत्यादि । आरण्याः । एतेषा च शाखान्तरीयाः षट्त्रिंशद्देवतापेक्षया (ता.) पश्वपेक्षया चाष्टादश । कृष्णा भौमा कृष्णवर्णास्त्रयो भूम्यै त्वा० । धूम्रवर्णास्त्रयोऽन्तरिक्षाय त्वा० । महाप्राणास्त्रयो दिवे त्वा० । शबलवर्णास्त्रयः कर्बुरवर्णास्त्रयो विद्युते त्वा० । सिध्मास्त्रयस्तारकायै त्वा० । एते पञ्चदश अजा अग्निष्ठ एव । उत्तरे चातुर्मास्याः कृष्णग्रीवास्त्रयो बभ्रवस्त्रय उपध्वस्तास्त्रयो वत्सतर्यस्तिस्र श्यामास्त्रय पञ्च संचाराः । एतास्त्रय. पृश्नयस्त्रयः कृष्णास्त्रयस्तूपरास्त्रय. प्रथमजास्त्रयो वत्साः सावातास्त्रयः समन्ववत्सा बाष्कास्त्रयश्चिरकालप्रसूताः ससृष्टा वर्णो वर्णान्तरे ससृष्टा गर्भिण्यो बीभत्सवत्सा अनुसृष्टा अविच्छिन्ना मातृभ्य पृष्ठतः । अथवा वर्षान्ते संसृष्टाः पुनश्च कृष्णग्रीवा इत्यादिपौष्णान्ता पञ्च । एता. श्वेतास्त्रय. प्राशृङ्गास्त्रयो मुखं प्रत्यागतशृङ्गा बहुरूपास्त्रयो विश्वकर्मणे त्वा० । धूम्रानूकाशाः कतमप्रदेशे धूम्रानूकाशाः कतमप्रदेशे धूम्राः कपिलास्त्रयो धूम्रास्त्रयो बभ्रुर (भ्रवोऽ) नूकाशा कतमप्रदेशोऽतिबभ्रवः । धूम्रास्त्रयो लोहितास्त्रयो नाकदेवत्यै (तायै) त्वा० । श्वेता आदित्याः । पुनश्च कृष्णग्रीवा इत्यादि पौष्णान्ता पञ्च । एतास्त्रयो बहुरूपास्त्रयः प्राशृङ्गास्त्रयः श्वेतास्त्रयः श्वेताः सौर्यस्त्रय एता अग्निष्ठ एव दधाति । अथ द्वयानैकादशिनान्प्राकृतान्—आग्नेयादिवारुणपर्यन्तानाग्निष्ठ एव । आश्वमेधिकानग्नयेऽनीकवते रोहिताञ्जिरनड्वानित्यादि (ह्याग्निष्ठ एव रो) लोहितराज (लिङ्ग) युक्तोऽघोरामावधस्तादुदरप्रदेशे कृष्णौ रजतनाभी शुक्लनाभी पिशङ्गौ गोरोचनवर्णौ कल्माषवर्ण. कृष्णोऽजः । एकश्वेतपादः । पेत्वो गलितमुष्को मेषः ।

अथ द्वंद्विनः पशून् अनोवाहौ शकटवहनसमर्थावनड्वाहौ बलीवर्दौ । ओजोदाभ्यामष्टमधातुप्रदातृभ्यामुष्टारौ शकटवाहिनोः सहकारित्वेन पुरोगामियुगवोढारौ । सीरवाहौ लाङ्गलवाहिनाववी अविसदृशौ ह्रस्वावनड्वाहावित्यर्थः । भूमेर्धेनुद्वयम् । दिशा वडवा-

द्वयम् । पुनर्भूमेर्धेनुद्वयम् । विराड्देवतायाः पुरुषी मनुष्यस्त्रियौ । पुनर्भूमेर्धेनुद्वयम् । आरोहणवाहौ मनुष्यारोहणार्थं निर्मितं शकटं वहन्तौ बलीवर्दौ । पूर्वं तु धान्यादिवाहिशकटार्थावुक्तौ । अत्र तु राजकुमारादिविनोदार्थशकटवाहिनावित्यर्थः । वरुणस्य तु कृष्णमृगजातीये स्त्रियौ वन्ध्ये । द्युदेवतायास्त्वाराद्याावुच्छ्रितशृङ्गौ । ऋषभौ सेचकौ । परिमरावुभयतो मरणयुक्तौ । यस्य पशोरग्रजोऽपि मृतोऽनुजोऽपि मृतस्तादृशौ । इत्याग्निष्ठे द्वंद्विनः ।

अथ पशूना संख्या उच्यन्ते । अश्वतूपरगोमृगास्त्रयं पर्यङ्ग्यास्त्रयोदशै अष्टादशिनोऽशीत्यधिकैशतं पञ्चदशिन. पञ्चदशै चातुर्मास्येषु पञ्चत्रिंशदधिकैशतमेकादशिन एकादश पुनश्चैकादशाश्वमेधिनो द्वंद्विनो द्वाविंशतिः । एव नवत्यधिकशतत्रयं ग्राम्याः पशवः । आरण्या इन्द्राय राज्ञ इत्यनुवाकेषु चैकादशाधिकैशत वसन्ताय कपिञ्जलान् इत्यर्धदश, एकोनत्रिंशदधिकशतमारण्याः । ग्राम्यारण्याभ्या सहैकोनविंशत्याधिकपञ्चशतसंख्या उक्ताः पशव. । उपाकृत्य पञ्चहोमाद्यग्नावग्निरित्यन्तम् ॥ १९ ॥

निर्मन्थ्येन प्रचरिते पत्न्योऽश्वमलंकुर्वन्ति ॥ २० ॥

पत्न्यो महिष्याद्या अश्वमलंकुर्वन्ति ॥ २० ॥

पर्यग्निकृतमित्येके ॥ (ख०८) ॥ २१ ॥

अलंकरणे कालविकल्प उक्त. ॥ २१ ॥

सहस्रं सौवर्णा मणयः । सहस्रं राजताः सहस्रं सामुद्राः शाङ्खाः सहस्रं काचा वा । वालेषु कुमार्यः काचानावयन्ति । ग्रीवास्वितरान्मणीन्प्रतिमुञ्चन्ति । भूरिति सौवर्णान्महिषी, भुव इति राजतान्वावाता सुवरिति शङ्खमयान्परिवृक्तिः ॥ २२ ॥

एकैकस्याः शतं शतं कुमार्यः सचिवा भवन्ति । अपत्यस्थानीयानां राजपुत्रीणां राजकन्यानां शतं महिष्याः । उग्राणा राजदासभूतानां शत वावातायाः । सूतग्रामणीनां कन्यानां शतं परिवृक्त्याः । सूताना पञ्चाशद्ग्रामणीना दासभूताना पञ्चाशत् । सौवर्णराजतसामुद्राणां मणीना सहस्रं सहस्रमेकैकस्य यथाक्रम सुवर्णमयरजतमयसमुद्रमयमौक्तिकानेतान्मणीनावयन्ति वालेषु । वालशब्देन रोमाण्युच्यन्ते । वालेषु मणीन्ग्रन्थयन्ति भूरिति महिषी सौवर्णान्मुखादारभ्याऽऽ कण्ठप्रदेशात् । मणौ मन्त्रावृत्तिर्द्रव्यपृथक्त्वात् । भुव इति राजतान्वावाता प्रत्यग्वा ग्रहात्प्राक्श्रोणे. । सुवरिति परिवृक्तीति

---

१ स्थापयन्ति ।

शोक्तः । अथ सौवर्णादिग्रथितवालेषु कुमार्यः शङ्खमणीनुपग्रथ्नन्ति । यावान्देशोऽलंकृतस्तं देशमाज्येनानक्ति ॥ २२ ॥

वसवस्त्वाऽञ्जन्त्विति गौल्गुलवेनाऽऽज्येन महिष्य-श्वमभ्यनक्ति । रुद्रास्त्वाऽञ्जन्त्विति कासांववे-(कौसुम्भे)न वावाता । आदित्यास्त्वाऽञ्ज-न्त्विति मौस्तकृतेन परिवृक्तिः । विश्वे त्वा देवा वैश्वानरा अञ्जन्त्विति प्रकृतेनेतरा विपरीत एकेऽभ्यञ्जनं मणिप्रतिमोचने समामनन्ति ॥ २३ ॥

गुग्गुलपक्वसर्पिषा महिष्यनक्ति वसवस्त्वा इति । गौल्गुलवेन सुरभिरित्यापस्तम्बोक्तमन्त्रो विकल्पः । कासांववे(कौसुम्भे)न देवदारुपक्वेन वावाता रुद्रास्त्वा० इति । मौस्तकृतेन पक्वेन परिवृक्तिः, आदित्यास्त्वा० इति । स्पष्टमन्यत् ॥ २३ ॥

युञ्जन्ति ब्रध्नमित्यश्वꣳ रथे युनक्ति ॥ २४ ॥

दिवीत्यन्तः । रथस्य दक्षिणपार्श्वे एवालंकृतमश्वं युनक्ति ॥ २४ ॥

युञ्जन्त्यस्य काम्या हरी विपक्षसेतीतरावश्वौ प्रष्टिवाहिनꣳ रथे युनक्ति ॥ २५ ॥

नृवाहसेत्यन्तः । तस्याश्वस्य सहायभूतावितरौ द्वावश्वौ युनक्ति ॥ २५ ॥

केतुं कृण्वन्नकेतव इति रथे ध्वजमुच्छ्रयति ॥ २६ ॥

समुषद्भिरजायथा इत्यन्तः ॥ २६ ॥

जीमूतस्येवेति कवचमध्यूहते ॥ २७ ॥

पिपर्त्वित्यन्तः ॥ २७ ॥

धन्वना गा इति धनुरभिमृशति ॥ २८ ॥

जयेमेत्यन्तः । यजमानो धनुरादत्त इत्यापस्तम्बवैखानसौ ॥ २८ ॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियमिति ज्याम् ॥ २९ ॥

पारयन्तीत्यन्तः ज्यामभिमृशतीत्यनुकर्षः ॥ २९ ॥

ते आचरन्ती समनेव योषेति धनुरार्त्नी ॥ ३० ॥

अमित्रानित्यन्तः । धनुष आर्त्नी संमृशतीत्यर्थः ॥ ३० ॥

बह्वीनां पिता बहुरस्य पुत्र इति पृष्ठ इषुधिं विनह्यति ॥ ३१ ॥

प्रसूत इत्यन्तः । पृष्ठभागे बाणं निनह्यति बध्नाति ॥ ३१ ॥

रथे तिष्ठन्नयति वाजिन इति सारथिमभिमन्त्रयते ॥ ३२ ॥

---

१ क निनह्यति ।

रश्मयः इत्यन्तः ॥ ३२ ॥

तीव्रान्घोषान्कृण्वते वृषपाणय इत्यश्वान् ॥ ३३ ॥

शत्रूꣳरनपव्ययन्त इत्यन्तः ॥ ३३ ॥

स्वादुषꣳसदः पितर इति पितॄन् ॥ ३४ ॥

ईशत इत्यन्तः । तिसृभिः पितॄनुपतिष्ठत इत्यापस्तम्बः ॥ ३४ ॥

सुपर्णं वस्ते मृगो अस्या दन्त इतीषुमादत्ते ॥ ३५ ॥

यꣳसन्नित्यन्तः ॥ ३५ ॥

ऋजीते परिवृङ्धि न इति परिदानं कुरुते ॥ ३६ ॥

यच्छात्वित्यन्तः । परिदानमात्माभिमर्शनम् । अपामुपस्पर्शनं स्मार्तम् ॥ ३६ ॥

आजङ्घन्ति सान्वेषामित्यश्वाजनिमादायाहिरिव भोगैः पर्येति बाहुमिति हस्तमात्रमभिमृशति ॥ ३७ ॥

विश्वत इति मन्त्रान्तः । अश्वाजनिरश्वप्रेरककशा । हस्तघ्नमभिमन्त्रयत इत्यापस्तम्बः । हन्यमानश्चर्मविशेषो हस्तघ्नः ॥ ३७ ॥

वनस्पते वीड्वङ्गो हि भूयेति पञ्चभी रथम् ॥ ३८ ॥

वीडयस्वेत्यन्तः । धनुरादानादिरथाभिमन्त्रणान्तं याजमानमेव ॥ ३८ ॥

आऽमूरज प्रत्यावर्तयेमा इति दुन्दुभीनभिह्रादयन्ति ॥ ३९ ॥

जयन्त्वित्यन्त । दुन्दुभीन्संह्रादयन्त्यध्वर्यव इति वैखानसः ॥ ३९ ॥

ये ते पन्थानः सवितः पूर्व्यास इत्युदकान्तमभिप्रेत्याऽऽक्रान्वाजी क्रमैरत्यक्रमीद्वाजीति स्वयंस्वयं वाजिनापो जुषस्वेत्यपोऽश्वमभ्यवगाहन्ति ॥ ४० ॥

उदकान्तमभिप्रेत्याऽऽगत्य स्वं स्वमश्वं प्रथमं पाययत्युदकं ततोऽवगाहनम् ॥ ४० ॥

यद्वातो अपो अगमदिति प्रदक्षिणमावर्तयते । अत्रैके धूर्योजनमामनन्ति । (ख० ९) ॥ यतः प्रयाति तत्रावतिष्ठते ॥ ४१ ॥

रथयुक्तोऽयमश्वो यतो रथशालायाः प्रयातः पुनः प्रादक्षिण्येनाऽऽवृत्तस्तस्यामेव रथशालायामवतिष्ठते । अत्र धूर्योजनं शाखान्तरीयम् ॥ ४१ ॥

वि ते मुञ्चामि रशना इत्यश्वं विमुञ्चति ॥ ४२ ॥

प्रत्यश्वं मन्त्रावृत्तिः ॥ ४२ ॥

द्यौस्ते पृष्ठमित्यश्वस्य पृष्ठꣳ संमार्ष्टि ॥ ४३ ॥

अद्भिः संमृशति ॥ ४३ ॥

रथवाहनमिति सह संग्रहीत्रा रथवाहने रथमादधाति ॥ ४४ ॥

सुमनस्यमाना इत्यन्तः । रथो यस्मिञ्छकटे स्थाप्यत इति तच्छकटं रथवाहनं तस्मिन्रथमादधाति स्थापयति ॥ ४४ ॥

आहिते संग्रहीत्राऽवरोहति ॥ ४५ ॥

आहिते स्थापितेऽश्वे ॥ ४५ ॥

यथोपास्थितमश्वमुपस्थापयन्ति ॥ ४६ ॥

स्पष्टम् ॥ ४६ ॥

लाजी३ञ्छाची३न्यशो ममाँ३ इत्यन्नपरिशेषान्पत्न्योऽश्वायोपयन्ति ॥ ४७ ॥

प्रजाप्यतः इत्यन्त । रात्रौ यैर्दशभिरन्नैर्होमा. कृतास्तदन्नशेषेषु लाजा अपि विद्यन्ते, तानयमश्वो भक्षयेत् ॥ ४७ ॥

यद्योपन्युप्तमत्ति तस्मै प्रजा राष्ट्रं भवति ॥ ४८ ॥

यस्यान्नमत्ति तत्पुत्रस्य राज्यम् ॥ ४८ ॥

आऽक्रान्वाजी क्रमैरत्यक्रमीद्वाजी द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वमभिमन्त्रयते ॥ ४९ ॥

स्पष्टम् ॥ ४९ ॥

यथोपाकृतान्नियुञ्जन्ति ॥ ५० ॥

यूपेष्विति शेष. ॥ ५० ॥

अश्वे पर्यङ्ग्यान्यूपेषु ग्राम्यान्पशूनारोकेष्वारण्यान्धारयन्ति ५१ ॥

उपाकृतस्थानेऽश्वं स्थापयित्वोपाकृत्य पञ्चहोमादि अन्नावन्निरित्यन्तम् । केचिदुपाकरणानन्तरमन्नावन्निहोमान्तं कृत्वाऽलंकरणाद्यथोक्तमुपाकृतं नियुञ्ज्यादश्वमग्निष्ठे ॥ ५१ ॥

प्रोक्ष्याश्वमुपपाययन्ति ॥ ५२ ॥

आलब्धाय स्वाहेति प्रोक्षणं सर्वेषां पायनं च ॥ ५२ ॥

यद्युपपाय्यमानो न पिबेदग्निः पशुरासीदित्युपपाययेत् ॥ ५३ ॥

न पिबेदश्वः पानीयं मन्त्रेण पाययेदध्वर्युः । नैमित्तिकमिदं कर्म । अयं वेद इत्यादिसूच्यमाचार्य पशूना सर्वेषा समञ्जनम् ॥ ५३ ॥

समिद्धो अञ्जन्कृदरं मतीनामित्यश्वस्याऽऽप्रियो भवन्ति ॥ ५४ ॥

इदं याजुषं हौत्रम् । समिद्धो अञ्जन्नित्यश्वमेधस्याऽऽप्रियो मध्यमेऽहन्येव दशेष्टा जुह्वा स्रुकुम्वचितीस्यादि सर्वेऽध्वर्युरेव पर्यग्निकरणं तन्त्रेणैव ॥ ५४ ॥

मेषस्त्वा पचतैरवत्विति पर्यग्नौ क्रियमाणेऽपा-
व्यानि जुहोति । पर्यग्निकृतान्ग्राम्यान्पशूनाल-
भन्ते प्रारण्यानुत्सृजन्ति । पर्यग्निकृतानां द्वंद्विना
वडबे पुरुषे वा(षी चा) त्सृजन्ति ॥ ५५ ॥

मेषस्त्वेत्यपाव्यानि दश नित्याना निवृत्तिः । पर्यग्निकरणे कृते प्रतिनिवृत्तिः । आग्नीध्र आरण्यानुत्सृजन्तीति वैखानस. । वडवे पुरुषे(षी) तन्त्रेण नयनमत्रापि । ये बध्यमाना० प्रमुञ्चमाना० तन्त्रेणाग्नेर्हरणम् । अश्वस्य पुरस्तादजो नीयते ॥ ५५ ॥

तार्प्ये च कृत्त्यधीवासे हिरण्यकशिपौ रुक्मे
चाश्वꣳ संज्ञपयन्ति । प्लक्षशाखास्वितरान्पशूञ्श्या-
मूलेनाश्वꣳ संज्ञपयन्ति । स्पन्द्याभिरितरान्पशून् ॥५६॥

वेतसशाखा तस्या तेनैव तार्प्यं कृत्त्यधीवासं हिरण्यकशिपूनास्तीर्य रुक्ममुपरिष्टात्कृत्वाऽश्वतूपरगोमृगान्निबध्नन्ति । प्लक्षशाखास्वितरान् । श्यामूलेनाश्व श्यामूलं कम्बलम् । स्पन्द्याभिरितरान् ग्रीवाया संवेष्ट्य रज्जुभिर्गले वेष्टनं कुर्यादित्यर्थः ॥ ५६ ॥

प्राणाय स्वाहा व्यानाय स्वाहेति संज्ञप्यमान आहुतीर्जुहोति ॥५७॥

प्राणाय स्वाहेत्यश्वमेधपठितेनानुवाकेन संज्ञप्यमाने होम., शमितार एकादशिनीवत् । अरातीयन्तमितररशनोदसनमध्वर्यवः ॥ ५७ ॥

संज्ञप्ते यदक्रन्दः प्रथम जायमान इति षोडशभि-
रश्वस्तोमीयं जुहोति । षट्त्रिꣳशता वा । क्रमैरत्य-
क्रमीद्वाजीति षट्त्रिꣳशी यामेन साम्ना प्रस्तोताऽ-
नुगायति ॥ (ख० १०) ॥ ५८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशप्रश्ने तृतीयः पटलः ॥

यामेन साम्ना नाके सुपर्णम्, इत्यनेन साम्ना प्रस्तोताऽश्वमुपतिष्ठते ॥ ५८ ॥

अश्वस्तूपरगोमृगौ तुरगपर्यङ्ग्या दश व्युत्तराः
सन्त्यष्टादशिनस्त्वशीतिशतकं द्वाविंशतिर्द्विन्द्विनः ॥
सन्त्येकादशिनस्तथा प्रकृतिजैर्द्वाविंशतिर्वैकृता-
श्चातुर्मास्यपशूनवेहि सशता पञ्चाधिका त्रिंशतम् ॥
भूयः पञ्चदशैव पञ्चदशिनो ग्राम्या नवत्युत्तरान्
आरण्यांस्त्रिशतान्यथर्तु पशवस्त्वष्टादशारण्यजाः ॥

१ क. व्युत्तर । २ क. हिंतान् ।

ज्ञेयाः सूकरपूर्वकास्तु दशतोऽत्रैकादशैते शतं
सर्वे पञ्चशती भवन्ति पशवोऽथैकोनिता त्रिंशतिः ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां चतुर्दशप्रश्ने तृतीयः पटलः ॥ ३ ॥

=====

अथ चतुर्दशप्रश्ने चतुर्थ पटल ।

अम्बे अम्बाल्यम्बिक इति परिश्रिते प्रतिप्रस्थाता पत्नीमुदानयति ॥ १ ॥

ससस्त्यश्वक इत्यन्तः । अम्ब इत्यादिना महिषीमलंकृतामुदानयति हस्ते गृह्णाति रमणवदाह्वयत्येनामेतेन कर्मणेति ॥ १ ॥

ता दक्षिणान्केशपक्षानुद्ग्रथ्य सव्यान्प्रस्रस्य दक्षिणानूरूनाघ्नानाः सव्यानित्येकेषाम् ॥२॥

आपो देवीः० वाक्त आप्यायतामित्यादिशमोषधीभ्य इत्यन्तः । एवं कृते पत्न्यो दक्षिणान्केशपाशानित्यादि । अत्र राजपत्न्यो दक्षिणान्केशपक्षानुद्ग्रथ्य सव्यान्प्रस्रस्य दक्षिणानूरूनाघ्नानाः सिग्भिरवधून्वत्यस्त्रिः प्रदक्षिणमश्वं धुवन्त्यः परियन्ति अनेन मन्त्रेणेति भाष्यकृत् ॥ २ ॥

गणानां त्वा गणपतिꣳ हवामह इति प्रदक्षिणमश्वं धावन्त्यः परियन्ति ॥ ३ ॥

स्पष्टम् ॥ ३ ॥

अवन्तीः स्थावन्तीस्त्वाऽवन्त्विवति परीत्य परीत्य जपन्ति ॥ ४ ॥

पत्न्यः ॥ ४ ॥

सव्यानुद्ग्रथ्य दक्षिणान्प्रस्रस्य सव्यानूरूनाघ्नाना दक्षिणानित्येकेषाम् । त्रिः प्रसव्यं त्रिः प्रदक्षिणमन्ततो यथापुरस्तान्नवकृत्वः संपादयन्ति ॥ ५ ॥

अथ सव्यानुद्ग्रथ्य दक्षिणान्प्रस्रस्य सव्यानूरूनाघ्नाना अनभिधून्वत्यस्त्रिः प्रसव्यं परियन्ति प्रदक्षिणमन्ततो यथा प्रथमे पर्याये । तत्र मृतोपचारभूतसिग्वातस्थानीयं सिग्भिरश्वस्याभिधूननं क्रियते ॥ ५ ॥

अम्बे अम्बाल्याम्बिक इति महिष्यश्वमुपसंविशाति ॥ ६ ॥

महिष्यश्वसमीप उपविशति ॥ ६ ॥

तौ सह चतुरः पदः संप्रसारयावहा इति पदः संप्रसारयेते (याति) ॥ ७ ॥

पादान्संप्रसारयतः (येत्) ॥ ७ ॥

अहꣳ स्यां त्वꣳ स्याः सुरायाः कुलजः स्यात्त्रे-माꣳश्चतुरः पदो व्यतिषज्य शयावहा इति पदो व्यतिषजते ॥ ८ ॥

अश्वस्य पदोऽन्योन्यं महिषी व्यतिषजति ॥ ८ ॥

सुभगे काम्पीलवासिनीति तार्प्येण वाससाऽध्व-र्युर्महिषीमश्वं च प्रच्छादयाति ॥ ९ ॥

गर्भधमित्यन्तः । तार्प्यं घृताक्तं वस्त्रम् । क्षौमेण वाससाऽध्वर्युर्महिषीमश्वं च प्रच्छाद्य (आप० श्रौ० २०—१८–३) इत्यापस्तम्बः ॥ ९ ॥

उत्सक्थ्योर्गृदं धेहीति प्रजनने प्रजननꣳ संदधाति ॥ १० ॥

परावधीदित्यन्तः । अश्वस्य प्रजनने प्रजनन धारयेत् । प्रजननं योनिरित्युच्यते ॥ १० ॥

अम्बे अम्बाल्यम्बिक इति महिषी गर्हते ॥ ११ ॥

महिष्यश्वं कुत्सयति ॥ ११ ॥

ऊर्ध्वामेनामुच्छ्रयतादिति पत्न्योऽभिमेधन्ते ॥ १२ ॥

पुनस्त्रिवेत्यन्तः । अभिमेधन्ते मैथुनायाऽऽह्वयन्ति ॥ १२ ॥

त्रिर्महिषी गर्हते । त्रिः पत्नयोऽभिमेधन्त उत्तर-योत्तरयर्चा ॥ १३ ॥

त्रिर्महिषी त्रिः पत्नयः । अम्बे अम्बाल्यम्बिक इति द्वितीया कुत्सा । यद्ध-रिणीति द्वितीयमभिमेधनम् । अम्बे अम्बाल्यम्बिक इति तृतीया । इयं यका इति तृतीयमभिमेधनम् । उत्तरे विकल्पार्थे ॥ १३ ॥

दधिक्राव्णो अकारिषमिति सर्वाः सुरभिमतीमृचं वदन्ति ॥ १४ ॥

तारिषदित्यन्तः । सर्वाः पत्नय ऋचं जपन्ति ॥ १४ ॥

आपो हि ष्ठा मयोभुव इति तिसृभिर्मार्जयन्ते ॥ १५ ॥

न म इत्यन्तः । शिरस्यप आनयन्ति ॥ १५ ॥

गायत्रीत्रिष्टुबिति द्वाभ्यां महिषी हिरण्मयीभिः सूचीभिरश्वस्यासिपथान्कल्पयति ॥ १६ ॥

शिम्यन्तु त्वेत्यन्तः । राज्ञ. पत्न्यस्त्रिविधा उत्तमा मध्यमाऽधमा चेति ताश्च महिषी वावाता परिवृक्तीत्येतन्नामधेया. । ताश्च मृतस्याश्वस्यासिना छेदनाय तत्तत्स्थानेषु रेखाः सूचीभिः कुर्युः ॥ १६ ॥

उत्तराभ्यां द्वाभ्यां वावाता राजतीभिरुत्तराभ्यां द्वाभ्यां परिवृक्ती लोहमयीभिरायसीभिर्वा तूष्णीं तूपरगोमृगयोरसिपथान्कल्पयन्ति ॥ १७ ॥

शिम्यन्तु त्वेत्यन्त· । यथा महिषी क्रोडात्प्राचीने मुखभागे लिखति । एवं वावाता क्रोडनाभ्योर्मध्येऽनन्तरभाविना मन्त्रद्वयेन लिखेत् । तत उत्तराभ्या नारीस्ते० कुविदङ्ग० इति द्वाभ्या परिवृक्ती शेषमित्यापस्तम्बः । लौहीभिः श्रोणिद्वयं समन्ततश्चन्द्रं नाम मेदः स्यान्न च वृषणौ । एवं तूपरगोमृगयोस्तूष्णीमितिवचनात् । अश्वस्य—ओषधे त्रायस्वैनमिति दर्भानन्तर्धानम् ॥ १७ ॥

यवपिष्टैर्गोधूमपिष्टैर्वा प्रलिम्पन्ति ॥ १८ ॥

न मृदा ॥ १८ ॥

लोम्नामविच्छेदायेति विज्ञायते ॥ १९ ॥

यवपिष्टलेपनेन लोम न विच्छद्यत इति श्रुत्यन्तरे विज्ञायत इत्यर्थ. ॥ १९ ॥

कस्त्वा छ्यति कस्त्वा विशास्तीत्यश्वस्य त्वचमाछ्यति ॥ २० ॥

तनुवे भुवदित्यन्तः । विशास्ति कस्त्वा छ्यतीत्यनुवाकेन । स्वधिते मैनमिति मन्त्रस्य प्रत्याम्नाय. ॥ २० ॥

नाश्वस्य वपा विद्यते ॥ (ख०११) ॥ २१ ॥

नाश्वस्य वपा ॥ २१ ॥

चन्द्रं नाम मेदः । तदुद्धरति ॥ २२ ॥

चन्द्र इति वपास्थानीयमेदोविशेष ॥ २२ ॥

उद्धरतीतरेषां पशूनाम् ॥ २३ ॥

वपामिति शेष· ॥ २३ ॥

शृतासु वपासूत्तरत उपरिष्टादग्नेर्वैतसे कटेऽश्वस्य तूपरस्य गोमृगस्येति वपा आसादयति ॥ २४ ॥

अश्वाभियुक्तेन सह ज्ञातव्य· । वपाधर्मेणोत्क्रन्तामीत्युक्तम् । एवं तूपरगोमृगयोर्वपोद्धरणम् । न कस्त्वा० स्वधिते मैनमेवमितरेषामप्येकादशिनीवत् । शृतासु वपासु यस्त

आत्मा० अग्नेरुत्तरतश्चित्यामेवापरेणाऽऽहवनीयं गत्वा वेतसशाखायामश्वतूपरगोमृगाणां वपा आसादयति सुपिप्पला ओषधीः कृता इति ॥ २४ ॥

दक्षिणतः प्लक्षशाखास्वितरेषां पशूनाम् ॥ २५ ॥

वपा आसादयतीत्यनुवर्तते । दक्षिणतः प्लक्षशाखास्वितरेषां पशूनां वपा आसादयतीत्यर्थः ॥ २५ ॥

एकधा प्राजापत्यानां वपाभिः प्रचरति ॥ २६ ॥ एकधेतरेषां पशूनां प्राजापत्यानां चन्द्रस्य वपयोर्मेदसोऽनुब्रूहि । प्राजापत्यानां चन्द्रस्य वपयोर्मेदसः प्रेष्येत्यश्वस्य तूपरस्य गोमृगस्येति वपानाꣳ संप्रेष्यति वपा मेदः प्रस्थितं प्रेष्येति वा ॥ २७ ॥ विश्वेषां देवानामुस्राणां छागानां मेषाणां वपानां मेदसोऽनुब्रूहि । विश्वेषां देवानामुस्राणां छागानां मेषाणां वपानां मेदसः प्रेष्येतीतरेषां पशूनाꣳ संप्रेष्यति । वपां मेदः प्रेष्येति वा ॥ २८ ॥

शाखाद्वयं बर्हिःप्रत्याम्नायत्वेनाऽऽसन्नाभिमर्शनमुत्तमप्रयाजादि स्वाहा देवेभ्य इति हुत्वा महिमानं जुहोति राजतेन तस्य ते द्यौरित्यनुवाकशेषेण । प्रजापतिर्देवता । हुत्वाऽभिषेकार्थमवशेषयति । जुह्वामुपस्तीर्येत्यादि प्रकृतिवत् । अश्वादीनां वपाः समवदाय संप्रेष्यति । उपांशुना वा प्रजापतयेऽश्वस्येत्यादि । जातवेदो वपाभिर्गच्छ० चन्द्रवपाभिर्गच्छ देवा० इति वा । प्रजापतेरहं० जेमानामिति वा । इतरेषां पशूनां वपा अवदाय संप्रेष्यति विश्वेभ्यो देवेभ्य इत्यादि । सर्वे पशवो वैश्वदेवार्था भवन्तीति वैखानसः ॥ २६ ॥ २७ ॥ २८ ॥

पुरस्ताद्वपानाꣳ होमात्स्वाहा देवेभ्य इति पूर्वं महिमानं जुहोति यस्ते देवेषु महिमा संबभूवेति वा हुत्वा शेषं करोति ॥ २९ ॥ उपरिष्टाद्वपानाꣳ होमाद्देवेभ्यः स्वाहेत्युत्तरं यस्ते पृथिव्यां महिमा संबभूवेति वा हुत्वा शेषं करोति ॥ ३० ॥ अत्रैव मार्जनमाम्नातम् ॥ ३१ ॥

जातवेदो वपाभिर्गच्छेत्यूहेन विश्वेषां देवानां प्राणैः० प्राजापत्याभिश्चरित्वाऽथेतरवपाभिश्चरत्यध्वर्युः । (श्चरन्त्यध्वर्यव.) । अथ महिमानमुत्तरं सौवर्णेन तस्य ते पृथि-

वीति होमसंपातमन्यस्मिन्पात्रे निधाय परिवप्यम् । अथ वपोद्धरणाभिघारणं स्वाहोर्ध्व-नभसमित्येकादशिनीवत् । संस्रावं हुत्वा समुत्क्रम्य चात्वाले मार्जनम् ॥ २९ ॥ ॥ ३० ॥ ३१ ॥

अग्रेणाऽऽहवनीयमभितो यूपमुपविश्य होता ब्रह्मा च ब्रह्मोद्यं वदतो दक्षिणतो ब्रह्मोत्तरतो होता । अथ वा किꣳ स्विदासीत्पूर्वचित्तिरिति होतुः पृष्टानि प्रज्ञातानि ब्राह्मणे । ब्रह्मणो विजयꣳ संज्ञपयन्ति ॥ ३२ ॥

यद्यग्निष्ठयूपमभितो ब्रह्मोद्याय दक्षिणतो ब्रह्मा, उत्तरतो होता किꣳ स्विदासी० कः स्वित् पृच्छामीति होता पृच्छति द्यौरासीत्० सूर्य एकाकी चरति वेदिमाहुरिति प्रति-वचनं ब्रह्मणः किꣳ स्विदिति प्रश्नस्य द्यौरिति परिहारः, कः स्विदिति प्रश्नस्य सूर्य इति परिहारः पृच्छामि त्वेत्यस्य वेदिमाहुरिति परिहारः । प्रश्नवाक्यानि ब्रह्मणो विजयं प्रकाशयन्ति, उदञ्चं होतारं प्रतीत्यर्थः । एवं कृत्वा प्रातःसवनाय संप्रसर्पतीत्यादिशेषं प्रकृतिवत् । संतिष्ठते प्रातःसवनम् ॥ ३२ ॥

प्रजापतयेऽश्वस्य तूपरस्य गोमृगस्यास्थि लोम च तिर्यगसंभिन्दन्तः सूकरविशसं विशसतेति संप्रै-षवत्कुर्वन्ति ॥ ३३ ॥

अथ माध्यंदिनसवनमुच्यते । माध्यंदिने पशुपुरोडाशानां विकल्पः । सवनीयानां हविष्कृता वाचं विसृज्य गुदं मा निर्लेषीः इति कृत्वा प्रजापतयेऽश्वस्य शकृदादीनां यथा सूकरो न विनश्यति त्वक्कर्मलोमभिः सहाश्वस्य कण्ठं छित्वा व्यङ्गेषु बध्नाति । पशूनां (पशु) व्यङ्गेषु लोहितेन शृतेन स्विष्टकृतं यजतीति भरद्वाज-वचनात् ॥ ३३ ॥

अश्वस्य लोहितं स्विष्टकृदर्थं निदधाति ॥ ३४ ॥

नाश्वस्य गुदो विद्यते । कण्ठं गुदस्थाने तूपरगोमृगयोर्गुदावेव । पादचतुष्टयं सत्वक् छिद्यते शकृदादीनामाधारभूतं मांसं प्रक्षाल्य चिह्नं कृत्वा निदधाति । कुम्भ्यामवदाय हृदयवर्ज्यानि सर्वाण्यङ्गानि पच्यन्ते । शूले प्रणीय हृदयम् । अश्वस्य लोहितं रक्तं स्विष्टकृदर्थमिति ॥ ३४ ॥

गोमृगकण्ठमश्वशफं च माहेन्द्रस्य स्तोत्रं प्रत्य-भिषिञ्चति ॥ ३५ ॥

गोमृगकण्ठादिभिर्होमः । वषट्काराहुतिपक्षे शामित्रे श्रपणम् । अस्मिन्पक्षे गोमृग-

कण्ठादिषु जुहूधर्मा अश्वशफधर्मा एकं छिद्यते । गोमृगकण्ठश्चेतरेषां प्रकृतिवत् । शुक्रामन्थिनावित्यादि । दक्षिणाकाले दिक्षु वित्तं विभज्य ददाति । केचित्तु—(औपासने श्रपणं दर्विहोमपक्षे तदा काले अग्निभ्यः स्विष्टकृद्भ्यः स्वाहेति वा रुद्राय स्विष्टकृते स्वाहेति वा, अग्नये स्विष्टकृते स्वाहेति वा नाऽध्वर्युभ्यो दानं, इति च ।) न विषाणप्रासनम् । मरुत्वतीयाभ्यामित्यादि । माहेन्द्रे महानाम्नि साम्नि दक्षिणं प्रत्यपि पक्षमित्यादि कृत्वाऽग्निमन्वारब्धमभिषिञ्चति ॥ ३५ ॥

हिरण्यगर्भः समवर्तताग्र इति षट्प्राजापत्यान्पुरस्तादभिषेकस्य जुहोति ॥ ३६ ॥ षडुपरिष्टात्सप्तममेकेषां यः प्राणत इति पूर्वासां प्रथमा भवति ॥ (ख० १२)॥३७॥ प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते । तस्य धीराः परिजानन्ति योनिं मरीचीनां पदमिच्छन्ति वेधसः ॥ यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे । नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्टं मनिषाणामुं मनिषाण सर्वं मनिषाण ॥ भूतो भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव । तस्य मृत्यौ चरति राजसूयꣳ स राजा राज्यमनुमन्यतामिदम् । प्रजापत इत्येषा । तवेमे लोकाः प्रदिशो दिशश्च परावतो निवत उद्वतश्च । प्रजापते विश्वसृज्जीवधन्व इदं नो देव प्रतिहर्य हव्यमित्युत्तरासामुत्तमा ॥ ३८ ॥

हिरण्यगर्भ इति षट्प्राजापत्याञ्जुहोति । स्पष्टमन्यत् ॥ ३६ ॥ ३७ ॥ ३८ ॥

अयं पुरोभुव इति पञ्चाशतं प्राणभृतः पुरस्तादभिषेकस्य जुहोति । प्राची दिशां वसन्त ऋतूनामिति पञ्चाशतमपानभृत उपरिष्टात् ॥ ३९ ॥

उपरिष्टादभिषेकस्य जुहोतीत्यनुकर्ष. ॥ ३९ ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादिति
पुरुषेण नारायणेन शतातृण्ण९ सौवर्ण९
रुक्मं यजमानस्य शिरसि निदधाति ॥ ४० ॥

देवा इत्यन्तः । पुरुषसूक्तानुवाकेन सौवर्णेन शतमानेन शतक्षरेण शतकृष्णलेन यजमानस्य शीर्षन्नधि निदधाति स्थापयति ॥ ४० ॥

प्रजापतेस्त्वा पृथिव्यै बाहुभ्यामन्तरिक्षस्य हस्ताभ्यां प्रजापति९साम्राज्यायाभिषिञ्चामीति महिम्नोरुद्रेकेण पर्णमयैः पात्रैः स(सि९)ह चर्मण्यध्यभिषिञ्चति ॥ ४१ ॥

महिम्नो. संस्रावेणाभिषिञ्चति यजमानमिति शेषः ॥ ४१ ॥

ऋषभचर्माभिषिच्यमानस्योपरिष्टाद्धारयन्ति ॥ ४२ ॥

व्याघ्रचर्मावस्तीर्य चर्मण्यवस्थितोऽभिषिच्यते । अभिषिच्यमानस्य राज्ञ उपर्यृषभचर्म धार्यते ॥ ४२ ॥

ऊर्ध्वा अस्य समिधो भवन्तीति प्राजापत्याभिराप्रीभिर्यजमानस्य हस्तं गृह्णाति ॥ ४३ ॥

देवा इत्यन्तः । प्राजापत्याप्रीभिर्द्वादशभिरभिषिच्यमानस्य यजमानस्य दक्षिणहस्तं गृह्णात्यध्वर्युः ॥ ४३ ॥

मृगो न भीम इति वैमृधीभ्यां मुखं विमृष्टे ॥ ४४ ॥

वैमृधीभ्यामृग्भ्या यजमानो मुख विमृष्टे हस्ताभ्यामिति शेषः ॥ ४४ ॥

अग्निना देवेन पृतना जयामीति जागतान् विष्णुक्रमान् क्रामति ॥ ४५ ॥

अभिषेके समाप्ते—अग्निना देवेनेति यजमानो जागतान् विष्णुक्रमान् क्रामति ॥४५॥

मधुश्च माधवश्चेति द्वादशाऽऽहुतीर्जुहोति । त्रयोदशेत्येकेषाम् । वसन्ताय स्वाहा ग्रीष्माय स्वाहेति जुहोति ॥ ४६ ॥

मधुश्च माधवश्चेति द्वादशभिस्त्रयोदशभिर्वा माससनामभिरभिषिच्यमानस्य (रभिषिक्तस्य) शिरसि जुहोति । वसन्ताय स्वाहेति षड्भिश्च जुहोतीत्यर्थः । सर्वत्र यथालिङ्गं त्यागः माहेन्द्रे न त्वतिग्राह्याः । उक्थ्यादि । संतिष्ठते माध्यंदिनसवनम् ॥४६ ॥

हविरासादनप्रभृतीनि कर्माणि प्रतिपद्यते ॥ ४७ ॥

आरभते । आदित्यग्रहणाद्याग्रयणं गृहीत्वा षोडशिग्रहण सवने सवने पक्षे विरमति वारेत्यादि ॥ ४७ ॥

उत्तरत उपरिष्टादग्नेर्वैतसे कटेऽश्व तूपरं गोमृगमिति यथाङ्गमनुपूर्वम् ॥(ख० १३)।
प्राञ्चः कल्पयन्ति ॥ ४८ ॥

शृतं हविः शमितरित्यादिमुख्यं प्रतिप्रस्थाता, अन्येषामध्वर्युव. पृषदाज्येन हृदयाभिघारणान्तं कृत्वा यस्त आत्मेत्यादिरन्तरा यूप कृत्वाऽग्नेश्चित्यस्योपरि पञ्चहोत्रा वैतसकटेऽश्वं प्राक्शिरसमुदीचीनपादमुदङ्मुखं यथाङ्गं रचयति मुख निधाय जुह्वा कण्ठपादवक्षस इत्यादि । एवमश्वाकृतिं कुर्यादिति भाव· ॥ ४८ ॥

प्रतीचो वा दक्षिणतः प्लक्षशाखास्वितरान्पशून् ॥ ४९ ॥

एवं पुरस्तादश्वस्य प्रत्यक्शिरसं तूपर पश्चादश्वस्य गोमृगमासन्नाभिमर्शनमेव रचयित्वा वसा(पा)होमग्रहणम् ॥ ४९ ॥

नानाकुम्भीष्वेते पशवः श्रप्यन्ते । वपाभिः प्रचरणकल्पो व्याख्यातः ॥ ५० ॥

इतरेषा जुह्वामुपस्तीर्येत्यादिवसा(पा)होम(मार्थं) गृहीत्वा कटमास्तीर्य संप्रेष्यत्यध्वर्युः प्रजापतयेऽश्वस्येत्यादि हविषा मेदसामनुब्रूहि ॥ ५० ॥

क्रमैरत्यक्रमीद्वाजीति वैतसेन कटेनाश्वं तूपरं गोमृगमिति सर्वहुतं जुहोति ॥ ५१ ॥

आऽक्रान्क्रमैर्द्यौस्त इत्यनुवाकेन स्वाहाकारान्तेनाश्वतूपरगोमृगान्सर्वहुतान्जुहोति ॥ ५१ ॥

हुताय स्वाहेति हुतमभिजुहोति ॥ ५२ ॥

अश्व हुत्वा हुताय स्वाहेति हुतमभिजुहोति । इलुवर्दाय स्वाहा बलीवर्दाय स्वाहा, इत्यभिहोम । कटमाहवनीये प्रहरतीत्यापस्तम्ब· ॥ ५२ ॥

येऽश्वस्य हुतस्य गन्धमाजिघ्रन्ति ॥ ५३ ॥

पापकर्माणो हुताश्वगन्धावघ्राणेन पुण्यकर्माणो भविष्यन्तीति भाव. ॥ ५३ ॥

सर्वे ते पुण्यलोका भवन्तीति विज्ञायते ॥ ५४ ॥

अथेतरेषा विश्वेभ्य इति संसृष्टेन । दिग्ययागे चाश्वादीनां प्रजापतेर्नेमान० इतरेषा विश्वेषामित्यादि । नारिष्ठान्हुत्वा ॥ ५४ ॥

स्तेगान्दꣳष्ट्राभ्यां मण्डूकाञ्जम्भ्येभिरित्याज्यमव-
दानं कृत्वा प्रतिसंख्यायाऽऽहुतीर्जुहोति ॥ ५५ ॥
ग्राम्यान्हुत्वाऽरण्येऽनुवाक्यं जुहोति द्यावापृ-
थिवीयꣳ हुत्वाऽश्वस्तोमीयं जुहोति ॥ ५६ ॥
इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ।
यज्ञं च नस्तनुवं च प्रजां चाऽऽदित्यैरिन्द्रः सह
सीषधातु । आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं
भेषजाऽकरत् । अग्ने त्वं नो अन्तम इति द्विपदाꣳ
हुत्वाऽश्वलोहितेन शृतेन स्विष्टकृतो जुहोति ॥ ५७ ॥
गोमृगकण्ठेन प्रथमामाहुतिं जुहोति । अश्वशफेन
द्वितीयाम् । अयस्मयेन कमण्डलुना चरुणा वा
तृतीयाम् ॥ ५८ ॥

स्तेगानित्यादिभिश्चतुर्दशभिरनुवाकैः प्रतिमन्त्रं शारीरहोमाञ्जुहोति । प्रयासाय स्वाहेत्यनुवाकेन चित्तꣳ संतानेत्यनुवाकेन द्यौस्ते पृष्ठं यदक्रन्द इति त्रिभिरनुवाकैः क्रमैरत्यक्रमीदितीमेऽनुवाका. । अथैतेषा मन्त्रव्यवस्था उच्यन्ते । स्तेगानित्येकादश तृतीयान्ताः । षडादौ ततस्तृतीयाद्या द्वितीयान्ताश्चत्वार उत्तमस्तृतीयान्तः । वाजमिति द्वादश । पञ्च तृतीयान्ता. । ततो द्वौ द्वितीयान्तौ । ततः पञ्च तृतीयान्ताः । कूर्मानित्येकादश तृतीयान्ता द्वितीयवर्जं स तु द्वितीयान्तः । योक्त्रमिति दश । तृतीयान्ताश्चत्वारो द्वितीयान्तास्त्रयः पुनस्तृतीयान्ता. । उत्तरस्मिन्नेकादश सर्वे तृतीयान्ता. । इन्द्रस्यैकादश त्रीन् आद्यान्वर्जयित्वा सर्वे तृतीयान्ता । उत्तरेऽप्येकादश सर्वे द्विपदाः षष्ठान्तिमवर्जं तौ तु त्रिपदौ । ओज इति नव । आद्यास्त्रयस्तृतीयान्ता. । षट् प्रथमान्ताः । आनन्दमष्टौ सर्वे तृतीयान्ताः । अहरिति चतुर्दश द्विपदा । उत्तरावपि चतुर्दशकौ । प्रथमान्ताः सर्वे । पन्थामित्येकादश द्विपदाः । क्रमैरित्यनुवाकमन्त्राः प्रयासाय स्वाहेति द्वादश द्विपदा मन्त्रा । चित्तिमिति नव प्रतिवाक्यम् । द्यौस्त इति दश सर्वे प्रथमान्ताः । यदक्रन्द इति त्रिभिरनुवाकैः प्रत्यृचं पञ्चत्रिंशत् । क्रमैरिति षट्त्रिंशत् । इमा नु कं यज्ञं नः । आदित्यैरिति तिस्रो द्विपदाः । अथाश्वस्य लोहितेन स्विष्टकृतं यजति । गोमृगस्य कण्ठेन प्रथमाम् । अश्वस्य शफेन द्वितीयाम् । अयस्मयं कमण्डलुं पूरयित्वा तृतीयहोमस्तु पूर्ववत् । वनस्पतियागोत्तरकालमितरेषां स्विष्टकृदादि ॥ ५५ ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥

पत्नीसंयाजान्तमहः संतिष्ठते ॥ (ख० १४) ॥ ५९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशप्रश्ने चतुर्थः पटलः ।

आग्निमारुतान्तमनूयाजादि पत्नीसंयाजान्तं समिदाधानान्तं महः संतिष्ठते ॥ ५९ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्यायां महादेवशास्त्रिसंकलितायां प्रयोगचन्द्रिकायां चतुर्दशप्रश्ने चतुर्थः पटलः ।

अथ चतुर्दशप्रश्ने पञ्चमः पटलः ।

श्वोभूते प्रतायते सर्वस्तोमोऽतिरात्र उत्तमो बृहत्सामा ॥ १ ॥

यज्ञायज्ञीय नमस्तेऽस्तु अह्नः पक्षे वसतीवरीर्गृह्णाति सवनीयपरिस्तरणान्तं पूर्ववत् । महारात्रे बुद्ध्वेत्यादि । अतिरात्रः सर्वस्तोमश्च बृहत्सामा । ध्रुवं प्रयुज्य षोडशिपात्रं परिप्लवादि । सवनीयस्य पशोः पात्रासादनकाले द्वादश पशुरशनाश्चतुर्विंशतिं यूपरशनाः पूर्वबद्धा विसृ(स्र)स्य पुरस्तात्प्रातरनुवाकादग्निं युनज्मीति । अन्वहपक्षे आग्रयणाग्र सदसि बहिष्पवमानः ॥ १ ॥

पशुकाल ऐकादशिनान्वायव्यान्पशूनुपाकरोति । प्राजापत्यमृषभं तूपरं बहुरूपं द्वादशमुपालम्भ्यꣳ सर्वेभ्यः कामेभ्यः ॥ २ ॥

पशुकाले त्रिवृद्धया परिवीय—अग्नयेऽनीकवत इत्याश्वमेधिकान्गव्यान्प्राजापत्यमित्यादि । अथवा—अग्नयेऽनीकवत इत्येतासां देवतानां स्थाने प्रजापतिर्वा विश्वे देवा इत्यस्मिन्पक्षे देवतैक्यात्समवदाय प्रचारः । पूर्वस्मिन्पक्षे देवतानानात्वात्प्रचारभेदः । पक्षद्वये गव्या एव पशवः । वैश्वदेवपक्ष एकादशिना(शाना) सह प्रचारः । प्राजापत्यपक्षे द्वादशानाम् । पशूनेहीत्यादि । दक्षिणाकाले विभज्य ददाति । कृष्णविषाणप्रासनम् । उक्थ्यपर्याये प्रचर्येत्यादि आश्विनं तिरोह्नान्तम् । एकादश समिष्टयजूंषि, इत्यादि प्रकृतिवत् ॥ २ ॥

अवभृथेन प्रचरिते पुरस्तात्स्विष्टकृतः ॥ ३ ॥

अवभृथेन प्रचर्य यत्ते ग्राव्णेति बिन्दुस्पर्शनान्तम् ॥ ३ ॥

आत्रेयं खलतिं विक्लिधꣳ शुक्लं पिङ्गाक्षꣳ शिपिविष्टं तिलकावलमवभृथमभ्यवनीय जुम्बुकाय

स्वाहेति तस्य मूर्धञ्जुहोति । चुम्बुकाय स्वाहेत्येकेषाम् । मृत्यवे स्वाहेति द्वितीयाम् । भ्रूणहत्यायै स्वाहेति तृतीयाम् । ब्रह्महत्यायै स्वाहेत्येकेषाम् ॥ ४ ॥

पुरस्तात्स्विष्टकृत इत्युपहोमकालो दर्शपूर्णमासयोर्व्याख्यातः । आत्रेयमित्यादि तिलकावद्ध चित्रित शिरसि जुहोति मृत्यव इति तिसृभिः ॥ ४ ॥

तस्मै शतमनोयुक्तं च ददाति ॥ ५ ॥

अध्वर्यवे शतपर्यन्तमित्यर्थः ॥ ५ ॥

शते वाऽनोयुक्ते चेत्येकेषाम् ॥ ६ ॥

अय कल्पः शाखान्तरोक्तः ॥ ६ ॥

सह पुण्यकृत पापकृतश्चावभृथमवयन्ति ॥ ७ ॥

पुण्यकर्माण. पापकर्माणश्च पराचीरवगच्छन्ति ॥ ७ ॥

अवभृथादुदेत्य हस्तसंस्सक्ता ग्राममायन्ति ॥ ८ ॥

अन्योन्यहस्तसंरभ्य (व्धा) ग्राममभ्युदायन्ति । यागदेशं गत्वा समिदाधानादि, उदवसानीयान्ते देवैरिमामिति वीणागाथिनौ गायतः ॥ ८ ॥

सौर्यानव श्वेता वशा अनूबन्ध्या भवन्ति पञ्चदश वा । छगल कल्माषः किकिदीविर्विदीगय इति त्रयस्त्वाष्ट्राः ॥ (ख० १५) ॥ ९ ॥

तृतीयेऽह्नि प्रात.काले गोजातीया एकादश पशवः । ते च देवताविशेषस्यानुक्तत्वात्प्राजापत्याः । छगलादयस्त्रयस्त्वाष्ट्राः । छगलश्छागार्भकः । स च कल्माषः कृष्णवर्णमिश्रः । किकिदीविस्तित्तिरि. । विदीगय. कुक्कुटविशेषः । एते च तस्मिन्नेवाहन्यालब्धव्या । सौरीः सूर्यदेवताका. । अनूबन्ध्याश्चरमकालीना. पशवः । ताश्च वशा वन्ध्याः श्वेताः श्वेतवर्णा नवसङ्ख्याकाश्च भवन्ति ॥ ९ ॥

पात्नीवते संतिष्ठतेऽतिरात्रः ॥ १० ॥

अनूबन्ध्यावपाहोमान्ते वपन कृत्वा स्नात्वा पात्नीवतस्य कर्म शाखाच्छेदनादि । (छगलश्छागार्भक. । कल्माष कृष्णबिन्दुयुक्तः । किकिदीविष्टिट्टिभः । विदीगयः पक्षिविशेषः पृषन्न्यङ्को वा । एते त्रय पशव. पात्नीवते) । साण्डमित्येतस्य प्रत्याम्नायः । पशूत्सर्जनान्तं (वपायागान्तं) कृत्वा, इमं स्तनमित्यादि । अनूबन्ध्याया. पशुपुरोडाशमष्टौ देवसुवा हवींष्यनूबन्ध्या संस्थाप्य विशालयूपकर्म ॥ १० ॥

श्वोभूते त्रिपशुना पशुबन्धेन बैल्वे त्रिविशाखे यूपे यजत आग्नेयमैन्द्राग्नमाश्विनम् । तान् पशूनालभते । अपि वा त्रैतानां प्रथमजमाश्विनं कालकाभ्रुमश्विभ्यां मध्यमे विशालयूपे त्रैतानां मध्यमजमूर्जे दक्षिणे विशालयूपे त्रैतानामुत्तमजं पृथिव्या उत्तरे विशालयूपे ॥ ११ ॥

न पश्विष्टयादयः । शाखाहरणाद्यनूबन्ध्यादिवत् पात्रप्रयोगे तिस्रः कुम्भ्यः । विष्णूनि स्थेत्यन्तं कृत्वा यूपसमानमपराद्धूर्ध्वं त्रिशाखमष्टाश्रिय सत्त्रपात्रमध्यमे विशालयूपे, अग्नये त्वा० दक्षिण इन्द्राग्निभ्या त्वा० उत्तरे, अश्विभ्यां त्वा- त्रैतानां प्रथमजं प्रथमपुत्रम् । कालकाभ्रु. कृष्णाभ्रु । मध्यमयूप आश्विनदेवत्यमालभते । तस्यामेव जाताया मध्यमजमूर्जेदेवत्यं दक्षिणे यूपे तस्या एव तृतीयाया पृथिविदेवत्यम् । उत्तरे यूप इति पक्षान्तरम् । उपाकृत्य पञ्चहोमादिनियोजनादिवपाहोमान्त कुर्यात् ॥ ११ ॥

पशुपुरोडाशं निरुप्याग्नयेऽꣳहोमुचेऽष्टाकपालमिति दशहविषं मृगारेष्टिं निर्वपति ॥ १२ ॥

अथ पशुपुरोडाशस्य कर्म । तेषा पशुरोडाशानाम् । अग्नयेऽꣳहोमुचेऽष्टाकपाल इति दशहविषं मृगारेष्टिं निर्वपति । पञ्चसप्ततिः कपालानि अन्यद्भर्जनार्थमेक द्वे स्थाल्यौ प्रातर्दोहपात्राणि वाजिनपात्रं च । अग्नये जुष्टं० इन्द्राग्निभ्या जुष्ट० अश्विभ्या जुष्टं० (दशहविषामिष्टीनामेकतन्त्रम् ।) अग्नयेऽꣳहोमुचे जुष्ट० इन्द्राग्निभ्यामꣳहोमुचे जुष्ट० वायोः सवित्र आगोमुग्भ्या० वायुसवितृभ्यामागोमुग्भ्यामिति वा मैत्रायणीयपाठः । अश्विभ्यामागोमुग्भ्या० मरुद्भ्य एनोमुग्भ्यो जुष्टं० विश्वेभ्यो देवेभ्य एनोमुग्भ्यो जु० अनुमत्यै जुष्टं० अग्नये वैश्वानराय० द्यावापृथिवीभ्यामꣳहोमुग्भ्या० इति । अग्नेरꣳहोमुग्यव्यं रक्षस्वेन्द्राग्न्योरꣳहोमुग्यहव्य रक्षस्वेत्युत्करे निर्निनीय यथाभागमिदमग्नेरꣳहोमुचो मरुतामेनोमुचा विश्वेषा देवानामेनोमुचामग्नेर्वैश्वानरस्य द्यावापृथिव्योरꣳहोमुचोरिति पेषणार्थान् । इदं वायोः सवितुरागोमुचावाश्विनावागोमुचोरनुमत्या इतिचर्वर्थान् । निर्वापक्रमेण कपालोपधानमग्नेयादीनामेकादशैकादश, मृगाराणामष्टावेकादशेत्यादिस्थालीद्वय भर्जनार्थं (सप्त द्वादश स्थालीः) द्वादशाष्टिकपालमेवमुपधाय दोहकर्म मस्तालनानिनयनार्थं कामधुक्षः० मित्रावरुणाभ्यामागोमुग्भ्याꣳ हविरिन्द्रियमित्यादि पिण्ड कृत्वा व्यावर्तध्वमिति स्तक्त्वस्तथा तण्डुलार्थान्व्यावर्तध्व व्यावर्तेथा पुनरय व्यावर्तेथामिति द्वौ पुरोडाशौ व्यावर्तेथामित्यु-

१ क तस्या एवजाताया मध्यम°।

त्तमौ । इदं वायोः सवितुरागोमुचोरनुमत्या इति चरू । इदमग्नेर्वैश्वानरस्येदं द्यावापृथिव्योरꣳहोमुचोः (इति) पुरोडाशपञ्चकमधिश्रित्य तत्र प्रातर्दोहे लौकिकद्ध्यानयनम् । अथ घर्मोऽसीति चरुम् । अथ धानार्थान्घर्मा स्थ विश्वायुष इति । अथ मारुतं वैश्वदेवमानुमतं चरुं वैश्वानरं द्यावापृथिव्य पर्यग्निकरणाद्याप्यलेपनिनयनान्तम् । उद्वासनकाले प्रथममन्त्रेणाभिघार्य उत्तरौ तूष्णीं, उत्तरमन्त्रेणोत्तरं तूष्णीं यस्त आत्मेत्युत्तरांश्चरूंस्तूष्णीमानुमतवैश्वानरयोर्मन्त्रेणोत्तरयोस्तूष्णीमेव क्रमेणोद्वास्य पयस्या तूष्णीं द्वयो. पात्रयोरित्यादि आसन्नाभिमर्शनं क्रमेण । प्रचरणकाले पशुपुरोडाशौ. प्रचर्य, अग्नयेऽꣳहोमुचेऽनुब्रूहीत्यादि ॥ १२ ॥

अग्नेर्मन्वे प्रथमस्य प्रचेतस इति याज्यानुवाक्या भवन्ति ॥ १३ ॥

इदं याजुषं हौत्रम् ॥ यथालिङ्गं याज्यानुवाक्याः ॥ १३ ॥

पशुपुरोडाशानां मृगारेष्टेश्च समानꣳ स्विष्टकृदिडम् ॥ १४ ॥

[अꣳहोमुचेरहमन्नादः । इन्द्रस्याꣳहोमुच इन्द्रियाव्यन्नादः । मित्रावरुणयोर्जेमानं० वायुसवित्रोर्वृत्रहा० अश्विनोर्वृत्रहा० मरुतामिन्द्रियाव्यन्नाद ० मित्रावरुणयोर्जेमान० वायुसवित्रोर्वृत्रहा० अश्विनोर्वृत्रहा० (मरुतामिन्द्रियाव्यन्नादो वृत्रहा वा ।) विश्वेषा देवाना प्राणे·० वृत्रहा वा । अनुमत्या अहमन्नाद ० तथा वैश्वानरस्य द्यावापृथिव्योर्वृत्रहा०] समानं तु स्विष्टकृदिडम् । यत्त वयं पुरुपत्रा० इति स्विष्टकृतः पुरोनुवाक्या, यथा ह तद्वसव० इति याज्या भवति । शृतꣳ हविरित्यादि ब्राह्मणतर्पणान्तम् । एव विशालयूपकर्म समाप्य ग्रन्थिविस्रसनादि सक्तुहोमं धूमादिमन्त्रणादि(क)कृत्वा यदाकूतादिति दशाऽऽकृती । प्रत्यवरुह्य पुनर्मन इत्युपतिष्ठते नित्यम् । अय नो नभसेत्यादि, उपस्थान येऽग्नय इति । समारोप्य त्रैधातवीयो(यामु)दवस्यति । उदवसानीया धर्माः क्रियन्त उपांशुत्वादय , न पूर्णाहुति. । सहस्रदक्षिणा अत्र नियम्यते । उदवसानीयान्ते विशालयूपकर्मेति भाष्यकृत् । अथ वीणागाथी, उप त्वाऽग्न इति ॥ १४ ॥

श्वोभूते द्वादश ब्रह्मौदनानन्वहं निर्वपति । द्वादशाभिर्वेष्टिभिर्यजेत ॥ १५ ॥ तासु द्वादशानि शतान्यन्वहं ददाति ॥ १६ ॥ पिशङ्गास्त्रयो वासन्ता इति यथर्तु यथादैवतं यथासमाम्नातमृतुपशुभिर्यजेत ॥ १७ ॥ संतिष्ठतेऽश्वमेधः ॥ (ख०१६) ॥ १८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशप्रश्ने पञ्चमः पटलः ।

गृहं गत्वा द्वादश ब्रह्मौदनानि (न्) समिद्वर्जमग्न्याधेयवत् । यजमानः सहर्त्विग्भिर्भोजयित्वा द्वादशाहमन्वहम् । अन्वह द्वादशशतं दानम् । एव च राज्ञो नित्योऽश्वमेध· । नैमित्तिककाम्ययोर्वा परिगणनादित्येके । तदसत् । राजा सार्वभौमोऽश्वमेधेन यजेत इति वचनाच्च । द्वादशभिर्वैष्टिभिर्यजेतेति नैमित्तिकेष्टिरोदनो द्रव्यमग्निर्देवताऽन्वाधानादि सिद्धमिष्टि· सतिष्ठते । तास्विष्टिषु द्वादशानि शतानि चान्वह ददातीत्युक्तम् । इष्ट्या यक्ष्य इत्यादि विशेष । आगामिपर्वणि सौत्रामणी मैत्रावरुणी चाऽऽमिक्षा वा । आगामिनि वसन्ते पर्वणि पशुबन्धेन यक्ष्य इत्यादि । पिशङ्गास्त्रयो गोरोचनवर्णाः सारङ्गाश्चातकवर्णा. । पृषन्तस्त्रय. । पृषन्तस्त्रय. पृश्निसक्थ्या महाकाया अवलिप्ता अन्येन वर्णेन मिश्रिता । अथान्यस्मिन्पर्वणि संवत्सरदेवतास्त्रिभिर्यजेत निवक्षसः निम्नवक्षसो नीलवक्षसो वा । त्रिपशुबन्धा एतदन्त यजमानस्य ब्रह्मचर्यादि परिसमाप्यतेऽश्वमेधः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसकलिताया प्रयोगचन्द्रिकाया चतुर्दशप्रश्ने पञ्चम पटल ॥ ५ ॥

अथ चतुर्दशप्रश्ने षष्ठ· पटल ।

पञ्चाहः पुरुषमेधः । राजा ब्राह्मणो वा । यः कामयेत सर्वेषां भूताना ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ स्वाराज्यमाधिपत्यं गच्छेयमिति । स एतेन यजेत॥१॥

पञ्चाहसाध्यः पुरुषमेधः । ब्राह्मणो राजन्यो वा यजेत, न तु वैश्यः । ओजो वीर्यमाप्नोतीति वचनात् । सर्वा व्युष्टीर्व्यश्नुत इत्यापस्तम्ब ॥ १ ॥

तस्याश्वमेधेन कल्पो व्याख्यातः ॥ २ ॥

तस्य पुरुषमेधस्य ॥ २ ॥

त्रयोविꣳशतिर्दीक्षाः । द्वादशोपसदः । पञ्च सुत्याः । एकादश यूपा एकादशाग्नीषोमीया अग्निष्टोमः प्रथममह उक्थ्यो द्वितीयमतिरात्रस्तृतीयमुक्थ्यश्चतुर्थमग्निष्टोमः पञ्चमम् । मध्यमेऽहनि पौरुषमेधिकान्पशूनुपाकरोति ॥ ३ ॥

तस्याहीनद्वादशाहवदिति भाष्यकृत् । शिशिरे दीक्षते । अग्निचित्यमाश्रित्य

प्रयोगः । शिशिरे पर्वणि प्रातरग्निहोत्रं हुत्वा पुरुषमेधेन यक्ष्य इत्यादि । विद्युत्० सोमप्रवाकवरणादिसक्षेदान्त बृहस्पतिपुरोहिता इत्याद्युखासंभरणान्तं तस्मिन्नेवाहनि वायव्यः पशु प्रवर्ग्यसभरण च । पष्ठ्या द्रव्यनिर्देशादग्निवद्दीक्षणीया, उखाप्रवृञ्जनादि सर्वमग्निवत् । व्यहमेकैका चिति· प्रायणीय ऋषीष्टकाना विश्वेषु त्वा० इत्यादीनामुपधाय विराम । न वाङ्य० आसन्नाश्व. । श्वोभूत एकाद्यष्टकाद्यश्वपरिणयनान्तम् । श्वोभूत एकाष्टकामुपधाय विराम. । एव प्रत्यह पञ्चमेऽग्निजातानित्यादिस्तोमभागान्तमुपधाय विराम· । श्वोभूते स्तोमभागादिसयानीयान्त प्रत्युदमुपसादयत्यध्वर्युः । ऐन्द्रवायवग्रहमाग्नेयमतिग्राह्यं दक्षिणाकालेऽश्वमेधे यथा भवति तथा ददाति । यज्ञायज्ञीये नमस्ते अस्तु । अस्मिन्काले वसतीवरीरुत्तरस्याह्न । एव पत्नीसंयाजान्तमहः संतिष्ठते ।

अहीनसततय. सवनीयस्य परिस्तरणीयान्त । अध्वर्युर्महारात्रे बुद्ध्वा पञ्चदश उक्थ्यः षडहस्य द्वितीयविकार. शुक्राग्र (ह)ऐन्द्रमतिग्राह्यमेक ऐन्द्र. । ऐन्द्रपत्नीसंयाजान्तमहीनसंततय· सवनीयस्य परिस्तरणान्ते महारात्रे बुद्ध्वोक्थ्यं सौर्यमेकमतिग्राह्यमेकमेकादशनीवेदिपरिव्ययण कुर्यात् ॥ ३ ॥

देव सवितः । तत्सवितु । विश्वानि देव सवितरिति पुरुषानुपाकरिष्यन्स्तिस्रः सावित्रीर्जुहोति॥४॥

तिस्र ऋच. सावित्री. सवितृदेवताप्रकाशका इत्यर्थ. ॥ ४ ॥

ऐकादशिनानुपाकृत्य पुरुषानुपाकरोति ॥ ५ ॥

द्व्यानैकादशिनानुपाकृत्य पुरुषानुपाकरोतीत्यर्थ. ॥ ५ ॥

ब्रह्मणे ब्राह्मणमालभत इति यथासमाम्नातम् । तेषामष्टाचत्वारिंशतं मध्यम उपाकरोति ॥ ६ ॥ एकादशैकादशेतरेष्ववशिष्टान्मध्यमेऽष्टौ वा ॥ ७ ॥ उत्तमानग्नियुक्तान्पुरुषान्सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादिति पुरुषेण नारायणेन दक्षिणतो ब्रह्माऽभिष्टौति ॥ ८ ॥

ऐकादशिनानाश्वमेधिकाश्चोपाकृत्य पुरुषानालभते ब्रह्मणे ब्राह्मणमिति (तै० ब्रा० ३-४-१) चतुर्थ्यन्तपदोक्ता देवता· । द्वितीयान्ता. पशव: । ब्रह्मणे त्वा जुष्टमुपाकरोमीत्यादि । स्पष्टमन्यत् ॥ ६ ॥ ७ ॥ ८ ।

पर्यग्निकृतान्पुरुषानुदीचो नीत्वोत्सृज्याऽऽज्येन तद्देवता आहुतीर्हुत्वाऽथैकादशिनीः संस्थापयन्ति ॥ ९ ॥

उपाकृत्य पश्वहोमादि पर्यग्निकृतान्पुरुषानुत्तरतो नीत्वोत्सृजति । तत आज्येन तद्दे॰वतायै (याः) ब्रह्मणे स्वाहा इत्यादिहोमा द्वयोरेकादशिनीः संस्थापयन्ति पत्नीसंयाजान्तं पूर्ववदहीनसंततयः । अन्वाधानादि रात्रौ परिस्तरणान्तम् । महारात्रे बुद्ध्वेत्यादि पञ्चदश उक्थ्योऽग्निष्टोमो वा । अतिग्राह्य न वा । ऐन्द्रवायवग्रहः । अग्निष्टोमपक्षे दधिधर्म. पत्नीसंयाजान्तं पूर्ववदहीनसंततयः परिस्तरणान्तम् । महारात्रे बुद्ध्वेत्यादि सप्तदशोऽतिरात्रः शुक्रग्रहो यज्ञायज्ञिये॰ नमस्ते अस्तु॰ कृष्णविषाण॰प्रासनं तिरोह्नान्तम् ॥ ९ ॥

दक्षिणाकाले मध्यमं प्रतिराष्ट्रस्य यदन्यद्ब्राह्मणादिक्षु वित्ताद्भूमेः सेनाभ्यश्च तत्पुरुषमेधे ददाति ॥ (ख०१७) ॥ १० ॥

मध्यमं प्रतिराष्ट्रस्येति क्षत्रिययजमानविषयम् ॥ १० ॥

यथाऽश्वमेधे ब्राह्मणो यजमानः सर्ववेदस दद्यात् ॥ ११ ॥

ब्राह्मणो यजमानश्चेत्तदा सर्ववेदसं ददाति ॥ ११ ॥

एकादश यूपा एकादशानूबन्ध्या मैत्रावरुणी वैश्वदेवी बार्हस्पत्या वा ॥ १२ ॥

अवभृथादुदवसानीयान्तमग्निष्टोमवदिति भाष्यकृत् । अनूबन्ध्या एकादशसु यूपेषु सूर्यदेवत्या वैश्वदेवत्याः प्रजापतिदेवत्या वा । अनूबन्ध्याः समाप्य ग्रन्थिविस्रसनादि ॥ १२ ॥

त्रैधातवीयोदवसानीया तयेष्ट्वा पृथगरणीष्वग्नीन्समारोह्योत्तरनारायणेनाऽऽदित्यमुपस्थाय गृहेषु प्रत्यवस्येद्यानभिप्राप्नुयात्तान्यज्ञक्रतूनारभेत॥१३॥

संतिष्ठते पुरुषमेधः ॥ १४ ॥

त्रैधातवीयोदवसानीयास्थाने भवति । तयेष्ट्वाऽग्नीन्समारोप्य-अद्भ्यः संभृतः पृथिव्या इत्यनुवाकेनाऽऽदित्यमुपस्थाय ग्राम प्रविश्य त्रैधातवीयया यजेत वेति । अनन्तरे पर्वणि सौत्रामणी मैत्रावरुणी च । ततोऽमावास्याया साकप्रस्थायीयेन यजेत । पञ्चबिलेन चरुणा पञ्चशारदीयेनेति । पञ्चबिलस्य चरोर्विज्ञायते । आज्य आग्नेयः पूर्वस्मिन्बिले । दधन्यैन्द्रो दक्षिणे । शृते प्रतिदुहि [नव]नीतमिश्रे वा वैश्वदेवः पश्चिमे । अप्सु मैत्रावरुण उत्तरे । पयसि बार्हस्पत्यो मध्यमे (आप॰ श्रौ॰ २०–८–२९) इत्यापस्तम्ब. । ब्राह्मणभोजनान्तेयमिष्टिः । समाप्यते पुरुषमेध ॥ १३ ॥ १४ ॥

सर्वमेधो दशरात्रः । यः कामयेत सर्वमिदं भवेयमिति । स राजे(एते)न यजेत । तस्य पुरुषमेधेन कल्पो व्याख्यातः ॥१५॥

अथ सर्वमेधो दशरात्रो राजा यजेत । तद्वद्वादशाहाविच्छिन्नं दीक्षत इति सूत्रान्तरात् । शैशिरे वसन्ते वा पर्वाणि पत्नीभि सह राजा सर्वमेधेन यक्ष्य इत्यादि । षष्ठ्या दीक्षणीया सप्तहोतु स्थाने दशहोता दशरात्राय दीक्षिष्यमाण इति ब्राह्मणम् ॥ १५ ॥

त्रिस्तावा वेदिरेकशतविधोऽग्निरग्निष्टुत् ॥ १६ ॥

पञ्चाशदधिकचतु शताङ्गुली(ल)समितः पुरुष पुरुषस्थानीय । तेनाग्निमानमरत्निप्रादेशयोर्वाऽपि विवृद्धिपक्षे पञ्चोत्तरशतविधाभ्यासेन चैकोत्तरशतविधाभ्यासेन चैकोत्तरं शतम् । उक्तस्य पुरुषस्य चतुर्भागीयास्तदर्धेन तत्पादाः पुरुषस्य पञ्चमाशेन पञ्चमभागीयास्तदर्धेन तत्पादा. पुरुषस्य पञ्चदशभागेनाष्टाङ्गुला. षड्भागीया वा । गार्हपत्यस्य धिष्णियाना प्राकृत (ता) एव करणीय (या.) ॥ १६ ॥

अग्निष्टोमः प्रथममहः । सर्वमाग्नेयं क्रियते ॥१७॥ इन्द्रस्तुदुक्थ्यो द्वितीयं सर्वमैन्द्रं क्रियते॥ १८॥ सूर्यस्तुदुक्थ्यस्तृतीयं सर्वं सौर्यं क्रियते ॥१९॥ विश्वेदेवस्तुदुक्थ्यश्चतुर्थं सर्वं वैश्वदेवं क्रियते ॥ २० ॥ आश्वमेधिकं मध्यमं पञ्चमम् । तस्मिन्नश्वं मेध्यमालभते ॥ २१ ॥ पौरुषमेधिकं मध्यमं षष्ठम् । तस्मिन्पुरुषान्मेध्यानालभते ॥ ॥ २२ ॥ अप्तोर्यामः सप्तमम् । तस्मिन्सर्वान्मेध्यानालभते ॥२३॥ वपा वपावतां त्वच उत्कृत्यावपानां जुहोति ॥ २४॥ संवृश्चौषधिवनस्पतीनार्द्राञ्शुष्कांश्चानुप्रकिरन्ति ॥ २५ ॥ प्रातःसवने सन्नेषु नाराशंसेषु चान्नमन्नं जुहोति ॥२६॥ सर्व जुहोति सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्या इत्येवं माध्यंदिने सवने तथा तृतीयसवने हुतेषु हविःषु त्रिणवमष्टमम् । त्रयस्त्रिंशं नवमम् । विश्वजित्सर्वपृष्ठोऽतिरात्रो दशमम् ॥ २७॥

गार्हपत्यं चित्वा प्रायणीयया प्रचर्य चतुर्भागीयासंमितेन दण्डेन वेदिमानम् । तिस्रो दीक्षाः षडुपसदः । द्वादश दीक्षा द्वादशोपसदो वा । सोमक्रयकाले दशक्रयः । (तत आतिथ्याप्रचरणादिवसतीवरीग्रहणान्तं कर्म प्रकृतिवत् ।) महारात्रे बुद्ध्वा, इत्याद्यग्निष्टुदग्निष्टोमः । सोमपात्रप्रयोगे बृहन्नसि० अग्नये वाच वदतेत्यूह । द्विदेवत्यानामाग्निर्देवता जगती छन्दः । अग्नेः पात्रममीत्यूह । ग्रावाऽस्यध्वरकृत्० पवित्रायाग्नये सोममित्याद्यनूहो वा । ऐन्द्रवायवग्रहणकालेऽग्याजरास इति चतुर्वाक्यमनुद्रुत्य, उपयामगृहीतोऽस्यग्नये त्वा० उपयम्याग्न आयूंषि पवस० उपयामगृहीतोऽस्यग्निभ्यां त्वा एष ते योनिः सजोषा त्वा० ऐन्द्रवायवाग्रमेव मैत्रावरुणं यजनानो मित्रावरुणा त्रिवाक्यपूर्वा । उपयामगृहीतोऽस्यग्निभ्या त्वा राया वयं एष ते ऋतायुभ्या त्वा० शुक्र द्वे विरूपे भवतः । चतुर्वाक्यान्यनुद्रुत्योपया० शण्डाय त्वा० मन्थिनो पूर्वापरचतुर्वाक्यानि मर्काय त्वा० मनो नयेषु० एष ते आग्रयणं० (त्रीणि शतानि) चतुर्वाक्यानि चानुद्रुत्योपयामगृहीत० हि ३ सोमः पवते० विश्वेभ्यस्त्वा० अग्निभ्य ० द्वितीयेऽतिग्राह्ये उत्तिष्ठन्० सोममग्ने चमूसुतं, उपया० अग्नये त्वेति । तरणिर० उपयाम० अग्नये त्वा० एष ते० अग्नये त्वा० उक्थ्यं० अग्निर्वृत्राणि० आहुत । उपयाम० अग्नये त्वोक्थायवे । यत अग्ने० एष ते योनिरग्नये त्वोक्थायवे । नित्य मूर्धानं० ध्रुवस्येति । आश्विनं अश्विनौ पिबतं० वाहसं, उपयाम० अश्विभ्या त्वा । त्रिवृतयूपमित्यादि कापेयाना प्रथममाग्नेयमाग्निष्ठ उपाकरोति विभज्य सप्तरात्रवत् । पञ्चषष्ठसप्तमानामह्नां (महेषु) सूत्रोक्ताः पशवः । शिष्टानामह्ना (महेषु) कापेया एव विभक्ता । तामतिरात्रचरमेति लिङ्गात् । कापेयानामुपदेशेनैव प्राप्तिः । नतु चोदकेन । अग्नयेऽग्निभ्यामनुब्रूहीत्यादि एवं प्रेष्य । ऐन्द्रवायवस्य मैत्रावरुणस्य (अग्निभ्यामनुब्रूहीत्यादिरत्र वा) एवमाश्विनस्य सवनमुखप्रेषे प्रात. प्रात सवनस्येन्द्रस्य (अग्नये) सोमाय तस्मा अग्नय ऐन्द्राग्नः, अग्निनाऽग्निः, त्रिवाक्यानि अग्निभ्या त्वा० वैश्वदेव अग्निर्देवतानां जठर त्रिवाक्यान् उपयाम० विश्वेभ्यस्त्वा० अग्निभ्य उक्थ्यपर्याय उपयाम० अग्निभ्या त्वा० अग्निभ्यस्त्वा देवायुवं, माध्यंदिने वशी त्व देव अग्नेः प्रियं पाथः । पूर्ववच्छुक्रामन्थिनौ । मरुत्वतीये अग्निश्रिय इति चतुर्वाक्यानि । उपयाम० अग्नये त्वा मरुत्वते द्वितीयवदुत्तमे मरुत इति चतुर्वाक्यानि ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

दक्षिणाकाले मध्यमं प्रतिराष्ट्रस्य यदन्यद्ब्राह्मणाद्दिक्षु वित्तात्तत्सभूमि पुरुषवद्ददाति । यथा पुरु-

षमेधे यथा पुरुषमेधे ॥ (ख०१८) ॥ २८ ॥

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशप्रश्ने षष्ठः पटलः ।

इति सत्याषाढहिरण्यकेशिसूत्रे चतुर्दशः प्रश्नः ।

दक्षिणाकाले प्राप्तेऽश्वमेधवत् । अग्नये मरुत्वतेऽनुब्रूहि इड अग्न इति चतुर्वाक्यानि माहेन्द्रं श्रुधि श्रुत० अध्वरम् । उपयाम० अग्नये त्वा० उक्थ्यपर्यायस्तथैव तृतीयसवनस्य (सवनीय) आदित्य विश्वेषामधितिः उपयाम० अग्निभ्यस्त्वा । त्वमग्ने सुमतिं सिन्धुः० उपयाम० अग्निभ्यस्त्वा० शृतातङ्क्या, त्वामग्ने, आहुत, उपयाम० अग्निभ्या त्वा विवश्व आदित्येति नोह । अग्निभ्योऽनुब्रूहि प्रियेभ्यः, आशिरो सुमनस्यमानोऽग्नय आशिरम् । अथ तृतीयस्य सवनीयस्याग्नेः सोमानिति अन्तर्यामसावित्रेण सावित्रम् । नित्या यज्ञायज्ञियं उपयाम० अग्नये त्वा० वैश्वदेवं, अग्निर्देवानां जठरं उपयाम० अग्निभ्यस्त्वा० ज्योतिष्टोमवत्पात्नीवतम् । यज्ञायज्ञियस्थाने वारवन्तीयं, तस्मिन्स्तूयमाने वसतीवरीर्गृह्णाति । हारियोजनं, उपया० अग्नये हरिवते सह सोमा अग्नये । एवं पत्नीसंयाजान्तम् । पूर्ववदहीनसंततयः परिस्तरणान्तम् । शेषं पूर्ववत्समानम् । अभ्यास. प्रश्नपरिसमाप्त्यर्थः ॥ २८ ॥

प्रयोगवैजयन्त्यास्तु मालाया सूत्रसंस्थितेः ।
न्यायसूत्रस्येह कृतो निर्णय. कौस्तुभो मणिः ॥
मध्यगो यज्ञवपुषस्तुष्ट्येऽस्तु मयाऽर्पित. ।
गृह्णाति हि किमप्येष भक्त्यैर्यद्यत्तत कृतम् ॥

इति सत्याषाढहिरण्यकेशिसूत्रव्याख्याया महादेवशास्त्रिसंकलिताया प्रयोगचन्द्रिकाया चतुर्दशप्रश्ने षष्ठः पटलः ।

इति सत्याषाढसूत्रव्याख्याया चतुर्दशप्रश्नः ॥

अथ सत्याषाढहिरण्यकेशिश्रौतसूत्रे चयनक्रतुप्रतिपादकैकादशद्वादशप्रश्नगतसूत्राणां पाठक्रमेण प्रतीकानि ।

सू० प्र०	पृष्ठाङ्कः ।	सू० प्र०	पृष्ठाङ्कः ।
अग्निं व्याख्यास्यामः	२	अपां पृष्ठमसीति	१०
स उत्तरक्रत्वर्थः	३	प्राचीनग्रीवमुत्तरलोम	११
अपिवा धार्यमाणे	,,	पुरीष्योऽसि	,,
अपिवा तिस्रश्च	,,	कृष्णाजिने पुष्करपर्णे	,,
तं चेष्यमाणो	,,	य कामयेत वसीयान्	,,
बृहस्पतिᳫं रोहिता	६	जनिष्वा हि जेन्य इति	१२
जुहूᳫं स्रुवं च	,,	सलोभ्य मृत्खनᳫं	,,
यं कामयेत	७	उदु तिष्ठ स्वध्वरेति	,,
यदि कामयेत	,,	सजातो गर्भो असि	,,
ऋचा स्तोमᳫं	,,	स्थिरो भव वीड्वङ्ग	,,
देवस्य त्वेति	,,	शिवो भव प्रजाभ्यः	,,
इमामगृभ्णन्	८	प्रैतु वाजी कनिक्रदत्	,,
तूष्णीं गर्दभस्य	,,	अग्निं पुरीष्यमङ्गिरस्वत्	,,
योगे योगे तव	,,	उत्तरेण विहारम्	१३
अग्निं पुरीष्य०	९	वि पाजसेति	,,
अग्निं पुरीष्यमङ्गिरस्वत्	,,	आपो हि ष्ठा	,,
सूर्यस्योदयनं प्रति	,,	मित्रः सᳫंसृज्य	,,
अत्रैके समामनन्ति	,,	मखस्य शिरोऽसीति	,,
अन्वग्निरुषसा०	,,	यज्ञस्य पदे स्थ इति	१४
आगत्य वाज्यध्वन	,,	रुद्राः सम्भृत्य	,,
द्यौस्ते पृष्ठ०	,,	वसवस्त्वा	,,
अभितिष्ठ	१०	अध्वर्युरेकभार्यस्य	,,
अपो देवीरुपसृज	,,	एतैरेव यजुर्भिः	,,
तस्मिन्हिरण्यं	,,	त्र्युद्धि पञ्चोद्धिं वा	,,
अपादाय हिरण्यं	,,	प्रादेशमात्रीमूर्ध्वे०	,,
देवस्य त्वेति	,,	पारिमण्डला वा	१५

सू० प्र०	पृष्ठाङ्कः।	सू० प्र०	पृष्ठाङ्कः।
नवाग्निमभिचरतः	१५	अपिवाऽऽग्नेयान्	२१
अदित्यै रास्नाऽसि	,,	अपः कबन्धानि	,,
अश्रीणा रास्नायाश्च	,,	प्राजापत्येन	,,
अदितिस्ते बिलम्	,,	अपिवैतेषाम्	,,
कृत्वाऽयसा महीमुखाम्	,,	तस्य प्राजापत्येन	,,
तस्या एव मृदः	,,	वायुमती श्वेतवती	२२
गार्हपत्येऽश्वशकृति	,,	वायुमती नियुत्वती	,,
अदितिस्त्वा देवीः	१६	मृदा प्रलिप्य	,,
तूष्णीमषाढाम्	,,	यत्प्राग्दीक्षणीयायाः	२३
मित्रस्य चर्षणीधृत.	,,	दीक्षाहुतिकाले	,,
देवस्त्वा सविता	,,	यत्प्राङ्मुष्टिकरणात्	२५
अपद्यमाना पृथिव्याशा	,,	मित्रैतामुखा तप	,,
मित्रैतामुखाम्	,,	दूवन्न इति तस्याम्	,,
सप्तैकविंशतिम्	१७	मुञ्जाश्च	,,
अयं योऽसि	,,	यो भूतिकामः	,,
योऽस्य कौष्ठ्य जगतः	,,	यं कामयेत	,,
आहरन्नपति	१८	अम्बरीषात्	२६
इदमस्माकं भुजे	,,	प्रदाव्यादाहरेत्	,,
उदेह्यग्ने अधि	,,	वृक्षाग्राज्ज्वलतः	,,
परि त्रिविष्टयध्वरम्	,,	भर्जनादन्न०	,,
अग्निभ्य. कामाय	,,	काम्यमग्निं कुर्वाणः	,,
एकविंशति चतुर्विंशति वा	१९	जात उख्ये	,,
अमुत्र भूयादधयत्	,,	परस्या अधि	,,
बृहस्पते सवितः	२०	शमीमयीं पूर्वाम्	,,
राये अग्ने महे	,,	सीद त्व मातुः	२७
हिरण्यगर्भः समवर्तत	,,	यदग्ने यानि	,,
ऊर्ध्वा अस्य समिधः	,,	तैल्वकमभिचरतः	,,
आग्नेयीस्त्रिष्टुभः	,,	दंष्ट्राभ्या मलिम्लून्	,,
यः प्राणत इति	,,	यो अस्मभ्यम्	,,
वैश्वानरः प्राजापत्यः	२१	संशितं मे	,,

सू० प्र०	पृष्ठाङ्कः ।
अथ यजमानम्	२७
ब्रह्म क्षत्रम्	,,
मातेव पुत्रम्	,,
पतिर्विश्वकर्मा	२८
अग्ने युक्ष्वा हि	,,
नक्तोषासेति	,,
विश्वा रूपाणि	,,
अपिवा शिक्यम्	,,
सुपर्णोऽसि	,,
सुपर्णोऽसि	,,
ऊर्ध्वं नाभेः	,,
अक्रन्ददग्निः	२९
अग्नेऽभ्यावर्तिन्	,,
आ त्वाऽहार्षम्	,,
उदुत्तममिति	,,
अग्ने बृहन्	,,
औदुम्बर्यासन्दी	३०
शर्करायाम्	,,
हꣳसवत्या	,,
मुष्टिकरणप्रभृतीनि	,,
येन देवा ज्योतिषा	,,
सदा ज्वलति	३१
अन्नपतेऽन्नस्य	,,
देवस्य त्वा	,,
श्वोभूते	,,
एवꣳ सदा	,,
पूर्वेद्युर्विष्णुक्रमान्	,,
यदहरग्निम्	३२
यद्युख्ये भ्रियमाणे	,,
यद्युख्ये भ्रियमाणे	,,

सू० प्र०	पृष्ठाङ्कः ।
यद्युख्ये भ्रियमाणे	३३
यद्युख्ये भ्रियमाणे	३३
उदु त्वा	,,
सीद त्वम्	,,
तूष्णीमितरौ	,,
अक्रन्ददग्निः	३४
अध्यवसाय	,,
इन्धने व्रतने	,,
यद्युखा भस्म	,,
आपो देवीः	३५
भस्मनः प्रत्यादाय	,,
पुनरूर्जा	,,
पुनस्त्वाऽऽदित्याः	,,
बोधा स बोधीति	,,
नित्यमप्सु भस्म०	,,
पुरीषे पशुकामः	,,
अप्सु यायावरः	३६
तिस्रो रात्रीः	,,
दीक्षितस्येष्टका	,,
मृन्मयीरिष्टका.	,,
निर्मन्थ्येन	३७
न कृष्णा न	,,
पुष्करपर्णम्	,,
यावदग्निमाना	३८
महान्तं बृहन्तम्	,,
अपवृत्ते दीक्षा०	,,
सञ्ज्ञानमासि	३९
तान्निवपन्	,,
सं या वः प्रियाः	,,
तिस्रस्तिस्रः	,,

सू० प्र०	पृष्ठाङ्कः	सू० प्र०	पृष्ठाङ्कः
अयꣳ सो अग्निः	३९	प्रादेशेन वितस्त्या	४५
इडामग्नेऽयम्	,,	स्योना पृथिवी	४५
सꣳहिते चिदसि	४०	सं वस्त्रा	,,
द्वाभ्या द्वाभ्याम्	,,	निष्कृताहवम्	,,
पूर्वयोपधाय	,,	उद्रिणꣳ सिञ्च	,,
सर्वास्विष्टकासु	,,	उद्योजनमन्त०	,,
कृष्णोऽश्वः	,,	सीरा युञ्जन्तीति	,,
तमालभ्य	,,	उष्टारयोः	४६
सा चितिः	,,	ब्रह्मजज्ञानम्	,,
पञ्चचितीकम्	४१	उदस्थात्	,,
एकचितीकः	,,	मलिम्लुचो नाम	,,
समितामिति	,,	लाङ्गलं पवी०	४७
मातेव पुत्रम्	,,	कीनाशाः	,,
अत्रैवैके	,,	पुच्छशिरः	,,
यदस्य पारे	,,	प्रदक्षिणम्	,,
नैर्ऋतीरिष्टकाः	४२	सीताम्	,,
तस्येष्टकाभिः	,,	घृतेन सीतेति	,,
यस्यास्ते अस्याः	,,	दक्षिणस्मात्	,,
न तयादेवतम्	,,	दक्षिणस्याः	,,
यत्ते देवी	,,	मध्ये सभिन्ना	४८
अत्राऽऽसन्दीम्	४३	विमुच्यध्वम्	,,
यदस्य पारे	,,	तानध्वर्यवे	,,
नमो भूत्यै	,,	पञ्चदशोद०	,,
श नो देवी	,,	द्वादशानुसीतम्	,,
ऊर्जं बिभ्रत्	,,	या जाता ओष०	,,
निवेशनः	,,	कृष्टे ग्राम्याः	,,
प्रायणा येन	,,	या ओषधीनाम्	४९
यावान्पुरुषः	४४	मनसा ध्यायेत्	,,
त्रीन्प्राच. पुरुषान्	,,	अविगतायाम्	,,
आत्मा चतुःपुरुष.	,,	ये वनस्पतीनाम्	,,

सू० प्र०	पृष्ठाङ्क.।	सू० प्र०	पृष्ठाङ्कः।
थत्प्रागातिथ्यायाः	४९	दक्षिणतः	,,
येऽन्तर्विधात्	,,	तपो योनिः	,,
इषमूर्जमहम्	,,	ब्रह्मजज्ञानम्	,,
तथोपक्रमेत	५०	हिरण्यगर्भः	५६
अग्ने तव श्रवः	,,	नमो अस्तु	,,
चितः स्थ	,,	कृणुष्व पाजः	,,
त्रिसप्ताभिः	,,	घृतस्य दध्नश्च	,,
त्रिणवाभिः	,,	घृतस्य पूर्णाम्	,,
अपरिमिताभिः	,,	अपिवा तूष्णीम्	५७
आप्यायस्व	५१	रुक्मं व्याघारयति	,,
अपिवा गायत्रिया	,,	ध्रुवाऽसि	,,
यं कामयेत	,,	चितिं जुहोमि	,,
आतिथ्याप्रभृतीनि	,,	अविद्वान्	,,
प्रथमाभ्याम्	५२	तेजोऽसि तेजः	५८
अपिवा तिस्रः	,,	काण्डात्काण्डात्	,,
दर्भाग्रमुष्टिना	,,	हिरण्यशकलौ	,,
त्रिरनूक्तायाम्	,,	विराड्ज्योतिः	,,
उत्तरवेदिम्	,,	द्वे एके	,,
इष्टकाभिरग्निम्	५३	ताः प्रथमायाम्	५९
दक्षिणावतः	,,	बृहस्पतिस्त्वा	,,
व्यालिखिता	,,	सर्वास्वृतव्यासु	,,
प्रतीचीरुप०	,,	घर्मेष्टकाम्	,,
श्वेतोऽश्वः	५४	अषाढाऽसि	,,
तमालभ्य	,,	मधु वाताः	६०
इदं विश्वा	,,	अपां गम्भीरम्	,,
उत्तरतः	,,	यच्चिद्धि त्वम्	,,
वाङ् म आसन्	,,	औदुम्बरम्	६१
तत्त्वा यामि	५५	उत स्म ते	,,
अभ्यस्थात्	,,	तद्विष्णो	,,
यदक्रन्दः	,,	दिवो वा	,,

सू० प्र०	पृष्ठाङ्कः।
सिकताभिः	६१
दध्ना मधुना	,,
यं कामयेत	,,
स्यूता देवेभिः	६२
उपरिष्टात्	,,
अग्ने युक्ष्वा हि	,,
पुरुषशिरसः	,,
समित्स्रवन्ति	६३
उदु त्यं चित्रम्	,,
पशुशीर्षाणि	,,
यं कामयेतापशुः	,,
वातस्य ध्राजिम्	६४
अथ यदि	,,
मुख्यस्थाने	,,
अपिवा तस्य	६५
नमो अस्तु	,,
अपिवा यजु.	,,
मा छन्दस्तत्	,,
पुरुषशिरः	६६
तामुपधाय	,,
अपस्या उप०	,,
ये यज्ञं समगृभ्णन्	,,
आयवे स्वाहा	६७
अद्भ्यः संभृतः	,,
अयं पुरो भुवः	६९
प्राची दिशाम्	७०
विषूची प्राणभृतम्	,,
आयुषः प्राणम्	,,
पृथिव्यसि	,,
या देव्यसि	७१
अर्थेतः स्थ	७१
दिवि श्रयस्व	७२
तेजसे त्वाम्	,,
त्वामग्ने वृषभम्	,,
यत्तेऽचितं यदु	७३
द्वाभ्या द्वाभ्याम्	,,
सर्वास्विष्टकासु	,,
कृष्णोऽश्वः श्यावः	,,
सा चितिः	,,
यो अप्स्वन्तरग्नि.	७४
एवमेतानि	,,
आग्नेय्या गायत्रिया	,,
षडुपसदः	७५
अनुपसदमग्निम्	,,
त्रीणि चतुस्तनानि	,,
आपराह्णिकीभ्याम्	,,
द्वादशप्रश्ने	,,
सर्वासु चितिषु	७६
ध्रुवक्षितिः	,,
सजूर्ऋतुभिः	,,
अनुपरिहारम्	७७
अपास्पिन्वेति	,,
ऽग्निविर्वय इति	,,
ऋषभप्रभृतिः	७८
श्वोभूते तृतीयाम्	,,
इन्द्राग्नी अव्यथ०	,,
चित्तिं जुहोमि	,,
ज्योतिरसि ज्योतिः	,,
नभश्च नभस्यश्च	,,
राज्यसि प्राची	७९

सू० प्र०	पृष्ठाङ्कः।	सू० प्र०	पृष्ठाङ्कः।
आयुर्मे पाहि	७९	आयोस्त्वा सदने	८५
षट्त्रिंशतम्	,,	प्रोथदश्वो न	,,
मूर्धाऽसि राट्	,,	अग्ने गोभिः	,,
पृथिव्यै स्वाहा	,,	ता मध्यमायाम्	,,
प्राच्या त्वा दिशा	८०	इन्द्राग्निभ्यां त्वा	८६
इन्द्रो दधीचः	,,	पुरोवातसनिः	,,
ऋषभप्रभृति.	,,	सलिलाय त्वा	,,
श्वोभूते चतुर्थीम्	,,	ऋचे त्वा रुचे	,,
आशुस्त्रिवृत्	,,	यशोदा त्वा	,,
आशुरष्टादश	,,	भूयस्कृदसि	,,
अन्तरिक्षमन्तारिक्षाय	,,	अप्सुषदसि	८७
सहश्च सहस्यश्च	,,	पृथिव्यास्त्वा	,,
एकयाऽस्तुवत	,,	प्राणं मे पाहि	,,
इयमेव सा	८१	अग्ने यत्ते	,,
अग्ने जातान्प्र	,,	या वा अयावा	,,
इष्टकाया पुरीष०	,,	अग्निना विश्वाषाट्	,,
ऋषभप्रभृतिः	८२	अभीषाच्चाभीषवी	,,
श्वोभूते पौर्वा०	,,	प्रजापतिर्मनसा	,,
एवश्छन्दो वरिवश्छन्दः	,,	ज्योतिष्मती त्वा	,,
रश्मिरसि क्षयाय	,,	रोहितेषु वा	,,
राज्यसि प्राची	,,	कृत्तिका नक्षत्रम्	,,
तपश्च तपस्यश्च	८३	अग्ने रुचः स्थ	८८
देवाना यान्यसि	,,	पूर्णा पश्चात्	,,
प्रजापतिस्त्वा	८४	हिरण्यगर्भः सम०	,,
द्यौरपराजिता	,,	विश्वकर्मा दिशाम्	८९
आपराह्णिकीभ्याम्	,,	प्राणाय त्वा	,,
औदुम्बरीस्तिस्त्रः	,,	अग्न आयाहि	,,
श्वोभूत उत्तमाभ्याम्	,,	शतायुधायेति	,,
अग्निर्मूर्धेति	,,	अग्ने यशस्विन्	,,
अन्त्रवातिच्छन्दसम्	,,	गायत्रीं दक्षिणतः	९०

सू० प्र०	पृष्ठाङ्कः ।
सहस्रस्य प्रमा	९०
इमा मे अग्ने	,,
ऐष्टिक्या चित्या	,,
शतरुद्रीयं जुहोति	९१
नमो रुद्रेभ्यः	,,
असंचरे	,,
यं द्विष्यात्तस्य	९२
यो रुद्रो अग्नौ	,,
तिसृधन्वमया०	,,
वसवस्त्वा	,,
उदकुम्भमादाय	९३
निधाय कुम्भम्	,,
पृष्ठैरुपातिष्ठते	,,
इष्टो यज्ञो भृगुभिः	९४
पिता मातरिश्वा	,,
अत्र धेनूः करणम्	,,
अवका मण्डूकम्	,,
अनुगमयित्वा	९५
य द्विष्यात्	,,
स्वयं कृण्वानः	,,
पृथिवीमाक्रमिषम्	९६
अपामिद न्ययनम्	,,
जुह्वा पञ्चगृहीतम्	,,
ये देवा देवानाम्	,,
कूर्मं पृषन्तम्	,,
जुह्वा पञ्चगृहीतम्	,,
षोडशगृहीतेन	,,
यं कामयेत	९७
समुद्राय	,,
उत्तमाभ्याम्	,,

सू० प्र०	पृष्ठाङ्कः ।
उदु त्वा विश्वे	९७
पञ्च दिशः	९८
आशुः शिशानः	,,
विमान एषः	,,
इन्द्रं विश्वा	,,
प्राचीमनु	,,
कृष्णायै	,,
ऊर्णावन्तम्	,,
प्रेद्धो अग्ने	९९
अग्ने तमद्याश्वम्	,,
जुहूं स्रुवं च	,,
ता जुह्वदिह	,,
वैश्वानरीयस्य	१००
वेदं कृत्वा	,,
न प्रणीताः	,,
निर्वपणकाले	,,
तूष्णीमुपचरिताः	,,
यजुरुत्पूताभिः	,,
यदन्यदिध्माबर्हिषः	,,
यत्प्रागाज्यग्रहणात्	१०१
प्रोक्षणीरभिमन्त्र्य	,,
एषाऽसददिति	,,
विष्णवसि वैष्णवम्	,,
वैश्वानरम्	,,
उच्चैर्वैश्वानरस्य	,,
सर्वेहुतम्	,,
ईदृङ्चान्यादृङ्	,,
पूर्वं पूर्वं गणम्	१०२
स्वतवाꣳश्च	,,
इन्द्रं दैवीः	,,

सू० प्र०	पृष्ठाङ्क ।
यदि कामयेत	१०२
एव त्रिभिरा०	
यदि कामयेत	,,
एवं त्रिभिरा०	१०३
न सप्रेष्यति	,,
यं कामयेत	,,
वमोर्धाराम्	१०४
य कामयेत	,,
यदाज्यमुच्छिष्येत	१०५
चतु शरावमो०	,,
वाजप्रसवीयम्	,,
पितु नु स्तोषम्	१०६
अपिवा यस्यान्नस्य	,,
यजमानाय ने	,,
दक्षिणे वा	,,
नित्यवदेके	,,
देवस्य त्वा	,,
इन्द्रस्य साम्राज्येन	१०७
पुरस्तात्प्रत्यङ्	,,
कृष्णायै श्वेत०	,,
ऋताषाड्ऋतधामेति	,,
पर्यायमनुद्रुत्य	,,
ताभ्य. स्वाहा	,,
दश वा पर्याय	१०८
समुद्गृहीतम्	,,
तान्सरयान्	,,
समुद्रोऽसि	,,
कृष्णाजिनपुटेन	,,
अग्ने उदधे	१०९
सुवर्णघर्मस्वाहेति	,,

सू० प्र०	पृष्ठाङ्क. ।
वेदिस्तरणप्र०	१०९
ममाग्न इत्येतेन	,,
द्वादश चतुर्विंशतिम्	,,
तव श्रिये व्यजि०	,,
यत्प्राग्यूपसमानात्	१११
तेषामग्निष्ठम्	,,
अत्रैव वा	,,
पशुपुरोडाशस्य	११२
पशुकाल एक०	,,
अग्नि युनज्मि	११३
दक्षिणाकाले	,,
अध्वर्यवे	,,
यदस्यान्याश्चि०	११४
उपाकृते यज्ञा०	,,
हारियोजनेन	,,
एकादश समिष्ट०	११५
नवाऽऽवरिकाणि	,,
अनूबन्ध्यावपा०	११६
आपं त्वाऽग्ने	,,
येऽग्नय पुरीष्या	,,
उप त्वाऽग्ने	,,
अग्नि चित्वा सौत्रा०	,,
अग्नि चित्वा स०	,,
यावज्जीवम्	,,
न तृतीय चित्वा	११७
अग्नि चित्वा य	,,
सलिलाय त्वा	,,
यथार्थ लोक०	,,
अग्नि चित्वा य	११८
पुनश्चितिम्	,,

सू० प्र०	पृष्ठाङ्क ।
अश्रवणार्थाम्	११८
यत्रैवास्य	,,
अपिवा येनर्षय.	,,
श्वोभूतेऽष्टौ	१२०
काम्यानग्नीन्	१२२
अर्थसयोगश्च	,
श्येनचितम्	,,
कङ्कचितम्	,,
अलजचितम्	,,
प्रउगचितम्	१२३
उभयत.प्रउगम्	,,
रथचक्रचितम्	,,
द्रोणचितम्	,,
पश्चात्स्वरु	,
समूह्य चिन्वीत	,,
दिक्षु चात्वालात्	,,
परिचाय्य चि०	,,
सपरिचाय्योप०	१२४
श्मशानचितम्	,,
तापश्चितम्	,,
सवत्सरम्	,,
संवत्सरे	,,
पुरस्तादुप०	,,
द्वौ द्वौ मासौ	१२५
यदृषीणामा०	,,
यानि दशतयीषु	,,
सूक्तपरिमाणा:	,,
आवृत्तासूप०	,,

अथ वाजपेयराजसूयप्रतिपादकत्र-योदशप्रश्नगतसूत्राणां प्रतीकानि ।

सू० प्र०	पृष्ठाङ्कः।
शरदि वाजपेयेन	१२६
ब्राह्मणो राज०	१२७
तस्य षोडशि०	,,
सप्तदश.	१२८
प्रजापतिमा०	,,
सप्तदश	,,
सप्तदशारत्निः	,,
यत्प्रागुपसद्भ्यः	,,
रशनाकाले	१२९
अग्नीषोमीयस्य	,,
देव सवितः	,,
हिरण्यमालिनः	,,
पात्रसंस्माद्०	१३०
तेषामैन्द्रेण	,,
षोडशिपात्रम्	,,
तेषां षोडशि०	,,
तेषामैन्द्रेण	,,
तेषां षोडशि०	,,
व्यतिषङ्गम्	,,
पशुकाले त्रीन्	१३१
सप्तदश प्राजा०	,,
श्यामास्तूपरा:	१३३
पर्यग्निकृतानाम्	,,
सर्वेषा प्रति०	,,
दाक्षिणौ होमौ	१३८
अप्स्वन्तरमृ०	,,
वायुर्वा त्वा	,,
अपानपात्	,,
तूष्णीमितरान्	,,
दक्षिणाकाले	,,

सू० प्र०	पृष्ठाङ्क.	सू० प्र०	पृष्ठाङ्क.
सप्तदश निष्कान्	१३८	कृष्णल कृष्णल	१४३
सप्तदशा९ सप्त०	१३९	तानि प्रत्यादाय	,,
अनुदिष्टासु	,,	मधोष्ठाल	,
शेष. साधा०	,,	क्षत्रस्योल्ब०	१४४
अग्रेणाऽऽहव०	१४०	जाय एहि	,,
यजुर्युक्त	,,	अह नावुम०	,,
यत्र जघन्य.	,,	आयुर्यज्ञेन	,,
यत्प्राङ्माहेन्द्रात्	,,	सुवर्देवा९	,,
सर्पिष्मन्त चा०	,,	वाजश्च प्रस०	,,
त९ राजपुत्रो	१४१	पुरस्ताद्यूपा०	१४५
चात्वाले रथा०	,,	ममहमायुषा	,,
तस्मिन्रथ०	,,	नमाश्वत्यैरूप०	,,
विष्णो' क्रमो०	,,	हन्तारं वितत्य	,,
न्यङ्कौ न्यङ्का०	,,	इय ते राण्	,,
देवस्याह९ स०	,,	अग्रेण यूप	,,
इन्द्राय वाचं	,,	तेजोऽसीति	१४६
वाजसृत इ०	,,	अमृतमसि	,,
वाजिनो वाज०	,,	पुष्टिरसि	,,
प्रप्रोथेषु च	,,	तस्मादासन्दी०	,,
पश्चादितरे	१४२	दिव प्रोष्ठिनी०	,,
वाजिनो वाज	,,	माहेन्द्रप्रभृ०	,,
वाजिना९ साम	,,	तस्य स्तोत्र०	,,
अग्निरेका०	,,	रजसि स्तुव०	,,
लक्षणं प्राप्य	,,	मध्यम उक्थ्य०	,,
ते नो अर्वन्तो	,,	तेषामनभिधा०	१४७
तिसृभिरि०	१४३	सारस्वतस्य	,,
आ मा वाजस्य	,,	नैवारेण	,,
इयं व. सा	,,	महर्त्विजो	,,
सर्वान्वोप०	,,	पशुकाले	,,
वाजिनो वाज०	,,	षोडशिचमसान्	१४८

सू० प्र०	पृष्ठाङ्क.	सू० प्र०	पृष्ठाङ्क.
सुराग्रहाणा	१४८	दक्षिणाग्नेरे०	१९७
संपृच स्थ	,,	पराचीन द-	,,
आहवनीयन्यन्ते	१४९	अङ्गुष्ठाभ्या०	१९८
विराट्छन्दम	,,	वासोऽभिन्ना०	,,
दक्षिणस्या	,,	अप परिषिच्य	,,
अनूयाजै	,,	स्व हा नमो	,,
अपिवा यत्रै०	,,	आनुमतेन	,,
अनवदानीयान्	,,	आदित्य चरु	१९९
ककुदो राज०	१९०	आग्रयणेष्टि०	,,
संतिष्ठते	,,	श्वोभूते चातु०	,,
वाजपेयेने०	१९१	श्वोभूत इन्द्र०	१६०
न कंचन प्र०	,,	आग्नेयमष्टा०	,,
श्वेतच्छत्री	,,	एतस्या एव	,,
राज, राजसू०	,,	निशायामपा०	,,
तैष्याः पौर्णमा०	१९२	सायं हुते	,,
अथास्या पर०	,,	पराचीनमुत्त०	,,
ज्योतिष्टोमेना०	१९३	वरो दक्षिणा	,,
पश्चापवर्गो	१९४	एतेनैव यजेत	१६१
शतसहस्र	१९५	तेनैव यजेत	,,
तथा दक्षिणा	,,	श्वोभूते देविका०	,,
यथाऽस्याहानि	,,	धात्रे पुरोडाश	,,
राजसूयेष्टि०	,,	प्रवीता प्रवी०	१६२
तेषा दक्षिणा०	,,	तामि प्रजाकाम·	,,
अन्यद्दिशा०	,,	आमयाविन	,,
श्वोभूत आनु०	,,	श्वोभूते त्रिप०	,,
अनुमत्यै पुरो०	,,	आग्नावैष्णवमे०	,,
ये प्रत्यञ्चः	१९७	श्वोभूते त्रयोदश	१६४
उपधायाऽऽनु०	,,	यजमानस्या०	,,
आसाद्याऽऽनुमतं	,,	यस्य यस्य गृहे	,,
व्रीहि स्वाहा	,,	बार्हस्पत्य चरु	,,

सू० प्र०	पृष्ठाङ्क ।	सू० प्र०	पृष्ठङ्कः ।
भगाय चरु	१६५	प्रति त्यन्नाम	१७१
नैर्ऋतं चरुं	,,	विष्णो. क्रमोऽसि	१७२
अङ्गुष्ठपर्वमा०	,,	यत्प्राङ्माहेन्द्रात्	,,
तक्षरथकारा०	,,	आरण्येनानु०	,,
सेनान्यो गृहे	१६६	अभिवासितै०	,,
रौद्रं गावीधुक	,,	देवीरापो	,,
अध्वने स्व हेति	,,	अर्थेत· स्थेति	,,
अनृतदूत	,,	राष्ट्रदा: स्थ	,,
त्रयश्चर्ममया	१६७	पुरुषे पशौ	,,
ऐन्द्रमुत्तम	,	समुद्रिया सैन्धवी०	,,
स्वयमवपन्नाया	,,	अपो देवी०	१७४
श्वेता श्वेतवत्सा	,,	देवीराप:	,,
तत्स्वयं मथित०	,,	अत्राभिमन्त्रण०	,,
तत्स्वय विलीन०	,,	अनाधृष्टा·	,,
तैष्या पौर्णमास्या०	१६८	अपरेण होत्री०	,,
मैत्राबार्हस्पत्य	,,	अनिभृष्टम०	,,
पात्रसंसादन०	,,	सधमादो	१७५
मैत्रं चरु	,,	रौक्म औदुम्ब०	,,
ये कर्णा. स	,,	एकशतेन	,,
तस्मिन्पवित्रे	१६९	एष व कुरवो	,,
तस्मिन्पवित्रव०	,,	अत्र मारुत०	१७६
तावुत्तराधरौ	,,	सोमस्य त्विषि०	,,
धर्ममात्रंश्रप०	,,	अग्रे सदो	,,
अपिवा स्वयकृता	,,	लोहायस	,,
प्रचरणकाले	,,	निरस्त नमु०	,,
इतरथा वा	,,	प्रत्यस्त नमु०	,,
तथा दीक्षा.	१७०	अमृतमसीति	१७७
सह सोमौ	,,	सोमो राजा	,,
अग्नीषोमीय०	१७१	सोमस्य त्वा	,,
पुरस्तात्स्विष्ट०	,,	पर्णमयेन	,,

सू० प्र०	पृष्ठाङ्कः।
क्षत्राणां क्षत्र०	१७७
अति दिवस्पा०	,,
इन्द्राय स्वाहेति	१७८
रुद्र यत्ते	,,
इन्द्रस्य वज्रो०	,,
मित्रावरुणयो०	,,
विष्णोः क्रमो०	१७९
मरुतां प्रसवे	,,
प्र ससाहिष	,,
प्रतिहितो०	,,
सधनू राज०	,,
तस्मा एतानि०	,,
एषु वज्रो	,,
इयदस्याऽऽयु०	,,
मध्ये सौवर्ण०	१८०
मित्रोऽसीति	,,
समहं वि०	,,
नमो मात्रे	,,
प्रति त्यन्नाम	,,
अग्रेणाऽऽग्नीध्रं	,,
अवनह्यति	,,
स्योनाऽसी०	,,
स्योनामासी०	,,
मा त्वा हिंसी०	१८१
मा त्वा हिंसी०	,,
निषसाद	,,
अग्नये गृ०	,,
आहिते सं०	,,
इन्द्रस्य वज्रोऽसि	,,
एष वज्रोऽसि	,,
तेन स स्फयेन	१८२
उद्भिन्नं राज्ञ	,,
ब्राह्मणो राज०	,,
तानपिसृज्य	,,
यत्कामयते	,,
या कामयेत	,,
असावामुष्या०	१८३
शौनःशेपमा०	,,
हिरण्यकशिपा०	,,
हिरण्यकूर्च०	,,
अपवृत्ते शौनः०	,,
अत्र मारुते०	,,
अत्रैते हिर०	१८४
माहेन्द्रप्रभृ०	,,
अवभृथादु०	,,
ऊर्जो नप्त्रे	,,
अग्नये गृह०	,,
ऐन्द्रीं सूत०	,,
तस्या नैवारं	,,
शाक्टप्रत्या०	,,
संतिष्ठते	,,
श्वोभूते सप्तपि.	१८५
अथ तया	१८६
अप्सु दीक्षायाः	,,
तदहर्दीक्षितो	,,
क्रयमेवापर	,,
न पणते	,,
पुरस्तादुप०	,,
तासामौपस०	१८७
सप्तदशो	,,

सू० प्र०	पृष्ठाङ्क.	सू० प्र०	पृष्ठाङ्कः
भार्गवो होता	१८८	सौत्रामण्या०	१९५
पात्रसंस्थाद०	,,	तत्र यावत्कि०	,,
उन्नयनकाले	,,	निर्वपणका०	१९६
भक्षणकाले	,,	चरुकल्पेन	,,
दश दशै०	,,	स्वाद्वीं त्वा	,,
दक्षिणाकाले	,,	सोमोऽस्यश्वि०	,,
संतिष्ठते	१८९	तिस्रो रात्रीः	,,
तस्मिन्संस्थिते	,,	एकयूपं	१९७
आग्नेयमष्टा०	,,	न वेदं करोति	१९८
तयाऽन्नाद्य०	,,	सौमिक्यास्तृ०	,,
ब्राह्मणो यज०	,,	यस्मिन्काले	,,
श्वोभूते द्विप०	१९०	यस्मिन्कालेऽध्वर्यु०	,,
आदित्या मल्हा	,,	न पाणी प्र०	,,
ततः श्वोभूते	१९१	अश्विभ्या सर०	१९९
आग्नेयमष्टाक०	,,	सतं शतातृ०	,,
श्वोभूते षड्भि०	,,	यत्प्राक्पशूपा०	,,
तिसृधन्वं	,,	वायुः पूतः	,,
अभ्यषिक्ति	१९२	पशूपाकरण०	,,
संवत्सरम०	,,	हुतासु वपासु	२०१
अनुमतत्यै	,,	तत्कृत्वा वायव्यैः	,,
संवत्सरे	,,	कुविदङ्गेति	,,
तत्र वपनप्र०	,,	कलसक्तुभि०	२०२
तस्मिन्संस्थिते	१९३	एष ते योनि०	,,
तस्य ज्योति०	,,	पशुपुरोडाश०	,,
सर्वस्तोमोऽति०	,,	तानासाद्य	,,
क्षत्राणा धृति०	१९४	वषट्कृते	२०३
पञ्चापवर्गो	१९५	अनुवषट्कृते	,,
संतिष्ठते	,,	नाना हि वां	,,
राजसूयेने०	,,	द्वे स्रुती अशृ०	२०३
त्रिरात्रे पुर०	,,	स्वयं वा पि०	,,

सू० प्र०	पृष्ठाङ्कः ।	सू० प्र०	पृष्ठाङ्कः ।
दक्षिणाग्नौ	२०३	चतुष्टय्य आपो	२१२
पितरो मदन्तां	२०४	तासु ब्रह्मौदन	,,
स्रवन्तीः पितृ०	,,	पात्र्यामुपस्तीर्य	,,
त्वं सोम प्रचि०	,,	प्राशितवद्भ्य	,,
पशुभिः प्रचर्य	२०५	द्वादशारत्नि०	२१३
पशुना पुरो०	,,	अश्वस्य रूपा०	,,
शूलैर्मासरेण	,,	यस्य वा श्वेत०	,,
तस्य सौमिकेन	२०६	यो शिशू	,,
न साम गी०	,,	मातृमन्तं	,,
तूष्णीमेव	,,	ब्राह्मणा राज०	,,
यस्ते देव वरुण	,,	देवस्य त्वेति	,,
तूष्णी प्रत्या०	२०७	ब्रह्मन्नश्व	,,
सोमवामिनं	,,	देवेभ्य प्रजा०	२१४
अथाश्वमेधनृमेधप्रतिपादकचतुर्दश प्रश्नगतसूत्राणां प्रतीकानि ।	,,	अत्रैकेऽश्व०	,,
राजाऽश्वमेधेन	२०८	श्वान चतुर०	,,
यः कामयेत	,,	प्रजापतय त्वा	,,
पुण्यनामधेय	२०९	यत्र शुनो:	,,
चैत्र्या पौर्णमा०	,,	यो अर्वन्त	,,
वैशाख्या पौर्ण०	२१०	पूर्वेद्युर्वा	२१५
तस्या योत्तरा०	,,	अह च त्व च	,,
अन्वहमित०	,,	अभिक्रत्वेन्द्र०	,,
केशश्मश्रूणि	२११	ऐषीकमुदू०	,,
अग्निवृक्षसूर्ये	,,	तेनैनं मह०	,,
वाग्व्रत यै०	,,	इद विष्णुः	२१६
अरातयो रा०	,,	अग्नये स्वाहा	,,
नमो द्रष्ट्रे	,,	दशकृत्व एत०	,,
उदित आदित्ये	,,	शतकृत्व इत्ये०	,,
वैतसमिध्म०	२१२	अपरिमित०	२१७
देवा देवेषु	,,	अग्नये स्वाहे०	,,
		विभूर्मात्रे०	,,

सू० प्र०	पृष्ठाङ्क ।	सू० प्र०	पृष्ठाङ्कः ।
तं पारिददाति	२१७	सर्वाण्युत्तमे	२२३
यद्ब्राह्मण०	२१८	भुवो देवाना	२२४
यज्जनपदे	,,	आ ब्रह्मन्नाह्मि	,,
इह धृतिः	२१९	विसृष्टाया	,,
सवित्रे प्रात०	,,	वसतीवरीषु	,,
पुरस्तात्स्विष्ट०	,,	द्विस्तावा वेदि	२२५
विपरीतमेके	२२०	वैश्वानरीयेण	,,
हिरण्यꣳ शत०	,,	अग्नये गायत्राय	,,
तस्याꣳ सꣳस्थि०	,	समिद्दिशा०	२२६
सवित्रे प्रस०	,,	कस्त्वा युनक्ति	,,
सवित्र आस०	,,	रथवाहने	,,
तस्याꣳ सꣳस्थिता०	,,	पोतुद्रवाव०	,,
दक्षिणतो	,,	त्रय खादिरा	,,
हिरण्यकशि०	,,	चतुष्टय्य आपो	,,
हिरण्मये कूर्चे	,,	श्वोभूते प्रता०	,,
दक्षिणतो वीणा०	२२१	दक्षिणाकाले	२२७
समुपविष्टेष्व०	,,	प्राचीं दिशम०	,,
पारिप्लवमा०	,,	अपिवा प्राचीꣳ	,,
समाप्ते पारि०	,,	पत्नीसयाजा०	,,
सायधृतिषु	,,	अभित आह०	,,
नित्यꣳ सायꣳ	,,	अस्तमित आ०	२२८
त्रिंशिमास	२२२	आज्यं मधु	,,
ऊर्ध्वमेकाद०	,,	व्यत्यास जु०	,,
तस्मै बद्धाय	,,	अत्रैके प्रयु०	,,
यद्यश्वमुप०	,,	उपसे स्वाहे०	,,
अमावास्याया०	२२३	प्रतायत एक०	२२९
त्रैधातवीया	,,	अन्तरेणाऽऽग्र०	,,
दीक्षाहुतिका०	,,	हिरण्यगर्भ	,,
अग्निना तपो०	,,	आयुर्यज्ञस्य	२३०
सोऽयं दीक्षा०	,,	श्येनोऽसि	,,

सू० प्र०	पृष्ठाङ्क.
अग्निवृत्राणि	२३०
नमो राज्ञे	२३१
प्लक्षशाखाभि०	,,
रोहितो धूम्र०	,,
कृष्णग्रीवा	,,
ऐन्द्राग्नाः पृश्नयो	२३२
ऐन्द्राग्नाः प्राशृङ्गा	,,
सोमाय स्वराज्ञे	,,
निर्मन्थ्येन प्र०	२३७
पर्यग्निकृत०	,,
सहस्रं सौवर्णा	,,
वसवस्त्वाऽ०	२३८
युञ्जन्ति ब्रध्न०	,,
युञ्जन्त्यस्य	,,
केतुं कृण्वन्न०	,,
जीमूतस्येवेति	,,
धन्वना गा	,,
वक्ष्यन्ती वेदा	,
ते आचरन्ती	,,
बह्वीना पिता	,,
रथे तिष्ठन्न०	,,
तीव्रान्घोषान्	२३९
स्वादुषꣳसद्	,,
सुपर्णं वस्ते	,,
ऋजीते परि०	,,
आजङ्घन्ति	,,
वनस्पते	,,
आऽमूरज	,,
ये ते पन्थानः	,,
यद्वातो अपो	,,

सू० प्र०	पृष्ठाङ्कः
वि ते मुञ्चामि	२३९
द्यौस्ते पृष्ठ०	,,
रथवाहन०	,,
आहिते सग्र०	२४०
यथोपस्थित०	,,
लाजी३ञ्छाची३न्यशो	,,
यथोपन्युप्त०	,,
आऽक्रान्वाजी	,,
यथोपाकृता०	,,
अश्वे पर्यङ्ग्यान्	,,
प्रोक्ष्याश्वमुप०	,,
यद्युपपाद्य०	,,
समिद्धो अञ्जन्	,,
मेषस्त्वा पच०	२४१
तार्प्यं च कृत्य०	,,
प्राणाय स्वाहा	,,
सञ्ज्ञप्ते यद०	,,
अम्बे अम्बाल्य०	२४२
ता दक्षिणान्केश०	,,
गणाना त्वा	,,
अवन्ती. स्था०	,,
सव्यानुद्धृत्य	,,
अम्बे अम्बाल्य०	२४३
तौ सह चतुर.	,,
अहꣳस्या त्वꣳ	,,
सुभगे काम्पील०	,,
उत्सक्थ्योर्गृद्	,,
अम्बे अम्बाल्य०	,,
ऊर्ध्वामेना०	,,
त्रिर्महिषी	,,

सू० प्र०	पृष्ठाङ्क ।
दधिक्राव्णो	२४३
आपो हि ष्ठा	,,
गायत्री त्रिष्टु०	२४४
उत्तराभ्यां	,,
यवपिष्टै०	,,
लोम्नामविच्छे०	,,
नाश्वस्य वपा	,,
चन्द्र नाम मेदः	,,
उद्धरती०	,,
शृतासु वपासु	,,
दक्षिणतः प्लक्ष०	२४५
एकधा प्राजा०	,,
एकधेतरेषा	,,
विश्वेषा देवा०	,,
पुरस्ताद्वपाना॰	,,
उपरिष्टाद्वपाना॰	,,
अत्रैव मार्जन०	,,
अग्रेणाऽऽहव०	२४६
प्रजापतयेऽश्व०	,,
अश्वस्य लोहि०	,,
गोमृगकण्ठ०	,,
हिरण्यगर्भ॰	२४७
षडुपरिष्टात्	,,
प्रजापतिश्चर०	,,
अयं पुरोभुव	,,
सहस्रशीर्षा	२४८
प्रजापतेस्त्वा	,,
ऋषभचर्मा०	,,
ऊर्ध्वा अस्य	,,
मृगो न भीम	,,

सू० प्र०	पृष्ठाङ्कः ।
अग्निना देवे०	२४८
मधुश्च माधव०	,,
हविरासादन०	२४९
उत्तरत उप०	,,
प्रतीचो वा	,,
नानाकुम्भीष्वेते	,,
क्रमैरत्यक्रमी०	,,
हुताय स्वाहेति	,,
येऽश्वस्य हुत०	,,
सर्वे ते पुण्य०	,,
स्तेगान्दंष्ट्रा०	२५०
ग्राम्यान्हुत्वा	,,
इमा नु कं	,,
गोमृगकण्ठेन	,,
पत्नीसयाजान्त०	२५१
श्वोभूते प्रता०	,,
पशुकाल ऐका०	,,
अवभृथेन प्र०	,,
आत्रेय खलतिं	,,
तस्मै शतमनो०	२५२
शते वाऽनो०	,,
सह पुण्यकृत.	,,
अवभृथादुदेत्य	,,
सौरीर्नव	,,
पात्नीवते	,,
श्वोभूते त्रि०	२५३
पशुपुरोडा०	,,
अग्नेर्मन्वे	२५४
पशुपुरो०	,,
श्वोभूते द्वा०	,,

सू० प्र०	पृष्ठाङ्कः ।
तासु द्वादश०	२९४
पिशङ्गास्त्रयो	,,
संतिष्ठते	,,
पञ्चाहः पुरु०	२९५
तस्याश्वमे०	,,
त्रयोविंशति०	,,
देवसवितः	२९६
एकादशिना०	,,
ब्रह्मणे ब्राह्म०	,,
एकादशैका०	,,
उत्तमानाग्नि०	,,
पर्यग्निकृतान्	,,
दक्षिणाकाले	२९७
यथाऽश्वमेधे	,,
एकादश यूपा	,,
त्रैधातवीयो०	२९७
संतिष्ठते	,,
सर्वमेधो दश०	२९८
त्रिस्तावा वेदि०	,,
अग्निष्टोमः	,,
इन्द्रस्तुदुक्थ्यो	,,
सूर्यस्तुदु०	,,
आश्वमेधिकं	,,
पौरुषमेधिक	,,
अप्तोर्यामः	,,
वपा वपावता	,,
सर्वौषधि०	,,
प्रात सवने	,,
सर्वं जुहोति	,,
दक्षिणाकाले	२९९

इति सत्याषाढहिरण्यकेशिश्रौतसूत्र एकादशादिचतुर्दशान्तप्रश्नगतसूत्राणां प्रतीकानि ।